ॐ

❀ किञ्चित् प्रास्ताविकम् ❀

इह खलु सर्वेऽपि प्राणिनः स्वस्वेष्टसाधनघटमाना बहुधाऽनिष्टमप्यासादयन्तीति प्रत्यहिकं न प्रत्यक्षदृष्टमेतत्। तत्र विशेषतः किमिष्टं किमनिष्टं चेति जिज्ञासाकुलितहृदया मनुष्या एव भवितुमर्हन्ति। मनुष्याधिकारञ्च शास्त्रम्। ते यदनालोच्य शास्त्रं स्वमनीषिकयैव इष्टानिष्टे कल्पयन्ति अन्धगोलाङ्गूलन्यायेन गर्त्ते पतन्तोऽनर्थञ्चर्च्छन्ति श्रेयसो भ्रश्यन्ति च। यत उक्तम्—

अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम्।
सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः॥ इति॥

काव्यादर्शप्रणेता (दण्डी) साहित्याचार्यशिरोमणिरप्याह—*'दिव्यं हि चक्षुर्भूतभवद्भविष्यत्सु व्यवहितविप्रकृष्टादिषु च विषयेषु शास्त्रं नामाप्रतिहतवृत्ति, तेन हीनः सतोरप्यायतविशालयोर्लोचनयोरन्ध एव जन्तुरर्थदर्शनेष्वसामर्थ्यात्' इति। शास्त्रञ्चानेकविधमधिकारनानात्वात्। तेषु चेदं 'साहित्यशास्त्रं' मन्दामन्दमतीनां सर्वेषामपि हिताहितोपयोगिस्वबोधनक्षममनायासेनेति नात्र केषाञ्चिदपि विवादः। यतोऽस्य प्रयोजनान्येवामुमर्थं स्फुटमवगमयन्ति। उक्तं हि श्री'हेमचन्द्राचार्येण'—**'काव्यमानन्दाय यशसे कान्तातुल्यतयोपदेशाय च'** इति। 'कान्तेव सरसतापादनेन सम्मुखीकृत्य रामादिवद्वर्तितव्यं न रावणादिवत् इत्युपदिशति इति सहृदयानां प्रयोजनम्' इति च। तस्मात् अनायासेन सन्मार्गस्वरूपावगमलोलुपैः ऐहिकामुष्मिककल्याणेप्सुभिरवश्यमेव शास्त्रमिदमध्येतव्यं यत् 'साहित्य'नामेति। एतस्यैव च 'अलङ्कारशास्त्रम्' इत्यपराप्याभिधाऽस्तीति वहवः।

(१) किमिदं साहित्यं नाम—

हितेन सह वर्त्तत इति सहितम्। सहितस्य भावः कर्म वेति साहित्यम्। **'गुणवचनब्राह्मणादिभ्यः कर्मणि च'** (५।१।१२४) इति सूत्रेण ष्यञन्तोऽयं शब्दः। साहित्य, साहिती, साम्यम् इत्यनर्थान्तरम्। साहित्यप्रधानं शास्त्रं 'साहित्यशास्त्रम्'। भवति हि दृश्यश्रव्यादिनानाविधकाव्यस्वरूपनिरूपणपरमिदमलङ्कारशास्त्र

*दशकुमारचरितस्याष्टमोच्छ्वासे 'वसुरक्षितस्य' मन्त्रिवृद्धस्य 'अनन्तवर्माणं' राजानम्प्रत्युक्तिरियम्।

सर्वशास्त्रमर्मविज्ञानाय साहित्यं कुर्यादिति सर्वेषां विदुषां विदितचरमेवैतत् । एवञ्च—'साहित्य शब्दोऽयं सकलासु भरतादिमुनिप्रणीतासु नाट्यादिकलासु व्याप्तिं भजमाना वर्त्तते यस्य स्वदेशमिदमलङ्कारशास्त्रमिति न प्रतिभाति।'अलङ्कार'शब्दश्च—अनुप्रासोपमालङ्कारादिषु प्रायः प्रसिद्धोऽस्ति तत्प्रतिपादकत्वाच्छास्त्रस्य तथा व्यपदेश इति युज्यते,तावता दोषगुणादीनां निरूपणपरस्यापि अस्य शास्त्रस्य अलङ्कारनाम्नैव व्यपदेशो न परं दोषशास्त्रं गुणशास्त्रं रीतिशास्त्रं वेति जायते शङ्का, यद्यप्यत्र न वयं साक्षात् किमपि बीजं पश्यामः तथापि अलङ्कृतिरलङ्कार इति भावप्रधाननिर्देशेन दोषापगमगुणालङ्कारादिसवलनकृतसौन्दर्यपरोऽयं शब्दः, तत्प्रतिपादकत्वादेव अस्यालङ्कारनाम्ना समभिव्याहार इति युक्तमुद्भावयामः । अत एव **'काव्यं ग्राह्यमलङ्कारात्'** (१।१) **'सौन्दर्यमलङ्कारः'** (१।२) अलङ्कृतिरलङ्कारः । करणव्युत्पत्त्या पुनरलङ्कारशब्दोऽयमुपमादिषु वर्त्तते । **'स दोषगुणालङ्कारहानादानाभ्याम्'** (१।३) स खल्वलङ्कारो दोषहानात्, गुणालङ्कारादानाच्च सम्पाद्यः कवेरित्यादिसदर्भेण 'वामनो'ऽप्यमुमेवार्थं समुपोदवलयत् । आस्तां तावदेतत् । एतच्छास्त्रस्य प्रणेतारः अनेके प्राक्तना भामहप्रभृतयोऽर्वाञ्चश्च श्रीमम्मटाद्या अभूवन् । अर्थात् द्विविधमलङ्कारशास्त्रप्रस्थानमीक्षामहे 'भामहा'द्युपदिष्टमेकं यदनुसारिणो भोजराजप्रभृतयः । अभिनवगुप्तपादादिभिरुद्भावितं यद्व्यसनपरतया मम्मटभट्टप्रभृतयो ग्रन्थाननेकान् वितेनिरे । तेषु प्राक्षु एवायं दण्ड्याचार्यः स्थितिपदमलभत । तत्र—

(२) कोऽयं दण्डी—

अस्य 'काव्यादर्शस्य' रचयिता कविकुलतिलकः 'दण्डी' कुत्र कदा कतमं देशमलञ्चकार इत्यादिनिश्चयाय नैकमपि दृढं प्रमाणमुपलभामहे । विज्ञानवतां पुरोगाणामपि प्राचीनानां प्रायः स्वकीयनिबन्धनकालदेशादीनामौदासीन्यस्य सर्वतो जागरूकत्वादिति तत्स्वदेशकालस्य गवेषणारसिकस्य महत् कष्टास्पदं नापतति, तथापि 'गद्धातद्धान्याय' मनुसृत्यैतत् किञ्चित् स्थापयितुं शक्यते—यदयं महाकविः महत्या आस्थयाऽस्मिन् ग्रन्थे वैदर्भीरीतिं प्रशशंस, तथैव चोपनिबबन्ध वैदर्भीप्रधानं 'दशकुमारचरितं' नाम गद्यकाव्यम् इति तेनायं दाक्षिणात्यो विदर्भदेशोद्भव इति । विदर्भस्यैव 'बदाउ' नाम्ना प्रसिद्धिरस्तीति साम्प्रतिका । अपि च—'खिस्तीयषष्ठशतकादनन्तरसमुत्पन्नो वासवदत्तागद्यप्रणेता 'सुबन्धु' महाकविरिति पुरातत्त्वविदां विमर्शः । 'सुबन्धु'श्च—'यश्च छन्दोविचितिरिव कुसुमविचित्राभिः 'छन्दोविचितिरिव मालिनीसनाथा' छन्दोविचितिमिव भ्राजमानतनुमध्याम' इत्येवं वासवदत्ताख्यायिकायामपि दण्डिप्रणीतं 'छन्दोविचितिं' नामानं छन्दोग्रन्थं सस्मार, तेन विक्रमीयपञ्चशतके तदन्तिमभागे वा अयं 'दण्डी' बभूवेति सम्भावयामः । यतः—

त्रयोऽग्नयस्त्रयो वेदास्त्रयो देवास्त्रयो गुणाः ।
त्रयो दण्डिप्रबन्धाश्च त्रिषु लोकेषु विश्रुताः ॥

इति 'राजशेखर महाकविकृताया 'सुभाषितहारावल्या' धृतात् पद्यात् अस्य ग्रन्थत्रयकर्तृत्वं सुप्रसिद्धम् । तेच ग्रन्था —

काव्यादर्श , दशकुमारचरितम्, छन्दोविचितिश्च इति । यद्यपि केचित् छन्दोविचित्या दण्डिकर्तृत्वेविप्रतिपन्ना तथापि ते न दृढप्रमाणा ।

किमयं गृहस्थः संन्यासी वेति ?—अस्मद्भावनया तु अयं 'दण्डी' कवि गृहस्थ एवासीत् न सन्यासीति । दशकुमारादिग्रन्थेषु वर्णितस्य लोकव्यवहारस्य मुख्यत सन्यासावस्थाया वर्णनाया गर्हिततरत्वात् , उपरतेश्च सन्यासस्थितिसाधकत्वात् । बाह्यप्रवृत्तेश्चोपरतिप्रतिबधकत्वात् । प्राय सन्यासिकृतानाग्रन्थाना वेदान्तविषयवर्णनापरकत्वेनोपलभ्यमानत्वाच्चेति । ननु—कथ 'दण्डी' इति सन्यासिषु व्यवहृतशब्देन तस्य व्याहार इति चेत् ? 'ब्रह्माण्डच्छत्रदण्ड शतधृतिभवनाम्भोरुहोनालदण्ड' इत्यादि दण्ड शब्दावृत्तिमति काव्ये रच्यमाने तस्य 'अय दण्डी अय दण्डी' इति कदाचिच्छ्लैर्व्याहृतो भवेदय कवि , तेन उपनाम्नैव प्रसिद्धि लेभे इत्यस्यापि कथञ्चिदूहितु शक्यत्वात् । अस्तु वा गृहस्थस्यापि सत तेन नाम्ना व्याहार इति एतद्विषये बहुगवेषणा तुषकण्डनमनुरुन्धे बहिरङ्गत्वादित्यस्माक विमर्श । न च—तादृशगर्हिततरपरनायिकासक्तिप्रभृतिवृत्तान्तप्रक्रियावतारणेनापि सविरय गृहस्थप्रणीपु गण्य स्यादित्याशङ्कनीयम् तथावर्णनेऽपि कर्वीनामसङ्गताया अस्फुटतरत्वात् । उक्तञ्च 'रुद्रटेन' काव्यालङ्कारस्य चतुर्दशाध्याये—

नहि कविना परदारा एष्टव्या नापि चोपदेष्टव्याः ।
कर्त्तव्यतयाऽन्येषां नच तदुपायोऽभिधातव्यः ॥
किन्तु तदीयं वृत्तं काव्याङ्गतया स केवलं वक्ति ।
आराधयितु विदुषस्तेन न दोषः कवेरत्र ॥ इति ॥

तस्मात् केचिदा गुणिसविज्ञानच्छटाचरितमतिपटले संस्कृतकविषु क्षिप्यमाणमसभ्यताप्रभृतिदोषजातमविचारितसर्णाग्रमेव मन्तव्यमिति परिनिष्ठितधिषणाना सूरीणा परामर्श । क्वचित् साक्षात् क्वचित् परम्परयाऽस्य शास्त्रस्यापि परमपुरुषार्थबोधनप्रवणताया सहस्रश प्रमाणं साधयितु शक्यत्वात् ।


अस्य काव्यादर्शस्य त्रय परिच्छेदा सन्ति । **प्रथमे परिच्छेदे** वैदर्भ्या गौडयाश्च रीतिनिरूपणपूर्वक लक्ष्यलक्षणाभ्या श्लेषाद्या गुणा प्रपञ्चिता गद्यपद्यादिकाव्यभेद निरूपयित्वा प्रसङ्गतश्चानुप्रासोऽपि सप्रभेदो वर्णित । **द्वितीये परिच्छेदे** स्वभावोक्त्याद्या अर्थालङ्कारा । **तृतीये परिच्छेदे** यमकालङ्कार सविस्तर निरूप्य अतिरम्या दश दोषा चापवादा प्रपञ्चिता । एतावता अस्य ग्रन्थस्य परिसमाप्ति । यथा काव्यसम्बन्धिषु अलङ्कारादिविषयेषु एतस्य ग्रन्थस्याध्ययनेन आशु बोध सम्पद्यते न तथान्यरचिताय

ग्रन्थाध्ययनेन जायते इति ममाभाति यतोऽत्र वैदर्भप्रियेण महाकविना निपयोद्योतशैली ऋजुमार्गेणैवाश्रिता। यथा चायमल्पकायोऽपि अपेक्षितविषयविमर्शनपरो ग्रन्थ , न च तथा स्योपरि काचन सरला सपरिष्कृता टीका वर्त्तते, येन जिज्ञासूना बुद्धावस्य महत्त्व गौरवञ्च झटिति जायेत, एतदालोच्य प्राचीनसंस्कृतसाहित्यप्रचारबद्धपरिकरैः **'मेहरचन्द-लक्ष्मणदास'** महाशयैः प्रेरितोऽहं **'कुसुमप्रतिमां'** नाम स्फुटार्थबोधनकरीं सरलतरामुदाहरणप्रपञ्चां टीका व्यरचम् । तदुपरि च विषमस्थलोद्घाटनाय समधिकचारुविचारसञ्चारणाय च **'सौभाग्यवती'** इत्याभिधां विवृतिञ्च प्राणैषम् । परीक्षार्थिनां छात्राणामुपकाराय च प्राय प्रश्नोत्तरशृङ्खलाऽपि सङ्कलिता येन ते एतद्ग्रन्थस्योत्तरलेखे न व्यामोहमेष्यन्तीति । यद्यपि—अस्योपरि *'मालिन्यप्रोञ्छनी' जीवानन्दकृत'विवृति' कान्दिदर्शकैका 'प्रभा' च दृश्यते, पर ये गुणा अस्या टीकाया विद्यन्ते, न ते तासु इति स्वयमेव विपश्चिद्वर्या तुलनात्मिकसमालोचनादृष्ट्या समुत्तोल्यावगच्छन्तु स्वात्ममुखात् स्वप्रशसा को हि विज्ञवर उत्तमां मनुते । अपिच—तत्तच्छ्लोकार्थस्य झटिति दर्शनाय मदीयदर्शितमार्गेण मम **पत्न्या** सङ्कलिता श्लोकानुक्रमणी अन्ते योजिता, आदौ च विषयानुक्रमणी, येन तत्तद्विषयविमर्शनवेलाया जिज्ञासूना बुद्धिवैकल्य न सम्भवेत् । किं—एतावन्निव मया टीकारचनाप्रूफपत्रसशोधना पुनर्निरीक्षणादिक्रियासु व्यग्रचेतसा यथामति अस्य ग्रन्थस्य सस्करण कृत, तत्र यदि क्वचित् ? मनुष्यबुद्धिसुलभा वर्णमात्रादित्रुटिजनिता दोषा सम्भाव्येरन् तर्हि तत्तत्स्थलसशोधनेन तान् दोषानपवार्य एतस्या टीकाया प्रचार कुर्वाणा मय्यनकम्पां विधास्यन्ति सहजकरुणावरुणालया महानुभावा सरस्य इति साञ्जलि प्रार्थयते—

ई० ता०

विदुषामनुचर —

नृसिंहदेवः,



*अत्र टीका मेल्लनाथस्येव स्पृष्ट्वा व्याख्यामार्गे प्राय काठिन्यमनुधावति ।

सटीककाव्यादर्शस्य संक्षिप्ता विषयसूची ।

प्रथम परिच्छेद

द्वितीयः परिच्छेद

—:—

तृतीय परिच्छेद

सविवृतिकुसुमप्रतिमायां धृतानां ग्रन्थकाराणां


सूची

उद्भटभट्ट ।	[काव्यालङ्कारसङ्ग्रह]
रुद्रट ।	[काव्यालङ्कारग्रन्थ]
भारवि । [महाकविः]	[किरातार्जुनीयम्]
धनञ्जय ।	[दशरूपकम्]
विश्वनाथ ।	[साहित्यदर्पण]
भरत ।	[नाट्यशास्त्रम्]
अमरसिंह ।	[अमरकोष]
मेदिनीकर ।	[मेदिनी]
महेश्वर ।	[विश्वकोष]
हेमचन्द्र [महावैयाकरण अलङ्कारशास्त्राचार्य]	[काव्यानुशासनम्—हैमकोषादि]
श्रीकोक्कोककवि ।	[रतिरहस्यम्]
मनु [महर्षि]	[मनुस्मृति]
कालिदास [महाकवि]	[रघुवंशादि]
व्यास ।	[श्रीमद्भागवतम्] [योगभाष्यम्]
श्रीहर्ष [महाकवि]	[नैषधम्]
श्रीअच्युतराय ।	[साहित्यसारम्]
सोमदेवसूरि ।	[यशस्तिलकम्]
अप्पयदीक्षित ।	[कुवलयानन्दम्] [चित्रमीमांसादि]
माघ [महाकवि]	[शिशुपालवधम्]
[illegible] ।	[अलङ्कारमणिहार]
श्रीपण्डितराज-जगन्नाथ ।	[रसगङ्गाधर]
श्रीकौण्डभट्ट ।	[वैयाकरणभूषणम्]
श्रीनागेशभट्ट ।	[लघुमञ्जूषा]
बोपदेव ।	[कविकल्पद्रुम, मुग्धबोधव्याकरणम्]
शाकटायन ।	[शाकटायन सूत्राणि]
[illegible] ।	[अलङ्कारतन्त्र]
	[शाश्वतकोष]
[illegible] ।	[अलङ्कारसर्वस्वम्]
[illegible] ।	
[illegible] ।	[भामन्यादि]

श्रीगदाधरभट्टाचार्या ।		[व्युत्पत्तिवाद]
शाण्डिल्याचार्य ।		[भक्तिमीमांसा]
हरि [महावैयाकरण]		[वाक्यपदीयम्]
राजानकरत्नाकर [महाकवि]		[हरविजयम्]
देवेश्वर ।		[कविकल्पलतिका]
श्रीकृष्णभट्ट ।		[सिद्धभेषज्यमणिमाला]
प्रतीहारेन्दु ।	..	[काव्यालङ्कारसारलघुवृत्ति]
श्रीनखकुट्ट ।	.	[नाट्यविषयकग्रन्थ] ।
सिंहदेवगणि ।		[वाग्भटालङ्कारव्याख्या]
श्रीमदवतारकवि		[ईश्वरशतकम्]
श्रीभट्टि [महाकवि]		[भट्टिकाव्यम्]
श्रीभानुजीदीक्षित ।		[अमरकोषव्याख्या]
श्रीशङ्कराचार्या ।		[विष्णुसहस्रनामव्याख्या]
विद्यारण्यस्वामी ।		[पञ्चदशी]
श्रीसुरेश्वराचार्या ।		[वार्त्तिकादि]
श्रीहरिचन्द्र [महाकवि]	.	[धर्मशर्माभ्युदयम्]
अनुभूत्याचार्य. ।	..	[सारस्वतसूत्राणि]
श्रीभट्टमल्ल । .	...	[आख्यातचन्द्रिका]
श्रीनारायणभट्ट ।	.	[वृत्तरत्नाकरव्याख्या]

इत्यादि

विशेष सूचना ☞ पृ० २४२ इत्यत्र 'वीररस इत्यशुद्धम्- 'करुणरस' इति शुद्धम् । पृ० २८० इत्यत्र 'अत्र श्लेषशास्त्रार्थ' इति नैव पठनीयम् ।





काव्यादर्शः

चतुर्मुखमुखाम्भोजवनहंसवधूर्मम ।
मानसे रमतां नित्यं सर्वशुक्ला सरस्वती ॥ १ ॥

कुसुमप्रतिमा

निर्दोषा सरसा गुण्या सुरीतिः साचलङ्कृतिः ।
अनेकभावगम्भीरा पातु मां सा सरस्वती ॥ १ ॥

स्वाङ्के षडाननगजाननसूनुयुग्मं
धृत्वा स्तनामृतपयः परिपाययन्ती ।
सा नीलकण्ठमुक्तौघफलं भवानी ।
वाचां निरोधमपहन्तु ममाद्य माता ॥ २ ॥

दण्डिना कविनोदीते काव्यादर्शेऽतिनिर्मले ।
'कुसुमप्रतिमा' बिम्ब-मान माधास्यति स्वयम् ॥ ३ ॥

सुलक्षणा वृत्तिविभूषिता च
रसान्विता रीतिमती सुखार्थी ।
सालङ्कृतिः कोमलवागुपेता
भवेन्मदीया 'प्रतिमा' ऽद्य लोके ॥ ४ ॥

देवीदासाभिधं तातं विष्णुदेवीञ्च मातरम् ।
प्रणम्य मान्यं मान्याञ्च तयोरर्थं समर्थयन् ॥ ५ ॥

'कुसुमप्रतिमा' नाम काव्यादर्शेऽतिनिर्मलाम् ।
टीकां करोमि शिष्याणां हितमारचयन्नहम् ॥ ६ ॥

साहित्यशास्त्रविदां धौरेय श्रीमहाकविर्दण्डी काव्यज्ञानोपयोग्यलङ्कारादिस्वरूपनिरूपण-
पर 'काव्यादर्श' नामकं निबन्धं प्रणयन्नादौ सदाचारमागागत मङ्गलकरणकार्यं शिष्य-

---

*गायत्रीपुरश्चरणसाधितशास्त्रमनन्तताण्डवम् ।

शिक्षायै परिपालयन् सरस्वत्या ध्यानात्मकं मङ्गलमारचयति—'चतुर्मुखे'ति । 'सरस्वती'=वागधिष्ठात्री देवता 'मम'=मदीये 'मानसे'=हृदये 'नित्यं'=सर्वदा 'रमताम्'=विहारं करोतु । अर्थात् मम मानसज्ञानविषयीभूता भवतु येनाहं ग्रन्थरचनादिकर्मणि कदापि कुण्ठितबुद्धिर्न भवेयम् । विशेषणद्वयेन सरस्वतीं निरूपयति—कीदृशी सरस्वती इत्याह । 'चतुर्मुखे'ति । चतुर्मुखः=चतुराननो ब्रह्मा यस्य हृदये ईश्वरेण सर्गादौ वेदरूपा सरस्वती प्रचोदिता स हिरण्यगर्भस्तस्य मुखानि=आननान्येव अम्भोजानि=कमलानि तेषां वनं=काननं समुदाय इत्यर्थः तत्र हंसवधूः=हंसस्य मानसौकसः वधूर्हंसी वरटा इति यावत् । 'हंसस्य योषिद्वरटा' इत्यमरः ।

यथा सकलदोषरहिता वेदरूपा सरस्वती हिरण्यगर्भमुखाम्भोजवासिनी तथा मम मानसे वर्तमाना सरस्वत्यपि शुद्धैव, न तु हालिकादिसाधारणजनमुखे विद्यमाना च्युतसंस्कृत्यादिदोषदोषितेति भावः ।

सैषा एवम् अत एव 'सर्वशुक्ला'=सर्वतः स्वरूपतोऽर्थतश्च शुक्ला=निर्मला पदपदार्थ-[illegible]रहिता इत्यर्थः । अन्यापि हंसी मानसाख्ये सरोवरे सदा रमते सर्वशुक्ला च भवति इति तस्यापि स्वरूपम् । अत्र सरस्वत्यां हंसवधूत्वारोपं प्रति चतुर्मुखे अम्भोजवनत्वारोपो हेतुरिति 'परम्परितरूपकं' नाम रूपकालङ्कारभेदः । वक्ष्यत्यग्रे 'उपमैव तिरोभूतभेदा रूपकमुच्यते' इति अलङ्कारप्रस्तावे । तच्च रूपकं न श्लिष्टशब्दनिबन्धनम् अम्भोजवन-[illegible]गेतरस्पर्शित्वाभावात्, 'मानसे' इति पदस्य च प्रकृते श्लिष्टत्वाभावात् ।

इयं च सरस्वती भगवन्मूर्तिरेव । तथा चोक्तं विष्णुपुराणे—

काव्यालापाश्च ये केचिद्गीतकान्यखिलानि च ।
शब्दमूर्तिधरस्यैते विष्णोरंशा महात्मनः ॥ इति ॥

चेति 'तामेतादृशीं सरस्वतीं स्तौमि नमस्करोमि चे'ति व्यञ्जनया नमस्कारात्मकमङ्गलध्वनिरपि बोध्य । अत्र भगवन्मूर्तिभूताया सरस्वत्या कविनिष्ठो रतिभावोऽपि व्यङ्ग्य ॥ १ ॥

पूर्वशास्त्राणि संहृत्य प्रयोगानुपलक्ष्य च ।
यथा सामर्थ्यमस्माभिः क्रियते काव्यलक्षणम् ॥ २ ॥

ग्रन्थस्य प्रतिपाद्य विषय दर्शयितु प्रतिज्ञा करोति—'पूर्वशास्त्राणि' इति । पूर्वेषां भरतादिकवीनां शास्त्राणि काव्यग्रन्थान् 'संहृत्य'=समाहृत्य अर्थात् संगृह्य तेभ्यो ग्रन्थेभ्य संक्षिप्तरीत्या सारमादाय, 'प्रयोगान्'=प्रयुज्यन्ते प्रथ्यन्ते एते इति प्रयोगा* विषया ,नायकनायिकादिरूपा चन्द्रचन्दनरोलम्बादिरूपा वा तान् च'उपलभ्य'=सम्यग् विचार्य 'अस्माभि =मयेत्यर्थ । बहुवचन स्वशिष्यादीनां स्वसिद्धान्तानुयायिना वाभिप्रायेण नेतव्यम् । 'यथासामर्थ्यम्'=सामर्थ्यमनतिक्रम्य वर्त्तत इति यथासामर्थ्यं यथाज्ञानम् । पदार्थानतिवृत्तिरूपे यथाऽर्थे 'अव्यय विभक्ति०' (पा० २।१।६) इति सूत्रेण समास । 'काव्यलक्षणम्'=काव्यस्य† लक्षणं, लक्ष्यते अन्येभ्यो व्यावर्त्यते (वस्तु) अनेनेति लक्षणम्-असाधारणो धर्म स्वरूपमिति यावत्, 'क्रियते'=रच्यते । एतेनास्य ग्रन्थस्य काव्यमेव प्रतिपाद्यो विषय इत्युक्तं भवति । 'सर्वशास्त्राणि' इति पाठेतु सर्वाणि च तानि शास्त्राणि इत्यर्थो ज्ञेय ॥ २ ॥

इह शिष्टानुशिष्टानां शिष्टानामपि सर्वथा ।
¶ वाचामेव प्रसादेन लोकयात्रा प्रवर्त्तते ॥ ३ ॥

सम्प्रति ग्रन्थस्य प्रयोजन वक्तु 'वाच एव सर्वव्यवहारसाधिका' इत्यन्वयव्यतिरेकमुखेन दर्शयति द्वाभ्या श्लोकाभ्याम्—'इह' इत्यादिना । 'इह'=अस्मिन् लोके 'शिष्टानुशिष्टानाम्'=‡'शिष्टै'=वेदशास्त्रादिप्रमाणविद्भि महेश्वरप्रभृतिभि 'अनुशिष्टानाम'=प्रकृतिप्रत्ययादिभेदेन अन्वाख्याताना संस्कृताना,'शिष्टानाम्'=संस्कृतभिन्नाना प्राकृतादीना जातिदेशादिभेदेनानेकवि-

---

(प्रश्नः)¶ कस्य प्रसादेन लोकयात्रा प्रवर्त्तते ? । (उत्तरम्) अस्य पृष्ठस्य प० १७।

* 'अकर्त्तरि च कारके सञ्ज्ञायाम्' (पा०३।३।१९) इति सूत्रेण कर्मणि घञ् ।

† कवे कर्म काव्यम् । 'गुणवचनब्राह्मणादिभ्यः कर्मणि च' (पा०५।१।१२४) इति सूत्रेण कविपदात् ष्यञ् । ब्राह्मणादिराकृतिगण ।

‡ भक्तिश्रद्धादिभिर्वेदानुमतकर्मकर्त्तार शिष्टा. । महाभारते तु—

न पाणिपादचपलो न नेत्रचपला मुनि ।
नच वागङ्गचपल इति शिष्टस्य लक्षणम् ॥ इत्युक्तम् ।

'पृषोदरादीनि यथोपदिष्टम्' (६।३।१०९) इतिसूत्रमहाभाष्य तु 'एतस्मिन्नार्यावर्त्ते निवासे ये ब्राह्मणा कुम्भीधान्या अलोलुपा अगृह्यमाणकारणाः किञ्चिदन्तरेण कस्याश्चिद्विद्याया पारङ्गता तत्रभवन्तः शिष्टा' इत्युक्तम् । साराशं तु सर्वेषा समेषिरेवेति बोध्यम् ।

धना 'वाचामेव'=वाणीनामेव 'प्रसादेन'=अनुग्रहेण 'सर्वथा'=सर्वप्रकारेण सर्वप्रकारा इत्यर्थः 'लोकयात्रा'=लोकानामृष्यार्यम्लेच्छादीनां यात्रा आहारविहारादिरूपो व्यवहारः 'प्रवर्त्तते'=निर्वाहो भवति। अर्थात् उत्तमप्रकृतयो देवर्ष्यादयः संस्कृतवाचा, मध्यमप्रकृतयः प्राकृत-देशाद्यादिभाषारूपया वाचा, अधमप्रकृतयः पिशाचाद्या नीचया वाचा, स्वं स्वं व्यवहारं साधयन्ति न कोऽप्येतादृशो व्यवहारो जगति वर्त्तते यो वाचां साहाय्यमन्तरा प्रचलितो भवेत्। अत एव 'व्यवहारः शब्दप्रयोगः' इत्याचक्षते न्यायशास्त्रविदः। इत्थं 'वाचां सत्त्वे व्यवहारसत्त्वमित्यन्वयो बोध्यः ॥ ३ ॥

इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयम् ।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ॥ ४ ॥

'इदमन्धम्' इति। 'यदि शब्दाह्वयम्'=शब्द आह्वयो नाम यस्य तत् शब्दाह्वयम् शब्दात्मकं ध्वनिवर्णात्मकं वाङ्मयमिति यावत्। उक्तञ्चाग्नेयपुराणे—'ध्वनिर्वर्णाः पदं वाक्यमित्येतद्वाङ्मयं मतम्' इति। [अ० ३३७। श्लो० १] 'ज्योतिः'=ज्योतिरिव ज्योतिः अर्थप्रकाशकम्, यथा प्रकाशकं सौरादि तेजः सकलमर्थजातं प्रकाशयति तथा शब्दो-ऽपि तत्तदर्थजातं नाम इति प्रकाशकत्वसाम्येन वाङ्मये ज्योतिष्ट्वारोपः। तथाच श्रुतिः—'**वाचैवायञ्ज्योतिषाऽऽस्ते**' [बृह० ६। ३।] 'आसंसारम्'=संसारम-भिव्याप्य 'न दीप्यते' न प्रकाशते तदा 'कृत्स्नम्'=समग्रं 'भुवनत्रयम्'=भुवनानां स्वर्ग-मर्त्यपातालानां त्रयं त्रयो लोका इत्यर्थः। 'अन्धं तमः'=गाढान्धकारस्वरूपम् अज्ञानान्ध-कारग्रस्तमज्ञानं वा 'जायेत'=भवेत्।

आदिराजयशोबिम्बमादर्शं प्राप्य वाङ्मयम् ।
तेषामसन्निधानेऽपि न स्वयं पश्य नश्यति ॥ ५ ॥

वाङ्मयस्यावश्यकता बोधयितुमाह—'आदिराजे'ति । आदिराजा मन्विक्ष्वाकुमान्धातृप्रभृतयः, तेषां यशः कीर्त्तिः एव बिम्बं प्रतिकृतिः । इदं कर्त्तृपदम् । 'वाङ्मयं'=कविभिरुपनिबद्धं काव्यग्रन्थरूपं 'आदर्शम्'=दर्पणं 'प्राप्य'=इत्वा 'तेषाम्'=आदिराजानाम् 'असन्निधाने' सामीप्याभावेऽपि अर्थात् तेषुं मृतेष्वपि 'न नश्यति'=नैव नष्टं भवति इति त्वं 'स्वयं पश्य'=विचारय । पाठयशिष्यजनाभिप्रायेणैवमुक्तिः । 'पश्य मृगो धावति' इत्यादिवत् वाक्यार्थस्य चात्र कर्मता ।

प्रसिद्धदर्पणे समीपस्थितानामेव प्रतिबिम्बं वाङ्मयाख्ये दर्पणे तु असन्निहितानामपि यशः प्रतिबिम्बस्थितिरिति उपमानापेक्षया उपमेयस्याधिक्यवर्णनात्मको व्यतिरेकालङ्कारः । तथा चोक्तं दण्डिना व्यतिरेकचक्रे—

शब्दोपात्ते प्रतीते वा सादृश्ये वस्तुनोर्द्वयोः ।
तत्र यद्भेदकथनं 'व्यतिरेकः' स कथ्यते ॥ इति ।

उपमानादुपमेयस्याधिक्यवर्णनं व्यतिरेक इत्यर्थः । एतच्चाग्रे स्पष्टीभविष्यति ।

'इदन्तु पुरावृत्तवर्णितानां यशःकीर्त्तनं प्रयोजनान्तरमनुसन्धेयम्' इति जीवानन्दोक्तं तुच्छम् काव्यप्रयोजनेषु कुत्रापि यशःकीर्त्तनस्यागणितत्वात् अन्यथा विरोधिनामयशःकीर्त्तनमपि प्रयोजनान्तरं मृग्यं स्यात्, तत्त्वे वा तदपि न स्यादिति कृतं कुदृष्टिविवेचनया । वस्तुतस्तु आदिराजादिचरितसम्बन्धिकाव्यप्रणयनेन कवेरेव यशआदिलाभ इति भङ्गयन्तरेण प्रसिद्धं काव्यप्रयोजनमेव पुष्टिना नीतमिति ध्येयम् ।

[१] गौर्गौः कामदुघा सम्यक् प्रयुक्ता स्मर्यते बुधैः ।
दुष्प्रयुक्ता पुनर्गोत्वं प्रयोक्तुः सैव शंसति । ६ ।

प्रकारान्तरेण वाचामुपादेयभावं दर्शयन् कविभणितीनां वैशिष्ट्यं वर्णयति—'गौ' रिति । 'सम्यक्'=दोषराहित्येन गुणालङ्कारादिमत्त्वेन 'प्रयुक्ता'=गुम्फिता काव्याकारेति यावत् । 'गौः'=वाणी 'बुधैः'=रसभावादिनिपुणैः पण्डितैः 'कामदुघा'=कामानाम् अभिलषितानां दोग्ध्री पूरयित्री अभीष्टसम्पादयित्री अर्थात् 'गौः'=धेनुरेव 'स्मर्यते'=स्वीक्रियते मन्यत इत्यर्थः । किञ्च 'सैव'=प्रसिद्धा 'गौः' वाणी 'दुष्प्रयुक्ता'=गुणालङ्कारादिरहिता दोषवती च प्रयुक्ता सती 'प्रयोक्तुः'=रचयितुः कुकवेः 'गोत्वम्'=गोर्भावो गोत्वं पशुत्वं मूर्खत्वमिति यावत् 'शंसति'=प्रकटयति ।

निर्दोषां सगुणां सरसां सालङ्कारां वाचं प्रयुञ्जानः कविः श्लाघ्यो भवति तदन्यो निन्द्यते लोके तस्मात् अदोषवत्त्वादिधर्मोपेताया वाचि यतितव्यम् तादृशी वागेव च काव्यमिति भावः । उक्तमग्निपुराणे सप्तत्रिंशदधिकत्रिशततमेऽध्याये—

(प्र०) [१] कीदृशी गौः (वाणी) प्रयोक्तव्या कीदृशी च न ? ॥ (उ०) पं० २०

नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा ।
कवित्वं दुर्लभं तत्र शक्तिस्तत्र सुदुर्लभा ॥ इति॥ ॥

दोषरहिता काव्यरूपा वाणी प्रयोक्तव्या नेतरेति तु परमार्थः । कामान्दोग्धीति कामदुघा । 'दुह कप् घश्च' [पा० ३।२।७०] इति सूत्रेण सुबन्तोपपदात् 'दुह्'धातोः कप्प्रत्ययः घश्चान्तादेशः । स्त्रियां टाप् ।

गौः स्वर्गे च बलीवर्दे रश्मौ च कुलिशे पुमान् ।
स्त्री सौरभेयीदृग्बाणदिग्वाग्भूष्वप्सु भूम्नि च ॥

इति मेदिनी । ६ ॥

तदल्पमपि नोपेक्ष्यं काव्ये दुष्टं कथञ्चन ।
स्याद्वपुः सुन्दरमपि श्वित्रेणैकेन दुर्भगम् । ७ ।

पुराणे—'काव्य स्फुरदलङ्कार गुणवद्दोषवर्जितम्' इति । 'दुष्टम्' इत्यत्र 'दुष्' धातो 'नपुसके भावे क्त' [३।३।११४] इति सूत्रेण क्लीवत्वविशिष्टे भावे कालसामान्ये क्त प्रत्यय ।

अत्रोपमानोपमेयभावापन्नयो द्वयो पूर्वोत्तरवाक्ययोर्विम्बप्रतिविम्बभावेन भिन्नधर्मनिर्देशात् दृष्टान्तालङ्कार । उक्तञ्च जयदेवेन—

चेद्बिम्बप्रतिविम्बत्व दृष्टान्तस्तदलङ्कृति ' इति । प्रकृते च दुष्टकाव्यश्वित्रवपुषोर्विम्बप्रतिविम्बभाव । पूर्वार्धवाक्यमुपमेयवाक्यम् परार्धवाक्यन्तूपमानवाक्यमिति बोध्यम् ।७।

गुणदोषानशास्त्रज्ञ कथं विभजते जनः ।
किमन्धस्याधिकारोऽस्ति रूपभेदोपलब्धिषु ।८।

सम्प्रति गुणदोषयोर्विभागस्यावश्यज्ञातव्यता सदृष्टान्तमाह—'गुणदोषान्' इति । 'अशास्त्रज्ञ '=जानातीति ज्ञ । 'इगुपधज्ञाप्रीकिर क' [३।१।१३५] इति 'ज्ञा' धातो क । शास्त्रस्य ज्ञ शास्त्रज्ञ न शास्त्रज्ञ अशास्त्रज्ञ । 'नलोपो नञ' [६।३।७३] इति सूत्रेण नञो नस्य लोप । अशास्त्रज्ञोऽकवि अविद्वान् जन इत्यर्थ । 'गुणदोषान्'=गुणा माधुर्यौज प्रभृतय । दोषा श्रुतिकटुच्युतसस्कृतादय गुणाश्च दोषाश्चेति द्वन्द्व तान् 'कथ'=केन प्रकारेण विभजते'=विविच्य ज्ञातु समर्थो भवति, न कथमपीत्यर्थ । अर्थात् अकविर्जन काव्यशास्त्रे 'अमुके गुणा उपादेया अमुके दोषा हेया' इति विशेषरूपेण ज्ञातु नैव प्रभवति । अत्रैव दृष्टान्तमाह—'अन्धस्य'=नेत्राभ्या हीनस्य पुरुषस्य 'रूपभेदोपलब्धिषु'=चक्षुर्मात्रग्राह्यो गुणो रूपम्, तस्य भेदा शुक्लनीलपीतरक्ताद्या तेषाम् उपलब्धय ज्ञानानि तासु 'अधिकार '=सामर्थ्यम् अस्ति 'किम्' ? नैवास्तीति सर्वप्रसिद्धमेवतदित्यर्थ । तस्माद् गुणदोषविभागज्ञानाय काव्यशास्त्रेऽवश्य प्रवृत्ति करणीया ।

अत्रापि पूर्ववद् दृष्टान्तालङ्कार । अशास्त्रज्ञान्धयोश्च विम्बप्रतिविम्बभाव । अशास्त्रज्ञान्धयोविम्बप्रतिविम्बभावप्रयोजक सादृश्यन्तु विवेकाभाव एव तच्च साक्षात्*च्छब्देोपात्तत्वाच्छाब्दम् । ८ ।

अत प्रजानां व्युत्पत्तिमभिसन्धाय सूरय ।
वाचां विचित्रमार्गाणां निवबन्धु क्रियाविधिम् । ६ ।

एतदर्थमेव अलङ्कारशास्त्ररचने प्राञ्च प्रावर्त्तिषत इति दर्शयति—'अत' इति । 'अत '=उक्तहेतो अर्थात् गुणाना दोषाणां च विभागस्य अलङ्कारशास्त्रमात्रैकबोध्यत्वात् 'सूरय '=प्राञ्चो विद्वास भरतप्रभृतय 'प्रजानाम्'=लोकानाम् 'व्युत्पत्तिम्'=पदपदार्थसम्बन्धज्ञानम् 'अभिसन्धाय'=उद्दिश्य विचित्रमार्गाणाम्'=विचित्रा अनेके मार्गा वैदर्भी-

*नचात्र 'कथ विभजते जन ' इत्यतो न कथमपीत्यर्थबललभ्यमिदमिति कथ विवेकाभावस्य शाब्दत्वमिति वाच्यम् उक्तार्थस्य काका लाभेन काकोश्च ध्वनेर्भिन्नत्वाच्छाब्दत्वमेव यत इति केचित् ।

[उपमारूपकस्योदाहरणम्]

¶ अयमालोहितच्छायो मदेन मुखचन्द्रमाः ।
सन्नद्धोदयरागस्य चन्द्रस्य प्रतिगर्जति ॥ ८९ ॥

उपमारूपकमुदाहरति—'अयम्' इति । 'मदेन'=मद्यपानजनितेन अवस्थाविशेषेण 'आलोहितच्छायः'=आलोहिता ईषद्रक्ता छाया कान्तिर्यस्य स तादृशः 'मुखचन्द्रमाः'= मुखमेव चन्द्रमाः 'सन्नद्धोदयरागस्य'=सन्नद्धः सम्यक् स्फुरन् उदयरागः उदयकालिकलौहितिमा यस्य तस्य तथाविधस्य 'चन्द्रस्य'=शशिनः 'प्रतिगर्जति'=समानरागवन्तं तादृशं चन्द्रं प्रति स्पर्धते, अर्थात् तमनुकरोति न तु सदृशीभवति । चन्द्रस्येति सम्बन्धविवक्षया षष्ठी ।

अत्रारोप्यमाणस्य चन्द्रस्य तदभिन्नतया आरोपविषयो मुखमुपमेयम्, तस्यौपम्यसूचनकरं प्रतिगर्जनं समानोधर्मः तत्सम्बन्धादिदम्—'उपमारूपकम्' इत्युक्तं भवति । यथा वा मम—

¶ गदोद्दण्डितदोर्दण्डो मदाघूर्णेक्षणः क्षणम् ।
असर्ववैरिविक्रान्तिर्भीमोऽस्य स्पर्धते बलम् ॥

'बलम्'=बलभद्रं श्रीकृष्णभ्रातरमित्यर्थः, भीमः भीमसेनो मध्यमपाण्डवः । अत्रापि आरोप्यमाणस्य बलस्याभिन्नतया भीमसेन उपमेयम्, तस्यौपम्यसूचनकरं स्पर्धनं समानो धर्मः । तत्सम्बन्धादुपमारूपकमिदम् । 'स्पर्धते'=अभिभवपूर्वकमाह्वयते इत्यर्थः अन्यथा अकर्मकत्वापत्तिर्दुर्वारा । 'वोपदेवस्तु कविकल्पद्रुमे 'स्पर्धते बलिने बली' इति निर्मय 'स्पर्ध' धातुमकर्मकमाचष्टे ॥८९॥

[व्यतिरेकरूपकस्योदाहरणम्]

¶ चन्द्रमाः पीयते देवैर्मया त्वन्मुखचन्द्रमाः ।
असमग्रोऽप्यसौ शश्वदयमापूर्णमण्डलः ॥ ९० ॥

व्यतिरेकरूपकमुदाहरति—'चन्द्रमाः' इति । 'देवैः'=सुरैः 'असमग्र अपि' असम्पूर्णोऽपि 'चन्द्रमाः'=शशी 'शश्वत्'=निरन्तरम् 'पीयते'=आस्वाद्यते 'मया [तु] आपूर्णमण्डलः'=सम्पूर्णबिम्बः 'त्वन्मुखचन्द्रमाः'=त्वन्मुखमेव चन्द्रमाः 'पीयते'=सादरमालोक्यते इत्यर्थः । एकस्यैव क्रियापदस्यावृत्त्याऽन्वयः ।

अत्र चन्द्रो मुख्यः, मुखं गौणमिति मुख्यगौणयोः मुखचन्द्रमसोः सम्पूर्णत्वासम्पूर्णत्वरूपवैलक्षण्यसम्बन्धात् 'व्यतिरेकरूपक'मिदम् । 'व्यतिरेकानुप्राणितं रूपकं व्यतिरेकरूपकम्' इति तल्लक्षणम् । अर्थादत्र उपमानात् चन्द्रात् उपमेयस्य मुखस्यापूर्णमण्डलत्वरूपत-

प्र०] [illegible] स्पष्ट घटयतु भवान् । [उ०] अस्य
[illegible]

[काव्यभेदप्रदर्शनम्]

**पद्यं गद्यञ्च मिश्रञ्च तत् त्रिधैव व्यवस्थितम् ।
पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा ॥ ११ ॥**

उक्त काव्यस्य स्वरूपम्, सम्प्रति तद्भेदान् दर्शयति—'पद्यम्' इति । 'तत्'=पूर्वप्रकृत काव्य 'पद्य गद्य मिश्रञ्चेति त्रिधा एव त्रिप्रकारमेव प्राक्तनैरालङ्कारिकै 'व्यवस्थितम्'=व्यवस्थापित निरूपितमिति यावत् । अन्तर्भावितणिजर्थ । एवकारेण अन्ये प्रकारा न सन्तीति सूचितम् । तत्र पद्यस्य लक्षणमाह—'पद्यम्' इति । 'चतुष्पदी'=चतुर्णा पादाना समाहार चतुष्पदी 'द्विगो' [पा० ४ । १ । २१] इति सूत्रेण अदन्तत्वात् द्विगोर्ङीप्, तत 'पाद पत्' [६ । ४ । १३०] इति सूत्रेण पदादेश चतुष्पदी=पादचतुष्टयात्मकं यत् तत् 'पद्यम्' इत्युच्यते । प्राञ्चस्तु 'छन्दोनियमवद्वाक्य पद्यमित्यभिधीयते' इत्याहु । दर्पणकारोप्याह—'छन्दोवद्धपद पद्यम्' इति । तत्र द्वयो त्रयाणा चतुर्णा वा पादाना नैवाग्रह परन्तु महाकाव्यादौ प्राय पादचतुष्टयात्मकान्येव पद्यानि स्थापनीयानि, अत 'चतुष्पदी'ति पद्यलक्षणमुक्तम् । 'तत्'=पद्य 'वृत्त जातिश्चेति द्विधा'=द्विप्रकार भवति अर्थात् पद्यस्य द्वौ भेदौ वृत्त जातिश्चेति । तत्र यत्राक्षरसख्यया गणा निवेश्यन्ते तद् **वृत्तं** भवति, यथा—उक्तात्युक्तादि । यत्र तु मात्राभेदेन गणाना निवेश **तज्जाति**, यथा—आर्यागीत्यादि । आर्यादीना लक्षण वृत्तरत्नाकरादिषु द्रष्टव्यम् ॥ ११ ॥

---

[३]पि रस एवात्र जीवितम्' इत्यभिपुराणम् । 'काव्यस्यात्मनि अङ्गिनि रसादिरूपे न कस्यचिद्विमति' इति व्यक्तिविवेककार । 'वक्रोक्ति काव्यजीवितम्' इति वक्रोक्तिजीवितकार । 'औचित्य रससिद्धस्य स्थिर काव्यस्य जीवितम्' इति क्षेमेन्द्र ।

'गुणालङ्कारसहितौ शब्दार्थौ दोषवर्जितौ तत्' इति च विद्यानाथ ।

सगुणा सालङ्कारा रसभाग दोषपरिहारा ।
जगदनुरञ्जनशीला कविकृतलीला सरस्वती जयति । इत्यलङ्कारचन्द्रिकाकार ।
साधुशब्दार्थसन्दर्भ गुणालङ्कारभूषितम् ।
स्फुटरीतिरसोपेत काव्य कुर्वीत कीर्त्तये ॥ इति वाग्भट ।

'तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुन क्वापि' **मम्मटाचार्या** ।

(प्र०)[१] कतिविध काव्यम् ? पद्यस्य किं लक्षणम् ? पद्यभेदश्च ब्रूहि ? ।

(उ०) अस्य पृष्ठस्य प० २ ।

[४]'कमनीय काव्यम्' इति **लोचनकार** । 'कवयति इति कवि, तस्य कर्म काव्यम्' **विद्याधर** । कौति शब्दायते विमृशति रसभावान् इति कवि तस्य कर्म काव्यम्' इति **भट्टगोपाल** ।

वन्धाङ्गरूपत्वात्'='सर्गवन्धो महाकाव्यम्' इति वक्ष्यमाणलक्षणं यन्महाकाव्यं तदङ्गरूपत्वात् प्रधानभूतस्य तस्यैकदेशरूपत्वात् [मयाऽत्र] अनुक्तं ग्रन्थगौरवं मन्यमानेन न प्रदर्शितं ग्रन्थान्तरतो ज्ञातव्यं इति शेषः ।

तत्र मुक्तकस्य लक्षणमुक्तमग्निपुराणे—'मुक्तकं श्लोक एवैकश्चमत्कारक्षमः सताम्' [अ० ३३७] इति श्लोकान्तरसम्वन्धेन परित्यक्तमेकपद्यात्मकं 'मुक्तक'मित्यर्थः । अन्येत्वेवमाहुः —

एकः श्लोको मुक्तकः स्याद् द्वाभ्यां युगलकं स्मृतम् ।
त्रिभिर्गुणवती प्रोक्ता चतुर्भिस्तु प्रभद्रकम् ॥
वाणावली पञ्चभिः स्यात् षड्भिस्तु करहाटकः ॥ इति ॥

कोषस्य लक्षणन्तु साहित्यदर्पणे—यथा—

कोषः श्लोकसमूहस्तु स्यादन्योन्यानपेक्षकः ।
व्रज्याक्रमेण रचितः स एवातिमनोरमः ॥ इति ॥

सजातीयानामेकत्र सन्निवेशो 'व्रज्या' । अन्योन्यानपेक्षकः परस्पराकाङ्क्षारहितः । अत्रेदं तत्त्वम् । द्विविधः कोषः । व्रज्याघटित एकः । तद्भिन्नो द्वितीयः । आद्यस्योदाहरणम्—आर्यासप्तशत्यादि । द्वितीयस्योदाहरणम्—सुभाषितावलीप्रभृति । अकारादिहकारान्ताक्षरसन्निवेशो 'व्रज्या' इत्येके । यत्र प्रत्येकं परिसमाप्तार्थैः पद्यैः कथा समाप्यते स 'सघातः' इत्युच्यते । उक्तञ्च—

यत्र कविरेकमर्थं वृत्तेनैकेन वर्णयति काव्ये ।
'सघातः' स निगदितो वृन्दावनमेघदूतादिरिति ॥

एवमाद्या मुक्तकाद्या महाकाव्यस्यैकदेशरूपाः सन्तीति पृथङ् मया न लक्षिताः ग्रन्थान्तरतोऽन्वेष्या इति तात्पर्यम् ॥ १३ ॥

[महाकाव्यस्य लक्षणम्]

[1]सर्गवन्धो महाकाव्यमुच्यते तस्य लक्षणम् ।
आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम् । १४ ।
इतिहासकथोद्भूतमितरद्वा सदाश्रयम् ।
चतुर्वर्गफलोपेतं चतुरोदात्तनायकम् । १५ ।
नगरार्णवशैलर्त्तुचन्द्रार्कोदयवर्णनैः ।
उद्यानसलिलक्रीडामधुपानरतोत्सवैः । १६ ।
विप्रलम्भैर्विवाहैश्च कुमारोदयवर्णनैः ।
मन्त्रदूतप्रयाणाजिनायकाभ्युदयैरपि । १७ ।

(प्र०)[1]महाकाव्यस्य लक्षणं लिख ? । (उ०) अस्य पृष्टस्य प० २३ ।

प्रसङ्गवशात् रीतिभेदप्रदर्शनार्थं तस्य लक्षणं दर्शितम् । अत एवाग्रे *वक्ष्यति—'काश्चिन्मार्गविभागार्थमुक्ताः प्रागप्यलङ्क्रियाः' इति सर्वमवदातम् ।

[श्रुत्यनुप्रासस्योदाहरणम्]

एष राजा यदा लक्ष्मीं प्राप्तवान् ब्राह्मणप्रियः ।
ततः प्रभृति धर्मस्य लोकेऽस्मिन्नुत्सवोऽभवत् ॥ ५३ ॥

श्रुत्यनुप्रासमुदाहरति—'एष' इति । 'ब्राह्मणप्रियः' = ब्राह्मणाः प्रिया यस्य, अथवा ब्राह्मणानां प्रियः 'एष राजा' = प्रजानां रञ्जको नरपतिः 'राजा प्रकृतिरञ्जनात्' इत्यभियुक्तोक्तेः । 'यदा' = 'यस्मिन् काले 'लक्ष्मीम्' = राज्यश्रियम् 'प्राप्तवान्' = अधिगतवान्, 'ततः प्रभृति' = तद्दिनादारभ्य 'अस्मिन् लोके' = प्रजायाम् 'धर्मस्य' = वेदविहितस्य चोदनालक्षणस्य यज्ञादेः कर्मणः 'उत्सवः' = महः 'मह उद्धव उत्सवः' इत्यमरः । 'अभवत्' = अजायत । न्यायेन प्रजाशासनपरो राजा यज्ञदानादिधर्मकृत्यं प्रचारयामासेति पिण्डितार्थः । अत्र षकाररकारयोरेको मूर्धा स्थानमिति सादृश्यम् । एवं शकारयकारयोः तालु । दकारलकारयोः दन्ताः । तथा च 'तत्तत्स्थाने उच्चार्यमाणत्वेन यद् व्यञ्जनसाम्यं तदेव श्रुत्यनुप्रासः' । तत एव चात्र माधुर्याख्यो गुणः । स च धार्मिकराजविषयकरतिभावस्य व्यञ्जकः । इदं वैदर्भीरीतिमत् काव्यं वैदर्भाणामतिप्रियमित्युदाहरणदर्शनफलम् ।

श्रुत्यनुप्रासस्योदाहरणमाह विश्वनाथः—

दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः ।
विरूपाक्षस्य‡ जयिनीस्ताः स्तुमो वामलोचनाः ॥

अत्र 'जीवयन्ति' इति 'याः' इति 'जयिनी' इत्यत्र च जकारयकारयोरेकत्र स्थाने तालौ उच्चार्यत्वात् सादृश्यम्, ततोऽयं सहृदयानामतीवश्रुतिसुखावहत्वात् श्रुत्यनुप्रासः । एवं दन्त्यकण्ठ्यानामप्युदाहरणं ज्ञेयम् । यथा वा मम—

हरन्ति यूनां हृदयानि कान्ताः कचाः कुचाकीर्णसराः लसन्तः ।
कैलासशैलविस्तीर्णशिलाकदेशे कृष्णा भुजङ्गा इव सञ्चरन्तः ॥

अत्र 'हरन्ति' इति 'कान्ताः' इति 'कचाः' इत्यत्र हकारककारविसर्गाणामेकत्र कण्ठे स्थाने उच्चार्यमाणत्वात् सादृश्यम्, अतोऽयं श्रुत्यनुप्रासः ।

---

* द्वितीयपरिच्छेदस्य तृतीये श्लोके ।

† उक्तञ्च मानवे धर्मशास्त्रे—

तस्याहुः सम्प्रणेतारं राजानं सत्यवादिनम् ।
समीक्ष्यकारिणं प्राज्ञं धर्मकामार्थकोविदम् ॥ इति ॥ मनु० अ० ७ । श्लो० २६ ।

‡ विरूपाक्षस्य = विषमनेत्रस्य हरस्येत्यर्थः । जयिनीः = विजेत्रीः वामलोचनाः = सुन्दरीः । स्तुमः = स्तुमः इत्यर्थः ।

कर्त्तव्य इत्यस्य सूचितत्वात् । धीरोदात्तलक्षणमुक्त साहित्यदर्पणे यथा-

*अविकत्थन क्षमावानतिगम्भीरो महासत्त्व । स्थेयान्निगूढमानो धीरोदात्तो दृढव्रत कथित ॥ इति । तस्मिन् महाकाव्येऽन्यत् किं किं वर्णनीयमित्याह—'नगरे'त्यादि द्वाभ्याम् । सर्वाणि तृतीयान्तानि पदानि 'अनङ्कृत' मिति पदेनान्वयनीयानि । नगरम्=नगरी । अर्णव = समुद्र । शैल =पर्वत ऋतव =वसन्ताद्या षट् । चन्द्र =शशी, अर्क =सूर्य तयोरुदय चन्द्रार्कोदय एतेषा वर्णनै । अत्र चन्द्रार्कोदयपद तयोरस्तस्य वर्णनमप्युपलक्षयति । उद्यानम्=आराम । सलिलक्रीडा=जलक्रीडा । मधुपानम्=मद्यगोष्ठी । रतस्य सुरतस्योत्सव रतोत्सव =सम्भोगशृङ्गार, विप्रलम्भ =अभिलाषविरहेर्ष्याप्रवासशापहेतुक पञ्चविधे रित्यर्थ [इदन्तु ध्यातव्यम्-यदादौ विप्रलम्भ वर्णयित्वैव सम्भोगो वर्णनीय इति 'न विना विप्रलम्भेन सम्भोग पुष्टिमश्नुते' इत्युक्तत्वात्] कुमारोदय =सुतोत्पत्ति तस्य वर्णनै मन्त्र =शत्रूणा जयाय मन्त्रिभि सह विचार दूत =प्रेष्य सच निसृष्टार्थे, मितार्थे सन्देशहारकश्चेति त्रिविधो ज्ञेय । प्रयाणम्=रणाभिमुख यात्रा । आजि =सग्राम । नायकस्य=काव्यप्रधानपात्रस्य अभ्युदय =ऐश्वर्य रिपूणा जयादिरित्यर्थ एतै सर्वैरलङ्कृत भूषितम् ।

पुन कीदृशमित्याह—'असंक्षिप्तम्' इति । न संक्षिप्तमसंक्षिप्तम् विस्तृतवृत्तान्तमित्यर्थ । महाकाव्ये ग्रन्थबाहुल्यभिया सङ्क्षेपेण वस्तुवर्णन न चमत्कारमावहति । तद्यथा मम-

वसुदेवात्मज कृष्णो वेणुमारणयन् बभौ ।
गोपेषु निजमित्रेषु नक्षत्रेषु शशी यथा ॥ इति ।

रसा =शृङ्गाराद्या । भावा =प्रधानतया व्यञ्जनाख्यव्यापारेण व्यक्तीकृता व्यभिचारिणो निबद्धास्त्रयस्त्रिंशत् । देवगुर्वादिविषया रतिश्च 'रतिर्देवादिविषया व्यभिचारी तथाञ्जितो भाव' इति मम्मटोक्ते । एतै रसभाव निरन्तरमन्तरशून्य व्याप्तमित्यर्थ ।

इदन्तु बोध्यम्—शृङ्गारवीरशान्ताना मध्ये कोऽपि रसोऽङ्गी कार्य अन्ये रसा भावादयश्च एतेषामङ्गत्वेन रूपेण निबन्धनीया । तथाचोक्त साहित्यदर्पणे—'शृङ्गारवीरशा-

---

*उक्तञ्च प्रतापरुद्रीये नायकविषये—

महाकुलीनतौज्ज्वल्य महाभाग्यमुदारता ।
तेजस्विता विदग्धत्व धार्मिकत्वादयो गुणा ॥

भोजराजेनाप्युक्तम्—

कोऽस्त्यपि वाग्वृत्तिर्विद्वत्कर्णावतसति ।
नायको यदि वर्ण्येत लोकोत्तरगुणोत्तर ॥ इति ।

प्राचा भामहेनापि भणितम्—

उपश्लोक्यस्य माहात्म्यादुज्ज्वला काव्यसम्पद्' इति ।

तस्माद्भूयिष्ठगुणो नायको महाकाव्ये स्यात् ॥

समानोधर्म , तद्वाचक इवादिश्च । तत्राधिकगुणमुपमान चन्द्रादि । वर्ण्यमानमल्पगुणमुपमेय कामिनीवदनादि, समानोधर्म आह्लादकत्वादि । वस्तुतस्तु—यस्योपमा दीयते तदुपमानम् । यस्मै उपमा दीयते तदुपमेयमिति बालबुद्धेरव्यामोहकरी सरणिः । उक्तञ्च वामनेन—'उपमानेनोपमेयस्य गुणलेशत साम्यमुपमा' (काव्या० अध्या० २ सू० १) उपमीयते सादृश्यमानीयते येनोत्कृष्टगुणेनान्यत् तद् उपमानम् , यदुपमीयते न्यूनगुण तद् उपमेयम् । मेयमुपमा तावत् द्विविधा लौकिकी कल्पिता च । लोकप्रसिद्धा लौकिकी, यथा 'कमलमिव मुख मनोज्ञम्' इत्यादौ मुखकमलयोरुपमानोपमेयभावो लोके प्रसिद्धः । यथा वा 'हसीव कृष्ण ते कीर्त्ति स्वर्गङ्गामवगाहते' इति हसीकीर्त्योरपि । कल्पिता तु—'गुणबाहुल्यतश्च कल्पिता' (काव्य० अध्या० २ । स० २) गुणानां बाहुल्य गुणबाहुल्यम् , तत उपमानोपमेययो साम्यात् कल्पितोपमा, कविभि कल्पितत्वात् कल्पिता ।

यथा—

उद्गर्भहूणतरुणीरमणोपमर्द-भुग्नोन्नतस्तननिवेशनिभ हिमांशो ।
बिम्ब कठोरविसकाण्डकडारगौरैर्विष्णोः पद प्रथममग्रकरैर्व्यनक्ति ॥

अत्र तादृशस्तनहिमाशुबिम्बयोरुपमानोपमेयभावो न लोकप्रसिद्ध किन्तु कविकल्पित ।

उपमानोपमेयगतधर्माश्च गुणक्रियादिरूपा यथायथमवगन्तव्या । तत्र—हसीव कृष्ण! ते कीर्त्तिरेवना लोकगामिनी इत्यादौ धवलत्वं गुण । 'हसीवेयमिहायाता कान्ता स्वकान्तमन्तिरा' इत्यादावागमनादिक्रियारूप । एवमन्यदप्यूह्यम् ॥ १४ ॥

[तत्रादौ धर्मोपमाया उदाहरणम्]

अम्भोरुहमिवाताम्रं मुग्धे ! करतलं तव ।
इति 'धर्मोपमा' साक्षात्तुल्यधर्मप्रदर्शनात् ॥ १५ ॥

प्रतिज्ञानुसारमुपमाप्रपञ्चं कुर्वाण प्रथमं 'धर्मोपमा'-मुदाहरति 'अम्भोरुहम्' इति । अयि ! मुग्धे ! अपरिपक्वमते ! सुन्दरि ! 'तव करतलम्'=पाणितलम् 'अम्भोरुहमिव'=कोकनदमिव 'आताम्रम्'=समन्ततो लोहितम् 'अस्ति' इति शेष । 'इति'=उक्ते वाक्ये 'साक्षात्'=स्फुटम् 'तुल्यधर्मप्रदर्शनात्'=आताम्रमितिपदोपात्तस्य तुल्यस्य धर्मस्य आताम्रत्वस्य रक्तताख्यसाधारणधर्मस्य प्रदर्शनात् उपादानात् इय 'धर्मोपमा' नाम उपमा । अर्थात् 'उपात्तधर्मा इयमुपमा । इयञ्च पूर्णा श्रौती, चतुर्णामपि उपमानोपमेयसाधारणधर्मतद्वाचकानामुपादानात् । अत्र अम्भोरुहमुपमानम् , करतलमुपमेयम् , आताम्रत्व समानो धर्म , इवशब्द उपमावाचक । एवमेवाग्रेऽपि यथासम्भव योजनीयम् ॥ १५ ॥

[वस्तूपमाया उदाहरणम्]

राजीवमिव ते वक्त्रं नेत्रे नीलोत्पले इव ।
इयं प्रतीयमानैकधर्मा 'वस्तूपमै'व सा ॥ १६ ॥

दुष्यति'=दुष्टं निन्दितं न भवतीत्यर्थः । किमत्रास्ति कश्चन विशेषो येन तत्र दोषावहं भवतीत्यपेक्षायामाह—'यदि' इति । 'यदि उपात्तेषु'=उपनिबद्धेषु वर्णितेषु नायिकादिषु 'सम्पत्तिः'=उचिता रसादिसामग्री 'तद्विदः'=तत् काव्यं रचयितुं ज्ञातुं वा ये विदन्ति जानन्ति अर्थात् रसभावविदः सहृदयान् 'आराधयति=प्रीणयति । उक्तञ्च सरस्वतीकण्ठाभरणे—

नाऽवर्णनं नगर्यादेर्दोषाय विदुषां मतं ।
यदि शैलर्तुरात्र्यादेर्वर्णनेनैव तुष्यति ॥ इति ॥

एतद्विषये प्राचा भामहेनाप्युक्तम्—'उपश्लोक्यस्य माहात्म्यादुज्ज्वला काव्यसम्पदः' इति । उपश्लोक्यो यशस्वी सदाचारो यथा रामयुधिष्ठिरादिः । काव्यसम्पदो रसभावादिः ।

रुद्रटोऽप्याह—

गुणालङ्कारचारुत्वयुक्तमप्यधिकोज्ज्वलम् ।
काव्यमाश्रयसम्पत्त्या मेरुणेवामरद्रुमः ॥

रुद्रटेनाप्युक्तम्—'उदारचरितनिबन्धना प्रबन्धप्रतिष्ठा' इति ।

साहित्यमीमांसाकारोऽप्याह—'नायकगुणग्रथिता
सूक्तिस्रजः सुकृतिनामाकल्पमाकल्पन्ते' इति ।

भोजराजेनाप्युक्तम्—

कवेरल्पापि वाग्वृत्तिर्विद्वत्कर्णावतंसति ।
नायको यदि वर्ण्येत लोकोत्तरगुणोत्तरः । इति ।

तस्मान्महाकुलीनत्वगुणोपेतनायकप्रबन्धादि सकलाङ्गपूर्णं वा कतिपयाङ्गोपेतं वा भवेत सर्वथैव तत्र सहृदयानामादरो जायते । एवञ्च चमत्कारातिशयपुष्टं महाकाव्यम्, विच्छित्तिविशेषोपेतञ्च खण्डकाव्यमित्यनयोर्विशेषे सति नैवाव्याप्तिदोषलेशोऽपीति सारार्थः ॥ २० ॥

एवं काव्ये नायकोत्कर्षो विधेयः, स च यावत् प्रतियोगिनः प्रतिनायकस्यापकर्षो न वर्ण्येत तावद् विच्छित्तिविशेषता न भजते तस्मात्तस्याप्यपकर्षः प्रतिपाद्य इत्यावश्यकम्, परमेतत्कथं प्रतिपादनीयमित्यत्र प्रकारद्वयमाचष्टे 'गुणतः' इति द्वाभ्याम्—

[काव्ये नायकप्रतिनायकयोर्वर्णनम्]

[१]गुणतः प्रागुपन्यस्य नायकं तेन विद्विषाम् ।
निराकरणमित्येष मार्गः प्रकृतिसुन्दरः ॥ २१ ॥
वंशवीर्यश्रुतादीनि वर्णयित्वा रिपोरपि ।
तज्जयान्नायकोत्कर्षवर्णनञ्च धिनोति नः ॥ २२ ॥

'गुणतः'=महाकुलीनत्वादिगुणवत्त्वेन 'प्राक्'=प्रथमं 'नायकम्'=धीरोदात्तादिकम् 'उपन्यस्य'=वर्णयित्वा 'तेन'=उपन्यस्तनायकेन 'विद्विषाम्'=नायकप्रतिपक्षभूतानां कुपथगामिनामुद्धतानामिति यावत् [यत्] 'निराकरणम्'=पराजयवर्णनम् 'इत्येष मार्गः'=एवमा-

(प्र०) [१] कथं काव्ये नायकप्रतिनायकौ वर्णनीयौ? (उ०) अस्य पृष्ठस्य पं० २५

¶एकाङ्गरूपकं चैतदेवं द्विप्रभृतीन्यपि ।
अङ्गानि रूपयन्त्यत्र योगायोगौ भिदाकरौ ॥७६॥

अवयवरूपकस्य भेदान् दर्शयितुकाम प्रथम तस्य 'एकाङ्गरूपक' नाम भेदमाचष्टे—'मदपाटल०' इत्यादि द्वाभ्याम् । 'एष जनः'=मत्सदृश , 'ते'=तव 'मदपाटलगण्डेन'=मदेन पाटलौ श्वेतरक्तौ गण्डौ कपोलौ यस्य तादृशेन 'रक्तनेत्रोत्पलेन'=रक्ते लोहिते नेत्रे नयने एव उत्पले यस्य तथाभूतेन 'मुखेन'=आननेन 'मुग्ध '=मोहित तथा 'रागमय '=रागो लौहित्यम् अनुरागश्च तन्मय रागपूरितः इत्यर्थ 'कृत '=सम्पादित ॥

'एतद्'=दर्शितप्रकारम् 'एकाङ्गरूपकम्' नाम रूपकम् 'रक्तनेत्रोत्पलेन' इत्यत्र केवलमेकस्यैव नेत्ररूपस्याङ्गस्य उत्पलत्वेन रूपणात् । 'एवम्'=इत्थम् 'द्विप्रभृतीनि अपि अङ्गानि रूपयन्ति' कवय इति शेषः । तेन 'द्व्यङ्गरूपकम्, त्र्यङ्गरूपकम्' इत्यादीन्यन्यान्यपि रूपकस्य नामानि [विशेषा] ज्ञेयानि । तेषु विशेषमाह—'योगायोगौ' इति । 'अत्र'=अवयवरूपके 'योगायोगौ'=आरोप्यमाणानां परस्पर सम्बन्धो योग तदभाव अयोग योगश्च अयोगश्च तौ 'भिदाकरौ'=भेदकौ विशेषकौ ज्ञेयौ, अर्थात् द्विप्रभृत्यङ्गारोपणेषु आरोप्यमाणाना परस्पर सम्बन्धासम्बन्धाभ्या कृत्वा युक्तरूपकमयुक्तरूपकमिति भेदद्वयमपि भवति । तदेवादनुपद दर्शयति ॥ ७५ ॥ ७६ ॥

[युक्तरूपकस्योदाहरणकथनम्]

स्मितपुष्पोज्वलं लोलनेत्रभृङ्गमिदं मुखम् ।
इति पुष्पद्विरेफाणां सङ्गत्या युक्तरूपकम् ॥७७॥

युक्तरूपकमुदाहरति—'स्मित' इति । 'स्मितपुष्पोज्वलम्'=स्मितम् [हास्यम्] एव पुष्पम् [कुसुमम्] तेनोज्वलम् निर्मलम् । लोलनेत्रभृङ्गम्'=लोले [चपले] नेत्रे [नयने] एव भृङ्गौ [भ्रमरौ] यत्र तत् तथाविधम् 'इद' [कान्तायाः] 'मुखम्' अस्ति 'इति'=उक्तप्रकारेण 'पुष्पद्विरेफाणां सङ्गत्या'=अर्थात् स्मिते पुष्पत्वस्यारोपणात्, नेत्रे भ्रमरत्वस्य च आरोपणात् 'युक्तरूपक मिदम् । भोजराजस्तु—पुष्पभृङ्गादीनामन्योन्य योगोपपत्त्या 'युक्तरूपक' मिदमित्याशय प्रकटीचकार । किञ्च—मुखस्य अवयवयोरेव स्मितनेत्रयो यथाक्रम पुष्पभृङ्गान्वारोप कृत इत्यवयवारोपणाद् 'अवयवरूपक'मपीदम् । [न कस्य नन्दन मुग्धे सुरभिश्वसितानिलम्' इति पराग्रम्] ॥७७॥ *

[अयुक्तरूपकस्योदाहरणम्]

इदमार्द्रस्मितज्योत्स्नं स्निग्धनेत्रोत्पलं मुखम् ।
इति ज्योत्स्नोत्पलायोगादयुक्तं नाम रूपकम् ॥७८॥

अयुक्तरूपकमुदाहरति—'इदम्' इति । 'आर्द्रस्मितज्योत्स्नम्'=आर्द्र सरस स्मितमेव

---

* क्वचित् [मुखमन्यत्र] स्वयमभ्यूह्या प्रश्नादियोजना ।

[प्र०] * एकाङ्गादिरूपकभेदे का युक्ति ? [उ०] अत्र पृ० पं० १ ।

नायकेन वाच्या 'वा'=अथवा इतरेण अर्थात् कथायां नायकस्तदितरश्चेतिवृत्तवक्ता स्यात् । अत्र चार्थे 'वा' शब्दो बोध्य । अन्यथा नायकवाच्यायां कथायामाख्यायिकालक्षणस्याति-व्याप्तिः स्यात् ।

ननु —आख्यायिकाया स्वमुखेन स्वगुणप्रशंसने नायकस्य उदात्तता नङ्क्ष्यति इत्या-शङ्क्याह—'स्वगुणे'ति । 'अत्र'=आख्यायिकाया 'भूतार्थशंसिनः'=सत्यार्थवक्तु नायकस्य 'स्वगुणाविष्क्रिया'=स्वेषां गुणानां स्वमुखेन आविष्क्रिया प्रकाश 'दोषो न'=नैव दूषणं भवतीति शेष । असत्यभूतानामनपोढ्ढतानां स्वगुणानां स्वमुखेन कथनमेव दोष इति भाव । यथा च 'आख्यायिका' संज्ञके कादम्बरीगद्ये महाश्वेताप्रसङ्गे चन्द्रापीडस्य नायकस्य स्वेतिवृत्तवक्तृत्वं न दोष' ।

सन्ति चान्येपि चूर्णिकाद्या गद्यभेदा परं यथा महाकाव्ये मुक्तकादीनामन्तर्भाव तथा चूर्णकादीनामप्याख्यायिकादावन्तर्भाव इति ते पृथङ् न लक्षिता । तेच ग्रन्थान्तरतो-ऽवमेया विशेषजिज्ञासुभि । तथाचाह काव्यालङ्कारसूत्रे वामन —* 'गद्य वृत्तगन्धि चूर्ण-मुत्कलिकाप्रायञ्च' [अ० ३ । सू० २२] † 'पद्यभागवत् वृत्तगन्धि' [३।२३] यथा— 'पातालतालुतलवासिषु दानवेषु' । अस्मिन् गद्ये वसन्ततिलकाख्यस्य वृत्तस्य भाग प्रत्यभि-ज्ञायते । 'अनाविद्धललितपद चूर्णम्' [३।२४] । न विद्धानि अनाविद्धानि अदीर्घसमा-सभाञ्जि च तानि ललितपदानि अनुद्धतानि पदानि यस्मिन् तदनाविद्धपद 'चूर्ण' मित्युच्यते । यथा—'अभ्यासो हि कर्मणा कौशलमावहति । नहि सकृन्निपातमात्रेणोदबिन्दुरपि ग्रावणि निम्नतामादधाति' इति । 'विपरीतमुत्कलिकाप्रायम्' [३।२५] विपरीतम् आविद्धोद्धतपद-मित्यर्थ । यथा—‡ 'कुलिशशिखरखरनखरप्रचयप्रचण्डचपेटापाटितमत्तमातङ्गकुम्भस्थल-गलन्मदच्छटाच्छुरितचारुकेसरभारभासुरमुखे केसरिणि' इति ।

अग्निपुराणे तु—

'अपद पदसन्तानो गद्य तदपि गद्यते । चूर्णकोत्कलिकावृत्तगन्धिभेदात्त्रिरूपकम् ॥ इत्युक्तम् ।

---

* 'गद' व्यक्ताया वाचि इत्यस्माद् धातो 'गदमदचरयमश्चानुपसर्गे' [पा० ३।१।१०० इति सूत्रेण कर्मणि 'यत्' प्रत्यय । † पादेषु भव पद्यम् । भवार्थे यत्प्रत्यये भसंज्ञायां पदादेशे रूपमिति कश्चित् । वयन्तु-पादा मन्त्यस्य 'अन्येभ्योपि दृश्यते' [पा० ५।२।१२०] इति यप् 'पद्न्नो०'-[६।१।६३] इति पदादेश ।

‡ कुलिश वज्र तस्य शिखर कोटि अग्रभाग इति यावत् तद्वत् खराणां तीव्राणां नखराणां करजानां प्रचय सघ तेन प्रचण्ड. महापीडाजनको य चपेट. करतल अथवा प्रचण्डा या चपेटा करतलाघात. तेन (तया) पाटित द्वैधीभावं नीत यत् मत्तमातङ्गस्य मदस्राविगजस्य कुम्भस्थल स्थूलांसप्रदेश. तस्माद् गलन्ती प्रच्यवन्ती या मदच्छटा मदधारा तया छुरित चर्चित चारु मनोहर. य केसरभार. स्कन्धकेशनिचय तेन भासुरं भ्राजमान मुखम् आनन यस्य तस्मिन् इत्यर्थ ।

¶वक्त्रञ्चापरवक्त्रञ्च सोच्छ्वासत्वञ्च भेदकम् ।
चिह्नमाख्यायिकायाश्चेत् प्रसङ्गेन कथास्वपि ॥ २६ ॥
आर्यादिवत् प्रवेशः किं न वक्त्रापरवक्त्रयोः ।
भेदश्च दृष्टो लम्भादिरुच्छ्वासो वास्तु किं ततः ॥ २७ ॥

कथाख्यायिकयो र्विषये वक्त्रभेदकृतो विशेष इति प्राचां मतं निरस्तम्, सम्प्रति प्रकारान्तरेणान्येषां केषाञ्चिन्मतं खण्डयति—'वक्त्रञ्च' इति । वक्त्रम्, अवरवक्त्रेत्येति छन्दोभेदो । वक्त्रलक्षणमुक्तं वृत्तारत्नाकरे-'वक्त्र' नाद्यान्नसौ स्यातामब्धेयोऽनुष्टुभि ख्यातम्' इति । अपरवक्त्रलक्षणन्तु—'अयुजि ननरला गुरु समे तदपरवक्त्रमिदं नजौ जरौ' वित्यन्यत्रोक्तम् । 'सोच्छ्वासत्वन्'=कथांशभेदकस्य अध्यायादिवत् विरामविशेषस्य नाम उच्छ्वासः, तेन सह वर्त्तते इति सोच्छ्वासः तस्य भावस्तत्त्वम् । उच्छ्वासेन सहितत्वमित्यर्थः । एतत्त्रय 'आख्यायिकायाः'=उक्तलक्षणस्य गद्यकाव्यस्य 'भेदकम्'=कथातो विशेषकं 'चिन्हम्'=लक्षणमस्तीति 'चेद्'=यदि [एवं कथयेयुः केचित् तन्न यतः] 'आर्यादिवत्'=आर्यादिच्छन्दोविशेषवत् 'कथास्वपि'=कथानामकेषु गद्येष्वपि 'किं वक्त्रापरवक्त्रयोः प्रवेशः'=निवेशः न स्यात् अपितु स्यादेवेति भावः ।

अयमभिप्रायः—नहि कथायामार्यानामकच्छन्दोनिवेशे प्रवृत्तः कविः यदि वक्त्रापरवक्त्रच्छन्दसी निवेशयेत तदा कमपि दोषं करोति तावता वा कथायाः कथात्वमेव न भवति । अभ्यनुज्ञातश्च कैश्चित् कथायामार्यादिवत् वक्त्रापरवक्त्रयोरपि निवेशकरणम् । तथाहि—'आर्यावक्त्रापरवक्त्राणां छन्दसा येन केनचित्' इति । तस्मादुक्तरीत्या कथायामार्यादिच्छन्दोनिवेशाभ्यनुज्ञाने उक्तविशेषकथनं केषाञ्चिदज्ञानमूलकमेवेति भावः ।

सोच्छ्वासत्वस्यापि भेदकत्वं निरस्यति-'भेदश्च' इति ।'लम्भ'इति कथापरिच्छेदस्य नाम। आदिपदेन उल्लासादीनामपि ग्रहणम् 'वा' शब्दश्चार्थे लम्भादिः उच्छ्वासश्चेत् [यदि] कथाख्यायिकयोः 'भेदः'=विशेषोऽस्तु 'ततः किम् ?'=न किमपीत्यर्थः । अर्थात् लम्भादिरुच्छ्वासः कथायां स्यात् आख्यायिकायां वा स्यात् नैतावता कविर्दुष्यति नाप्युभयोरैक्यं भवति । यथा घटपटयोः स्व*रूपभेदे विद्यमाने नहि नीलतायास्तयोर्विशेषका भवन्ति । कादम्बर्यांञ्च नैव लम्भकस्य निवेशः । तस्मात् लम्भकादिकं व्यभिचारि मतं नोभयोरसाधारणो धर्म इत्यर्थः । २६, २७ ॥

[उक्तेऽर्थे स्वसिद्धान्तकथनम्]

¶तत्कथाख्यायिकेत्येका जातिः संज्ञाद्वयाङ्किता ।
अत्रैवान्तर्भविष्यन्ति शेषाश्चाख्यानजातयः ॥ २८ ॥

(प्र०)¶कथाख्यायिकयोर्विषये कीदृशं प्राचां मतम् ? कथञ्च तत्खण्डितम् ? (उ०, अस्य पृष्ठस्य प० १

प्र०)¶कथाख्यायिकाविषये दण्डिसिद्धान्तं लिख ? उ०) अस्य पृष्ठस्य प०२८

* घटत्वपटत्वधर्मप्रयुक्ते भेदे ।

'शिवा' = कल्याणकारिणः' निष्प्रत्यूहा 'सन्तु' = भवन्तु । 'यत्र भवान् गत ममापि जन्म तत्रैव भूयात्' [इत्याशासने] इत्याशी । तव गमनोत्तरमेव मृता भविष्यामीति व्यङ्ग्यम् ॥ १४१ ॥

[लक्ष्ये आशीर्वचनाक्षेपस्वरूपयोजनम्]

इत्याशीर्वचनाक्षेपो यदाशीर्वादवर्त्मना ।
स्वावस्थां सूचयन्त्यैव कान्तयात्रा निषिध्यते ॥ १४२ ॥

उक्ते पद्ये आशीर्वचनाक्षेपलक्षणं योजयति—'इति' इति । 'इति' उक्तप्रकारे पद्ये 'आशीर्वादवर्त्मना'=आशीर्वादप्रकाशनमार्गेण अर्थात् 'तव पन्थानः शिवाः सन्तु' इत्यालपनद्वारा, किंवा प्रियार्थस्य प्राप्तीच्छारूपा आशंसा आशी तस्य वाद ममापीत्याद्युत्तरवाक्येन यत् कथनम् तद्द्वारा 'स्वावस्थाम्'=भविष्यमरणात्मिका दशा 'सूचयन्त्या'= प्रकाशयन्त्या कयाचित् कान्तया 'कान्तयात्रा'=कान्तस्य यात्रा प्रवासगमनं यत् निषिध्यते सोऽयम् 'आशीर्वचनाक्षेप' ज्ञेय इति शेषः । स्वाभीष्टाशासनपूर्वक आक्षेप 'आशीर्वचनाक्षेप' इत्यर्थः । यद्यत्र विधिरास्य तथापि निषेधो व्यङ्ग्यः ॥ १४२ ॥

[परुषाक्षेपस्योदाहरणम्]

यदि सत्यैव यात्रा ते काप्यन्या मृग्यतां त्वया ।
अहमद्यैव रुद्धाऽस्मि रन्ध्रापेक्षेण मृत्युना ॥ १४३ ॥

'परुषाक्षेपम् उदाहरति—'यदि' इति । 'यदि ते यात्रा'=प्रदेशगमनं प्रयाणमिति सत्यम् 'सत्या एव [तदा] त्वया कापि अन्या'=कान्ता 'मृग्यताम्'=गवेष्यताम् । 'अहम्' [पुन] अद्य एव रन्ध्रापेक्षेण'=छिद्रान्वेषणशीलिना मृत्युना 'रुद्धा'=आक्रान्ता 'अस्मि'=भवामि । अचिरं मे मृत्युर्भावीति व्यङ्ग्यम् ॥ १४३ ॥

[परुषाक्षेपस्य लक्ष्ये योजनम्]

इत्येष परुषाक्षेपः परुषाक्षरपूर्वकम् ।
कान्तस्याक्षिप्यते यस्मात् प्रस्थानं प्रेमनिघ्नया ॥ १४४ ॥

परुषाक्षेपं लक्ष्ये योजयति—'इति' इति । 'इति'=दर्शितप्रकारवति काव्ये 'प्रेमनिघ्नया'=प्रेमपरवशया कयाचित् कान्तया 'परुषाक्षरपूर्वकम्'=कठोरवर्णवचनपूर्वकं [illegible] 'कान्तस्य प्रस्थानम्'=विदेशगमनं 'आक्षिप्यते'=निषिध्यते अतो हेतो 'एष [illegible]' =[illegible] आक्षेपो ज्ञातव्य इत्यर्थः ॥ १४४ ॥

[साचिव्याक्षेपस्योदाहरणम्]

गन्ता चेद् गच्छ तूर्णं ते कर्णौ यान्ति पुरा रवाः ।
आर्तबन्धुमुखोद्गीर्णाः प्रयाणपरिपन्थिनः ॥ १४५ ॥

धर्मा: कथाख्यायिकयोनैव भेदमावहन्ति । एवञ्च 'कन्याहरणसंग्रामविप्रलम्भोदयान्विता' इत्यादि भामहादिकृत लक्षणं दुष्टमेव मन्तव्यमित्याशय ॥ २ ॥

[कथाख्यायिकाविषये भामहादिमतनिरास]

कविभावकृत चिन्हमन्यत्रापि न दुष्यति ।

मुखमिष्टार्थसंसिद्ध्यै किं हि न स्यात्कृतात्मनाम् ॥ ३० ॥

अथ *कथाया कवेर्भावविशेषो भवति, आख्यायिकायान्तु स नो प्रतीयत इत्यनयोर्विशेष इति भामहादीना मत स्यात्, तदपि दूषयति—'कविभावकृत'मिति । कवेर्भाव कविभाव कविहार्द तत्कृत 'चिन्हम्'=लक्षणम् 'अन्यत्रापि'=कथायामिव आख्यायिकायामपि 'न दुष्यति'=नैव दोष जनयति । अर्थात् यथा †माघकाव्यस्य सर्गसमाप्तिश्लोकेषु 'श्री' शब्दप्रयोग, किराते च तथैव 'लक्ष्मी' पद प्रयुक्तम् । एवमेव यदि आख्यायिकायामपि कृत भवेत् तदापि न दोष । तथाहि—'इष्टार्थसंसिद्ध्यै'=वाञ्छितार्थसाधनाय मङ्गल करणायेत्यर्थ 'कृतात्मनाम्'=पण्डितानाम् 'कि हि मुखम्'=प्रारम्भ 'न स्यात्'=अपितु सूरय इष्टार्थघटनाय यद्यदुपादयते तत्सर्व सर्वत्रैव काव्येषु शोभाधायकमेव जायते । निरङ्कुशा कवय इति भाव ॥ ३० ॥

[मिश्रकाव्यनिरूपणम्]

(¹)मिश्राणि नाटकादीनि तेषामन्यत्र विस्तर ।

[चम्पूकाव्यस्य लक्षणम्]

गद्यपद्यमयी काचिच्चम्पूरित्यभिधीयते ॥ ३१ ॥

अधुना क्रमप्राप्त मिश्रकाव्यमाचष्टे—'मिश्राणि' इति । 'नाटकादीनि'=दृश्यरूपकानि काव्यानि 'मिश्राणि'=मिश्ररूपकानि 'भवन्ति' इति शेष । अर्थात् तेषु गद्य पद्यञ्च मिश्रित भवत्यत एव 'मिश्राणि' इत्युच्यन्ते । 'तेषां'=नाटकादीनाम् 'अन्यत्र'=भरतादिग्रन्थेषु 'विस्तर'=प्रपञ्च । 'अस्ति' इति शेष । मया ग्रन्थगौरवभयादत्र न दर्शित इत्याशय । न केवल दृश्यकाव्येष्वेव गद्यपद्ययोर्योग किन्तु श्रव्यकाव्येष्वपि क्वचिद् भवतीत्याह—'गद्यपद्यमयी' इति । गद्यपद्यप्रचुरा काचित् 'चम्पू' इत्यभिधीयते चम्पूनामक तत्काव्य भवतीत्यर्थ ।

(प्र)¹ कानि मिश्राणि ? कुत्र च तेषा विस्तर ? चम्पूलक्षण किम् ? दशकुमारादिष्वपि क्वचित् पद्यसत्त्वे कुतो न चम्पूत्वम् ? (उ०) अस्य पृष्ठस्य प०१६

* कवेरभिप्रायकृतैरङ्कैरङ्किता कथा इति भामहोक्ति ।

† तथाच माघ —प्रथमसमाप्तिश्लोकस्य द्वितीयपादे—

'तस्मिन्नुपतिने पुर सुरसुनाविन्दो श्रिय बिभ्रति' इत्याह । एवमेव सर्वत्र । तथा भारविस्तु—

'रिपुतिमिरमुदस्योदीयमान दिनादौ दिनकृतमिव लक्ष्मीस्त्वा समभ्येतु भूय ' इत्यादिदिशा सर्वत्र सर्गसमाप्तौ 'लक्ष्मी' शब्द प्रयुयोज ।

अत्र कृष्णा [द्रौपदी] रूपस्य द्रव्यस्य कर्णा—[राधेया] वलम्बन न सम्भवाति क्रियाया आपातत प्रतीयमानोऽपि विरोध श्लेषसामर्थ्यात् परिहर्तुं शक्य । अयम विरोधः श्लेषमुखप्रेक्षी ॥ ३३६ ॥

इत्यनेकप्रकारोऽयमलङ्कारः प्रतीयते ॥

—*—

इति विरोधचक्रम् ।

विरोधमुपसहरति—'इति'=उक्तप्रकारेण 'अयम्'=विरोध अलङ्कार 'अनेकप्रकार.' नानाविध 'प्रतीयते' । उक्तमस्य वहुविधत्व ३३३ कारिकाया व्याख्याने ।

इतीति—विरोधालङ्कारप्रकरण समाप्तमित्यर्थ । विरोधस्यान्यदुदाहरण यथा—

*तव दक्षिणोऽपि वामो वलभद्रोऽपि प्रलम्व एष भुज ।
दुर्योधनोऽपि राजन् ! युधिष्ठिरोस्तीत्यहो चित्रम् ॥

अत्र दक्षिणस्यापि वामत्वे विरोध परिहरास्तु—भक्तान् प्रति अनुकूलत्वाद् दुष्टान् प्रतिकूलत्वाच्च ज्ञेय । इत्येवमादिरीत्या ज्ञेयम् 'वामन'स्तु—'विरुद्धाभासत्व विरोध' [का० ३ । १२] इति सूत्रयित्वा—

पीत पानमिद त्वयाद्य दयिते ! मत्त ममेद मन
पत्राली तव कुङ्कुमेन रचिता रक्ता वय मानिनि ! ।
त्व तुङ्गस्तनभारमन्थरगतिर्गात्रेषु मे वेपथु-
स्त्वन्मध्ये तनुता ममाधृतिरहो प्रेम्णा विचित्रा गति ॥

इत्युदाजहार । विस्तरस्तु 'सरस्वतीकण्ठाभरणे' द्रष्टव्य ।

[अप्रस्तुतप्रशसाया लक्षणम्]

¶ अप्रस्तुतप्रशंसा स्यादप्रक्रान्तेषु या स्तुति ॥ ३४० ॥

क्रमप्राप्तामप्रस्तुप्रशसा लक्षयति—'अप्रस्तुतप्रशसा' इति । 'अप्रक्रान्तेषु'=अप्रस्तुतेषु 'या स्तुति'=अर्थात् प्रस्तुतस्य निन्दार्थं गुणकीर्त्तनम् सा 'अप्रस्तुतप्रशसा' नामालङ्कृति स्यात् भवतीत्यर्थ । अप्रस्तुतस्तुत्या प्रस्तुतनिन्दावोधनमप्रस्तुतप्रशसा

[प्र०] ¶ अप्रस्तुतप्रशसाया लक्षणोदाहरणे निरूप्य तत्र नवीनमताद् दण्डिमतस्य विशेषो वक्तव्य ? [उ०] अस्य पृ० प० २०

* हे राजन्, तव वाहुर्भक्तान्प्रत्यनुकूलत्वाद्दक्षिणोऽपि शत्रून्प्रति प्रतिकूलतया वाम इत्यविरुद्धमर्थद्वयम् । तथा स एव वलेन भद्रोऽपि श्रेष्ठोऽपि प्रलम्वो दीर्घ । तथा दु मेन योधन इति दुर्योधनोऽपि युधि समरे स्थिरोऽचञ्चल इत्यविरोध । विरोधप्रतिभासश्च दक्षिणवामयो सव्येतरयोरन्यत्वात्, तथा वलभद्रप्रलम्वयोर्हलधरासुरयोरन्यत्वात्, तथा दुर्योधनयुधिष्ठिरयोर्भिन्नपुरुषत्वाल्लक्ष्यते ।

[संस्कृतप्राकृतयोर्लक्षणम्]

¹संस्कृतं नाम दैवीवागन्वाख्याता महर्षिभि ।
तद्भवस्तत्समो देशीत्यनेक प्राकृतक्रम ॥ ३३ ॥

सस्कृतादीना स्वरूपमाह—'सस्कृतम्' इति । दैवी देवानामियं 'दैवी' 'तस्येदम्' [४।३।१२०] इत्यण् । तत 'टिड्ढाणञ्०' [४।१।१५] इति ङीप्। देवानां सम्बन्धिनी देवैर्ब्रह्मेन्द्रादिभिरादौ व्यवहारे प्रयुक्ता या वाक् तत् 'सस्कृत' नाम स्वाभाविकसस्कारवत्त्वात् सस्कृत' मित्युच्यते श्रुतिरपि सर्गादौ 'स भूरिति व्याहरत् भूमिमसृजत् [तै० ब्रा० २ २।४।२] इत्येवमाद्या सस्कृतवागुच्चारणपूर्वकमेव प्रजापते सृष्टिमाह । तथाच दैवीवाक्त्वमेव संस्कृत-लक्षणम्। आग्नेयेऽप्युक्तम्—'देवादीना सस्कृत स्यात्' इति । [सा च] 'महर्षिभि'=साक्षा-त्कृतधर्मभि तदुत्तरकालभाविभिश्च पाणिन्यादिभिर्मुनिभि 'अन्वाख्याता'=कथिता प्रकृति-प्रत्ययादिविभागकल्पनया प्रकाशिता नतु रचिता सस्कृतवाचो नित्यत्वात् ।

पाणिनिप्रभृतयो ऽर्वाञ्चना तत परार्चो वा अन्ये तानि तानि व्याकरणानि रचयित्वा तत्र प्रकृतिप्रत्ययादिविभागञ्च कल्पयित्वा शिष्यान् प्रत्यर्थबोधोपायमाकलयाम्बभूवु नतु कुम्भकारो घटमिव ते सस्कृतशब्दान् रचयामासु । किन्तु स्थिताया एव नित्याया. सस्कृत-वाचो ऽनुशासनमेव कृतवन्त इति भाव· । अत एवेयं भाषा सर्वभाषामूलमित्यपि सूक्त भवति । प्रपञ्चितश्चायमर्थो वाक्यपदीयादौ मत्प्रणीते 'निरुक्तसारे' च ।

प्राकृत लक्षयति—'तद्भव इति । तस्मात् सस्कृतात् भव उत्पत्तिर्यस्य स तद्भवः 'प्राकृतक्रम'=अथमप्रकृतय प्राकृता तत्सम्बन्धित्वेन प्राकृतम् तस्य क्रमो व्यवस्था । वयन्तु—सस्कृतरूपाया प्रकृतेरुत्पन्नत्वात् प्राकृतमिति ब्रूम । सर्व प्राकृत सस्कृतस्यैवापभ्रश । सच 'तत्सम, देशी इति अनेक'=बहुविध स्मृत इति शेष । सक्षेपेण तु द्विविध – एक तत्सम=सस्कृतसदृश । द्वितीय देशी=तत्तद्देशव्यवहृत ।

यत्तु—'सस्कृतोत्पन्नत्वेन सस्कृतसदृशत्वेन तत्तद्देशव्यवहृतत्वेनानेको बहुविध' इत्याह कश्चित् तन्मन्दम् । सर्वासा प्राकृताना सस्कृतोत्पन्नत्वेन साम्ये सति उक्तरीत्या भेदत्रयकरणा-स्यायुक्ततरत्वात, वस्तुतस्त्वित्यादिस्वोक्तिविरोधाच्च ।

केचित्तु—'आर्षोत्थमार्षतुल्यञ्च द्विविध प्राकृत विदु' रिति भेदद्वयमाचक्षते ॥ ३३ ॥

[प्रकृष्टप्राकृतनिरूपणम्]

²महाराष्ट्राश्रयां भाषा प्रकृष्टं प्राकृतं विदु· ।
सागर सूक्तिरत्नाना सेतुबन्धादि यन्मयम ॥ ३४ ॥

प्राकृतमेव प्रपञ्चयति 'महाराष्ट्राश्रयाम इति । महाराष्ट्र दक्षिणापथवर्ती प्रसिद्धो देश ।

(प्र०)¹ सस्कृतस्य किं लक्षणम् ? कतिविधश्च प्राकृतम् ? तल्लक्षणश्च लिख ? (उ०) अस्य पृष्ठस्य प० ?

(प्र०)² प्राकृतेषु प्रकृष्ट प्राकृत सोपपत्ति ब्रूहि ? (उ०) अस्य पृष्ठस्य प० २७

तत्परिहारस्तु भिन्नसम्बन्धिगतत्वेन ज्ञेय । अत्र च वर्णनीय शरत्काल' तस्मिन् एकजातीययोरपि वलावलकारित्वेन विशेषप्रतीतिर्वैचित्र्यमावहतीत्यस्यालङ्कारत्वम्बोध्यम् । क्रियाविरोधश्चायम् । 'राजहसास्तु ते चञ्चुचरणैर्लोहितै सिता ' इत्यमर । 'राजहंसस्तु कादम्बे कलहसे नृपोत्तमे' इति [हैम] । हसाना राजा इति राजहस । 'राजदन्तादिषु परम्' [पा० २ । २ । ३१] अनेन 'हस' शब्दस्य परनिपात । 'चीयत इति कर्मकर्तरि' इति वामन [का० २ । सू० ४] ॥ ३३४ ॥

प्रावृषेण्यैर्जलधरैरम्बरं दुर्दिनायते ।
रागेण पुनराक्रान्तं जायते जगतां मन ॥ २३५ ॥

वस्तुगतगुणविरोधमुदाहरति—'प्रावृषेण्यै ' इति । [वर्षाकालवर्णनमिदम्] । 'प्रावृषेण्यै '=प्रावृषि भवै वर्षाकालिकै 'जलधरै '=मेघै. 'अम्बरम्'=व्योम [गगनम्] 'दुर्दिनायते'=आच्छन्न भवति [मेघच्छन्नेऽह्नि दुर्दिनम्' इत्यमर] श्यामल जायते इत्यत्र तात्पर्यम् । 'जगताम्'=लोकानाम् 'मन.'=हृदयम् 'पुन रागेण'=रागोऽनुराग लौहित्यञ्च तेन 'आक्रान्तम्'=व्याप्त 'जायते इत्यन्वितार्थ.

अत्र अनुरागे लौहित्यस्याऽभेदाध्यवसान कृतम् , तस्मात् श्यामलत्वलौहित्ययोर्गुणयोरेकजलधरजन्यत्वरूपस्य ससर्गस्य कीर्तन विरोध । परिहारस्तु—श्लेषेण कृत अनया रीत्या वर्णनीयस्य वर्षाकालस्य किमप्यौत्कर्ष्यं व्यज्यते ।

'प्रावृषेण्यै रिति । 'प्रावृष एण्य ' [पा० ४ । ३ ।] इति सूत्रेण शैषिक 'एण्य' प्रत्यय । 'दुर्दिनायते' इत्यत्र 'सुदिनदुर्दिननीहारेभ्यश्च' [वा० ३ । १ । १७] इत्यनेन 'दुर्दिन' प्रातिपदिकात् करोत्यर्थे क्यङ् । दुर्दिन करोतीति दुर्दिनायते ॥ ३३५ ॥

तनुमध्यं पृथुश्रोणि रक्तोष्ठमसितेक्षणम् ।
नतनाभि वपु स्त्रीणां कं न हन्त्युन्नतस्तनम् ॥ ३३६ ॥

अवयवगतगुणविरोधमुदाहरति–तनुमध्यमिति । 'तनुमध्यम्'=तनु सूक्ष्म मध्य कटिभागो यस्य तत् 'पृथुश्रोणि'=पृथु स्थूला विशाला च श्रोणि नितम्बो यस्य तत् , 'रक्तोष्ठम्'=रक्तो लोहित ओष्ठोऽधरो यस्य तत् , 'असितेक्षणम्'=असिते कृष्णे ईक्षणे नयने यस्य तत् , नतनाभि'=नता निम्ना गम्भीरा नाभिर्यस्य तत् , 'उन्नतस्तनम्'=उन्नतौ वर्त्तुलौ कठोरौ च स्तनौ कुचौ यस्य तत् एतादृशविशेषणोपेत 'स्त्रीणाम्' युवतीनाम् 'वपु =शरीरम् 'कम्'=जनम् 'न हन्ति'=नाकुलयति अपि तु सर्वमपि विह्वलीकरोति, तापयतीत्यर्थ ।

अत्र तनुत्वपृथुत्वयो रक्तत्वासितत्वयो नतत्वोन्नतत्वयोर्गुणयो परस्पर विरोध , तेन च वर्णने यत्नेन प्रस्तुताना स्त्रीणा किमपि वैचित्र्य द्योत्यते । परिहारस्तु तनुत्वादीनामाश्रयभूतावयवभेदाद् बोध्य । केचित्तु—बहूना गुणयुग्माना विरोधोपन्यासे वैचित्र्यातिशय इति इत्यनेन इत्थगुण विरोधप्रदर्शनार्थमुदाहरणमिति मन्यन्ते इति 'प्रभा' ॥ ३३६ ॥

अपशब्द म्लेच्छा माभूमेत्यध्येय व्याकरणम्' इत्येवमादिमहाभाष्यादावुक्तम् । तस्मात् संस्कृताद्भिन्ना सर्वा वाचा अपभ्रंशसंज्ञा:, यज्ञादिकर्मसु तासा निषेधादिति भाव: ।

काव्येषु 'अपभ्रंश' शब्द' पारिभाषिक । इदन्तु प्रासङ्गिकमुक्तम् ॥ ३६ ॥

[भाषाणा प्रयोगविषय]

[१]संस्कृतं सर्गबन्धादि प्राकृतं स्कन्धकादिकम् ।
आसारादीन्यपभ्रंशो नाटकादि तु मिश्रकम् ॥ ३७ ॥

कुत्र कुत्र का का भाषा' प्रयोक्तव्या इति तासा लक्ष्यमाह—'संस्कृतम्' इति । 'सर्गबन्धादि =[यदुक्त महाकाव्य तत्] 'संस्कृतम्'=संस्कृतभाषारचितमेव कार्यम् । नान्यभाषानिवेशस्तत्र कर्तव्य इत्यभिप्राय । उक्तञ्चाग्निपुराणे—

सर्गबन्धो महाकाव्यमारब्ध संस्कृतेन यत् ।
तद्भव न विशेत्तत्र तन्मय नापि किञ्चन ॥ इति ॥

आदिपदेन देवस्तुत्यादिखण्डकाव्यस्यापि ग्रहणम् तदपि संस्कृतेनैव कार्यम्।'स्कन्धकादिक प्राकृतम्'=स्कन्धक छन्दोविशेष तदादिर्यत्र तत्'प्राकृतम्' प्राकृतभाषयैव रचित भवति। यथा-सेतुबन्धादि । आदिना गलितकादीना परिग्रह । इदञ्च सट्टकस्यापि उपरूपकभेदस्योपलक्षकम्, तदपि प्राकृतमयमेव भवति। 'आसारादीनि'=आसारादिच्छन्दोविशेषनिबद्धानि 'अपभ्रंश' इति संज्ञया व्यवह्रियन्ते, अर्थात् 'अपभ्रंश' नामककाव्ये आसारादीनामेव छन्दसा निवेश कर्तव्य यथा-वर्णपराक्रमादि । 'नाटकादि =नाटकमादि यस्य तत् 'मिश्रकम्' नानाभाषामयत्वात् मिश्रकमङ्ग विज्ञेयम । 'तु रेवार्थे नाटकाद्येवेत्यर्थ । अर्थात् सट्टक विहाय नाटकनाटिकाप्रकरणादिषु रूपकभेदेषु सर्वत्र यथापात्रमनेका भाषा आश्रयितव्या भवन्ति । यथा वेणीसहाराद्य ।

[कथाबृहत्कथयोर्भाषाभेदनिरूपणम्]

[२]कथा हि सर्वभाषाभि संस्कृतेन च बध्यते ।
भूतभाषामयीं प्राहुरद्भुतार्थां बृहत्कथाम् ॥ ३८ ॥

'मिश्र' काव्यस्य लक्ष्यान्तरमाह—'कथा' इति । 'कथा =कथानामक गद्य पूर्वोक्तलक्षण 'सर्वभाषाभि '=सर्वाभिर्भाषाभि शौरसेन्यादिभि 'संस्कृतेन च'=देववाण्या च 'बध्यते'=रच्यते । अत सापि मिश्र काव्यमित्यर्थ 'हि' निश्चयार्थे । तथा च द्विविधा कथा—सर्वभाषामयी संस्कृतमयी चेत्यर्थ । कथाप्रसङ्गेन बृहत्कथानामक काव्य लक्षयति—भूतेति । 'भूतभाषामयीम् =भूतभाषा पैशाची भाषा तन्मयीं पैशाच्या भाषया रचितामित्यर्थ । 'अद्भुतार्थाम =अद्भुत अद्भुताख्यो रसरूपोऽर्थो यस्या तां अद्भुतरसभरिताम्

(प्र०)[१]कुत्र २ का २ भाषा प्रयोक्तव्या इति विवृणु ? । (उ०) अस्य पृष्ठस्य प० ५
(प्र०)[२]मिश्रकाव्यस्योदाहरणान्तर दर्शय ? । (उ०) अस्य पृष्ठस्य प० २२

[अथ वैदर्भीगौड्योः स्फुटो विवेकः]

अस्त्यनेको गिरां मार्गः सूक्ष्मभेदः परस्परम् ।
तत्र वैदर्भगौडीयौ वर्ण्येते प्रस्फुटान्तरौ ॥ ४० ॥

काव्य सप्रभेद प्रपञ्च्य गुणालङ्कारेषु निरूपयितव्येषु सौकर्याय तावत् रीतिं प्रदर्शयति 'अस्त्यनेक' इति । 'गिराम्'=काव्यवाचा 'परस्परम्'=अन्योन्यम् 'सूक्ष्मभेद'=परिपक्व बुद्धिगम्य स्वल्पो विशेष 'अनेक'=नानाविध [प्राचीनैरुक्त.] 'मार्ग'=पदविन्यासप्रकार रचनाप्रणाली 'रीति' सञ्ज्ञक इति यावत् 'अस्ति'=कविभिराश्रित इत्यर्थ । तत्र'=अनेकविधे मार्गे अर्थात् तेषु मार्गेषु मध्ये 'वैदर्भगौडीयौ'=वैदर्भी गौडी च एते द्वे रीती प्रस्फुटान्तरौ प्रकर्षेण स्फुट स्पष्टमन्तर भेदो [विशेषो] ययोस्तौ [मार्गौ] 'वर्ण्येते'=निरूप्येते 'मया' इति शेष ।

अयभाव —वामनेन तावत् 'रीतिरात्मा काव्यस्य' [काव्या० २।६] इत्युपक्रम्य 'विशिष्टा पदरचना रीति ' [२।७] इति च ता लक्षयित्वा 'सा च त्रेधा वैदर्भी गौडीया पाञ्चाली चेति [२ ८] इति त्रिविधो गिरा मार्ग. रीतिनामा प्रदर्शित. ।

सरस्वती कण्ठाभरणादिषु भोजराजप्रभृतिभिस्तु—

वैदर्भीचाथ पाञ्चाली गौडीयाऽवन्तिका तथा ।
लाटीया मागधी चेति षोढा रीतिर्निगद्यते । इति

षड् मार्गा निरूपिता ।

विश्वनाथश्च—साहित्यदर्पणे नवमे परिच्छेदे 'पदसङ्घटना रीतिरङ्गसंस्थाविशेषवत्' इत्युक्त्वा 'वैदर्भी चाथ गौडी च पाञ्चाली लाटिका तथा' इति चतुरो मार्गान्वर्णयत् । एषु [एवविधेषु] सर्वेष्वेव पक्षेषु ग्रन्थकारस्यास्वरस । तत्र बीजन्तु एतेषामन्योन्य सूक्ष्ममल्पमन्तर सुकुमारमतिभिर्विलक्षितुमशक्यमनुपयुक्तञ्चेति द्वावेव मार्गौ वैदर्भीगौडीयौ स्फुटभेदौ निरूपणयोग्याविति तावेवात्र दर्श्येते ।

तथाहि—पाञ्चालीमार्ग वैदर्भीगौड्योर्मध्यवर्ती उभयस्वरूप एव । लाटीमार्गस्तु वैदर्भीपाञ्चाल्योरन्तरालवर्त्ती । एवमन्यदपि । ततश्च किञ्चित् किञ्चित् भेददर्शनस्य बालबुद्धिव्यामोहकरत्वान्न फल पश्याम इति दण्डिनोऽभिप्राय । ४० ॥*

(प्र० " रीतेर्मुख्यौ भेदौ कौ एत ' इतरे भेदा दण्डिना कुतो नाश्रिता ' (उ०) अस्य पृष्ठस्य प० :

* एतद्विषयक प्रपञ्च आग्नेयपुराणेऽपि द्रष्टव्य ।

भोजराज इत्थमप्याह—

वैदर्भादिकृत पन्था काव्ये मार्ग इति स्मृत ।
रीङ् गताविति धातो सा व्युत्पत्त्या रीतिरुच्यते ॥ इति ॥

रियन्ते परम्परया गच्छन्ति अनयेति करणसाधनोऽय रीतिशब्दो मार्गपर्याय । '**गुणवत्पदरचना रीति**रिति स्फुट रीतिलक्षणम् ।

[वर्णनियमे चतुर्वर्णचित्रस्योदाहरणम्]

रे रे रोरूरुरूरोरुगागोगोऽगाङ्गगोऽगगु ।
किं केकाकाकुक काको मामा मामम मामम ॥ ९२ ॥

वर्णनियमेषु आदौ चतुर्वर्णमुदाहरति—'रे रे' इति । [काचित् बहुपण्या वाराङ्गना स्वाभिलाषिणम [अल्पधनम्] भिल्ल प्रति वक्ति] 'रे रे' । इति सम्बोधन नीचार्थकम् । रे । रे । मामम !'=मायां श्रियां मम ममत्व यस्य तत्सम्बोधनम् 'मम' इति विभक्तिप्रतिरूपकमव्ययम् । भावप्रधानो निर्देश इति । दरिद्रत्वात धनस्य व्ययकरणे कृपण ! । अथवा—'मामम !'=मायां लक्ष्म्याम् अममत्व यस्य तत्सम्बोधनम् श्रीविहीनेत्यर्थ । एतादृशो दरिद्रतरस्त्वम् 'मा मा'=न न । न कदापीत्यर्थ । 'माम् अम'= उपसर्प । 'अम' गत्यर्थ । 'मामा' इति निषेधार्थे सम्भ्रमे द्विर्वचनम् अव्ययञ्च तत् । अयमर्थ' चतुर्थपादस्य । यत —'काकः'=करट 'किम् केकाकाकुक '=*केका मयूरवाणी ['केका वाणी मयूरस्य' इत्यमर] तस्या काकु मदजनितो विकारविशेष [काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वने इत्यमर] तां [केकाकाकु] कायति शब्दायते शब्देन प्रकटीकरोति इति 'केकाकाकुक ' मयूरवाणीसदृशवाणीकथनकाम । 'कै' शब्दे अस्माद्धातो 'ड ' प्रत्यय । अर्थात यथा वायसो मयूरकेकोच्चारणे साभिलाषोऽपि व्यर्थमनोरथो जायते तथैव त्वमपि मयि व्यर्थसकल्प इति ज्ञेयम् । इति तृतीयपादार्थ । अपि चाधमकार्यकारित्वादपि त्व सर्वथा ममानर्ह इत्याह—'रोरूरुरूरोरुगागोगः '=' रोरूयते'=त्रासेन पुन पुन अतिशयेन वा रौतीति रोरू ' यङ्लुगन्तात् 'रु' शब्दे इत्यस्मात् धातुम त्रात् क्विब्विधानात् 'क्विप्' । 'यस्य हलः' [६ । ४ । ४९] इति यलोपे रूपम् । रोरूश्चासौ रुरु मृग इति 'रोरूरु ' तस्य 'उरस ' वक्ष स्थलस्य या 'रुक्' प्रक्षिप्तशरकृतवेधोत्पन्ना पीडा तद्रूपम् यत् 'आग·' अपराध [आगोऽपराधो मन्तुश्चेत्यमर] पाप विशेष । तत् [आगसम्] गच्छति प्राप्नोति इति 'रोरूरूरोगागोग·' पूर्ववत् गमेर्ड । 'सारस्वतास्तु'—एतस्मिन्विषये **'नाम्नि च'** इति सूत्र पठन्ति । कर्मादिनियमरहितनाममात्रोपपदाद् धातो कर्तरि भावे च 'ड 'प्रत्ययो भवतीत्यर्थः] निरपराधप्राणिहिंसाकरत्वात् पापाचारीत्यर्थ । एवम्भूतस्त्व नीचकर्मकृत् ततोऽपि न मम योग्य इति भाव इति प्रथम पादार्थ । किञ्च—त्वम् 'अगाङ्ग '=अग पर्वत तस्य अङ्गम् एकदेश त गच्छतीति 'अगाङ्ग ' पर्वतीय अतो नैव नागर इत्यतोऽपि ममानर्ह 'असि' इति शेष । अपि च—'अगगु '=असि । न गच्छति प्राप्नोति प्राकरणिक विषय पूर्वोत्तरसम्बन्ध वेति 'अगा' असम्बद्धा । 'गौ ' वाक् । अगा गौ यस्य सा अगगु 'गोस्त्रियोरुपसर्जनस्य'

---

* के मूर्धनि कायति । कै शब्दे । 'अन्येभ्योऽपि दृश्यते [वा० ३ । २ । १०१] इति 'ड ' । 'हलदन्तात् सप्तम्या ' [६ । ३ । ९] इत्यलुक् ।

[श्लेषस्य लक्षणोदाहरणे]

श्लिष्टमस्पृष्टशैथिल्यमल्पप्राणाक्षरोत्तरम् ।
शिथिल मालतीमाला लोलालिकलिला यथा ॥ ४३ ॥

श्लेषादीनां क्रमेण सलक्ष्य लक्षणमाह–'श्लिष्टम्' इति । 'अल्पप्राणाक्षरोत्तरम्'–अल्प प्राण उच्चारणप्रयत्नो येषां तानि अल्पप्राणानि, तानि च अक्षराणि अल्पप्राणाक्षराणि, एतानि उत्तराणि प्रधानानि अधिकानि यत्र तत् तादृशम् । अल्पप्राणाश्च स्वरा वर्गाणा विषमा वर्णा यरलवाश्चेति ज्ञेयम् । 'शिथिलम्'=अनुत्कटमपि 'अस्पृष्टशैथिल्यम्'=न स्पृष्ट प्रकाशित शैथिल्य यस्य तत् अर्थात् शिथिलस्यापि यस्य रचनाविशेषेण शैथिल्य न लक्ष्यते तादृश काव्यात्मक वाक्य 'श्लिष्टम्'=श्लेषगुणोपेत भवतीति शेष । एवञ्च अल्पप्राणादिवर्णघटितरचनाविशेषवत्त्वं **'श्लेषत्व'** मिति श्लेषगुणलक्षणमायात भवति । उदाहरति 'मालतीमाला' इति । 'लोलालिकलिला'=लोलै इतस्तत समापतद्भिः चञ्चलैरिति यावत् अलिभि षट्पदै कलिला आकुला व्याप्तेत्यर्थ , एवम्भूता 'मालतीमाला'=मालत्या जाते चम्पाया इति यावत् माला दाम 'वर्त्तते' इति शेष 'सुमना मालती जाति' रित्यमर ।

अत्र मकाराद्या वर्णा अल्पप्राणा । एतैर्घटितत्वात् वाक्य [काव्य] कोमलमप्यनुप्रासमहिम्ना किञ्चिद् गाढमिवाभाति । अत एवाय श्लेषो गुण । मकारलकारयोरसकृदावर्त्तनात् वृत्त्यनुप्रासश्च । स्वभावस्पष्ट विचारगहन वच 'श्लिष्ट'मिति **भरत** ।

प्रसाद । 'महिषा निपानसलिलम्' इत्यत्र मसृणत्वात् **श्लेषः** । 'गाहन्ताम्' इत्यारभ्य समानेन मार्गेण उपक्रमोपसहारकरणेन मार्गाभेदरूपा **समता** । 'गाहन्ताम्' इत्यारोह 'महिषा' इत्यवरोह इति **समाधि** । 'शृङ्गैर्मुहुस्ताडितम्' इति पृथक्पदत्वात् **माधुर्यम्** । 'रोमन्थमभ्यस्यतु' इति दन्दश्यानरठत्वात् **सौकुमार्यम्** । 'शिथिलज्याबन्धमस्मद्धनु ' इत्यत्र बन्धस्य विकटत्वात् **उदारता** । एव पदानामुज्ज्वलत्वात् **कान्तिः** । अर्थाभिव्यक्तिहेतुत्वात् **अर्थव्यक्ति** । एवमनया रीत्या सर्वत्र वैदर्भी रीतिरूहनीया । गौड्या उदाहरण यथा—

दोर्दण्डाञ्चितचन्द्रशेखरधनुर्दण्डावभङ्गोद्यत—
ष्टङ्कारध्वनिरार्यबालचरितप्रस्तावनाडिण्डिम ।
द्राक्पर्यस्तकपालसम्पुटमितब्रह्माण्डभाण्डोदर—
भ्राम्यत्पिण्डितचण्डिमा कथमहो नाद्यापि विश्राम्यति ॥

रामेण खण्डपरशोर्धनुषि आकृष्टे तद्भङ्गध्वनिविषये लक्ष्मणस्योक्तिरियम् । अत्र बन्धस्य गाढत्वोज्ज्वलत्वयोरुत्कटत्वादुत्वणावोज कान्तिगुणौ समासभूयस्त्वञ्चेति गौडीया रीति

(प्र०, श्लेषगुणस्य किं लक्षणम् ? किमुदाहरणम ? कतिविधश्च स ? सोयं वैदर्भमार्गानुसारमुदाहर्त्तव्य ? (उ०) अस्य पृ० २

इति निश्चितोऽयमर्थः । यदा वशीकृतेन्द्रियगणानां प्रस्तूयते तदा त्वां विहाय अनामिका ऽन्यस्मिन् जन्तौ न पततीति भावः । 'भूतं क्ष्मादौ पिशाचादौ जन्तौ क्लीबम्' इति मेदिनी। अत्र प्रथमचतुर्थयोरभ्यासः ॥ ५९ ॥

[द्वितीयतृतीयपादगतस्याभ्यासस्योदाहरणम्]

यशश्च ते दिक्षु रजश्च सैनिकाः
वितन्वतेऽजोपम ! दंशिता युधा ।
वितन्वतेजोऽपमदं शितायुधा
द्विषाञ्च कुर्वन्ति कुलं तरस्विनः ॥ ६० ॥

द्वितीयतृतीयपादगमभ्यासमुदाहरति—'यश' इति । [कस्यचिज्जयेच्छो राज्ञो गुणकीर्त्तनामिदम्] हे ! 'अजोपम' !=अजस्य विष्णोरुपमा सादृश्यं यस्य तत्सम्बुद्धौ विष्णुसम! राजन् ! अथवा 'हरसम' ! [अजा विष्णुहरच्छागाः' इत्यमरात्] किं वा—'अजः' रघोः पुत्रः तत्सदृश ! 'ते'=तव 'सैनिकाः'=योद्धारः 'युधा'=सङ्ग्रामेण [कृत्वा] 'दिक्षु'=प्राच्यादिषु दशस्वपि दिशासु 'यशः च'=कीर्त्तिम् 'रजः च'=स्वपादोत्थितधूलिञ्च 'वितन्वते'=विस्फारयन्ति । कथम्भूताः सैनिकाः—'दंशिताः'=कवचिनः तथा-'शितायुधाः'=शितानि [प्रत्यहं मृगाकरणात्] तीव्राणि आयुधानि शस्त्राणि येषां ते तादृशाः । तथा—'तरस्विनः'=वेगवन्तः पराप्रधृष्या इत्यर्थः । किञ्च—एवम्भूता ते 'द्विषाम्'=शत्रूणाम् 'कुलञ्च'=सङ्घमपि 'वितनु'=शरीरहीनम् 'अतेजः'=हतप्रभम् 'अमदम्'=गर्वरहितञ्च 'कुर्वन्ति'=विदधते । अत्र—द्वितीये तृतीये च पादे अभ्यासः ॥ ६० ॥

[तस्यैव द्वितीयचतुर्थपादगतस्योदाहरणम्]

बिभर्त्ति भूमेर्वलयं भुजेन ते
भुजङ्गमोऽमा स्मरतो मदाश्रितम् ।
शृणूक्तमेकं स्वमवेत्य भूधरं
भुजङ्गमो मा स्म रतो मदाश्रितम् ॥ ६१ ॥

तत्रैव द्वितीयचतुर्थपादगतमुदाहरति—'बिभर्त्ति' इति । [कस्यचिन्नृपतेः स्तवनमिदम्] हे राजन् ! 'ते'=तव 'भुजेन'=बाहुना 'अमा'=समम् 'भुजङ्गमः'=अनन्तः शेषो भगवान् 'भूमेः वलयम्'=पृथिव्याः चक्रं [मण्डलम्] 'बिभर्त्ति'=धारयति । अनन्तवत् त्वं भुजेनापि भूभारमारोपितवान् न बिभेय इत्याह—'स्मरतः'=उभयोर्वृत्तान्तं विदितवतः 'मम'='आश्रितम्'=युक्तिमदिदं 'एकम् उक्तम्'=वचनम् 'शृणु'=निशामय । किन्तदित्याह—'स्वम्' इति [त्वम्] 'स्वम्'=स्वकीयम् 'भुजम्'=बाहुम् 'भूधरम्'=पृथिव्या धारकम् [अत एव महान्तं महीध्रवत् उन्नतम्] 'अवेत्य'=अवगत्य 'रतः'=प्रसन्नमनाः सन् 'मदाश्रितम्'=मदाश्रयम् [यदम] 'मदम्'=अहङ्कारम् 'मा स्म गमः'=मा यासीरित्यर्थः ।
अत्र—द्वितीये चतुर्थे च पादेऽभ्यासः ॥ ६१ ॥

गौरव गाढत्व तस्मात् रचनागाढत्वज्ञानाद्धेतोरित्यर्थ । 'गौडे'=गौडदेशभवै कविभिरपि 'तत्'=तादृश 'मालतीमाला' इत्यादि श्लेषगुणोपेत काव्यम्, अर्थात् श्लेषस्योदाहरणम् 'इष्टम्'=वाञ्छित तम् । अनुप्रासप्रिया गौडा कवय इति भाव ।

ननु—एव वैदर्भीगौडीरीत्योरभेद प्राप्त इत्याशङ्कायामाह—'वैदर्भै'रिति । अत्र 'इति' इत्यय शब्द अप्यर्थ । ततश्चायमर्थ —वैदर्भै=विदर्भदेशभवै कविभिरपि 'मालती* दाम लङ्घित भ्रमरै' इति वाक्य [काव्यम्] इष्ट श्लेषगुणघटितत्वेन स्वीकृतमित्यर्थ. । अय भाव'—

गौडा अनुप्रासस्थल एव श्लेष मानयन्ति, वैदर्भास्तु क्वचित् अनुप्रासशून्यस्थलेऽपि श्लेष स्वीकुर्वते, तथाच न वैदर्भीगौडीरीत्योरभेद । अत्र त्रयो मकारा', द्वौ च तकारौ स्त । तेषामावृत्तावपि व्यवधानस्थितत्वात् चमत्काराभावान्नानुप्रास तथापि श्लेषो गुणो वर्त्तते इति वैदर्भमतमित्याशय । 'अशिथिल वच श्लिष्ट' मिति दण्ड्यनुयायिनां पन्था ।

अयञ्च श्लेषो गुण' शब्दगत । केचित्तु अन्यथापि लक्षयन्ति—

यत्रैकपदवद्भाव' पदाना भूयसामपि
अनालक्षितसन्धाना स श्लेष परमो गुण । इति ।

उदाहरन्ति च यथा—'अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराज ' इत्यादि । वामनोप्याह—'मसृणत्व श्लेष ' [काव्याल० १।१०] इति । 'यत्र हि व्यासेऽपि समासवदवभास स श्लेष' इति तु निष्कर्ष' । एवमाद्यनुप्रासाभावस्थलेऽपि वैदर्भाणां श्लेषस्वीकार इत्युक्त न विस्मरणीयम् । शिष्यबुद्धिवैशद्यार्थमस्माक क्वचित् पुनरुक्तमपि दोषो न मन्तव्य ॥ ४४ ॥T

---

* भ्रमरै=अलिभि मालतीदाम=सुमनोमाला लङ्घितम्=आक्रान्तमिति अन्वितार्थ ।

।केचित्तु—क्रमकौटिल्यानुल्वणोपपत्तियोगरूपघटनात्मा श्लेष [अर्थश्लेष] इत्याहु । उदाहरन्ति च—

दृष्ट्वैकासनसंस्थिते प्रियतमे पश्चादुपेत्यादरात्
एकस्या नयने पिधाय विहितक्रीडानुबन्धच्छल ।
ईषद्वक्रितकन्धर सपुलक प्रेमोल्लसन्मानसा—
मन्तर्हासलसत्कपोलफलकां धूर्त्तोपरा चुम्बति ॥

अत्र दर्शनादय क्रिया । उभयसमर्थनरूप कौटिल्यम् । लोकसव्यवहाररूपमनुल्वणत्वम् एकासनसंस्थिते' 'पश्चादुपेत्य, इत्यादि चोपपादकम् इत्येषा योग । विचार्यमाणे तु अस्मदुक्तार्थश्लेपलक्षणान्न वहन्तरमाभाति । आह च वामन—'घटना श्लेष ' इति । एतच्चाधुनिक विश्वनाथप्रभृतिभिर्निराकृत. ।

प्रसादगुणे गौडाना मतभेद दर्शयति—'व्युत्पन्नम्' इति। 'गौडीयै'=गौडीरीतिप्रधानै कविभि 'नातिरूढमपि'=नातिप्रसिद्धमपि अर्थात् निहितार्थतादिदोषदुष्टमपि 'व्युत्पन्नमिति'= व्युत्पत्तियोगार्थं तद्युक्त व्युत्पन्न योगार्थघटितमपि अर्थात् बन्धस्य गौरवप्रतीतिप्रतिभास-कतया वचित्र्यवत् इति कृत्वा 'इष्यते'=मन्यते 'प्रसादवद वाक्य' मिति शेष ।

अयमाशय —यदि काव्यं शिथिलबन्ध भवेत् तदा तत्र निहितार्थत्वादिदोषसत्त्वे नैव प्रसाद । उक्तदोषाभावे सति शिथिलबन्धे प्रसादो गुणो भवतु नाम । यदि तु बन्धस्य समासादिवशात् गाढता स्यात् तदा निहितार्थत्वादिदोषाणां सद्भावेऽपि तत्काव्य वैचित्र्य-मावहत्येवेति गौडाना कवीनां मतम् । एतद्विपरीतन्तु वैदर्भाणाम् ।

परमसारस्तु—शिथिलबन्धे निहितार्थाद्या दोषा भवितुमर्हन्ति, गाढबन्धे तु सन्तो-ऽपि ते काव्य दुष्ट कर्तु न समर्था इत्यनित्यदोषास्ते इति गौड मतम्* । तदेतदुदाहरणेन स्पष्टीकरोति 'यथा' इति । 'अनत्यर्जुनाब्जन्मसदृक्षाङ्क'=न अत्यर्जुनमिति अनत्यर्जुन नातिश्वेत किञ्चिन्नीलमित्यर्थ एवम्भूतं यत् अब्जन्म=नीलकमलमिन्दीवरं तस्य सदृक्ष सम अङ्क कलङ्को यस्य स तादृश 'वलक्षगु'=वलक्षा धवला गाव किरणा यस्य स चन्द्र इत्यर्थ 'अस्ति' इति शेष ।

अत्र 'अर्जुन' शब्द पाण्डवे कार्त्तवीर्ये च [सहस्रबाहौ] प्रसिद्ध शुक्ले वर्णे तु यद्यपि वाचक तथापि अप्रसिद्ध [एव] उभयार्थोपि अर्जुनशब्दोऽप्रसिद्धार्थे प्रयुक्तत्वात् निहितार्थ-दोषयुक्त । 'अब्जन्म' इति शब्दोपि न केनचित् कविना इन्दीवरे कमले प्रयुक्त, केवलम् 'अद्भ्यो जन्म यस्य' इति योग मत्वैवात्र विन्यस्त, एवमय शब्द 'अप्रयुक्त' दोषदुष्ट । किञ्च—अनत्यर्जुनाब्जन्म इव अङ्को यस्य इत्युपमागर्भितबहुव्रीहिसमासकरणेनापि तादृशार्थ-प्रतीतौ 'सदृक्ष' पदमधिक [वृथैव] इति, तस्मादत्र 'अधिकपदत्व मपि दोष । 'अनत्यर्जु-नाब्जन्म इति श्रुतिकटुश्चाय शब्द । एव 'वलक्ष' शब्दोपि अप्रयुक्त श्रुतिकटुश्च। 'गो' शब्दो यद्यपि वृषभादौ प्रसिद्ध किरणे †पठितोप्यप्रसिद्ध इति निहितार्थ । एव दोषप्रचुरमपि वाक्यमिद [काव्यम्] गाढबन्धप्रभावात् विच्छित्तिविशेषतामावहतीति काव्यत्वेन स्वीकुर्वन्ति गौडा ।

*काव्यप्रकाशकारमते काव्यसामान्यलक्षणे 'अदोषा' विति पद सर्वथा सुसङ्गतमिति पण्डितरूपा सूक्ष्मयेक्षिकयाऽऽकलयन्तु । प्रपञ्चस्तु मया तत्प्रभायां कृत ।

† इदन्तु मया ग्रन्थानुरोधेन व्याख्यातम वस्तुतस्तु गवादिशब्दा बहुषु स्थलेषु महा-कविभि किरणार्थेऽपि प्रयुक्ता तस्मादेतेषामप्रसिद्धार्थाभिधानमदुष्टमेवाभाति । ग्रन्थ-गौरवभयादृहु लिखितु योग्यत्वेऽपि दिङ्मात्रमुदाहराम । तथाहि—

विवस्वतानायिषतेव गाव स्वगोसहस्रेण सम जनानाम् ।
गावोऽपि नेत्रापरनामधेयास्तेनेदमान्ध्य खलु नान्धकारै ॥

इत्यादौ किरणार्थेऽपि गोशब्दो महाकविना माघेन प्रयुक्त इति कथमस्याप्रसिद्धत्व नाम । एवमाद्यन्यदप्यूह्यम् ।

वृत्तिमल्लिकादीनि।[१] **वृत्तय** कैशिकीसात्त्वत्यारभटीभारत्य चतस्र तासाम् अङ्गानि नर्मनर्मस्फूर्जादीनि षोडश । **लक्षणानि** भूषणाक्षरसंघातादीनि षट्त्रिंशत् । आदिपदेन नाट्यालङ्कारवीथ्यङ्गलास्याङ्गानां ग्रहणम्, ते च आशीरादयः त्रयस्त्रिंशत् वीथ्यङ्गानि उद्घात्यकादीनि त्रयोदश लास्याङ्गानि गेयप्रभृतीनि दश । एतत्सर्वम् 'आगमान्तरे'=ग्रन्थान्तरे भरतादिरचिते 'व्यावर्णितम्'=नाट्यशोभाकरत्वेन सम्यग्व्याख्यातम्।तत् च इदम् 'न'=अस्माकम् 'अलङ्कारतया एव'=अलङ्कारत्वेनैव रूपेण 'इष्टम्'=वाञ्छितम् अर्थात् उक्तेष्वस्मदलङ्कारेषु तेषां यथायथमन्तर्भाव तत्र कानिचित् स्वभावाख्यानप्रभृतिष्वन्तर्भवन्ति, कानिचिच्च भाविकेऽस्मिन्, तच्च दशरूपकादिदत्तोदाहरणेषु स्वबुद्ध्योहनीयम् । एते च ग्रन्थबाहुल्यभिया मयात्र न प्रपञ्चिता । एतेषां प्रपञ्चो दशरूपकादौ द्रष्टव्य, । मयापि च तद्व्याख्यायां सर्वमिद स्फुटीकृतम् ॥ ३६७ ॥

[परिच्छेदार्थोपसंहार]

पन्था स एष विवृत परिमाणवृत्त्या
संहृत्य विस्तरमनन्तमलङ्क्रियाणाम् ।
वाचामतीत्य विषयं परिवर्त्तमानान्—
अभ्यास एव विवरीतुमलं विशेषान् ॥ ३६८ ॥

इत्याचार्यदण्डिन कृतौ काव्यादर्शे
अर्थालङ्कारविभागो नाम
द्वितीय परिच्छेद ।

परिच्छेदार्थमुपसंहरति—'पन्था' इति । 'अलङ्क्रियाणाम्'=पूर्वोक्तस्वभावोक्त्यलङ्काराणाम् 'अनन्तम्'=सीमारहितम् 'विस्तरम्'=प्रपञ्चम् 'परिमाणवृत्त्या'=परिमितत्वेन 'संहृत्य'=संक्षिप्य संगृह्येति यावत् 'एष'=प्रख्यात कविसमाजे 'पन्था'=मार्ग अलङ्कारनिरूपणं, 'विवृत'=स्फुटीकृत । नन्वनन्तानां विशेषाणां प्रजापतिनापि स्फुटीकर्तुं शक्यत इति भाव । ननु तर्हि तेषां विशेषज्ञानाभावे वैयर्थ्यमेव शास्त्रस्य, तद्विशेषज्ञानस्यापूर्णविज्ञानत्वे यायदृष्याह—'वाचाम्' इति । 'वाचाम्'=वाणीनाम 'विषयम्'=अभिधानम् 'अतीत्य'=अतिक्रम्य 'परिवर्त्तमानान्'=स्थितिभाजः 'विशेषान्'=

---

१ उक्तञ्चाभियुक्तैः —

भारती कैशिकी चैव सात्त्वत्यारभटी पुन ।
रसे रसे च वर्तन्ते वृत्तय सर्वत्र भारती ॥

—/—

इति '[illegible]' टीके द्वितीय परिच्छेद ॥

—•—

[समताया लक्षणम्]

'समं बन्धेष्वविषमं ते मृदुस्फुटमध्यमा' ।
बन्धा मृदुस्फुटोन्मिश्रवर्णविन्यासयोनय ॥ ४७ ॥

समतां नाम गुण लक्षयति—'समम्' इति । 'बन्धेषु'=गुम्फेषु संघटनासु इति यावत्, 'अविषमम्'=न विषम अविषमं समानम् अर्थात् उपक्रमोपसहारयोस्तुल्य [यद् वाक्य] तत् 'समम्'=समताख्यगुणोपेतं भवतीत्यर्थ । 'उपक्रमोपसहारयो समानरचनावत्त्व **समता**' इति निष्पन्न समतालक्षणम् । 'ते'=बन्धा 'मृदुस्फुटमध्या' इति त्रिविधा भवन्ति । मृदु =कोमल । स्फुट =विकट तीव्र इति यावत् । मध्यम =उभयस्वरूप मृदुस्फुटतात्मक । बन्धानामुक्तस्वरूपे कारणमाह—'मृदु'० इति । मृदुश्च स्फुटश्च उन्मिश्रश्च ते मृदुस्फुटोन्मिश्रा ते च ते वर्णा 'द्वन्द्वान्ते श्रूयमाणं पद प्रत्येकमभिसम्बध्यते' इति नियमेन मृदुवर्णा =ह्रस्वस्वराद्या 'स्फुटवर्णा =दीर्घस्वराद्या , उन्मिश्रवर्णा =मृदुस्फुटाः मृदुस्फुटोन्मिश्रवर्णाना विन्यास =रचना योनिः=कारण येषां ते बन्धा मृदुस्फुटमध्यमा भवन्तीति स्पष्टार्थ । अय समताख्यो गुण शब्दनिष्ठ । यदाह वामन —'मार्गाभेद समता' [का० सू० १ । ११] आदिमध्यावसानेष्वैकरूप्य अर्थात् येन मार्गेण उपक्रमः तस्यैव [श्लोके प्रबन्धे च] त्यागाभाव समता । उदाहरण यथा मम 'श्रीकृष्णस्तवकशतके'—

कान्ताकटाक्षविशिखा नहि वेधयन्ति शान्त्यादिनिर्मलगुणा नच दूरयन्ति ।
तास्ताम्नरान्नहि यमा अपि खेट*यन्ति ये कृष्णमञ्जुलसुधां नयनै पिबन्ति ॥

अत्रोपक्रमादासमाप्ति स्फुटबन्धस्य निर्वाहात् समता ।*।

(प्र०) समताया [समतागुणस्य] लक्षण भेदमुदाहरणञ्च स्पष्टीकुरु ?

(उ० अस्य पृ० ५० ?

ननु—णाविष्ठवद्भावे 'स्थूलदूर०' [६।४।१५६] इत्यादिना गुणलोपयो कृतयो 'दवयति' इति भवितव्यमिति चेन्न, 'प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च' इत्यत्र बहुलग्रहणात् स्थूलदूरादिसूत्रेण यद्विहित तन्न भविष्यति । उक्तञ्च वामनेन—'दूरयतीति बहुलग्रहणात्' [का० सू० अ० ? । ७८] इति ।

*भक्षयन्ति । खेट' भक्षणे । चुरादि ।

*आह च वामन —

प्रतिपाद प्रतिश्लोकमेकमार्गपरिग्रह ।
दुर्बन्धो दुर्विभावश्च समतेति मतो गुण ॥ इति

अत्र [कारिकाया] वर्णशब्दो ऽसमासमध्यमसमासदीर्घसमासानामप्युपलक्षणम् । उक्तञ्च—

असमासा समासेन मध्यमेन च भूषिता ।
तथा दीर्घसमासेति त्रिधा सद्घनोदिता ॥ इति ॥

मूलग्रन्थे तत्र तत्र [शृङ्गाररसाद्युदाहरणे] न कस्यापि रसस्येतराङ्गत्व कथमप्यवगन्तुम रसवतो वर्णन प्रस्तुत्य तदुदाहरणाप्रदर्शन ग्रन्थकारस्य ग्रन्थनन्यूनता स्फुट प्रतीयमाना कथ वायन । शृङ्गारादीनां स्वरूपमेवात्रावतारित दण्डिना, तदङ्गत्वे [रसवदलङ्कारत्वे] उदाहरणानि ग्रन्थगौरव मत्वा ग्रन्थान्तरतो वा तेषामवसायं हृदि कृत्वा नेह प्रपञ्चितानि इति सम्भाव्येतापि, । मन्ये तु—[कदाचित्] रसवति काव्य एव गौण्या भावनया रसवद लङ्कारव्यवहारो दण्डयाचार्याणामिति, 'इह त्वष्ट रसायत्ता रसवत्ता स्मृता गिराम्' इति वक्ष्यमाणस्पष्टोक्ते, तदत्र विपश्चिद्वर्या युक्तायुक्ते स्वयमप्यामालोचयन्तु । मया तु गुरुभावितान्त.करणेन यथामति विवरीतम् ।

परमिदमन्यदपि विभाव्यम्—किं सर्वत्र सर्वथा सर्वदा प्रतीयमानस्य सर्वस्य [व्य ङ्ग्यमात्रस्य एव अलङ्कार्यत्वम [स्वप्रधानत्वम् ?] अथवा तादृश रसादेरेव ! । तत्र न तावदाद्य' पक्ष चोदक्षम —समासोक्त्यप्रस्तुतप्रशसापर्यायोक्तप्रभृतिस्थले मुख्यतयैव प्रतीयमानाना वस्त्वलङ्काराणामपि अलङ्कारतयैव स्वीकारात् । ननु तत्तत्स्थले वाच्यार्थस्यैव प्राधान्य, प्रतीयमानानां वस्त्वलङ्काराणां नैव तत् तस्मादप्रधानभूतानामलङ्कारत्वमेवेति चेत् ? न, व्यङ्ग्यमात्रस्य प्रधानताया अनुभवसिद्धत्वेनापलपितुमशक्यत्वात् । नच पर पक्ष –सामान्यत काव्यात्मत्वेन स्वीकृतानां वस्त्वलङ्काररसादिव्यङ्ग्यानां मध्ये वस्त्वल ङ्काराणामलङ्कारत्वम् रसादीनां नियमेनालङ्कार्यत्वमेवेति विनिगमनाविरहात् । तस्माद् व्यङ्ग्यतयाऽभिमितानां वस्त्वलङ्काराणां रसादीनाञ्च काव्यशोभाजनकत्वेनालङ्कारत्व युक्तम् गुणप्रधानमिति प्राचां सरणिरेव साधीयसीत्यपि केचित् । अधिकन्तु—'काव्यप्रकाशप्र भाया' मानोऽन्तिमस्माभिरिति तत एव करोहृत्य निरीक्षणीयम् ॥ २८१ ॥

[अथ रौद्रो रस]

निगृह्य केशेष्वाकृष्टा कृष्णा येनाग्रतो मम ।
सोऽयं दु शासन पापो लब्ध किं जीवति क्षणम ॥२८२॥

भ्रातृस्नुदात्त रौद्ररसमुदाहरति—'निगृह्य' इति । 'येन मम अग्रत '=पुरत माम नादृत्येत्यर्थ. । 'कृष्णा'=द्रौपदी 'केशेषु=शिरोरुहेषु 'निगृह्य'=नितरां गृहीत्वा 'आकृष्टा'= आकृष्टा 'स अयम् पाप '=दुष्ट. 'दु शासन '=दुर्योधनानुज 'मया'=भीमेन 'लब्ध '=प्राप्त 'क्षण जीवति'=प्राणिति 'किम्'=नैव जीवति [जीविष्यति] इत्यर्थ ॥ २८२ ॥

'उत्स प्रस्रवण वारिप्रवाहो निर्झरोझर' इत्यमर । 'चन्दनप्रणयोद्गन्धि' इति ॥

चन्दनम्=गन्धसार तस्य प्रणय =ससर्ग तेन उद्गन्धि =उद् अधिक गन्धो यस्य उत्कटगन्धवान् मन्द =मन्दगमन. कोमलस्पर्शो वा मलयानिल 'अस्ति' इति शेष ।

अत्र मिश्रवर्णो मध्यमसमासघटनावत्त्वात् मध्यमो वन्ध इति तृतीया 'मध्यमवन्धगा' समता ।

'उद्गन्धि' इत्यत्र वहुव्रीहौ 'गन्धस्येदुत्पूतिसुसुरभिभ्य' [५।४।१३५] इति पाणिनिसूत्रेण उद् परस्य गन्धस्येकारोन्तादेश । 'गन्धो गन्धक आमोदे लेशे सम्वन्धगर्वयो' इति विश्व ।

एव त्रिविधां समता लक्ष्यलक्षणाभ्या निरूप्य गौड्यां रीतौ तस्या भेद दर्शयति— 'स्पर्धते' इति । 'रुद्धमर्द्धैर्य'=रुद्धं प्रतिवन्धित स्तम्भता नीत मम धैर्यं धीरता येन तादृश मलयमारुत [इति पद पूर्वतोऽनुवर्त्तनीयम्] 'वररामामुखानिलै'=वरा उत्तमाश्च ता रामा. सुन्दर्य इति वररामा *पद्मिन्य स्त्रिय तासा मुखानिलै मुखोद्गते श्वासगन्धसमीरणै. 'स्पर्धते=समता यातीत्यर्थ । कस्यचिद् विरहिण उक्तिरियम् ।

अत्र प्रथमपादे वन्धस्य स्फुटत्व द्वितीयपादे तु मृदुत्वमिति उपक्रमोपसहारयोर्भिन्नभिन्न-वन्धकत्वान्नास्ति दर्शितलक्षणा समता ।

एतदेवोपपादयति—'इत्यनालोच्य' इति । 'इति'=एवमुक्तप्रकारेण 'स्पर्धते' इति श्लोकार्धेन दर्शित 'वैषम्यम्'=भेदम् अर्थात् समताविपरीत्यजनित दोषम् 'अनालोच्य'= अगणयित्वैव 'अर्थालङ्कारडम्वरौ=अर्थाना मृदुविकटमध्यमरूपाणा काव्यार्थाना अलङ्कारा-णाम् अनुप्रासोपमादीनां च डम्वरौ उत्कर्षप्रतिरूपौ 'अपेक्षमाणा'=अनुसरन्ती अर्थात् अर्थविशेषानुरोधेनैव अलङ्कारकृतवैचित्रीपूर्विका प्रयुक्ता 'पौरस्त्या'=पूर्वदेशीया गौडीया 'काव्यपद्धति.'=काव्यमार्ग 'वव्रृधे'=विस्तर भेजे इत्यर्थ ।

'स्पर्ध' सघर्षे 'स्पर्धते' इति लटि प्रथमपुरुषैकवचने रूपम् । 'वृधु' वृद्धौ । 'ववृधे' इति लिटि प्रथमपुरुषैकवचनम ॥

अयमत्रगौडानामभिप्राय —मृदुविकटमध्यमात्मकास्त्रिविधा अर्था, +तन्धाश्चार्थानु-

*पद्मिनीलक्षणमुक्त रतिरहस्ये—

कमलमुकुलमृद्वी फुल्लराजीवगन्धि सुरतपयसि यस्या सौरभ दिव्यमङ्गे ।
चकितमृगदृशाभे प्रान्तरक्ते च नेत्रे स्तनयुगलमनर्घ्यं श्रीफलश्रीविडम्वि ॥
तिलकुसुमसमाना विभ्रती नासिकाञ्च द्विजगुरुसुरपूजा श्रद्दधाना सदैव ।
कुवलयदलकान्ति क्वापि चाम्पेयगौरा विकचकमलकोशाकारकामातपत्रा ॥
व्रजति मृदु सलील राजहंसीव तन्वी त्रिवलिवलितमध्या हंसवाणी सुवेषा ।
मृदु शुचि लघु भुङ्क्ते मानिनी गाढलज्जा धवलकुसुमवासोवल्लभा पद्मिनी स्यात् ॥ इति

+अथिष 'पद्मायकविश्रुता ज्ञेयम् । + अर्थानुसारिण ।

वस्तुस्वभाववैचित्र्यात्सहृदयहृदये चमत्कारजनक इति नालङ्काराणां गुणसापेक्षता । एवञ्च वैदर्भाभिमतसमतागुणानुसारिणो गौडा न सन्तीति परं सारं ।

[अथ माधुर्यगुणलक्षणम्]

[1]मधुरं रसवद्वाचि वस्तुन्यपि रसस्थितिः ।

[रसलक्षणम्]

येन माद्यन्ति धीमन्तो मधुनेव मधुव्रताः ॥ ५१ ॥

क्रमप्राप्तं माधुर्यं लक्षयति—'मधुरम्' इति । 'रसवत्'=शृङ्गारादिरसोपेतं वाक्यं 'मधुरम्'=माधुर्यगुणयुक्तं 'भवति' इति शेषः । अत्र शृङ्गारप्रभृतेः उपलक्षणात् भावतदाभासानामपि ग्रहणं, तेपि रसशब्दवाच्या इत्यर्थः । एते विद्यन्तेऽत्र [वाक्ये] इति 'रसवत्' इत्यर्थः । ननु—प्राचीनानां मते यथा अलङ्काराः शब्दार्थगतत्वेन रसमुपकुर्वन्ति तथा गुणा अपि नवीनानां मते तु साक्षादेव गुणा रसधर्मा तत्कथं रसात्मकमेव माधुर्यं स्यात् इत्याशङ्कायामाह—'वाचि' इति । 'वाचि'=वाक्यरचनाहेतुभूते तत्तद्वर्णादौ 'वस्तुन्यपि'=वाक्यप्रतिपाद्ये तत्तदर्थरूपे च 'रसस्थितिः'=रसानां शृङ्गारादीनां रसनधर्मयोगित्वात् भावतदाभासादीनाञ्च स्थितिः व्यञ्जकत्वसम्बन्धो वर्त्तत एवेति शेषः । तथाच-व्यञ्जकतासम्बन्धेन वाक्यस्य रसवत्त्वे नैव दोषः । कोऽसौ रस इति जिज्ञासायामाह—'येन' इति । *'धीमन्तः'=काव्यास्वादपराः सहृदयाः न तु मूर्खा हालिकाद्याः 'येन माद्यन्ति'=हृष्टा भवन्ति तदास्वादवशादन्यविषयेभ्यो निवृत्तवृत्तयो जायन्ते स रसः । अत्रार्थे उपमामाह—'मधुना' इति । 'मधुना'=वसन्तेन पुष्परसेन वा 'मधुव्रताः'=मकरन्दलिहः [भ्रमराः] 'इव'=यथा माद्यन्ति इत्यन्वयः ।

अयमत्राशयः—यद् वाक्यस्य रसव्यञ्जकवर्णादिमत्त्वं तदेव माधुर्यं नाम गुणः । अत एवोक्तं वाग्भटेन-'सरसार्थपदत्वं यत्तन्माधुर्यमुदाहृतम्' इति । तत्र मृदुवर्णा असमासा अल्पसमासा वा रचना शृङ्गारकरुणशान्तरसव्यञ्जिका । मध्यमवर्णा मध्यमसमासा हास्याद्भुतभयानकरसव्यञ्जिका । विकटवर्णा दीर्घसमासा च वीरबीभत्सरौद्ररसव्यञ्जिका । अर्था

(प्र०) माधुर्यगुणस्य लक्षणं निरूप्य उदाहरणेन तत्सङ्गमनीयम् । उ०' अस्य पृ० ५० ८

*उक्तञ्च—

काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् ।
व्यसनेन तु मूर्खाणां निद्रया कलहेन वा ॥

नच—'काव्यालापांश्च वर्जयेत्' इत्यादिवचनेन काव्यनिषेधे कथं प्रेक्षावतां तत्र प्रवृत्तिरिति शक्यमुद्भूम् असदर्थपरकाव्यालापनिषेधपरत्वात्तादृशवचसाम् ।

अपि विभावानुभावव्यभिचारिरिणा तत्तद्रसव्यञ्जका ज्ञेया । *'काव्यार्थभावनाजन्मा निर्वृत्तिविशेषो रस इति रसस्य लक्षणम् । [रसविषयक प्रपञ्चस्तु रसवत्प्रकरणे द्वितीयपरिच्छेदे करिष्यते] एवञ्च यद्यपि उक्तो गुणो रसस्वरूपो नास्ति तथापि रसव्यञ्जकवर्णादिनिष्ठव्यञ्जकतासम्बन्धेन तत्र [माधुर्य] औपचारिको रसव्यवहार इति बोध्यम् ।

वामनस्तु—'पृथक्पदत्व माधुर्यम्' [का० सू० १ । २०] इत्याह । दीर्घसमासाभाववती रचनेत्यर्थ, तस्मादय शब्दगुणः । उक्तिवैचित्र्यरूप माधुर्यन्तु अर्थगुण उक्तञ्च **जयदेवेन**—

माधुर्य पुनरुक्तस्य वैचित्र्य चारुतावहम् ।
वयस्य पश्य पश्यास्य चचल लोचनाञ्चलम् ॥ इति ।

'चित्तद्रवीभावजनक वैचित्र्यं माधुर्य'मित्यर्थ । द्रवीभावश्च रसाद्याकारानुविद्धानन्दोद्बोधरूप स्वाभाविकाद्यनेकविध । सच शृङ्गारकरुणाशान्तजन्य इति **प्रकाशकृत्** । द्रवीभाव एव माधुर्य रचनाजन्यश्चेति **दर्पणकृत्** । रचना तु टवर्ग विना वर्गान्त्याना वर्गमूर्धस्थितिरूपा ।

उक्तञ्च काव्यप्रकाशे—

वर्णा समासो रचना तेषा व्यञ्जकतामिता ॥
मूर्ध्नि वर्गान्त्यगा स्पर्शा अटवर्गा रणौ लघू ।
अवृत्तिर्मध्यवृत्तिर्वा माधुर्ये घटना तथा ॥

अस्यायमर्थ —

टठडढवर्जिता कादयो मान्ता शिरसि निजवर्गान्त्ययुक्ता तथा रेफणकारौ ह्रस्वान्तरितौ इति वर्णा, समासाभावो मध्यम समासोवेति समास तथा माधुर्यवती [सुकुमारा] पदान्तरयोगेन रचना माधुर्यस्य व्यञ्जिका । एवमेव—

योग आद्यतृतीयाभ्यामन्त्ययोरेण तुल्ययो
टादि शषौ वृत्तिदैर्घ्य गुम्फ उद्धत ओजसि ॥

आद्यतृतीयाभ्याम्=वर्गप्रथमतृतीयाभ्याम् । अन्त्ययो =द्वितीयचतुर्थयो रेण अध उपरि उभयत्र वा योग इति सम्बन्ध शिष्ट स्पष्टम् । उदाहरण तत एवावमेयम् । अत्रापि स्वबुद्धया यथायथमूह्य ग्रन्थगौरवभयाद्विस्तरो न कृत ।

उदाहरणान्ते पद्यादौ 'पश्ये'ति 'चल' मिति च यथाकथञ्चित् पुनरुक्तिश्चारुतावहेति माधुर्यलक्षणसङ्गति ॥ ५१ ॥

*लौकिकानन्दे अतिव्याप्तिवारणाय 'काव्यार्थभावनाजन्मा' इत्युक्तम । 'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्ति'रिति भरतसूत्रस्य पर सारमादाय सुकुमारमतीनां कृते[illegible]

[प्रसङ्गसङ्गत्या श्रुत्यनुप्रासलक्षणकथनम्]

[1]यया कयाचिच्छ्रुत्या यत् समानमनुभूयते ।
तद्रूपा हि पदासत्ति [2]सानुप्रासा रसावहा ॥ ५२ ॥

माधुर्ये गुणे वैदर्भाणां गौडानाञ्च मतभेदं दर्शयित्वा वैदर्भेष्टायाः श्रुत्यनुप्रासघटिताया वर्णसंहतेः रसव्यञ्जकतामाचष्टे—'यया' इति । 'श्रुत्या'=श्रूयतेऽनयेति श्रुतिः । 'स्त्रियां क्तिन्' [पा० ३ । ३ । ९४] इति सूत्रस्थेन 'श्रयजीषिस्तुभ्यः करणे' इति वार्त्तिकेन ['श्रु' श्रवणे] श्रवणार्थकात् 'श्रु'धातोः क्तिन्प्रत्ययः । श्रुतिः = उच्चारणम् । 'श्रुतिः श्रोत्रे च तत्कर्मण्याम्नायवार्त्तयोः स्त्रियाम्' इति **मेदिनी** । यया कयाचित् कण्ठजनितया दन्तजनितया अन्यया वा तात्वादिस्थानजनितया श्रुत्या = श्रवणसाधनीभूतेन उच्चारणेन 'यत् समानम्' = पूर्वोच्चरितवर्णतुल्यम् 'अनुभूयते = तादृशानुभवविषयीक्रियते 'हि' = निश्चयेन 'तद्रूपा' = तादृशवर्णसादृश्यव्यञ्जनवती 'पदासत्तिः' = पदानां सुप्तिङन्तानाम् आसत्तिः = अव्यवधानेन प्रयोगः [सा कविसमयप्रसिद्धा] 'सानुप्रासा' = श्रुत्यनुप्रासवती [रचना] 'रसावहा' = रसव्यञ्जिका भवति । निश्चयेन तादृशी पदासत्तिः रसपोषिका भवतीत्यर्थः ।

एतदुक्तं भवति—कण्ठताल्वादिसमानस्थानोच्चार्यमाणत्वरूपं यद् व्यञ्जनवर्णानां सादृश्यं स 'श्रुत्यनुप्रासः' । आह च दर्पणे **विश्वनाथः**—

उच्चार्यत्वाद् यदेकत्र स्थाने तालुरदादिके ।
सादृश्यं व्यञ्जनस्यैव 'श्रुत्यनुप्रास' उच्यते ॥ इति ।

[1]अयमनुप्रासोऽभिन्नवर्णविषयो वैदर्भाणामत्यन्तं श्रुतिसुखावहः [प्रियतरः] । एकवर्णविषयः छेकवृत्तिसंज्ञोऽनुप्रासस्तु गौडानामतिप्रिय इत्यग्रे वक्ष्यते । एवञ्च तादृशव्यञ्जनवद्वाक्यं रसावहं [शृङ्गारविप्रलम्भकरुणशान्तान्यतमरसोपेतम्] भवति । एतादृशे स्थले काव्यशोभाकरो **माधुर्याख्यो** गुणः । उक्तञ्चाभियुक्तैः—

यथा ज्योत्स्ना शरच्चन्द्रं यथा लावण्यमङ्गनाम् ।
अनुप्रासस्तथा काव्यमलङ्कर्तुमिह क्षमः ॥ इति ।

इदमत्रावधेयम्—यद्यप्यलङ्कारप्रकरण एवानुप्रासस्य निरूपणमुचितं भाति तथाप्यत्र

---

[1] (प्र०) श्रुत्यनुप्रासस्य किं लक्षणम् ? कपाञ्च कवीनामयं प्रियतरः ? (उ०) अस्य पृ० प० ?,१८ ।

[2] रसाद्यनुगतः प्रकृष्टोन्यासोऽनुप्रासः । अनुशब्दोऽनुगमार्थकः, प्रशब्दः प्रकृष्टार्थकः, आसशब्दो न्यासार्थकः । एवञ्च—'अतिव्यवधानशून्यत्वेन चमत्कृत्याधायिका या प्रकृतरसव्यञ्जकसदृशवर्णावृत्तिः सोऽनुप्रासः' इति अनुप्राससामान्यलक्षणं फलितं भवति ।

विप्रलम्भस्य शृङ्गारत्वेपि पृथङ्निर्देशः सम्भोगशृङ्गारापेक्षया तस्य वर्णनार्धक्यद्योतनार्थः ।

प्रसङ्गवशात् रीतिभेदप्रदर्शनार्थं तस्य लक्षणं दर्शितम् । अत एवाग्रे *वक्ष्यति—'काश्चिन्मार्गविभागार्थमुक्ताः प्रागप्यलङ्क्रियाः' इति सर्वमवदातम् ।

[श्रुत्यनुप्रासस्योदाहरणम्]

एष राजा यदा लक्ष्मीं प्राप्तवान् ब्राह्मणप्रियः ।
ततः प्रभृति धर्मस्य लोकेऽस्मिन्नुत्सवोऽभवत् ॥ ५३ ॥

श्रुत्यनुप्रासमुदाहरति—'एष' इति । 'ब्राह्मणप्रिय' = ब्राह्मणा प्रिया यस्य, अथवा ब्राह्मणानां प्रिय 'एष राजा' = प्रजानां रञ्जको नरपति 'राजा प्रकृतिरञ्जनात्' इत्यभियुक्तोक्ते । 'यदा' = 'यस्मिन् काले 'लक्ष्मीम्' = राज्यश्रियम् 'प्राप्तवान्' = अधिगतवान् 'तत प्रभृति' = तद्दिनादारभ्य 'अस्मिन् लोके' = प्रजायाम् 'धर्मस्य' = वेदविहितस्य चोदनालक्षणस्य यज्ञादे कर्मण 'उत्सव' = मह 'मह उद्धव उत्सव' इत्यमर । 'अभवत' = अजायत । न्यायेन प्रजाशासनपरो राजा यज्ञदानादिधर्मकृत्यं प्रचारयामासेति पिण्डितार्थ । अत्र षकाररकारयोरेको मूर्धा स्थानमिति सादृश्यम् । एवं शकारयकारयो तालु । दकारलकारयो दन्ता । तथा च 'तत्तत्स्थाने उच्चार्यमाणत्वेन यद् व्यञ्जनसाम्य तदेव श्रुत्यनुप्रास' । तत एव चात्र माधुर्याख्यो गुण । स च धार्मिकराजविषयकरतिभावव्यञ्जक । इदं वैदर्भीरीतिमत काव्यं वैदर्भाणामतिप्रियमित्युदाहरणदर्शनफलम् ।

श्रुत्यनुप्रासस्योदाहरणमाह विश्वनाथ —

दृशा दग्धं मनसिजं जीवयन्ति दृशैव या ।
विरूपाक्षस्य† जयिनीस्ता स्तुमो वामलोचना ॥

अत्र 'जीवयन्ति' इति 'या' इति 'जयिनी' इत्यत्र च जकारयकारयोरेकत्र स्थाने तालौ उच्चार्यत्वात् सादृश्यम्, ततोऽयं सहृदयानामतीवश्रुतिसुखावहत्वात् श्रुत्यनुप्रास । एवं दन्त्यकण्ठ्यानामप्युदाहरणं ज्ञेयम् । यथा वा मम—

हरन्ति यूनां हृदयानि कान्ता कचा कुचाकीर्णसरा लसन्त ।
कलापविस्तार्णशिलकदेशे कृष्णा भुजङ्गा इव सञ्चरन्त ॥

अत्र 'हरन्ति' इति 'कान्ता' इति 'कचा' इत्यत्र हकारककारविसर्गाणामेकत्र कण्ठस्थाने उच्चार्यमाणत्वात् सादृश्यम्, अतोऽयं श्रुत्यनुप्रास ।

---

* द्वितीयपरिच्छेदस्य तृतीये श्लोके ।

उक्तञ्च मानवे धर्मशास्त्रे—

तस्याहु सम्प्रणेतारं राजानं सत्यवादिनम् ।
समीक्ष्यकारिणं प्राज्ञं धर्मकामार्थकोविदम् ॥ इति ॥ मनु० अ० ७। श्लो० २६।

† विरूपाक्षस्य = विषमनेत्रस्य हरस्येदर्थं । जयिनी = विजेत्री वामलोचना =

[अत्र वैदर्भगौडकवीनां मतभेदकथनम्]

[1]इतीदं नादृतं गौडैरनुप्रासस्तु तत्प्रियः ।
अनुप्रासादपि प्रायो वैदर्भैरिदमिष्यते ॥ ५४ ॥

उक्तविषये वैदर्भगौडरीत्योर्मतभेदं निरूपयति—'इति' इति । 'इति इदम्'=पूर्वोक्तमुदाहरणम् 'गौडैः'=गौडदेशभवैः कविभिः 'न आदृतम्'=माधुर्यगुणवत्त्वेन नैव स्वीकृतम् । अर्थात् समानश्रुतयोऽप्यमी वर्णा रसोपकारं न जनयन्तीति गौडानामाशयः । [तु पुनः] 'अनुप्रासः'=वक्ष्यमाणलक्षणस्तु वर्णावृत्तिरूपः 'तत्प्रियः'=तेषां गौडानां प्रियः इष्ट एवेत्यर्थः । वर्णावृत्तिरूपमेवानुप्रासं रसोपकारकं मन्यन्ते गौडा इत्याशयः ।

'वैदर्भैः'=विदर्भदेशभवैः कविभिस्तु 'इदम्'=उक्तं श्रुत्यनुप्रासोदाहरणभूतं 'एष राजा' इत्यादि पद्यम् 'प्रायः'=बाहुल्येन 'अनुप्रासाद् अपि'=वक्ष्यमाणलक्षणात् वर्णावृत्तिरूपाद् अनुप्रासादपि वर्णावृत्तिरूपमनुप्रासमपेक्ष्यापीत्यर्थः । 'ल्यब्लोपे कर्मण्यधिकरणे च' [१।४।३१] इति वार्त्तिकेन 'प्रासादात् प्रेक्षते' इत्यादिवत् कर्मणि पञ्चमी । 'इष्यते'=काम्यते आद्रियत इत्यर्थः । यत्तु 'अनुप्रासात् पूर्वोक्तात् श्रुत्यनुप्रासादपि प्रायः बाहुल्येन इदम् एष राजेत्यादि पद्यम् इष्यते' इति नैव व्याख्यानं [*]तन्निरानन्दम्, एष राजेत्यादि पद्यस्य स्फुटं श्रुत्यनुप्रासोदाहरणत्वात् स्वपूर्वोक्तिविरोधात्, मूलकाराशयास्पृष्टत्वाच्च ।

[अथानुप्राससामान्यलक्षणम्]

[2] वर्णावृत्तिरनुप्रासः पादेषु च पदेषु च ।
पूर्वानुभवसंस्कारबोधिनी यद्यदूरता ॥ ५५ ॥

गौडसम्मतमनुप्रासं लक्षयति—'वर्णावृत्तिः' इति । वर्णावृत्तिः=वर्णानां व्यञ्जनानामक्षराणाम् आवृत्तिः पुनरुच्चारणम् अनुप्रासः । अर्थात् पुनरुच्चारणेन व्यञ्जनवर्णसादृश्यप्रतीतिरनुप्रासः । आह च मम्मटः—'वर्णसाम्यमनुप्रासः' इति । स्वरवैसादृश्येऽपि व्यञ्जनसदृशत्वं वर्णसाम्यम् । रसाद्यनुगतः प्रकृष्टो न्यासो ऽनुप्रास इति । सा चावृत्तिः कीदृशी इत्याह—'पूर्वानुभव०'=यदि पूर्वं प्रथमो यो वर्णः, तस्य योऽनुभवः श्रोत्रजं प्रत्यक्षम्, तेन यः संस्कारः भावनानामकः तस्य बोधिनी उद्बोधयित्री 'अदूरता'=द्वितीयवर्णस्य सन्निधिर्भवति तदा वर्णावृत्तिरनुप्रासो भवतीत्यर्थः । सा च वर्णावृत्तिः 'पादेषु, पदेषु च'=भवति । पद्यचतुर्थांशः पादः । सुप्तिङन्तं पदम् । एवञ्च पादगतः पदगतश्चानुप्रास इति सामान्यतो द्विविधः ।

---

[1] (प्र०) श्रुत्यनुप्रासवर्णानुवृत्तिरूपानुप्रासविषये वैदर्भगौडकवीनां मतभेदः तत्फलञ्च किम्? (उ० अस्य पृ० प० ०) ।

[2] (प्र०) वर्णावृत्तिमनुप्रासं लक्षणोदाहरणाभ्यां स्पष्टयित्वा अनुप्रासस्य शिष्टानपि ग्रन्थान्तरगतान् भेदान् निरूपय ? (उ०) अस्य पृ० प० १। पृ० ४८, प० ५ ।

[*] प्रमाद एवेत्यग्रे ना पश्यम ।

यत्र अव्यवधानेन किञ्चिद्व्यवधानेन वा व्यञ्जनवर्णसादृश्यप्रतीति तत्रैव तादृशवैचित्र्यजनकवर्णावृत्तिरनुप्रासालङ्कार इति सार । वर्णस्य वर्णयोर्वर्णानाञ्चावृत्तिरिति विवक्षितो विग्रह । 'पादेषु च' इति प्रथमकल्पे सर्वश्लोकव्यापिन्येव वर्णावृत्तिरिष्टा। यत्र त्वेव नास्ति तत्र पतत्प्रकर्षतादोष । यथा—'क क कुत्र न घुर्घुरायितघुरीघोरो घुरेत्सूकर' इत्यादिषु। 'पदेषु च' इति द्वितीयकल्पे नासौ दोषो विवक्षित । अयमनुप्रासोऽनेकविध । तथाहि 'प्रतापरुद्रीये'—

भवेदव्यवधानेन द्वयोर्व्यञ्जनयुग्मयोः । आवृत्तिर्यत्र स बुधै 'छेकानुप्रास'इष्यते ॥

यत्राव्यवहितयो व्यञ्जनयुग्मयोर्द्वयो पौनरुक्त्य तत्र छेकानुप्रास । यथा—

महीमहीनविभवे धत्ते क्षेमङ्करे करे । राजन्यजन्यविजयी राजा राजद्गुणोदय ॥

अत्र पादचतुष्टयेऽपि 'महीमही' 'करे करे' 'जन्यजन्य' 'राजा राज' इत्याकाराणां व्यजनयुग्मानामव्यवधानेनावृत्ते छेकानुप्रास । छेको विदग्ध तत्प्रियत्वादेष छेकानुप्रास । यद्वा 'छेकास्तु गृहपक्षिण ' इत्यमरोक्ते छेकभाषणोपलक्षितोऽनुप्रास छेकानुप्रास । तेषां प्रायो द्विर्भाषित भवति तत्सादृश्यात्तथाव्यवहार । यथा वा मम—

प्रिया प्रियालोकविलोकनोत्का सदा सदानन्दमना गवाक्षे ।
वीथ्यां निधायात्मदृश वराकी चकार चिन्तां परमां प्रियस्य ॥

अत्र 'प्रिया प्रिया' 'सदा सदा' इत्याकाराणा व्यञ्जनयुग्मानामव्यवधानेनावृत्तिरूप छेकानुप्रास ।

एकादिप्रभृतीना तु व्यञ्जनानां यथा भवेत् । पुनरुक्तिरसौ नाम 'वृत्त्यनुप्रास' इष्यते ॥

उदाहरण यथा मदीय 'श्रीकृष्णस्तवकशतके'—

यस्यादर्शाक्षपरिमार्जनशौचभावं
धत्ते शिवोऽपि शिवमूर्त्तिरघौघहारी ।
लोकास्तु शिक्षयति शास्त्रनिशामनेन
कृष्णं प्रशान्तवपुष नमतादरेण ॥ इति ॥

अत्राऽसकृत् शकारावृत्त्या वृत्त्यनुप्रास । 'अघौघहारी' इत्यत्र घकारस्य सकृदनुवृत्तिरेव । श्रुत्यनुप्रासस्तु पूर्वमुक्त । मम्मटसम्मतो लाटानुप्रास 'साहित्यसारे'ऽपि भणित । तथा—

वागर्थावृत्तिके लाटानुप्रासो भेदसम्मते
नाके नाकेन्दुसस्मेरे स्मेरेणाक्ष्णावलोकय ॥

भेदसम्मते =अन्वयभेदस्य सम्मतत्वेन हेतुना । वागर्थावृत्तिके=वागर्थयो सार्वांशिकसाम्येनावृत्ति येन पुन यस्मिन् काव्ये तत्र 'लाटानुप्रासो' भवतीत्यर्थ । श्लोकार्थमुदाहरणम् । अत्र 'नाके नाके' 'स्मेरे स्मेरे' इत्यादिशब्दार्थयोरभेदेऽपि अन्वयमात्रभेदात् तात्पर्यमात्रभिन्नत्वाच्च लाटानुप्रास ।

[वर्णावृत्त्यनुप्रासस्योदाहरणम्]

चन्द्रे शरन्निशोत्तंसे कुन्दस्तवकसन्निभे ।
इन्द्रनीलनिभं लक्ष्म सन्दधात्यलिनः श्रियम् ॥ ५६ ॥

तत्रादौ स्वरवैषम्येणानुप्रासमुदाहरति—'चन्द्र' इति । 'शरन्निशोत्तंसे =शरदो निशा शरन्निशा शारदी रात्रिरित्यर्थः । तस्या शरन्निशाया उत्तंसे शिरोभूषणभूते, 'कुन्दस्तवकसन्निभे =कुन्दं माघ्यप्रसून तस्य स्तवको गुच्छः तत्सन्निभे तत्तुल्ये माघ्यपुष्पगुच्छसदृशे 'चन्द्रे =निशाकरे 'इन्द्रनीलनिभम्'=इन्द्रनीलाख्यमणिसम श्याममित्यर्थः 'लक्ष्म'=चिन्ह कलङ्क इति यावत् 'अलिन =भ्रमरस्य 'श्रियम् शोभां कान्तिं 'सन्दधाति'=धारयति ।

अत्र प्रथमे द्वितीये तृतीये च पादे शकार-ककार वकार-नकार-लकाराणां वर्णानां पुनरावृत्तिद्वारकसाम्यप्रतीतिरिति वृत्त्यनुप्रासो ज्ञेय । चतुर्थपादेतु दकार-धकार तकार-नकाराणा दन्तरूपैणकेन स्थानेनोच्चार्यमाणत्वेन श्रुत्यनुप्रासोऽपि । अनेनालङ्कारद्वयेन तादृशवर्णविन्यासरीत्या माधुर्याख्यो गुणो व्यज्यते । व्यक्तीभूतश्च तत् शृङ्गाररसस्य उद्दीपनविभावभूतं चन्द्रमुपस्कृत्य [विप्रलम्भ] शृङ्गारं पोषयति । तदिदं माधुर्यं शब्दगतम् । अत्रैव * रूपकोपमाभ्यामुज्जीविता निदर्शनाऽर्थालङ्कृति, तया चोपस्कृतस्तादृशो वाच्यार्थं शृङ्गारपरिपोषकृदित्यर्थगतमपि माधुर्यं ज्ञेयम् । 'निशा निशीथिनी रात्रिस्त्रियामा क्षणदा क्षपा' । 'माघ्य कुन्दम्' । 'पुष्पं प्रसून कुसुमं सुमम्' । 'स्तम्बो गुच्छस्तृणादिन' 'द्विरेफपुष्पलिड्भृङ्गषट्पदभ्रमरालय ' इति सर्वत्र अमरः ॥ ५६ ॥

[स्वरसादृश्येन अनुप्रासोदाहरणम्]

ᶦचारु चान्द्रमसं भीरु ! बिम्बं पश्यैतदम्बरे ।
मन्मनो मन्मथाक्रान्तं निर्दयं हन्तुमुद्यतम् ॥ ५७ ॥

स्वरवैषम्येणानुप्रास निरूप्य सम्प्रति स्वरसादृश्येनापि वैचित्र्यं मत्वा तन्निरूपयति—'चारु' इति । मानवती नायिकां प्रति कस्यचित् कामिन उक्तिरियम् । हे ! भीरु ! भयशीले ! 'अम्बरे =गगने 'एतत्'=पुरतोऽवलोक्यमानं 'चारु'=मनोज्ञम् 'मन्मथाक्रान्तम्'=मन्मथेन मदनेन [कामिन] आक्रान्तं पीडितं कामातुरमिति यावत् 'मन्मन '=मदीय

(प्र०) ᶦ स्वरसादृश्येनानुप्रास स्पष्टीकुरु । (उ०) अस्य पृ० प० ११ ।

* 'चन्द्रे शरन्निशोत्तंसे' इत्यत्र व्यस्त **रूपकम्** आपम्यस्य तिरोभूतभेदत्वात् । उक्तं दण्डिनैव—'उपमैव तिरोभूतभेदा रूपकमिष्यते' इति । 'कुन्दस्तवकसन्निभे' इत्यादौ **उपमा** । 'साधर्म्यमुपमा भेदे' इति मम्मटोक्ते । सन्दधात्यलिन श्रियम्' इत्यत्र **निदर्शना** । 'वाक्यार्थयो सदृशयोरैक्यारोपो निदर्शना' इति जयदेवोक्ते । परन्तु इयं पदार्थवृत्तिनिदर्शना 'पदार्थवृत्तिमप्येके वदन्त्यन्यां निदर्शनाम्' इति तदुक्तेश्च । एतद्विषये [शास्त्रार्थनम्भरूपेण] बहु विचारोऽवतारयितुं शक्यते परं सुकुमारमतिव्याकुलताभिया तन्नोदितम् । अत्र चन्द्रलक्ष्मणि [चन्द्रकलङ्के] अलिगतश्रीपदार्थारोपो निदर्शना ।

मानसम् 'निर्दयम्'=निर्गता दया यस्यां क्रियायां तत् यथा स्यात् तथा [निर्दयम्' इति क्रियाविशेषणम्] 'हन्तुम्'=चोदयितुम् 'उद्यनम्'=उदय प्राप्तम् 'चान्द्रमसम्'=ऐन्दव चन्द्रमसम्बन्धीत्यर्थ 'विम्बम्'=मण्डलम् 'पश्य'=आलोकयेति सान्वयोर्थः ।

अत्र प्रथमे पादे चाकारयो रुकारयोश्च स्वरविशिष्टयो सादृश्यम् तेनात्र वृत्त्यनुप्रास द्वितीये पादे म्बम्वयो', तृतीये च मन्ममन्मयो रिति सकृत्साम्यात् छेकानुप्रास चतुर्थ पादे तु दकारयो तकारयोश्च स्वरवैसादृश्यम् तेनात्र अन्यप्रकारोऽपि वृत्त्यनुप्रास अत्र काव्ये शब्दगतमर्थगतञ्च द्विविधमपि माधुर्यं गुण । सोयमेव शब्दार्थोभयगतत्वेन चमत्कारकरत्वात् विप्रलम्भशृङ्गारस्य परिपोषकर ।

अत्र च विरहिणि निर्दयतया हननोद्यमस्यासम्बन्धेपि तत्कल्पनात् सम्बन्धातिशयोक्तिरलङ्कार * । उक्तञ्च जयदेवेन—

सम्बन्धातिशयोक्तिः स्यात् तदभावेऽपि तद्वच ।
पश्य सौधाग्रसंसक्तं विभाति विधुमण्डलम् ॥ इति ॥

इत्यञ्च स्वरसादृश्येन स्वरवैसादृश्येन च द्विविधो ऽप्यनुप्रासो दर्शित ।

उदाहरणान्तर यथा वा मम—

मनो मनोहारिणि हारियौवने ' वने पिकीगीतवने ऽवने प्रिये ! ।
अत्यन्तमासक्तिमद निपीय मदीयमामूर्च्छति मूर्च्छतीत्यपि ॥

अत्र प्रथमे पादे 'मनो मनो' इत्येवमादि सकृत्साम्यात् छेकानुप्रास । तृतीयचतुर्थ पादे 'निपीय मदीय' इत्यत्र स्वरविशिष्टयोर्यकारयो सादृश्यात् वृत्त्यनुप्रास । तथैव चतुर्थे छकारयो स्वरविशिष्टयोरेव सादृश्यम् । केषाञ्चिन्मते तु—यदि 'वने वने' इत्यादि द्वयो स्वरव्यञ्जनसमुदाययोरेकदैवावृत्तिविवक्षिता स्यात् तदा वृत्त्यनुप्रास एव ।

[अनुप्रासलक्षणे 'अदूरता' पदस्य फलकथनम्]

इत्यनुप्रासमिच्छन्ति नातिदूरान्तरश्रुतिम् ।
ननु रामामुखाम्भोजसदृशश्चन्द्रमा इति ॥ ५८ ॥

'अदूरेणैवानुप्रास प्रयोजयन्ति' इति अन्वयव्यतिरेकाभ्यां स्पष्टीकरोति—'इति' इति । 'नातिदूरान्तरश्रुतिम्'=अतिदूरम्=अत्यधिकम् अन्तर=व्यवधान यस्या तादृशी [illegible] श्रुति इति अतिदूरान्तरश्रुति न अतिदूरान्तरश्रुतिर्यस्य स तथाविध त नातिदूरान्तरश्रुतिम् । [illegible] समान । तादृशम् 'अनुप्रासम्' उक्तमलङ्कारम् 'इच्छन्ति'=कामयन्ते [illegible] इति शेष । 'रामामुखाम्भोजसदृश '=रामा रमणी तस्या मुखम् आननमेव अम्भोज [illegible] तत्सदृश , 'चन्द्रमा '=शशी 'अयमस्ति' इति शेष । 'इति'=इत्या-[illegible] मकारयो साम्येऽपि अतिदूरान्तरश्रुतिम् अनुप्रास 'ननु'=नैव

* [illegible] । 'त्वमेव सम्भोग देहि' अथवा 'कामेनार्त्तापि मयि तव [illegible], [illegible] निर्दयासि' इत्यादि [illegible] ।

इच्छन्ति इति पूर्वेण तन्त्रान्वय । एवमन्वयव्यतिरेकाभ्यामनुप्रासे अदूरता अवश्य-मपेक्षितेति स्फुटीकृतम् ।

[दोषस्थले ऽनुप्रासस्य रसानुपकारकत्ववर्णनम्]

¹स्मर खर. खलः कान्त' कायः कोपश्च न कृशः।
च्युतोमानोऽधिकोरागो मोहोजातोऽसवोगता ॥ ५६ ॥

'पदासत्ति सानुप्रासा रसावहा' इति पूर्वं [५२] कारिकायामुक्तम् । यत्र तु दोषो वर्त्तते तत्र विद्यमानोनुप्रास सन्तमपि रस नोपकरोतीति नैव तत्र माधुर्यमिति दर्शयति— 'स्मर' इति । काचिन्नायिका नायकोपेक्षया भ्रष्टमाना बभूव, तस्या पश्चात्तापस्य वर्णनमिदम् । 'स्मर' इति । 'स्मर '=कामः 'खर =कठोर । 'कान्त '=वल्लभ 'खल '=प्रणयभङ्गात् कठोरस्वभाव । 'न =अस्माक 'काय '=देह 'कृश '=क्षीण । 'च'=अथ च 'कोप '= क्रोध 'कृश '=गलित । 'मान '=गौरवम् 'च्युत '=भ्रष्ट । 'राग '=कान्तविषयक प्रेमा प्रियप्राप्तिकामो वा 'अधिक '=प्रचुर । 'मोह '=मूर्च्छा 'जात '=प्रावर्त्तत प्रतिक्षणमिति शेष । 'असव '=प्राणा. 'गता '=विगतप्राया. सन्तीत्यर्थ ।

अत्र प्रथमे रकारयो खकारयो ककाराणाञ्च साम्याद् 'वृत्त्यनुप्रास ' । उत्तरार्धे तु तकारादीनां दन्त्याना साम्यात् 'श्रुत्यनुप्रास ' । एवमत्र द्विविधोप्यनुप्रासो *विसन्ध्युपहत-विसर्गाभ्या वाक्यदोषाभ्या दुष्टत्वादस्य काव्यस्य श्वित्रोपहतां कामिनीं हाराद्यलङ्कार इव विप्रलम्भशृङ्गार नैव पुष्टीकरोति ॥ ५६ ॥

इत्यादिबन्धपारुष्यं शैथिल्यञ्च नियच्छति ।
²अतो नैवमनुप्रासं दाक्षिणात्या. प्रयुञ्जते ॥ ६० ॥

उक्त पद्ये स्वसम्मत दोष स्वयमेव निरूपयति—'इत्यादि' इति । 'इत्यादि'=एव-प्रकारक अनुप्रासोपेतमपि वाक्य 'बन्धपारुष्यम् =बन्धस्य रचनाया पारुष्य श्रुतिकटुत्व 'शैथिल्यञ्च'–शिथिलभावम् आहतविसर्गतया ऽगाढत्वमपि 'नियच्छति =सूचयति बोध-यतीति यावत् । 'अत '=हेतो 'दाक्षिणात्या दक्षिणदेशभवा वैदर्भा. कवय. 'एवम्'= दोषसहितम् 'अनुप्रासम् ='न प्रयुञ्जते'=रचनाया नैव निवेशयन्ति ।

(प्र०) ¹ कुत्रानुप्रासो रस नोपकरोति कथञ्च ? (उ०) अस्य पृ० प० ४ ।

(प्र०) ² कीदृशमनुप्रास दाक्षिणात्या नैव प्रयुञ्जते ? (उ०) अस्य पृ० प० १६ ।

*वाग्भटोप्याह—

पश्चाद्द्रुत्य सयोगाद्विसर्गाणामलोपनम् ।
विसन्धिवर्जनञ्चेति बन्धचारुत्वहेतव ॥ इति ।

विसर्गाणामलोपनमिति तु ओजोगुणस्थाने हेयम । विरूप सन्धिर्विसन्धि ' सन्धेर-भावो वा विसन्धि । अन्येप्युक्तवाक्याद्विक्लिष्टपदवर्जनादयो बन्धचारुत्वस्य हेतवो ज्ञेया इति सूचनार्थं प्रकारार्थंकेतिशब्दप्रयोग ।

अत्र पूर्वार्धे निरन्तरबहुविसर्गहेतुका अत्युद्वेजनकारिणी अतिकटुताति पारुष्यं बन्धस्य उत्तरार्धे तु आहतविसर्गतया बन्धशैथिल्यम्, तस्मादत्र न माधुर्याख्यो गुण इति वैदर्भाणामाशय' ।

अत्रोदाहृते पूर्वस्मिन् पद्ये निरन्तरबहुविसर्गश्रवणात् बन्धस्य पारुष्येण अतिकटुत्वम्। तथाचोक्तमभियुक्तै—'अनुस्वारविसर्गौ तु पारुष्याय निरन्तरौ' इति । बन्धस्य शैथिल्यन्तु आहतविसर्गतारूपेण दोषेणास्ति। आहतविसर्गता च ओत्वप्राप्तविसर्गता अर्थात् 'आद्गुण' [६।१।८७] इति पाणिनिसूत्रेण ओत्वप्राप्तिरिति बोध्यम् । अयमेव दोष क्वचित् 'उपहतविसर्गता' नाम्नोक्त अर्थात् 'अतोरोरप्लुतादप्लुते' [६।१।११३] इति 'हशि च' [६।१।११४] इति च पाणिनिसूत्रेण उत्वप्राप्ति परन्तु फलिते दोषस्वरूपे नैव भेद । ओत्वप्राप्तिरपि न स्वरूपेण दोष किन्तु तस्या पुन पुनर्निरन्तरतया प्रयोग एव दोष । यथा चात्रैव—'च्युतो मानोऽधिको रागो०' इत्यादि । प्रपञ्चस्तु अस्मत्काव्यप्रकाशप्रभायां द्रष्टव्य ।

इदन्तु बोध्यम्—यत्र वक्त्राद्यौचित्यवशात् बन्धस्य पारुष्य तत्र रसानुकूलत्वं, तादृशे अनुप्रासवति काव्ये माधुर्यस्य सद्भावोऽपीष्ट । उक्तञ्च सम्प्रदायविद्भि —

वक्तरि क्रोधसंयुक्ते तथा वाच्ये समुद्धते ।
रौद्रादौ च रसेऽत्यन्तं दुश्रवत्वं गुणो भवेत् ॥ इति ।

अत्र तु ['च्युतो मान' इति पद्ये] न वक्ता क्रोधी, नच वाच्यं समुद्धतम्, नापि रौद्रादिरस [किन्तु शृङ्गार] इत्येतत्त्रयाभावात् रसपरिपन्थी दोष, माधुर्यगुणस्यचाभाव ॥ ६० ॥

[यमकस्य लक्षणं, तस्यात्र अप्रपञ्चे हेतुवर्णनञ्च]

आवृत्तिं वर्णसंघातगोचरां यमकं विदु ।
तत्तु नैकान्तमधुरमत पश्चाद्विधास्यते ॥ ६१ ॥

यमके माधुर्यं यथा मम—

अयि ! मनो न मनोरथसन्ततिं परिविहाय सहायतम हरिम् ।

भजसि तामतापममुच्छिद् पथि मते कुमते परिसम्भ्रमत् ॥ इति ॥

अत्र वन्धस्य पृथक्पदत्व नाम माधुर्यं [शब्दगत] स्पष्टम् । तेनैव क्रमेण वर्ण-सघातगोचराऽऽवृत्तिश्चेति यमकमपि ॥ ६१ ॥

[विशेषेण ग्राम्यतादोषस्य रसप्रतिवन्धकत्ववर्णनम्]

¹कामं सर्वोऽप्यलङ्कारो रसमर्थे निषिञ्चति ।

तथाप्यग्राम्यतैवैनं भारं वहति भूयसा ॥ ६२ ॥

शब्दगतं माधुर्यं निरूप्य सम्प्रति अर्थगत माधुर्यं दर्शयति 'कामम्' इति । 'सर्व अपि'=शब्दगत अर्थगतश्च अलङ्कार अनुप्रासोपमादि 'अर्थे' वाच्यादिभेदेन त्रिविधे प्रतिपाद्ये 'कामम्' यथायोगम् 'रसम्'=शृङ्गारादिकम् 'निषिञ्चति=परिपोषयति उद्योतयतीति यावत् । 'तथापि'=रसोत्कर्षकस्यालङ्कारस्य सद्भावेऽपि 'अग्राम्यता=ग्राम्य प्राकृतो हालि-कादिर्जन तद्व्यवहृत शब्दोऽर्थश्चापि ग्राम्य तस्य भावो ग्राम्यता न ग्राम्यता अग्राम्यता अप्राकृतता विदग्धजनाव्यवहारतेत्यर्थ । सा 'एव' 'भूयसा'=बाहुल्येन 'एनम्'=रसनिषेकरूपं 'भारम्'=मर्यादां 'वहति'=धारयति । 'सालङ्कारो रसव्यञ्जकोऽर्थोऽर्थगत माधुर्य'मित्यर्थ । तथाच 'उक्तिवैचित्र्य माधुर्यम्'* [का० सू० ३ । १२] इत्याह वामन ।

अयमाशय —रसमात्रप्रतीतिं प्रति दोषा प्रतिवन्धका , तेन द्विविधमाधुर्यमप्रत्यपि दोषमात्र प्रतिवन्धकमित्यायातम् । परन्तु ग्राम्यतादोषो विशेषेण माधुर्यं प्रतिवध्नाति । ततश्च ग्राम्यतादिदोषाभावे सत्येवालङ्कारा रसमर्थे निषिञ्चन्ति, अत कविभिर्ग्राम्यतादोष-वर्जने विशेषेण प्रयत्नो विधेय ।

[अर्थगतग्राम्यताया उदाहरणम्]

कन्ये कामयमान मां न त्वं कामयसे कथम् ।

²इति ग्राम्योऽयमर्थात्मा वैरस्याय प्रकल्पते ॥ ६३ ॥

(प्र०)¹ 'काम सर्व' इत्यादि श्लोक सतात्पर्यं व्याख्येय ? अथवा कस्य दोषस्य विशेषत रसप्रतिवन्धकत्वम ? किंवा कस्मिन् दोषे सति विशेषतो माधुर्यं प्रतिवध्यते ? (उ) अस्य पृ० ५० ७ । १८ ।

(प्र०)² अर्थगत ग्राम्यतादोषमुदाहर ? तत्फलश्च दर्शय ? । उ०) अस्य पृ० ५० २२।

* वर्ण्यमानस्यार्थस्य प्रकर्षे प्रतिपाद्ये भङ्ग्यन्तरेणोक्तिरुक्तिवैचित्र्यम् । उदाहरण यथा मम—

सुधा सुधेव चूतस्य फल मधु नचान्यथा । सखे ! मृदि यदन्यत्स्यात् स्वादु कान्ताधरच्छदात् ॥

अत्रानेकोपमानातिशायि कान्ताधरच्छदमाधुर्यमिति वक्तव्ये 'सुधा सुधेव' इत्यादि भङ्ग्यन्तरेण प्रतिपादन माधुर्यम् ।

अर्थस्याग्राम्यत्वबोधाय अर्थगतां ग्राम्यतामुदाहरति—'कन्ये' इति । हे ! 'कन्ये !' 'कामयमानम्'=[त्वया सह] सुरतार्थिन 'माम्' त्वम् 'कथम्'=कुत 'न कामयसे'=नेच्छसि 'इति'=अनुना प्रकारेण निरूपित 'अय ग्राम्य'=ग्राम्यतादोषवान् 'अर्थात्मा' रसविच्छेदाय रसास्वादविघाताय वा 'प्रकल्पते'=समर्था भवति सहृदयहृदयोद्वेजकत्वादिति शेष ।

अयमाशय —'कन्ये' इति पुत्रीसमायामेव सम्बोधनमुचितम्, नायिकाया अभिमुखीकरणे तु 'सुन्दरि ! प्रिये ! वल्लभे ! इत्यादीन्येव सम्बोधनपदानि योग्यानि भवन्ति, तस्मादत्र अन्यथाकरणाद् अर्थस्य ग्राम्यतादोष. । नचात्र 'कन्या'शब्दगतो दोष , यतो विदग्धा अपि बहुश 'कन्या' शब्द प्रयुञ्जते । यथा—'कन्येय कलधौतकोमलरुचि कान्तिन्तु नान परा' इत्यादिषु । तस्मादत्रार्थनिष्ठ एव दोष । अत एव 'कटिस्ते हरते मन' इत्यादिषु प्राचीनैर्ग्राम्यत्वमुक्तम् । 'कामयमान' मित्युक्तिरप्यथ ग्राम्यतावहा । यत कामो हि नाम सुरताभिलाष स च कामिनीकुचकलशवद् गूढ एव चमत्कारजनक अगूढ' सन्तु सामाजिकानां व्रीडा जनयन् [सहृदयेषु] रसोद्बोध विहन्ति । एव सति नात्र माधुर्याख्यो गुण अत्र नष्टा विदग्धता । अविदग्धोक्तौ तु ग्राम्यताया गुणत्वम् ।

अत्र च नायिकाम्प्रति नायककामस्य हेतोर्विद्यमानत्वेऽपि नायिकानिष्ठसुरतेच्छारूपस्य फलस्य अनुदयाद् 'विशेषोक्ति'रर्थालङ्कार । उक्तञ्च मम्मटेन—'विशेषोक्तिरखण्डेषु कारणेषु फलावच' इति । ककारमकारयोरसकृदावृत्तौ अनुप्रासोपि शब्दालङ्कार । एवमर्थालङ्कारसत्त्वेऽप्यनुप्राससद्भावेऽपि ग्राम्यतादोषसद्भावात् सहृदयहृदय नावर्जयति, तस्मान्नात्र माधुर्याख्यो गुण इति परमार्थ ।

[अर्थगतग्राम्यतादोषरहितोदाहरणकथनम्]

'काम कन्दर्पचाण्डालो मयि वामाक्षि ! निर्दय ।
त्वयि निर्मत्सरो दिष्ट्येत्यग्राम्यो ऽर्थो रसावह ॥ ६४ ॥

सहृदयहृदयान्याहरतीति नैवविधे स्थले ऽर्थनिष्ठो ग्राम्यतादोषः । अतएव रसव्यञ्जकतया-ऽत्र माधुर्यगुणसद्भाव । रूपकश्चालङ्कार । उक्तिवैचित्र्यरूप वामनकृत माधुर्यगुणलक्षण-मप्यत्र घटितमिति सूक्ष्म निरीक्ष्यम् ॥ ६४ ॥

[शब्दगतस्य ग्राम्यतादोषस्य वर्णनम्]

[1]शब्देऽपि ग्राम्यताऽस्त्येव सा सभ्येतरकीर्त्तनात् ।
यथा यकारादिपदं रत्युत्सवनिरूपणे ॥ ६५ ॥

अर्थगतमाधुर्यस्य क्षतिकरी ग्राम्यता दर्शिता, सम्प्रति शब्दगतामपि तां दर्शयति— 'शब्दे' इति । 'शब्दे ऽपि ग्राम्यता [दोष] अस्ति एव' । 'सा =शब्दगता ग्राम्यता 'सभ्येतरकीर्त्तनात्' सभायां साधु सभ्यम् । 'तत्र साधु ' [४।४।९८] इति यति प्राप्ते स्वरे विशेषार्थ 'सभाया य ' इति [४।४।१०५] अनेन सूत्रेण 'सभा' शब्दाद् य प्रत्यय । सभ्यात् इतरत् असभ्यम=ग्रामीणहालिकादिजनप्रयोज्य शब्दविशेष. तस्य कीर्त्तनात्= उच्चारणात् 'भवति' इति शेष । 'यथा'=रत्युत्सवनिरूपणे'=रत्युत्सव भोगोल्लासः तस्य निरूपणे वर्णने वोधने इति यावत् 'यकारादिपदम् यकार आदिर्यस्य तत् तादृश पदम्, 'यभ मैथुने' इत्यस्मात् मैथुनार्थकात् 'यभ' धातोर्निष्पन्न 'यभना'दिपदमित्यर्थ । एतादृश-प्रयोगोच्चारणेन प्रयोक्तुरसभ्यतयोपहसनीयता, श्रोतुश्च लज्जमानता जायते तेन रसास्वाद-व्याघाते माधुर्यगुणाभाव ।

[1] निधुवनादिपदाना प्रयोगास्तु विदग्धैरपि क्रियन्ते इति न तत्र ग्राम्यतादोष । यथा—शिशुपालवधे महाकाव्ये माघ —

'अनिमिषितविरामा रागिणा सर्वरात्र नवनिधुवनलीला कौतुकेनाभिवीक्ष्य' इत्यत्र 'निधुवन'पद प्रायुङ्क्त, पर विदग्धैरत्र ग्राम्यतादोषो नाङ्गीक्रियते ।

[अश्लीलतादोषस्य ग्राम्यतायामन्तर्भावकथनम्]

[2]पदसन्धानवृत्त्या वा वाक्यार्थत्वेन वा पुन. ।
दुष्प्रतीतिकर ग्राम्यं यथा या भवत प्रिया ॥ ६६ ॥

[अर्थगतग्राम्यतावर्णनम्]

[3]खर प्रहृत्य विश्रान्त पुरुषो वीर्यवानिति ।
एवमादि न शंसन्ति मार्गयोरुभयोरपि ॥ ६७ ॥

(प्र०)[1] केषा शब्दाना प्रयोगे ग्राम्यतादोष शब्दगत कुत्र च ? केषां प्रयोगे चासां माधुर्यगुण न याहन्ति ? । (उ०) अस्य पृ० प० ५ । १७ ।

(प्र०)[2] अश्लीलतादोषस्य ग्राम्यतायामन्तर्भाव सोदाहरण व्याख्याहि ? (उ०) अस्य पृ० प० २२ ।

*अश्लीलतादोष ग्राम्यतायामेवान्तर्भावयति—'पदसन्धानवृत्त्या' इति । पदानां= सुप्तिङन्तानां सन्धान=समावेशो यस्मिन् तत् पदसन्धान वाक्यमित्यर्थ तद्वृत्त्या तद्गतत्वेन अर्थात् वाक्यगतत्वेन 'वा'=अथवा 'वाक्यार्थत्वेन=वाक्यार्थगतत्वेन यत् 'दुष्प्रतीतिकरम्'= दुष्प्रतीतिजनकम्, अर्थात् लज्जाजुगुप्साऽमङ्गलव्यञ्जकम् अश्लीलम् तदपि 'ग्राम्यम्'= ग्राम्यमेव, ग्राम्यतादोष एवान्तर्भवति माधुर्यगुणव्याघातकरत्वात् । एतदुदाहरणेन स्पष्टी- करोति—'यथा' इति । 'या भवत =[तव] प्रिया' [वल्लभा] 'अस्ति' इति शेष । अस्य वाक्यस्य प्राकरणिकोक्तार्थबोधानन्तर व्यञ्जनया 'याभवत =मैथुनकारिणस्तव मैथुनसा- धनत्वेन प्रीणनकर्त्री' इत्यसभ्यार्थस्य प्रतीति सहृदयानां [सामाजिकानां] लज्जामाव- हतीति असभ्यार्थव्यञ्जनपरमिद वाक्य व्रीडादाय्यश्लीलदोषदुष्टम्, अतो नात्र माधुर्याख्यो गुण । 'यभ' धातोर्भावे घञि 'याभ' इति पदम् यभन याभ मैथुनमित्यर्थ ' याभो- ऽस्यास्तीति 'याभवान्' । 'तदस्यास्त्यस्मिन्निति मतुप्'=[५ । २ । ९४] इतिपाणिनि- सूत्रेण मतुप् । 'मादुपधायाश्च मतोर्वोऽयवादिभ्य ' [८।२।९] इति सूत्रेण मतोर्वस्य य' । [illegible]दाहरण यथा मम—'साधन ते महाराज ! महोच्छ्राय विलोक्यते' इ[illegible] [illegible] पुरुषजव्यञ्जनपरतयाऽश्लीलता व्यनक्ति ।

'[illegible] मृतसत्कारे मन्त्रे सिद्धौषधे मतौ ।
[illegible]ऽनुगमे धने' इति मेदिनी ॥ ६६ ॥

[illegible] ग्राम्यतान्तर्गतत्यश्लीलमुदाहरति—'खरम्' इति । 'वीर्यवान्'=प्रशस्त- [illegible] पुरुष 'खरम्'=उत्कट 'प्रहृत्य'=शत्रून् घातयित्वा 'विश्रान्त '= [illegible] इत्यर्थ । एवमभिधया वृत्त्या प्रकृतमुख्यार्थबोधोत्तर वक्त्रादिवैशिष्ट्य- [illegible] व्यञ्जनया वृत्त्या 'वीर्यवान्=शुक्रवान् पुरुष =तरुण कथित खर=विकट प्रहृत्य= [illegible] विश्रान्त' इत्यसभ्यार्थप्रतीति सामाजिकानां व्रीडामावहतीत्यर्थगतो- [illegible] दोष । तस्मादत्रापि माधुर्याभावो रसव्याघातश्चेत्यत्र तात्पर्यम् ।

[illegible] काव्यप्रकाशे यथा—

[illegible] प्रारब्धस्य [illegible] विसर्गपरा ।
[illegible] न तथा पुनरुन्नति ॥ इति ।

[illegible] कर्तु प्रारब्धस्य स्तब्धस्य=अनम्रस्य यभ- [illegible] दुष्टस्य लिङ्गस्य च यथा [illegible] तथा पुन उन्नति =वृद्धि कामावेगेन [illegible] पुन[illegible] द्वितीयोऽसभ्योऽर्थो व्यङ्ग्य । एवमादिकाव्ये [illegible] ।

[illegible] इति [illegible] । [illegible] न [illegible] ।

'एवमादि' इति । 'एवमादि'=इत्याद्याकारकग्राम्यतादिदोषदुष्ट काव्यम् 'उभयोरपि'= द्वयोरपि 'मार्गयो'=गौडीवैदर्भीरीत्यो'र्न'=नैव 'शमान्ति=नाद्रियन्ते सूरय इति शेष द्वयोर्मार्गयोरनुप्रासप्रयुक्तभेदे सत्यपि ग्राम्यतादिदोषपरिहारे समानतैवेति पर सार: । आदिना अनुचितार्थत्वविरुद्धमतिकारितादीनां सङ्ग्रह' ॥ ६७ ॥*

---

*अत्रेदमत्यावश्यकमाकलनीयम्—द्विविधा तावत् व्यञ्जना शाब्दी आर्थी चेति । उक्तञ्च मम्मटेन—

अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते ।
संयोगाद्यैरवाच्यार्थधीकृद् व्यापृतिरञ्जनम् ॥ इति ।

यत्रानेकार्थाना शब्दानामभिधया युगपदनेकेष्वर्थेषूपस्थितेषु प्रकरणादिवशात् कस्मिंश्चिदेकस्मिन्नेवार्थे ऽभिधा शक्तिर्नियमिता भवति तथापि तत्र द्वितीयार्थोपस्थितिर्जायते सा शाब्दी व्यञ्जना नाम । एतादृशस्थले वाक्यगत. [शब्दगत] एवाश्लीलतादिदोषः । यत्र वक्त्रादिवैशिष्ट्यादपरार्थप्रतीति तत्रार्थी व्यञ्जना आर्थीव्यञ्जनास्थल एव अश्लीलतादीना मर्थगतत्वमिति हि वस्तुस्थिति । एव 'खर प्रहृत्य विश्रान्त' इत्यादौ वक्त्रादिवैशिष्ट्येन 'मैथुन कृत्वा श्रमङ्गत' इत्याकारकासभ्यार्थप्रतीति आर्थ्या व्यञ्जनयैव, नह्यत्रानेकार्थानां शब्दाना प्रकरणादिवशादभिधानियमन केनाप्युद्भावयितु सुशकम्, तस्मादत्र व्रीडाव्यञ्जकतयाऽर्थगताश्लीलत्वरूपो दोष , य दण्डी अर्थगता ग्राम्यतामेव मन्यते ।

'यथा—'या भवत प्रिया' इत्यत्र तु अनेकार्थस्य शब्दस्य प्रकरणादिना 'भवतो या प्रिया' इत्येकस्मिन्नर्थे नियन्त्रणात् 'याभवत [मैथुनिन] तव प्रिया' इति व्रीडादायिनो द्वितीयस्यासभ्यार्थस्य प्रतीतिस्तु शाब्द्या एव व्यञ्जनया ज्ञेया, तस्मादेतादृशस्थले ग्राम्यतापरपर्यायस्याश्लीलतादोषस्य शब्दगतत्वमेव । यतो दोषगुणालङ्काराणा शब्दार्थगतत्वव्यवस्थायां शब्दपरिवृत्तिसहत्वाऽसहत्वे एव बीजमित्यालङ्कारिकारणा परिमार्जितोऽर्थ । अर्थात् यत्र शब्द परिवृत्तिं न सहते तत्र दोषादीनां शब्दगतत्वम्, यत्र शब्दपरिवर्तनेऽपि अर्थ. परिवृत्तो न भवति तत्र तेषामर्थगतत्वमिति निष्कर्ष ।

स्थितेऽत्रैव राजमार्ग'खर प्रहृत्य विश्रान्त पुरुषो वीर्यवानिति' इत्यत्र वाक्यगतमश्लीलत्व न मन्तव्य शाब्द्या व्यञ्जनाया अभावात् । अपिचात्र 'वीर्य' शब्दस्थाने 'बल' शब्दनिवेशेऽपि नार्थस्य परिवृत्तिरिति असभ्यार्थप्रतीतो अर्थगतमेवाश्लीलत्वम् । 'या भवत' इत्यत्र शब्द परिवर्तनां न सहते तस्मादत्र शब्दगतत्वमेवेति दिक् । 'आदिना' इति । कारिकास्थादिपदेनेत्यर्थ । अनुचितार्थलक्षण चन्द्रालोके यथा—'व्यनक्त्यनुचितार्थ यत् पदमाहुस्तदेव तत्' इति । अर्थात अनुचित विवक्षितार्थतिरस्कारकधर्मव्यञ्जकोऽर्थो यस्य तत् अनुचितार्थम् । उदाहरण यथा तत्रैव—'इयमद्भुतशाख्यग्रकेलिकौतुकवानरी' इति ।

इय कामिनी अद्भुतरम्य शाखिनो वृक्षस्याग्रे क्रीडाकौतुक यस्या सा तत्रत्यैति यावत् तादृशी वानरी वनचरी । अत्र नायिकाया 'वानरी'ति पद रूपकवशादुपात्त तद्

[ग्राम्यतादोषस्यापवादस्थलप्रदर्शनम्]

भगिनीभगवत्यादि सर्वत्रैवानुमन्यते ।
विभक्तमिति माधुर्यमुच्यते सुकुमारता ॥ ६८ ॥

असभ्यार्थप्रतिपादकान्यपि कानिचित्पदानि न दुष्टानि इति ग्राम्यताया अपवादमाह—'भगिनी'त्यादि । 'भगिनी भगवती आदिर्यस्य तत् पदं 'सर्वत्रैव = काव्येषु व्यवहारेषु च 'अनुमन्यते' = आद्रियते अदूषकतया स्वीक्रियते सर्वैरिति शेषः । तस्मादेतेषु प्रयुक्तेषु पदेषु नैव श्रोतॄणां वमुख्यमिति भावः । 'इति' = उक्तप्रकारेण 'माधुर्यम्' = माधुर्याख्यो गुणः 'विभक्तम्' विभागेन दर्शितं निरूपितमित्यर्थः । अधुना 'सुकुमारता' नाम गुणः 'उच्यते' = तल्लक्षणविवक्षया निरूप्यते इत्यर्थः । अत्रादिपदेन योनिलिङ्गादिपदानामपि ग्रहणम्, तेषां प्रयोगेऽपि नैव ग्राम्यता [अश्लीलता] ॥ ६८ ॥

[अनुचितार्थ] पशुभावं व्यनक्ति ह्यनुचितार्थो नाम दोषः ।

विरुद्धमतिकृत्=विरुद्धां प्रकृतार्थप्रतिबन्धकीभूतामप्रकृतार्थबुद्धिं करोतीति यत् तदित्यर्थः । उदाहरणं यथा —'अकार्यमित्रमेकोऽसौ तस्य किं वर्णयामहे' इति । अत्र 'कार्यं विना मित्रमिति विवक्षितम् । अकार्याय मित्रम्' इति तु विरुद्धा प्रतीतिः । प्रपञ्चस्तु काव्यप्रकाशादौ द्रष्टव्यः ।

[सौकुमार्यस्य लक्षणम्]

¹अनिष्ठुराक्षरप्रायं सुकुमारमिहेष्यते ।
बन्धशैथिल्यदोषस्तु दर्शितः सर्वकोमले ॥ ६९ ॥

अनिष्ठुरेति—'अनिष्ठुराक्षरप्रायम्'=न निष्ठुराणि अतिकठिनानि परुषाणि अक्षराणि इति अनिष्ठुराक्षराणि तेषां प्रायः बाहुल्यता यत्र [नतु सर्वरूपता] तादृशं वाक्यम् 'इह'=काव्यशास्त्रे 'सुकुमारम्'=सुकुमारतागुणोपेतम् 'इष्यते'=काम्यते कविभिरिति शेषः । 'तु' पुनः 'सर्वकोमले'=सर्वरूपेण कोमलवर्णात्मके वाक्ये 'बन्धशैथिल्यदोषः'=शिथिलबन्धत्वरूपो दोषः 'अस्ति' इति शेषः । यथा मयैव ' मालतीमाला लोलालिकलिला यथा ' इत्यत्रोक्तं । एवञ्च—अनेकेषां कोमलाक्षराणां मध्ये यद् बन्धस्य क्वचित् क्वचित् परुषाक्षर-विन्यासेन गाढत्वसम्पादनं तदेव 'सौकुमार्य'मिति फलितम् । अल्पप्राणमहाप्राणाक्षरघटित-बन्धस्य अशैथिल्ये तु श्लेषः इत्यनयोर्विशेषः । आह च वामनः—'अजरठत्वं सौकुमार्यम्' [का॰ सू॰ ३ । २१] इति, शब्दगुणश्चायम् । अर्थगुणस्तु—'अपारुष्यं सौकुमार्यम्' [का॰ २ । ११] इत्यर्थाश्लीलत्वाभावत्वरूपमपारुष्यं तदित्यपि वामन आह ।

[सौकुमार्यस्योदाहरणम्]

²मण्डलीकृत्य बर्हाणि कण्ठैर्मधुरगीतिभिः ।
कलापिनः प्रनृत्यन्ति काले जीमूतमालिनि ॥ ७० ॥

सौकुमार्यमुदाहरति—'मण्डलीकृत्य' इति । 'मधुरगीतिभिः'=मधुरा मनोहारिणी गीतिः गीतिरिव गीतिः, केका येषां तैः 'कण्ठैः'=गलैः उपलक्षिताः 'कलापिनः'=मयूराः 'जीमूतमालिनि' = जीमूतानां जलदानां मेघानां माला पङ्क्तिः अस्मिन्नस्तीति जीमूतमाली मतुबर्थे इनिः प्रत्यये साधुः । तस्मिन् प्रावृषि 'काले' = समये 'बर्हाणि' = पुच्छानि 'मण्डलीकृत्य' = विस्तारयित्वा 'प्रनृत्यन्ति' = प्रहृष्टाः सन्तः नर्त्तनं कुर्वन्तीत्यर्थः ।

अत्र मकारककारादीनां कोमलानां वर्णानां अन्तरान्तरा टवर्गीयडकाररकारादि-

---

करिहस्तेन सम्बाधे प्रविश्यान्तर्विलोडिते ,
उपसर्पन् ध्वजः पुंसः साधनान्तर्विराजते ॥

अत्र करिहस्तादीनि पदानि अनश्लीलार्थानि तथापि सुरतारम्भगोष्ठ्यां कामिन उक्तित्वात् न दुष्टानि ।

उत्तानोच्छूनमण्डूकपाटितोदरसन्निभे ।
क्लेदिनि स्त्रीव्रणे सक्तिरकृमेः कस्य जायते ॥

अत्र शान्तरसः । अतः स्त्रीव्रणादीनि पदान्यदुष्टानि । एवमेव बीभत्सरसादावपि ग्रन्थान्तरतो ज्ञेयम् । ग्रन्थगौरवभयान्नोक्तम् ।

(प्र॰)¹ सौकुमार्यस्य लक्षणं ब्रूहि ? (उ॰) अस्य पृ॰ ५० ? ।

(प्र॰)² सौकुमार्यस्योदाहरणे तल्लक्षणं घटयतु भवान् ? (उ॰) अस्य पृ॰ ५॰ १५ ।

[illegible]विन्यासेनाय बन्ध कामप्यलौकिकीं सहृदयसाक्षिणीं चारुतां धत्ते इति सौकुमार्यं नाम गुण ।

अत्र प्रकृते वर्षाकालीने कलापिनां नर्तनव्यवहारे 'अन्येऽपि नर्तका मधुर गायन्तो [illegible] तन्वते' इत्याकारस्याप्रकृतव्यवहारस्य समारोपरूपा 'समासोक्ति'रलङ्कार । उक्तं [illegible]-'समासोक्ति परिस्फूर्ति प्रकृते ऽप्रकृतस्य चेत्' इति । स्वभावोक्तिश्च—'स्वभावोक्तिरसौ चारु यथावद्वस्तु वर्णनम्' इत्युक्ते । तस्मादुभयो संसृष्टि ।

[illegible] सौकुमार्यमित्थं सोदाहरणं लक्षितवान्—

सौकुमार्यमापाद्य पर्यायपरिवर्त्तनात्

स [illegible] यात समालिङ्ग्य हुताशनम् ॥ इति ॥

[illegible] —[illegible]शब्दपरित्यागेन तत्पर्यायशब्दप्रयोग 'सौकुमार्यम्' । पर्याय-[illegible] वाच्यार्थ । 'अग्नौ प्रविश्य मृत ' इत्यस्यार्थस्य पर्यायेणान [illegible] कथनम् । तथोक्तौ तु झटित्यमङ्गलप्रतीते पारुष्यम् ।

[illegible]—'[illegible] सौकुमार्यं न गुणान्तर' मित्याशयं मन्यामहे । पारुष्यमत्र न [illegible]कृतमिति बोध्यम् । अन्ये तु 'प्रविश्य मृत' इत्यस्य तत्र प्रवेशेन [illegible] तत्र [illegible] तदभाव एवात्र विवक्षित इत्याहु ॥ ७० ॥

[सौकुमार्यानङ्गीकर्तॄणां मतनिरास]

इत्यनूर्जित एवार्थो नालङ्कारोऽपि तादृश ।

सुकुमारतयैवेतदारोहति सतां मनः ॥ ७१ ॥

[illegible] नव्यानां मतनिरासायाह—'इति इति । 'इति'=उक्तरूप [illegible] उक्तपद्यप्रतिपाद्योऽर्थ 'अनूर्जित '=रसात्मकचमत्कार-[illegible] इत्यर्थ । रसवत एवार्थस्य सहृदयहृदाकर्षकत्वादिति [illegible] । '[illegible]=समासोक्तिरूप स्वभावोक्तिर्वा 'न तादृश '=विलक्षणचमत्का-[illegible], [illegible]लङ्कारस्यापि विच्छित्तिविशेषपोषकत्व यत । तथापि [illegible] सुकुमारतया [illegible]=सुकुमारगुणाकुष्टाक्षरविन्यासत्वेनैव 'सताम्'—सहृद-[illegible] 'मन '=चित्तम् 'आरोहति'=आश्रयते आश्रित्य मुग्ध करोतीत्यर्थ । [illegible] सौकुमार्यगुणोऽङ्गीकर्तव्य ।

[illegible] —[illegible]लङ्कारवैचित्र्यम अन्यत्र गुणकृत वैचित्र्यम । गुणो [illegible] प्रतीयते । उक्तञ्चाभियुक्तै —

[illegible] ।

[illegible] मन ॥ इति ॥

(१० [illegible] निरलङ्कार विद्गणु (।(उ०) अग्र [illegible]

सरस्वतीकण्ठाभरणे भोजराजोऽपि—'अलङ्कृतमपि श्रव्यं न काव्यं गुणवर्जितम्' इत्याह । तस्माद्गुणवैचित्र्याभावे ऽर्थालङ्कारस्य शोभा नास्तीत्यवश्यमेतादृशेषु काव्येषु सौकुमार्यमङ्गीकर्त्तव्यं गुणानां प्राणरूपत्वात् । अत एव पूर्वमुक्तम् 'प्राणा दश गुणाः स्मृता' इति । ७१ ॥

[अत्रैव गौडवैदर्भयोर्मतभेदकथनम्]

¹दीप्तमित्यपरैर्भूम्ना कृच्छ्रोद्यमपि बध्यते ।
न्यक्षेण क्षयितः पक्षः क्षत्रियाणां क्षणादिति ॥ ७२ ॥

सौकुमार्यविषये गौडानां कवीनां मतमाह—'दीप्तम्' इति । 'अपरैः'=गौडैः 'कृच्छ्रोद्यम्'=कृच्छ्रेण कष्टेन उच्चार्यमपि ओजोगुणव्यञ्जकतया परुषवर्णघटिततया च कष्टेनोच्चारणार्हमपि 'दीप्तम्' =वीररौद्रबीभत्सरसादिरूपमिति [मत्वा] 'भूम्ना'=प्राचुर्येण 'बध्यते'= गुम्फ्यते विरच्यत इति यावत् । अर्थात् **गौडा** कवयः वीरादिरसाविष्टे काव्ये ओजोव्यञ्जके परुषवर्णैरावश्यकत्वेन सौकुमार्यं गुणं न रोचयन्ते । **वैदर्भास्तु** ओजस्विस्थलेऽपि सौकुमार्यं स्वीकुर्वन्ति । यथा—

कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकं मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः ।
नरकरिपुणा सार्धं तेषां सभीमकिरीटिनामयमहमसृङ्मांसैः करोमि दिशां बलिम् ॥ इति

अत्र रौद्रो रसः तथापि नात्यन्तमुत्कटा वर्णाः सन्ति तस्माद् वर्णपारुष्याभावात्कोमलवर्णसत्त्वादत्रापि सुकुमारताख्यो गुणः इति वैदर्भसम्मतं मतम् ।

गौडा यथा यत्र सौकुमार्यं न मन्यन्ते तदुदाहरति—श्लोकार्धेन—'न्यक्षेण' इति । 'न्यक्षेण' = न्यक्षन्ति नितरामक्षन्ति ब्राह्मणवधादिकं पापिष्ठं कर्म कुर्वन्तीति 'न्यक्षः' कार्त्तवीर्याः तान् नीचः स्यति हन्तीति 'न्यक्षः' = परशुरामः 'क' प्रत्यये पृषोदरादित्वात्सिद्धिः । तेन 'क्षत्रियाणाम्' = राजन्यानाम्, 'पक्षः'=समूहः 'क्षणात्'=अल्पेनैव कालेन 'क्षपितः'= नाशितः । समग्रं क्षत्रियकुलं स्यमन्तपञ्चके यमलोकं प्रति नीतमित्यर्थः । अत्र रौद्रो रसः, परं कोमलबन्धस्य परित्यागः कृतः, तदेतादृशस्थले सौकुमार्यं गौडैर्नापेक्ष्यते । यत्तु 'न्यक्षेण अन्धेन धृतराष्ट्रेण' इति व्याख्यातं जीवानन्देन तन्निर्मूलं भारते तदीययुद्धापरिचयात् । अन्यद्वारा कृतेऽपि तत्र करुणरससम्भवेन रौद्ररसाभावात् । 'कृच्छ्रोद्यम्' इति 'वदः सुपि क्यप् च' [पा० ३।१।१०६] इति सूत्रेण सुप्युपपदात् 'वद' धातोर्भावे क्यपि रूपम् ॥ ७२ ॥

[अर्थव्यक्तेर्गुणस्य लक्ष्यलक्षणे]

²अर्थव्यक्तिरनेयत्वमर्थस्य हरिणोद्धृता ।
भूः खुरक्षुण्णनागासृग्लोहितादुदधेरिति ॥ ७३ ॥

'अर्थव्यक्तिः' नामकं गुणं सोदाहरणं निरूपयति 'अर्थव्यक्तिः' इति । अर्थव्यक्तिः =

(प्र०) ¹ सौकुमार्ये गौडवैदर्भमतयोर्भेदः स्पष्टः प्रकटीकृतः । (उ० अस्य पृ० ५० ३
(प्र० ² अर्थव्यक्तिः लक्षणोदाहरणाभ्यां प्रपञ्चयति । (उ० अस्य पृ० ५० २८

अर्थस्य प्रतिपाद्यस्य विषयस्य [यत्] 'अनेयत्वम्' = अकल्प्यत्वम्, अर्थात् अध्याहारादिना विनैव गृहीतैरेव शब्दैरुपस्थिति सा अर्थव्यक्ति एतन्नामा गुण इत्यर्थः । 'अव्यवहितान्वयप्रसिद्धार्थपदत्वमर्थव्यक्ति रिति तु फलितम् । उदाहरति—'हरिणा' इति । 'हि' = लोके हरिणा वराहावतारेण विष्णुना 'खुरक्षुण्णनागासृग्लोहितात्' = खुरै क्षुण्णा क्षुण्णा चोदिता हता ये नागा पन्नगा पातालवासिन इत्यर्थ तेषाम् असृग्भि रुधिरै लोहितात् रक्तात् 'उदधे' = समुद्रात् 'उद्धृता' = ऊर्ध्वमानीता रसातलादुद्धृत्योपरि स्थापितेत्यर्थ ।

अत्र यावन्त शब्दा उपात्ता तैरेवार्थः प्रतीयते नतु विवक्षितार्थबोधाय काचन अध्याहारादिना [कष्ट] कल्पना कृता ।

वामनीयार्थव्यक्ति शब्दगुण । यदाह वामन —'अर्थव्यक्तिहेतुत्वमर्थव्यक्ति' [का० सू० ३ । २३] इति । अन्येऽपि—'अर्थव्यक्ति पदानां हि झटित्यर्थसमर्पणम्' इत्याहु यथा वा श्रीमद्भागवते—

यदा मृधे कौरवसृञ्जयानां वीरेष्वथो वीरगतिं गतेषु ।
वृकोदराविद्धगदाभिमर्श-भग्नोरुदण्डे धृतराष्ट्रपुत्रे ॥
माता सुतानां निधनं निशम्य विलप्य घोरं परितप्यमाना ।
तदारुदद्बाष्पकलाकुलाक्षी तां सान्त्वयन्नाह किरीटमाली ॥ इति ।

अत्र निर्दिष्टैरेव पदै विवक्षितार्थपरिसमाप्तेर्नाध्याहारादिरूपा क्लिष्टकल्पना अतोऽर्थव्यक्तिर्गुण ।

'लोहितात्'=रक्तात् 'उदधे'=सागरात् 'मही'=पृथ्वी 'उद्धृता' = वहिरानीता, 'इति इयति'= एवमादिप्रकारे [एतावति] 'निर्दिष्टे'=प्रथिते कथिते इति यावत् 'नेयत्वम्'=क्लिष्टकल्पनावत्त्वम् अर्थस्य भवतीति शेष ।

अथ भाव । 'उत्गास्ज' इति कथिते कथमित्याकांक्षायां सत्यां 'खुरक्षुण्णे'त्यायंशस्याध्याहारे सत्येव अर्थ स्फुट प्रतीयते नान्यथा, तस्मादेतादृशस्थले नार्थव्यक्ति । यत्र च रूढिप्रयोजनाभावे लक्षणा कृता स्यात् तत्रापि*नेयार्थदोषस्थले नार्थव्यक्तिरित्यपि न विस्मरणीयम् ॥ ७४ ॥

¶नेदृशं वहु मन्यन्ते मार्गयोरुभयोरपि ।
नहि प्रतीति· सुभगा शब्दन्यायविलङ्घिनी ॥ ७५ ॥

उक्तेऽर्थे गौडवैदर्भयोरैकमत्यमाह—'नेदृशम्' इति । 'उभयो'=द्वयो 'अपि मार्गयो'=वैदर्भीगौड्यो रीत्यो 'ईदृशम्'=नेयत्ववद् वाक्यम् 'न = नैव 'वहु' = उपयुक्त 'मन्यन्ते'=स्वीकुर्वन्ति, वैदर्भा गौडाश्च कवय इति शेष । अत्र युक्तिमाह— 'न' इति । 'हि' यत 'शब्दन्यायविलङ्घिनी=शब्दन्याय शाब्दबोध वाक्यार्थबोध इति यावत् तस्य विलङ्घिनी = उल्लङ्घनकर्त्री शाब्दबोधविलम्बकारिणी इत्यर्थ 'प्रतीति'= ज्ञान 'न' नैव 'सुभगा'=मनोरमा सहृदयहृदयग्राहिणी नेत्यर्थ । सहृदया अध्याहारादिना पदादिकल्पनया कष्टेन जायमानां शाब्दप्रतीतिं नाद्रियन्ते अतो नेयत्वं [दोष] सर्वथा परिहर्त्तव्यमिति भाव ।

(प्र०)¶ अर्थव्यक्तिविषये गौडानां विदर्भाणा च विमतिरस्ति नवा ? इति ग्रन्थप्रमाणेन स्पष्टीकुरु ? (उ०) अस्य पृ० प० ८ ।

*रूढिप्रयोजनाभावादशक्तिकृत लक्ष्यार्थप्रकाशनम् । यथा—'चरणे कमलाघातं मुख सुमुखि ! तेऽकरोत्' । अत्र मुखस्य चरणाभावात् तदाघातासम्भवेन मुख्यार्थस्य बाध, तेन निर्जितत्व लक्ष्यम्, परमत्र लक्षणाया मूल न रूढि नवा प्रयोजनमिति नेयार्थत्वमस्य ज्ञेयम् । विशिष्टन्तु मत्प्रणीतकाव्यप्रकाशप्रभायां द्रष्टव्यम् । वस्तुतस्तु—निर्जितत्वातिशयत्वस्य व्यङ्ग्यत्वे प्रकृते दोषाभाव एव तस्मादुदाहरणान्तर मृग्यम् । यदपि प्रदीपानुसारिभिर्वामनादिभि निर्जितत्वातिशयत्वस्य प्रयोजनत्वस्वीकारे उत्तमगुणे कमलादौ न्यूनद्वारा चरणाघातादिवर्णनेन वर्ण्यस्यैवापकर्षापत्तिर्भाति प्रकटीकृता तदपि तेषां साहसमात्र व्यनक्ति, वहुत्र प्रतीपव्यतिरेकादिषूपमानन्यूनत्ववोधनेपि उपमानोपमेयभावात्तते । तस्मात 'तपर्त्तुपूर्त्तावपि मेदसां भरा विभावरीभिर्विभराम्बभूविरे' इत्यादौ मुख्यार्थबाधे अतिवृहत्त्व लक्ष्यते रूढिप्रयोजनान्यतरच्च नास्तीति नेयार्थता अतिवृहत्त्वात्पृथक् वृहत्त्वातिशयताया अभावादिति संक्षेप ।

[उदारताया लक्षणम्]

उत्कर्षवान् गुणः कश्चिद् यस्मिन्नुक्ते प्रतीयते ।
तदुदाराह्वयं तेन सनाथा काव्यपद्धतिः ॥ ७६ ॥

उदारता लक्षयति—'उत्कर्षवान्' इति । 'यस्मिन्'=वाक्ये (काव्ये) 'उक्ते'=कथिते सति 'उत्कर्षवान्'=वर्णनीयस्य नायकादेः उत्कर्षताजनकः प्रशंसाप्रतीतिकरः 'कश्चित्'=लोकोत्तरः 'गुणः' दयादाक्षिण्यादिरूपः शौर्यौदार्यादिरूपो वा धर्मः 'प्रतीयते'=ज्ञायते 'तत्'=वाक्यम् 'उदाराह्वयम्'=औदार्यगुणोपेतं 'भवति' इति शेषः । 'तेन'=औदार्यगुणेन 'काव्यपद्धतिः'=द्विविधोऽपि काव्यमार्गः गौडवैदर्भसम्मतः काव्यरीतिरूपः 'सनाथा'=सहिता 'भवति' इति शेषः । 'वाक्यस्य वर्णनीयोत्कर्षजनकगुणव्यञ्जकत्वमुदारत्व' मिति फलितं लक्षणम् ।

अर्थगतोऽयं गुणः । शब्दगतस्तु विकटत्वलक्षणो वामनेनोक्तः—'विकटत्वमुदारता' [का० सू० ३ । २२] यस्मिन् सति 'नृत्यन्तीव पदानि' इति जनस्य वर्णभावना भवति तत् विकटत्वं लीलायमानत्वं शब्दगतमौदार्यमित्यर्थः उदाहरणञ्च तस्यैव यथा— 'स्वचरणविनिविष्टैर्नूपुरैर्नर्तकीनां झणितिरणितमासीत्तत्र चित्रं कलञ्च' इति । अत्र क्रमशो कतिपयपदानाम् पदप्रथमाक्षराणां पदान्तरप्रथमाक्षरैः सादृश्यञ्च ।

[उदारताया उदाहरणम्]

अर्थिनां कृपणा दृष्टिस्त्वन्मुखे पतिताऽसकृत् ।
तदवस्था पुनर्देव ! नान्यस्य मुखमीक्षते ॥ ७७ ॥

वाक्ये'=राज्ञो दानप्रतिपादके काव्ये 'उत्कर्ष',=राज्ञो दानोत्कर्षे 'साधु'=समीचीन यथा स्यात् तथा 'लक्ष्यते'=प्रतीयते सहृदयैरिति शेष 'अन्यत्र'=पद्यान्तरेऽपि 'अनेन एव पथा' = दर्शितेनैव रीतिरूपेण मार्गेण 'समानन्यायम्' = समनियम (यथा स्यात् तथा) 'ऊह्यताम्' = तर्क्यताम् अर्थात् उक्तरीत्यनुसारेणैव उदारतागुणोपेत काव्य विरच्यताम् ।

उदारताया अन्यदुदाहरण यथा—

विभज्य मेरुर्नयदर्थिसात्कृतो न सिन्धुरुत्सर्गजलव्ययैर्मरुः ।
अमानि तत्तेन निजायशोयुग द्विफालबद्धाश्चिकुरा शिर स्थितम् ॥

अत्र राज्ञो नलस्यौदार्यगुणवर्णनेन उदारतागुण । एव भङ्गिविशेषोक्तथाऽर्थप्रत्यायकत्वमुदारता इति दण्ड्याशय फलति ।

जयदेवस्त्वित्थमाह—

उदारता तु वैदग्ध्यमग्राम्यत्वात्पृथङ्मता ।
मान मुञ्च प्रिये किञ्चिल्लोचनान्तमुदञ्चय ॥ इति ।

अत्रैवार्थे वामनस्यापि सवाद । तथाहि—'अग्राम्यत्वमुदारता' [वा०सू०अ० ३।१३] ग्राम्यत्वप्रसङ्गे अग्राम्यत्वमुदारता ।

[अन्यमतेन उदारताया लक्षणम्]

श्लाघ्यैर्विशेषणैर्युक्तमुदारं कैश्चिदिष्यते ।
यथा लीलाम्बुजक्रीडासरोहेमाङ्गदादयः ॥ ७६ ॥

अन्यमतेन उदारतां लक्षयति—'श्लाघ्यै' इति । 'श्लाघ्यै' = सुन्दरै सहृदयहृदयावर्जकै प्रशसनीयै 'विशेषणै' = विशेष्यस्य धर्मै 'युक्तम्' = समन्वित वाक्यम् 'उदारम्' = औदार्यगुणयुक्तम् 'कैश्चित्' = कविभि 'इष्यते' मन्यत इत्यर्थ । उदाहरणमाह—'यथा' इति 'लीलाम्बुज०' = 'लीलाम्बुजम्' इत्यत्र अम्बुजे 'लीला' पदनिवेशेन तदीयवर्णसौगन्ध्याद्यतिशय प्रतीयते । एव 'क्रीडासर' इत्यत्र सरसि 'क्रीडा' विशेषणदानेन कमल-कुमुद-जलचर-विहङ्गशोभितस्वच्छस्वादुजलवत्त्वादिक गम्यते । शुष्के समले च सरोवरे क्रीडाया कर्त्तुमनर्हत्वात्, शृङ्गाराद्यनुद्दीपकत्वाच्च तस्य । एव 'हेमाङ्गदम्' इत्यत्र अङ्गदे हेमविशेषणोपन्यास तस्य सुवर्णमयत्वेन बहुमूल्यत्वादिकव्यञ्जनार्थ । एवमादिषु औदार्यम् ।

अत्र 'कैश्चित्' इति वचनेन अस्मिन्मते स्वानादर प्रकटीकृत । तत्र वागन्तु—अपुष्टार्थदोषराहित्यस्य साभिप्रायविशेषणस्थले परिकरालङ्कारस्य च स्वीकार एव । अस्मद्भावनया तु भङ्गिविशेषोक्त्याऽर्थप्रत्यायकत्वमत्रापि घटत एवेति 'कैश्चित्' इत्युक्त्वाऽस्मिन्मते दण्डिनामनादरसूचन स्वातन्त्र्यमावेदयति । अत एव—'चुम्बन देहि मे बाले दृष्टकामस्य शान्तये' इत्यादिस्थले नोदारता किन्तु ग्राम्यतैव ॥७६॥

वाक्ये'=राज्ञो दानप्रतिपादके काव्ये 'उत्कर्ष,=राज्ञो दानोत्कर्ष 'साधु'=समीचीन यथा स्यात् तथा 'लक्ष्यते'=प्रतीयते सहृदयैरिति शेष 'अन्यत्र'=पद्यान्तरेऽपि 'अनेन एव पथा'=दर्शितेनैव रीतिरूपेण मार्गेण 'समानन्यायम्'=समनियम (यथा स्यात् तथा) 'ऊह्यताम्'=तर्क्यताम् अर्थात् उक्तरीत्यनुसारेणैव उदारतागुणोपेत काव्य विरच्यताम् ।

उदारताया अन्यदुदाहरण यथा—

विभज्य मेरुर्न यदर्थिसात्कृतो न सिन्धुरुत्सर्गजलव्ययैर्मरु‌ः ।
अमानि तत्तेन निजायशोयुग द्विफालबद्धाश्चिकुरा शिर स्थितम् ॥

अत्र राज्ञो नलस्यौदार्यगुणवर्णनेन उदारतागुण । एवं भङ्गिविशेषोक्त्याऽर्थप्रत्यायकत्वमुदारता इति दण्ड्याशय फलति ।

अयदेवास्त्वित्यमाह—

उदारता तु वैदग्ध्यमग्राम्यत्वात्पृथङ्मता ।
मान मुञ्च प्रिये किञ्चिल्लोचनान्तमुदञ्चय ॥ इति ।

अत्रैवार्थे वामनस्यापि सवाद । तथाहि—'अग्राम्यत्वमुदारता'[वा०सू०अ० २।१३] ग्राम्यत्वप्रसङ्गे अग्राम्यत्वमुदारता ।

[अन्यमतेन उदारताया लक्षणम्]

श्लाघ्यैर्विशेषणैर्युक्तमुदारं कैश्चिदिष्यते ।
यथा लीलाम्बुजक्रीडासरोहेमाङ्गदादयः ॥ ७६ ॥

अन्यमतेन उदारतां लक्षयति—'श्लाघ्यै' इति । 'श्लाघ्यै'=सुन्दरै सहृदयहृदयावर्जकै प्रशसनीयै 'विशेषणै'=विशेष्यस्य धर्मै 'युक्तम्'=समन्वित वाक्यम् 'उदारम्=औदार्यगुणयुक्तम् 'कैश्चित्'=कविभि 'इष्यते' मन्यत इत्यर्थ । उदाहरणमाह—'यथा' इति 'लीलाम्बुज०'= 'लीलाम्बुजम् इत्यत्र अम्बुजे 'लीला' पदनिवेशेन तदीयवर्णसौगन्ध्याद्यतिशय प्रतीयते । एव 'क्रीडासर' इत्यत्र सरसि 'क्रीडा' विशेषणदानेन कमल-कुमुद-जलचर-विहङ्गशोभितस्वच्छस्वादुजलवत्त्वादिक गम्यते। शुष्के समले च सरोवरे क्रीडायाः कर्तुमनर्हत्वात्, शृङ्गाराद्यनुद्दीपकत्वाच्च तस्य । एव 'हेमाङ्गदम्' इत्यत्र अङ्गदे हेमविशेषणोपन्यास तस्य सुवर्णमयत्वेन बहुमूल्यत्वादिकव्यञ्जनार्थ‌ । एवमादिषु औदार्यम् ।

अत्र 'कैश्चित्' इति कथनेन अस्मिन्मते स्वानादर प्रकटीकृत । तत्र बीजन्तु—अपुष्टार्थदोषराहित्यस्य साभिप्रायविशेषणस्थले परिकरालङ्कारस्य च स्वीकार एव । अस्मद्भावनया तु भङ्गिविशेषोक्तार्थप्रत्यायकत्वमत्रापि घटत एवेति 'कैश्चित्' इत्युक्त्वाऽस्मिन्मते दण्डिनामनादरसूचन स्वातन्त्र्यमावेदयति। अत एव—'चुम्बन देहि मे बाले दृष्टकामस्य शान्तये' इत्यादिस्थले नोदारता किन्तु ग्राम्यतैव ॥७६॥

अवलोक्यम् । अत्र तदुदाहरणेन ग्रन्थगौरव स्यादिति भाव । आदिपदेन चम्पूविरुदादीनां ग्रहणम् । परमिद वैदर्भकवीनां मतानुरोधेनोक्तम् । गौडानां मतेतु पद्यमयेष्वपि काव्येषु ओजस उच्चावचप्रकारता दृश्यते । यथा सूर्यशतकादौ । 'आख्यायिका' पदस्यविनिवेशेन कथायां रौद्रादिरसेऽपि न दीर्घ समास उचित इति सूचितम् ॥ ८१ ॥

[1]अस्तमस्तकपर्यस्तसमस्तार्कांशुसंस्तरा ।
पीनस्तनस्थितातम्रकम्रवस्त्रेव वारुणी ॥ ८२ ॥

गौडमतानुसारेण पद्ये दीर्घसमासरूपमोजो दर्शयति—'अस्त०' इति 'अस्त' अस्ताचल तस्य 'मस्तके' शृङ्गे 'पर्यस्ता' परितो लम्बमाना 'समस्ता' सर्वे ये 'अर्कस्य' सूर्यस्य 'अशव' मयूखा सायकालत्वादारक्ता किरणा तै 'सस्तर' आवरणमाच्छादनं यस्या सा एवभूता 'वारुणी =वरुणदेवताका पश्चिमा दिक् । 'पीन०' इति । 'पीने' पीवरे नवयौवनहेतोर्घने [नतु शिथिले] 'स्तने' कुचे 'स्थित' पतित आताम्रम् किंचिद् रक्त 'कम्र' सुन्दर 'वस्त्र' वसनमुत्तरीय चोलिकाख्यं वा यस्या सा तादृशी 'नायिकेव लक्ष्यते' इति शेष. अत्र सर्वत्र समासवाहुल्यरूपमोज ॥ ८२ ॥

[ओजोगुणे मतान्तरकथनम्]

इति पद्येऽपि पौरस्त्या बध्नन्त्योजस्विनीर्गिरः ।
[2]अन्ये त्वनाकुलं हृद्यमिच्छन्त्योजोगिरां यथा ॥ ८३ ॥
पयोधरतटोत्सङ्गलग्नसन्ध्यातपांशुका ।
कस्य कामातुरं चेतो वारुणी न करिष्यति ॥ ८४ ॥

ओजोगुणविषये अन्येषां मतमाह—'इति' इति । 'पौरस्त्या' = पूर्वदिग्भवा गौडा कवय 'इति' = उक्तप्रकारेण 'ओजस्विनी = ओजोगुणवती 'गिर' = काव्यवाणी' 'बध्नन्ति' = ग्रन्थयन्ति अर्थात् समासभूयस्त्वमेव तेषामोजोगुणलक्षणम् । अपरमतेन ओजोलक्षणमाह—'अन्ये तु इति । 'अन्ये तु = केचित्तु कवय 'गिराम्' = काव्यावाक्यानाम् 'अनाकुलम्' = अनाकुलत्व [भावप्रधानो निर्देश] उत्कटसमासादिना श्रोतृणां बुद्धेर्योऽव्याकुलीभाव तद्विहीनत्वं 'हृद्यम्' = सामाजिकहृदयावर्जकम् 'ओज' = ओजोगुणम् 'इच्छन्ति' = कामयन्ते ।

समासदैर्घ्य, स्वल्पसमासता, समासाभावो वा यत्किमपि भवतु पर यदाकर्णनमात्रेण श्रोतारो बुद्धेराकुलीभाव न भावयेयु यच्च श्रुतिसुखावह स्यात तदेव वाक्यमोजोगुणयुक्तमस्तीति एकेषां कवीनामाशय । एतदुदाहरणेन स्पष्टीकरोति—'पयोधर०' इति । पयोधर वारिद एव पयोधर स्तन कुच तस्य य तट = प्रान्तभाग तस्य उत्सङ्गे = अङ्के लग्न =

---

[1] (प्र०) गौडमतानुसारेण ओजोगुणमुदाहरणे लक्षणद्वारा स्पष्टीकुरु ? (उ०) अस्य पृ० प० ५ ।

[2] (प्र०) मतान्तरेण ओजोगुण ।वशगु ? उ० अस्य पृ० प० १- ।

[कान्तेर्लक्षणम्]

१कान्तं सर्वजगत्कान्तं लौकिकार्थानतिक्रमात् ।
तच्च वार्त्ताभिधानेषु वर्णनास्वपि दृश्यते ॥ ८५ ॥

क्रमप्राप्तं 'कान्ति' गुणं लक्षयति—'कान्तम्' इति । 'लौकिकार्थानतिक्रमात्'=लोके विदितं लौकिकं लोकप्रसिद्धं इत्यर्थः सचासावर्थः प्रतिपाद्यं वस्तु तस्यानतिक्रमात् अनुल्लङ्घनात् त्यागाभावादिति यावत्, 'सर्वजगत्कान्तम्'=सर्वेषां जगतां सुरासुरादिमनुष्यपर्यन्तानाम् कान्तं हृद्यम् बाधयुद्धयभावसहकृतझटित्यर्थज्ञानेन चमत्कारकारि यद् वाक्यं तत् 'कान्तम्'=कान्तिनामकगुणयुक्तं भवति । 'लोकप्रसिद्धवस्तुवर्णनं कान्ति'रिति तु फलितं लक्षणम् । 'तच्च'=कान्तिगुणयुक्तवाक्यञ्च 'वार्त्ताभिधानेषु'=कुशलप्रश्नप्रियालापादिप्रस्तावेषु तथा 'वर्णनासु'=यथास्थितवस्तुस्वरूपनिरूपणासु 'अपि' च 'दृश्यते'=आलोक्यते कविसमये इति शेषः ।

केचित्तु—वार्त्ता इतिहासः तदभिधानेषु तत्कथनेषु इतिहासानां यथावस्थितरूपेणैव वर्णनीयत्वात् अन्यथावर्णने तु श्रोतॄणामनाश्वासप्रसङ्गः, तेन च विनेयानां शिक्षाहीनानां राजकुमारादीनां कविकृतेषु बन्धेषु प्रवृत्तिरेव न स्यादिति व्याचक्षते ।

इयं कान्तिरर्थगुणः अर्थबोधात्प्रागप्रतीतेः । शब्दगता कान्तिस्तु—'औज्ज्वल्यं कान्तिः' [का० सू० ३ । १ । २५] इति बन्धस्योज्ज्वलत्वरूपा वामनोक्ता ज्ञेया । उदाहरणं तत्रैव यथा—'कुवलयनेत्रालीस्तव किसलयनालीपरिसर' इति । अयमाशयः—'पत्रम्' इति वक्तव्ये 'किसलय'मित्यादि, 'रात्रि' इति वक्तव्ये 'रजनि' इति, 'जलधौ' इति वक्तव्ये 'अधिजलधि' इति, 'कमलमिव' इति वक्तव्ये 'कमलायते' इत्यादि शब्दगतकान्तेर्हेतुर्बोध्यः ।

'लौकिक' इत्यत्र 'लोकसर्वलोकाट्ठञ्' [५।१।४४] इति सूत्रेण विहिताध्ठञ् ॥८५॥

[कान्तेरुदाहरणम्]

गृहाणि नाम तान्येव तपोराशिर्भवादृशः ।
सम्भावयति यान्येव पावनैः पादपांशुभिः ॥ ८६ ॥

आदौ वार्त्ताभिधाने कान्तिमुदाहरति—'गृहाणि' इति । 'नाम' इति सम्भावनामाह । 'तानि एव गृहाणि'=प्रशस्तगृहाणि सन्ति इति शेषः । 'यानि भवादृशः' लोकोत्तरमहिमशाली 'तपोराशिः'=पुण्यात्मा 'पावनैः'=पवित्रैः 'पादपांशुभिः'=चरणरजोभिः एव 'सम्भावयति'=सम्भालयति स्वागमनेन पवित्रीकरोतीत्यर्थः ।

अत्र 'गृहाणि' इति पदं लक्षणया प्रशस्तगृहबोधकम्, प्रशस्ततायाः आधिक्यञ्च व्यङ्ग्यम् । अत एव अर्थान्तरसङ्क्रमितवाच्यो लक्षणामूलो ध्वनिः बोध्यमिदम् । अत्र सज्जनचरणप्रवेशेन स्थानस्योत्तमतारूपो वर्णनीयोऽर्थो लोकप्रसिद्ध एव, तस्मादियं प्रियालापरूपा वार्त्ता, तत्सम्बन्धी अर्थगतः कान्तिगुणः ॥ ८६ ॥

(प्र०) १ कान्तेर्लक्षणम् । (उ०) अस्य० पृ० ५० । ।

अत्रापि लोकप्रसिद्धभारोद्वहनवस्तुवर्णनात्मिका स्फुटा कान्तिः ॥ ८८ ॥

[कान्तिविषये गौडानां मतभेदकथनम्]

लोकातीत इवात्यर्थमध्यारोप्य विवक्षितः ।
योऽर्थस्तेनातितुष्यन्ति विदग्धा नेतरे जनाः ॥ ८६ ॥

लक्षितकान्तौ गौडानां मतमेभेदमाह—'लोकातीत' इति । अत्यर्थे इवाव्ययम् । 'योऽर्थः'=प्रतिपाद्य वस्तु 'लोकातीत इव'=लोकप्रसिद्धिमतिक्रम्य वर्त्तमानोऽपि 'अध्यारोप्य' उपचर्य उपचारं कृत्वा 'विवक्षित'=वक्तुमिष्टः स्यात् 'तेन'=उपचरितेनार्थेन 'विदग्धाः'= गौडाः कवयः 'अतितुष्यन्ति'=बहुप्रसन्ना भवन्ति । 'इतरे जनाः' वैदर्भाः कवयः 'न'=नैव तेन तुष्यन्ति, न ते गौडमतानुरोधिन इत्यर्थः । विदग्धा' इति सोपहासमुक्तिः विशेषेण दग्धा असम्भव्यर्थानुरोधिमनःक्लेशवन्तः इत्यर्थः । प्रौढोक्तिप्रिया गौडाः, यथावद्वस्तु-वर्णनाप्रिया वैदर्भाः इत्युक्तलक्षणां कान्तिं गौडा न मन्यन्त इति सारः ।

अनया रीत्या अत्युक्त्यतिशयोक्तिस्थले विद्यमाना कान्तिर्गौडमतानुरोधिनी कवि-प्रौढोक्तिमन्तरा द्वयोरलङ्कारत्वासत्त्वात्, तस्मात् 'अनयोरनवद्याङ्गि' इत्युदाहरणं वैदर्भमते कथं घटत इति सन्तः सूक्ष्मया धिया स्वयमालोचयन्तु । ग्रन्थगौरवभयात् नाधिकं तन्यते ।८६।

[गौडमते निरुक्तकान्तेर्विपर्ययः]

[1]देवधिष्ण्यमिवाराध्यमद्यप्रभृति नो गृहम् ।
युष्मत्पादरजःपातधौतनिःशेषकिल्बिषम् ॥ ६० ॥

गौडमतेन वार्त्तायां निरुक्तकान्तेर्विपर्ययं दर्शयति—'देवधिष्ण्यम्' इति । 'अद्यप्रभृति' अद्यदारभ्य 'नः'=अस्माकं 'गृहम्'=सद्म 'युष्मत्पा०' युष्माकं पादरजसः पातेन चरणरेणोः सम्पर्केण धौतं क्षालितं विध्वस्तं दूरीकृतमित्यर्थः किल्बिषं पापं यस्य तत् तादृशं सत् 'देवधिष्ण्यम्-इव'=देवमन्दिरमिव 'आराध्यम्'=ससेव्यं 'भविष्यति' इति शेषः ।

अत्र महापुरुषाणां चरणरजःस्पर्शेन गृहस्य पवित्रता लोकप्रसिद्धैव । देवतासाम्यं तु तत्र कविप्रौढोक्त्यारोपितमेवेति वार्त्तायां विपर्ययः ॥ ६० ॥

[2]अल्पं निर्मितमाकाशमनालोच्यैव वेधसा ।
इदमेवंविधं भावि भवत्याः स्तनजृम्भणम् ॥ ६१ ॥

वर्णनायां गौडमतेन निरुक्तकान्तेर्विपर्ययमाह—'अल्पम्' इति । 'भवत्याः'=स्तन-जृम्भणम्'=स्तनयोर्वक्षोजयोर्जृम्भणं उपचयः वृद्धिरिति यावत् 'एवंविधम्'=विशालम् अधिकावकाशापेक्षि 'भावि'=भविष्यति 'इदम् अनालोच्य' एतत् अविविच्यैव 'वेधसा'= विधात्रा 'आकाशम्'=गगनम् 'अल्पम्'=न्यूनं 'निर्मितम्'=रचितम् इत्यन्वितोऽर्थः ।

(प्र०)[1] कान्तिविषये गौडानां मतभेदे किं ब्रूहि ? (उ०) अस्य पृ० प० ३ ।
(प्र०)[1] गौडमते वार्त्ताकान्तेर्विपर्ययमुदाहर ? । (उ०) अस्य पृ० प० १६ ।
(प्र०)[2] वर्णनायां कान्तिगौडमतोदाहरणं कथय ? (उ०) अस्य पृ० प० २८ ।

'प्रकृते वस्तुनि अप्रकृतस्य लोकप्रसिद्धो विच्छित्तियुतो धर्मारोप समाधि'रिति फलितं लक्षणम् । धर्मस्य समारोपे एवाय गुण । यत्र तु धर्मिण. समारोपस्तत्र 'अतिशयोक्ति' रलङ्कार इत्यनयोर्विशेष ॥ ६३ ॥

[समाधेरुदाहरणम्]

कुमुदानि निमीलन्ति कमलान्युन्मिषन्ति च ।
इति नेत्रक्रियाध्यासाल्लब्धा तद्वाचिनी श्रुतिः ॥ ६४ ॥

समाधिमुदाहरति—'कुमुदानि' इति । 'कुमुदानि'=कैरवाणि नीलोत्पलानीत्यर्थ । 'निमीलन्ति'=मुकुलीभवन्ति 'च' तथा 'कमलानि=पद्मानि दिवाविकाशीनि सरोजानि 'उन्मिषन्ति'=विकसन्ति । प्रात कालवर्णनमिदम् । अत्र प्रस्तुतयोर्नेत्रयोनिमीलनोन्मेषौ धर्मौ अप्रस्तुतयो कुमुदकमलयो संकोचविकाशरूपधर्मतादात्म्येनाध्यवसितौ । सादृश्यातिशयसामर्थ्यात्, तौ च लोकप्रसिद्धावेवाभिमतयोक्तौ । एतत्स्वय स्फुटीकरोति— इति' इत्युत्तरार्धेन । 'इति'=दर्शितप्रकारेण 'नेत्रक्रियाध्यासात्'=नेत्रयो क्रियाभ्यां निमीलनोन्मेषरूपाभ्या सह 'अध्यासात्'=आरोपात् 'तद्वाचिनी'=तयोर्निमीलनोन्मीलनयो वाचिनी प्रतिपादिका 'श्रुति'=नेत्रक्रियावाचक शब्द 'लब्धा'=स्वप्रतिपादकतया अवगता । अर्थात् नेत्रकमलयोरभेदमारोप्य तत्क्रिययोरपि अभेदबुद्धया द्वयोरेकेनैव शब्देन यत्प्रतिपादन तदेव समाधिर्गुण । सोऽयमर्थगुण * । अर्थ एवार्थान्तरस्यारोपात् । शब्दगत 'समाधि'स्तु आरोहावरोहक्रमरूप वामनोक्तो ऽन्य । तथाच वामनसूत्रम्—

आरोहावरोहक्रम समाधि [का० सू० १ । १२] आरोहस्यावरोहे सति परिहार अवरोहस्य वा आरोहे सति परिहार इति तत्सूत्रार्थ । तत्रारोहपूर्वकोऽवरोहो यथा— 'निरानन्द कौन्दे मधुनि परिभुक्तोज्झितरसे०' इति । अत्र 'निरानन्द कौन्दे' इति

---

* अर्थगत समाधिं वामन प्रकारान्तरेणावर्णयत् । तथाहि—

'अर्थदृष्टि समाधि' अध्या० ३। सू०६) अर्थस्य दर्शन दृष्टि. । समाधिकारणत्वात् समाधि । अवहित हि चित्तमर्थान् पश्यतीति० । 'अर्थोद्विविधोऽयोनिरन्यच्छायायोनिश्च' (अध्या० ३ । सू० ७) इति । तद्यथा—

आश्वपेहि मम शीधुभाजनाद्यावदग्रदशनैर्न दश्यसे ।
चन्द्र ! मद्दशनमण्डलाङ्कित ख न यास्यसि हि रोहिणीभयात् ॥
मा भै शशाङ्क ! मम शीधुनि नास्ति राहु
खे रोहिणी वसति कातर ! किं बिभेषि ।
प्रायो विदग्धवनिता नवसङ्गमेषु
पुंसां मन प्रचलतीति किमत्र चित्रम् ॥

अत्र पूर्वस्य श्लोकस्यार्थोऽयोनि । द्वितीयस्य च अन्यच्छायायोनिरिति । विस्तरस्त्वन्यतोऽवमेय ।

अत्र प्रागभेराविनाशपूर्वकाकाशरचनावर्णनया स्तनयोरतिपीनत्वोत्कृतत्वे प्रतिपादिते । तदेतत्सर्वमत्युक्तिरूप कवे स्वप्रौढिकल्पित न तु लोकप्रसिद्धेन रूपेण वर्णितम्, तादृश तत् प्रयोक्तृहृदयमनोयतां प्रकटीकरोति, तस्मादीदृश वाक्य कान्तिमिति वैदर्भाभिप्राय ॥ ६१

इदमत्युक्तिरित्युक्तमेतद्गौडोपलालितम् ।

प्रस्थानं प्राक् प्रणीतन्तु सारमन्यस्य वर्त्मन. ॥ ६२ ॥

उक्तमर्थमुपसंहरति—'इदम्' इति । 'इदम्'=उपरि दर्शितमेवम्प्रकार काव्यम् 'अत्युक्ति' इत्युक्तम् 'अत्युक्ति नाना कथितमालङ्कारिकै । तथाच **जयदेवः**—

अत्युक्तिरद्भुतातथ्यशौर्यादार्यादिवर्णनम् ।

त्वयि दातरि राजेन्द्र ! याचका कल्पशाखिन ॥ इति ।

अत्राद्भुत मिथ्यारूपमौदार्यमुक्तमत्युक्ति ।

सरस्वतीकण्ठाभरणे 'भोजराजो' प्याह—

लोकिकार्थमतिक्रम्य प्रस्थान यत्र वर्ण्यते ।

तदत्युक्तिरिति प्रोक्त गौडानां मनसो मुदे ॥ इति ।

'[illegible]'=उक्तरूपम् 'गौडोपलालितम्'=गौडैः कविभिर्मनोहरतया ऽङ्गीकृतमित्यर्थ' । परमत्र वैदर्भाणामसन्निरोधेनाह—'प्रस्थानम्' इति । 'प्राक्'=पूर्वं 'प्रणीतम्'=रचितम् 'प्रस्थानम्' लोकप्रसिद्धयनुसरणारूपम् 'अन्यस्य'=गौडभिन्नस्य 'वर्त्मन'=वैदर्भमार्गस्य 'सारम्'=उत्कृष्टत्वेनोपादेयमस्ति । एवम्प्रकारो गौडीवैदर्भीरीत्यो कान्तिगुणे भेदो ज्ञातव्य । वैदर्भविरुद्धे तु वैदर्भमतानुसारेण कान्तिविपर्ययो गुणागतो दोषः । उक्तञ्च—'कान्तिविपर्या-[illegible]' इति । यथा—

गृहे ते निर्गच्छन्ति निषीदन्त तवान्तिके ।

[illegible] कामयमान मां न त्व कामयसे कथम् ॥

अत्र [illegible] कान्तिराहित्य बोध्यम् । अर्थस्वरूपे च कान्ति विपर्ययो ऽयमाभाति ६४

[समाधिलक्षणम्]

'अन्यधर्मस्ततोऽन्यत्र लोकसीमानुरोधिना ।

सम्यगाधीयते यत्र स समाधि' स्मृतो यथा ॥ ६३ ॥

[illegible] समाधि गुण लक्षयति—'अन्यधर्म' इति । 'अन्यधर्म' अन्यस्य अप्राक [illegible] यावत् यो धम. गुणक्रियादिरूप 'तत'=तस्माद् 'अन्यत्र'= [illegible] 'लोकसीमानुरोधिना'=लोकमर्यादामनुसरता वक्त्रा 'यत्र' [illegible] 'सम्यक्' [illegible] 'आधीयते'=गाध्यवसनया गौण्या लक्षणया उपचर्यते [illegible] 'स'=[illegible] वाक्यार्थ 'समाधि'=समाधिनामकगुणवानित्यर्थ । एवञ्च

(२७, [illegible] उदाहरणे च योजय ? । (३०)

'प्रकृते वस्तुनि अप्रकृतस्य लोकप्रसिद्धो विच्छित्तियुतो धर्मारोप समाधि'रिति फलित लक्षणम् । धर्मस्य समारोपे एवायं गुण । यत्र तु धर्मिण. समारोपस्तत्र 'अतिशयोक्ति' रलङ्कार इत्यनयोर्विशेष ॥ ६३ ॥

[समाधेरुदाहरणम्]

कुमुदानि निमीलन्ति कमलान्युन्मिषन्ति च ।
इति नेत्रक्रियाध्यासाल्लब्धा तद्वाचिनी श्रुतिः ॥ ६४ ॥

समाधिमुदाहरति—'कुमुदानि' इति । 'कुमुदानि'=कैरवाणि नीलोत्पलानीत्यर्थ । 'निमीलन्ति'=मुकुलीभवन्ति 'च' तथा 'कमलानि=पद्मानि दिवाविकाशीनि सरोजानि 'उन्मिषन्ति'=विकसन्ति । प्रात कालवर्णनमिदम् । अत्र प्रस्तुतयोर्नेत्रयोनिमीलनोन्मेषौ धर्मौ अप्रस्तुतयो कुमुदकमलयो संकोचविकाशरूपधर्मतादात्म्येनाध्यवसितौ । सादृश्यातिशयसामर्थ्यात्, तौ च लोकप्रसिद्धावेवाभिमतयोर्क्तौ । एतत्स्वय स्फुटीकरोति— इति' इत्युत्तरार्धेन । 'इति'=दर्शितप्रकारेण 'नेत्रक्रियाध्यासात्'=नेत्रयो क्रियाभ्यां निमीलनोन्मेषरूपाभ्या सह 'अध्यासात्'=आरोपात् 'तद्वाचिनी'=तयोनिमीलनोन्मीलनयो वाचिनी प्रतिपादिका 'श्रुति '=नेत्रक्रियावाचक शब्द 'लब्धा'=स्वप्रतिपादकतया अवगता । अर्थात् नेत्रकमलयोरभेदमारोप्य तत्क्रिययोरपि अभेदबुद्धया द्वयोरेकेनैव शब्देन यत्प्रतिपादन तदेव समाधिर्गुण । सोऽयमर्थगुण * । अर्थ एवार्थान्तरस्यारोपात् । शब्दगतः 'समाधि'स्तु आरोहावरोहक्रमरूप वामनोक्तो ऽन्य । तथाच वामनसूत्रम्—

आरोहावरोहक्रम समाधि [का० सू० १ । १२] आरोहस्यावरोहे सति परिहार अवरोहस्य वा आरोहे सति परिहार इति तत्सूत्रार्थ । तत्रारोहपूर्वकोऽवरोहो यथा—'निरानन्द कौन्दे मधुनि परिभुक्तोज्झितरसे०' इति । अत्र 'निरानन्द कौन्दे' इति

---

*अर्थगत समाधिं वामन प्रकारान्तरेणावर्णयत् । तथाहि—

'अर्थदृष्टि. समाधि ' अध्या० २। सू०६) अर्थस्य दर्शन दृष्टि. । समाधिकारणत्वात् समाधि । अवहित हि चित्तमर्थान् पश्यतीति० । 'अर्थोद्विविधोऽयोनिरन्यच्छायायोनिश्च' (अध्या० २ । सू० ७) इति । तद्यथा—

आश्वपेहि मम शीधुभाजनाद्यावदग्रदशननं दश्यते ।
चन्द्र ! मद्दशनमण्डलाङ्कित स्व न यास्यसि हि रोहिणीभयात् ॥
मा भै शशाङ्क ! मम शीधुनि नास्ति राहु
स्वे रोहिणी वसति कातर ! किं बिभेषि ।
प्रायो विदग्धवनिता नवसङ्गमेषु
पुंसां मन प्रचलतीति किमत्र चित्रम् ॥

अत्र पूर्वस्य श्लोकस्यार्थोऽयोनि । द्वितीयस्य च अन्यच्छायायोनिरिति । विस्तरस्त्वन्यतोऽवसेय ।

गुर्वक्षरबाहुल्यादारोहः । 'मधुनि' इत्यत्र लघ्वक्षरप्राचुर्यादवरोहः । अवरोहपूर्वस्त्वारोहो यथा—'नराः शीतक्लिष्टा व्यसन इव मज्जन्ति तरवः' इति । अत्र 'नराः' इति शैथिल्यादवरोहः 'शीतक्लिष्टा' इत्यत्र गुर्वक्षरप्राचुर्यादारोहः । एवञ्च द्विविधः समाधिः शब्दगतोऽर्थगतश्चेत्युक्तं भवति ।

'वाग्भट' श्चेत्थमाह—

स समाधिर्यदन्यस्य गुणोऽन्यत्र निवेश्यते ।

यथा ऽश्रुभिरारिस्त्रीणां राज्ञः पल्लवितं यशः ॥ इति ।

[illegible]स्त्रीणामश्रुभिः राज्ञो यशः पल्लवितमित्युक्तम्, तत्र पल्लवगुणो वृक्षसम्बन्धी [illegible] स्यारोपितः ।

यत्र तु धर्मधर्मिणोरुभयोरप्यारोपस्तत्रातिशयोक्तिरित्युक्तम् तद्यथा मम—

[illegible]रो ऽस्ति काचिद्वापी ततः पद्मा ऽतिपेलवा ।

[illegible]र्या ता [illegible] [illegible]स्थामृतभागिनः ॥ इति ।

[illegible]शब्देर्नाभिप्रभृतयो ऽध्यवसिताः, अत्र च धर्मधर्मिणोरुभयोरेव समारोपः ।

[illegible] समाधेरपरमुदाहरणं यथा मम—

[illegible] ! [illegible] ! [illegible] [illegible]प्रतियोगिनौ

[illegible] [illegible] ऽस्मारमेतौ [illegible]पोतकौ ॥[illegible]

[illegible] [illegible] [illegible]योधापत्य धर्मः अप्रस्तुतयोः राजनयोः स्फुरणरूपता- [illegible] ॥ ९४ ॥

[समाधिगुणस्य बीजप्रदर्शनम्]

निष्ठ्यूतोद्गीर्णवान्तादि गौणवृत्तिव्यपाश्रयम् ।
अतिसुन्दरमन्यत्र ग्राम्यकक्षां विगाहते ॥ ९५ ॥

[illegible] समाधिर्गौणलक्षणामूल इत्युक्तम्, तदेव विशदीकरोति—'निष्ठ्यूत०' [illegible] । [illegible], [illegible]र्णम्, वान्तम् इत्येवमादि पदम्, 'गौणवृत्तिव्यपाश्रयम्'=गौणी या [illegible] लक्षणा सैव व्यपाश्रयो विशिष्ट आश्रयो यस्य तत्, अर्थात् [illegible] प्रयुक्तं तत् 'अतिसुन्दरम्'=अतिशय समाधि- [illegible] । 'अन्यत्र'=[illegible] 'ग्राम्यकक्षाम्' = ग्राम्यतादोषपक्ष [illegible] ।

[illegible] निरसने इति निरसनार्थकात् [illegible] धातोः भावे क्तः । [illegible] [illegible] इति सूत्रेण धस्य ऊठि कृते यणि 'निष्ठ्यूतम्'

[illegible] इति सप्रमाणं सोदाहरणं [illegible] ।

[illegible] ।

इति रूपम् । उत्पूर्वकात् निगरणार्थकात् 'गृ' धातो भावे क्त । ततः 'ऋत इद्धातो' [७।१।१००] इति सूत्रेण ऋकारस्य इत् रपर । 'रदाभ्या निष्ठातो न ०' [८।२।४२] इति नकारे कृते 'र्वोरुपधाया दीर्घ इक' 'हलि च' [८।२।७६] इति दीर्घे, णत्वे च रूपम् । 'वम्' धातो 'नपुसके भावे क्त' [३।३ ११४] इति क्त । 'अनुनासिकस्य क्विझलो क्ङिति' [६ ४।१५] इति दीर्घे अनुस्वारपरसवर्णे च रूपम् ।

अयमत्राशय —सादृश्यसम्बन्धप्रयुक्ता लक्षणा गौणी । 'गुणतो गुणवृत्तिरिष्यते' इत्युक्तेः । यदा मुख्यया शब्दवृत्त्या [अभिधया] निष्ठ्यूतोद्गीर्णवान्ताद्या शब्दा प्रयुज्येरन् तदा तु तत्र [वाक्ये] ग्राम्यतादोषो भवति । पर त एव ग्राम्यतादोषप्रयोजका शब्दा यदा गौण्या शब्दशक्त्या प्रयुक्ता तदा परगुणवन्त एव भवन्ति । लक्षणाया फलभूतस्तादात्म्यारोप एवात्र गुण , एवञ्च समाधिगुणस्य मूलभूता गौणी लक्षणेति सिद्धम् । कारिकास्थ 'गौणवृत्ति' पद सम्भावनामप्युपलक्षयति तेनोत्प्रेक्षास्थले मुख्यया वृत्त्यापि प्रयुज्यमानमश्लीलपद न दोषावहममिति ध्येयम् ॥ ६५ ॥

पद्मान्यर्कांशुनिष्ठ्यूताः पीत्वापावकविप्रुषः ।
भूयो वमन्तीव मुखै रुद्गीर्णारुणरेणुभि ॥ ६६ ॥

उक्तमर्थमुदाहरणे घटयति—'पद्मानि इति । सायकालिकपवनसङ्गेन स्खलत्परागाणां पद्माना वर्णनमिदम् । 'पद्मानि'=कमलानि [कर्तृपदमिदम्] । 'अर्कांशुनिष्ठ्यूता'=अर्कस्य सूर्यस्य अशव किरणा तैर्निष्ठ्यूता नितरां क्षिप्ता 'पावकविप्रुष'=वह्निस्फुलिङ्गान् पीत्वा आचम्य 'उद्गीर्णारुणरेणुभि'=उद्गीर्णा वहिष्कृता अरुणा रक्ता रेणव धूलय परागा यै एवभूतै 'मुखै' 'भूय'=पुन पुन 'वमन्ति इव'=उद्गिरन्तीवेति स्वरूपोत्प्रेक्षा । अत्र निष्ठ्यूतोद्गीर्णशब्दयो शरीरसम्बन्धिकफादिनिक्षेपे शक्ति ,तथापि निक्षेपात्मकसादृश्यात् निक्षेपमात्रेऽप्यनयोर्लक्षणा साच गुणयोगाद् गौणी । एवञ्चास्मिन् काव्ये सहृदयहृदयावर्जकता प्राप्ताविमौ शब्दौ समाधिगुण स्फुटीकुरुत नतु ग्राम्यता भजेते ।

यथा वा मम—

उद्वन्त्यमूनीति हि नाकलोक सौरप्रकाशेन चमत्कराणि ।
इत्याहुरेके ऽय वय भणामो निष्ठ्यूतमेतच्छशिनो रुजायाम् ॥

पूर्वत्रोत्प्रेक्षा, अत्रत्वपह्नुतिरितिविशेष. ।

इदन्तु बोध्यम्—यद्यपि निष्ठ्यूतादिपदे गौण्या लक्षणया समाधिरेव गुणो न दोष· तथापि 'वमन्ति' इत्यत्र तु नैवास्ति लक्षणा किन्तु सम्भावनैव । शाब्दबोधस्तु यथा आरोपस्थले जायते तथा सम्भावनायामपि । इत्थञ्च लक्षणाफलीभूततादात्म्यप्रतीतिरिव सम्भावनापि चमत्कारजनकत्वेन गुण , तस्मात्पूर्वत्रोक्त 'गौणवृत्ति' इतिपद सम्भावनाया अप्युपलक्षकमिति युक्तमत्रम ॥ ६६ ॥

[गौरव्या अभावे दोषस्यप्रदर्शनम्]

इति हृद्यमहृद्यन्तु निष्ठीवति वधूरिति ।
युगपन्नैकधर्माणामध्यासश्च स्मृतो यथा ॥ ९७ ॥

'इति' इति । 'इति'=पूर्वश्लोकोक्त गौण्या वृत्त्या प्रयुक्त निष्ठ्यूतादि पदं 'हृद्यम्'= [illegible] समाधिनामकगुणयोगादिति शेष 'अहृद्यन्तु'=अमनोहर दुष्टन्तु यथा 'वधूर्निष्ठीवति'=नवोढा थूत्करोति कफ मुखेन वहिः प्रक्षिपति 'इति'=इत्यादि ज्ञेय मिति शेष । [illegible] 'ष्ठिवु' धातोर्निरसने शक्तिरस्ति । 'वधू' पदप्रयोगस्तु शृङ्गारेऽत्यन्तोपयुक्त [illegible] मत्यन्तानुपयुक्तामिति भवति ग्राम्यता दोष । एतावता— '[illegible]' रित्युक्त भवति । तत्र वहूनां धर्माणामारोपे सति [illegible]—'युगपद्' इति । 'युगपत्'=एककालावच्छेदेन नतु कालभेदेन 'नैक-[illegible]'—[illegible] वहूनां गुणक्रियारूपाणां धर्माणाम् 'अध्यास'—आरोप' [illegible] विषयस्याभिधानमित्यर्थं 'स्मृत'=कथित सूरिभिरिति [illegible] । [illegible] एकस्य धर्मस्य समारोपे समाधि' तथा वहूनामपि समारोपेऽस्ति स [illegible] । [illegible] स्पष्टीकरोति ॥ ९७ ॥

गुरुगर्भभराक्लान्ता. स्तनन्त्यो मेघपङ्क्तयः ।
अचलाधित्यकोत्सङ्गमिमा समधिशेरते ॥ ९८ ॥

[illegible] समाधिमुदाहरति—'गुरु०' इति । 'गुरुगर्भभराक्लान्ता' [illegible] अन्यत्र भूगाव [illegible] इति समानम्, गर्भस्य अन्तर्व-[illegible] मन्दगमना । अन्यत्र भूणभरेण श्रान्ता [illegible] अन्यत्र [illegible] इमा 'मेघपङ्क्तय'=जलदराजय' [illegible] या अधित्यका ऊर्ध्वभूमिः तस्या उत्सङ्ग [illegible] 'समधिशेरते'=सम्यक् [illegible] । [illegible] 'अधिशीङ्स्थासां कर्म' [१।४।४६] इत्यना-[illegible] ।

[illegible] गौणधर्माणां युगपद्योगात् चाक्त्वातिशयः [illegible] । [illegible] विशेषणसाम्यात् समासोक्तिरलङ्कार ।
[illegible] इत्यलम् ॥ ९८ ॥

[illegible] तस्या [illegible] ।
[illegible] ॥ ९९ ॥

[illegible]—'[illegible]' इति । अत्र [illegible] 'तस्या'= [illegible] ।

ननु—'स्तनित गर्जित मेघनिर्घोषे' इत्यमरोक्तिबलात् स्तननशब्दात् मेघगर्जनात्मक-एवार्थोऽवबुध्यते तत्कथमस्य गर्भिणीधर्मत्वेन साधारणत्व स्यात् इति चेन्न भौवादिक 'स्तन' धातो शब्दमात्रार्थकत्वात् तथाविधस्तननस्यगर्भिण्या अपि सम्भवात्, अत एव 'मञ्जीरादिषु रणितप्राय पक्षिषु च कूजितप्रभृति । स्तनितमणितादिसुरते मेघादिषु गर्जितप्रमुखम्' इति कोषान्तरेण 'स्तनित' शब्द सुरतवाचकोऽप्युक्त, तस्मात् 'स्तन' धातो शब्दसामान्यवा-चकत्वमपीति कृत विस्तरेण ॥ ६६ ॥

तदेत्काव्यसर्वस्वं समाधिर्नाम यो गुण. ।
कविसार्थः समग्रोऽपि तमेनमनुगच्छति ॥ १०० ॥

समाधिमुपसहरति—'तद्' इति । 'तत्' तस्मात् पूर्वदर्शितरीत्या गौणवृत्तिव्यपाश्रयेण अतिमात्र चारुतावहत्वात् 'समाधि नाम यो गुण एतत् काव्यसर्वस्व'=सारभूतम् अवश्याश्रयणीयमित्यर्थ । 'समग्र'=अखिल 'कविसार्थः'=कवीना सङ्घ गौडो वा वैदर्भो वा अन्योपि वा य कश्चिन् लाटो वा पञ्चालो वा स सर्वोऽपि कविरित्यर्थ 'तम् एनम्'=दर्शितस्वरूप समाधिम् 'अनुगच्छति'=अनुसरति । स्वकाव्ये एतस्य निवेशाय यत्नवान् भवतीत्यर्थ ॥ १०० ॥

[द्वयोर्म्मार्गयो प्राधान्यस्योपसहार]

इति मार्गद्वयं भिन्नं तत्स्वरूपनिरूपणात् ।
तद्भेदास्तु न शक्यन्ते वक्तुं प्रतिकविस्थिता ॥ १०१ ॥

गौड्या वैदर्भ्याश्च रीतेर्वर्णित भेदमुपसहरति—'इति' इति । 'इति'=दर्शितप्रकारेण 'तत्स्वरूपनिरूपणात्'=तयो गौडवैदर्भयो स्वरूप=लक्षण तस्य निरूपणात्=वर्णनात 'मार्गद्वयम्'=गौडीवैदर्भीरीतिद्वय 'भिन्नम्'=परस्परं विलक्षणम् 'अस्ति' इति शेष । 'प्रतिकवि'=कविं कविं प्रति 'स्थिता'=विद्यमाना अर्थात् लाटपाञ्चालप्रभृतिदेशीयकविषु वर्तमाना 'तद्भेदा'=उक्तरीतिद्वयानुस्यूता प्रकारा 'वक्तु न शक्यन्ते'=अनन्तत्वात् गणयितुमशक्या सन्तीत्यर्थ, तस्मादनुक्ता अपि तेऽनयोर्द्वयोरेवरीत्योरन्तर्गता वेदितव्या इति दण्डिनोऽभिप्राय ।

इदमिह सम्प्रधार्यम्—अग्निपुराणे उक्तम्—

अलङ्कृतमपि प्रीत्यै न काव्य निर्गुण भवेत् ।
वपुष्यललिते स्त्रीणा हारो भारायते परम ॥ इति उपक्रम्य
य काव्ये महती छायामनुगृह्णात्यसौ गुण ।
सम्भवत्येष सामान्यो वैशेषिक इति द्विधा ॥

इत्यादिना शब्दार्थोभयव्यापी सामान्यगुण अन्यतरव्यापी च वैशेषिक इत्युक्तम् । तत्र श्लेष, लालित्य, गाम्भीर्यम्, सौकुमार्यम्, उदारता, सती यौगिकी चेति सप्त **शब्दगुणा** । प्रसाद, सौभाग्यम्, यथासंख्यम्, प्रशस्यता, पाक, राग इति षट्

शब्दार्थोभयगुणा उक्ता परन्तैषां स्वरूपं न बहु प्रपञ्चितम् ।

वामनस्तु—ओजःप्रसादश्लेषसमतासमाधिमाधुर्यसौकुमार्योदारतार्थव्यक्तिकान्तयो बन्धगुणाः (काव्या० अधि० ३ । अध्या० १ । ४) इति दशशब्दगुणानसूत्रयत । 'त एवार्थगुणाः' (काव्या० अधि० ३ । अध्या० २ । १) इति तानेव दश अर्थगुणान्व्यवैत् । अर्थात् नाम्ना तेषां समानता वाच्यवाचकगतत्वेन च भेदः । जयदेवस्तु—कान्तिमुदारतां [illegible] शिष्टान् श्लेषादीनष्टौ गुणानाचचक्षे तत्र काश्चित् शब्दगतान् काश्चिदर्थगतानमन्यत तदेतत्तदीयलक्षणग्रन्थादवगन्तु सुशकम् । सरस्वतीकण्ठाभरणे तु—

चतुर्विंशतिराख्याता स्तेषु ये शब्दसंश्रयाः ।
ते तावदभिधीयन्ते नामलक्षणयोगतः ॥
श्लेषः प्रसादः समता माधुर्यं सुकुमारता ।
अर्थव्यक्तिस्तथा कान्तिरुदारत्वमुदात्तता ॥
ओजस्तथान्यदौर्जित्यं प्रेयानथ सुशब्दता ।
तद्वत्समाधिः सौक्ष्म्यञ्च गाम्भीर्यमथ विस्तरः ॥
संक्षेपः संमितत्वञ्च भाविकत्वं गतिस्तथा ।
रीतिरुक्तिस्तथा प्रौढिरेषां लक्ष्यलक्षणे ॥

इति भोजराजेन चतुर्विंशतिसंख्याका उक्ताः । सर्वेषाममीषां मतं खण्डयन्निव प्रकाशकारः—'माधुर्यौजःप्रसादाख्यास्त्रयस्ते न पुनर्दश' इति त्रीनेव गुणानमन्यत, अन्यांस्तु [illegible] । तस्यायमाशयः—यद्यपि दण्डिवामनप्रभृतिभिर्दश गुणाः [illegible] ते न गुणाः ।

केचिदन्तर्भवन्त्येषु दोषत्यागात्परे श्रिताः ।
अन्ये भजन्ति दोषत्वं कुत्रचिन्न ततो दश ॥

[illegible] । तत्र बहूनामपि पदानामेकपदवद्भासनात्मा यः श्लेषः यश्चारो [illegible], या च [illegible] [पदानां विच्छेदात् नृत्यत्प्रायत्वरूपा] [illegible] प्रसादः, तेषामोजस्यन्तर्भावः अर्थात् [illegible] । 'दीप्तिरात्मवि- [illegible] माधुर्यं [illegible] । [illegible] । समता [illegible] । समाधि— [illegible] । [illegible] ग्राम्य [illegible] ।

[illegible] ।

[illegible]

एव न दश शब्दगुणाः । एवमेवार्थगुणाना विषयेऽपि परमत परास्य मम्मटाचार्येण त्रय एव गुणा स्थापिता ।

परन्तु वामनादीनामयमभिप्राय —'रीतिरात्मा काव्यस्य इति । सा च पदरचनारूपा । पदरचना च बन्ध एवमोज प्रभृतयो बन्धगुणा । वस्तुतो रीतिधर्मत्वेऽपि गुणानामात्मलाभस्य शब्दार्थाधीनत्वात् तस्य निरूप्यत्वाच्च शब्दार्थधर्मत्वमुपचारादित्युक्तभवति। अत एव (गुणाना मुख्यतयाऽऽमधर्मत्वादेव ' सूत्रे 'बन्धगुणा' इत्युक्तम्। नतु ते साक्षात्सम्बन्धेन शब्दार्थगता इति । एवञ्च सति उपक्रमोपसंहारादिलिङ्गैर्वामनाचार्यतात्पर्यपर्यालोचनया आत्मभूताया रीतेरेव शौर्यादिवद् गुणा , तच्छरीरभूतशब्दार्थनिष्ठा पुनरलङ्कारा इति निर्धीयते ।

एतेन गुणत्वादोज प्रभृतीनामात्मनि [रीतौ] समवायवृत्त्या स्थिति', अलङ्कारत्वाद् यमकोपमादीनान्तु शरीरे [शब्दार्थयुगले] सयोगवृत्त्या स्थितिरिति ग्रन्थकारस्य [वामनस्य तदनुयायिवर्गस्य च] अभिमतमिति मन्यामहे । कोह्युनुन्मत्त अलङ्काराणा शरीरभूते शब्दार्थयुगले समवायवृत्त्या स्थितिरिति मन्येत । एवञ्च गुणालङ्काराणामुभयेषामपि समवायवृत्त्या स्थितिरित्यभिमन्यमानै. भेदाभिधान गड्डरिकाप्रवाहनयेन इत्याद्युक्त निरस्त वेदितव्यम् । एतच्च 'विशिष्ट पदरचना रीति' 'विशेषो गुणात्मा' 'पूर्वे नित्या' इत्यादि सूत्राणामर्थतत्त्वपर्यालोचनया गुणाना नित्यत्वमलङ्काराणान्त्वनित्यत्वमित्यवगत भवति, नित्यानामेव काव्यव्यवहारप्रयोजकत्वञ्च सिद्ध भवति ।

अपि च–यथा परमतेऽपि व्यङ्ग्यस्य प्राधान्ये ध्वनिरुत्तम काव्यम्, तस्य गुणभावे गुणीभूतव्यङ्ग्य मध्यम काव्यम्, व्यङ्ग्यस्य सम्भावनामात्रे [अस्फुटतरे] चित्रसञ्ज्ञकमवर काव्यमिति त्रय काव्यभेदा कल्पिता , तथाऽत्रापि गुणाना सामग्र्ये वैदर्भी, अविरोधिगुणान्तरस्यानिरासेन ओज कान्तिबाहुल्ये च गौडीया, माधुर्यसौकुमार्यप्राचुर्ये च पाञ्चालीति काव्यभेदा भवितुमर्हन्त्येवेति मुधैव कतिपयगुणनिरासप्रयास प्रकाशकाराणाम्, सुखावबोधत्वाच्च छात्राणामधिक सख्यान न विरुध्यते ।

रीतिध्वनिवादिमतयोर्गियास्तु विशेष –

यदाद्ये काव्यस्यात्मा रीति तद्व्यवहारस्य प्रयोजकास्तु गुणा । द्वितीये तु ध्वनिरात्मा काव्यस्य, स एव च तद्व्यवहारप्रयोजक । गुणास्तूभयत्राप्यात्मनिष्ठा एव । शब्दार्थयुगलञ्च काव्यशरीरम , अलङ्काराश्च तन्निष्ठा एवेति च सर्व समानम ।

यत्तु—किं समस्तैर्गुणै काव्यव्यवहार ? उत कतिपयै ? आद्ये कथमसमस्तगुणा गौडाया पाञ्चाली वा रीति काव्यस्यात्मा ? । अथ कतिपयैस्तत् तदा 'अद्रावत्र प्रज्वलत्यग्निरुच्चै प्राज्य प्रोद्यन्नुल्लसत्येष धूम ' इत्यादावोज प्रभृतिषु गुणेषु सत्सु काव्यव्यवहारप्राप्ति ।

स्वर्गप्राप्तिरनेनैव देहेन वरवर्णिनी ।
अस्या रदच्छदरसो न्यक्करोतितरा सुधाम ॥

इत्थं च गुणानपेक्ष्य विशेषोक्तिव्यतिरेकालङ्कारयोरेव काव्यव्यवहारप्रयोजकत्वञ्च इत्यादि पुनरुक्तम् तत् स्वात्मजनवादिदोषाज्ञानमूलकमेव । तथाहि—आचष्टामत्रभवान् ? 'तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि' इति यत्काव्यसामान्यलक्षणं, तत्र शब्दार्थयुगलादिन्यभिचरन्, आर्थिकमुद्रया 'काव्यस्यात्मा रस' इति चोच्यते । अत्र किं समग्रगुणविशिष्टं काव्यम् ? कतिपयगुणविशिष्टं वा । नाद्यः एककगुणोदाहरणेषु काव्यत्वाभावप्रसङ्गात् समग्रगुणविशिष्टयाभावाच्च । न च द्वितीयः वस्त्वलङ्कारध्वनिषु गुणिनो रसस्याभावेन गुणाभावात् ।

...रसः सम्भूय काव्यस्यात्मा ? उतैकैको रसः ? आद्ये न कुत्रापि काव्यात्मत्वम् ... रसानां सामानाधिकरण्याभावात् । द्वितीये वस्त्वलंकारध्वनिषु रसाभावात् ... काव्यत्वाभावप्रसङ्ग इति कृतं परमतनिरासायासेन । ... ।

[मार्गान्तरादिने दृष्टान्तकथनम्]

इक्षुक्षीरगुडादीनां माधुर्यस्यान्तरं महत् ।
तथापि न तदाख्यातुं सरस्वत्यापि शक्यते ॥ १०२ ॥

...—'इक्षुक्षीरगुडादीनाम्' =इक्षुः =पुण्ड्रः । क्षीरम्=दुग्धम् ... आदिना मधुरमात्रस्य परिग्रहः एतेषाम् 'माधुर्यस्य'=मधुरिम्णः ... 'अन्तरम्'=भेदः 'महत्' इति शेषः । 'तथापि तत्'=अन्तरम् 'सरस्वत्या' ... 'अपि' 'आख्यातुम्'=वक्तुं 'न शक्यते'=न समर्थीभूयते किमुता... । ... मार्गाणाम् अपि अनन्तमन्तरं विशिष्य निर्देष्टुमशक्यं किन्तु ... भेदा अवगन्तव्या इति शिष्य- ... ॥

नैसर्गिकी च प्रतिभा श्रुतं च बहु निर्मलम् ।
अमन्दश्चाभियोगोऽस्याः कारणं काव्यसम्पदः ॥ १०३ ॥

शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात् ।
काव्यज्ञशिक्षयाऽभ्यास इति हेतुस्तदुद्भवे ॥

काव्यस्य उद्भवे निर्माणे उल्लासे चेत्यर्थः । केचित्तु केवलां प्रतिभामेव काव्योद्भवे हेतुमाहुः —

प्रतिभैव श्रुताभ्यासमहिता कविता प्रति ।
हेतुर्मृदम्बुसम्बद्धबीजव्यक्तिर्लतामिव ॥ इति ।

उक्तञ्च—

कवित्वं जायते शक्तेर्वर्धतेऽभ्यासयोगतः ।
तस्य चारुत्वनिष्पत्तौ व्युत्पत्तिस्तु गरीयसी ॥ इति ।

वाग्भटोऽपि—

प्रतिभा कारणं तस्य व्युत्पत्तिस्तु विभूषणम् ।
भृशोत्पत्तिकृदभ्यास इत्याद्यकविसंकथा ॥ इति—

केवलां प्रतिभामेव हेतुमाह । एतद्विषयकः प्रपञ्चः वामनप्रणीतकाव्यालंकारसूत्रेषु प्रथमेऽधिकरणे मदीयकाव्यप्रकाशप्रभायाञ्च द्रष्टव्यः ॥ १०३ ॥

[अभ्यास पूर्ववासनोद्योतौ]

न विद्यते यद्यपि पूर्ववासना
गुणानुबन्धि प्रतिभानमद्भुतम् ।
श्रुतेन यत्नेन च वागुपासिता
ध्रुवं करोत्येव कमप्यनुग्रहम् ॥ १०४ ॥

अत्र शास्त्राभ्यासस्यापि क्वचित् मुख्यतामाह—'न' इति । यद्यपि 'पूर्ववासना'=प्रतिभाख्य प्राक्तन संस्कारो 'न विद्यते'=नास्ति कस्यचित्पुंसः 'गुणानुबन्धि'=गुणानां काव्यवैचित्र्याणाम्* अनुबन्धि अनुपाङ्गि 'अद्भुतम्'=अदृष्टाश्रुतविषयाविमर्शनक्षमम् अनर्गलकाव्यरचनाक्षमं वा 'प्रतिभानम्'=बुद्धिरपि न विद्यत इति पूर्वेणान्वयः । तथापि 'श्रुतेन'=काव्यज्ञगुरुशिक्षया 'यत्नेन च'=स्वाभिनिवेशेन 'अवश्यं कविर्भवेयम्' इत्याकारकेण हृदयोल्लासेन च 'उपासिता'=सेविता पुनः पुनरावर्त्तितेति यावत् 'वाक्'=सरस्वती 'ध्रुवम्' निश्चयेन 'कमपि'=अलौकिकम् 'अनुग्रहम्'=कृपामेव 'करोति एव'=काव्यरचनायां सामर्थ्यमवश्य-

---

*. अस्मद्भावनया तु—अत्रत्य गुणपदं काव्यगतौचित्यपरम् । औचित्यस्य काव्यसम्बन्धिसर्वाङ्गेषु व्यापकत्वेनावश्यापेक्षणीयत्वात् । उक्तं हि 'क्षेमेन्द्रेण'—

उचितं प्राहुराचार्याः सदृशं किल यस्य यत् ।
उचितस्य च यो भावस्तदौचित्यं प्रचक्षते ॥ इति ।

एतद्धि पदप्रभृतिषु स्थानेषु मर्मस्विव काव्यस्य सकलशरीरव्यापि जीवितमौचित्यं स्पष्टत्वेन स्फुरदवभासते । एतद्विषयकं विशेषं चर्चं ग्रन्थान्तरे करिष्यामः ।

[illegible] । तथाच भास —

काष्ठादग्निर्जायते मथ्यमानाद् भूमिस्तोयं खन्यमाना ददाति ।
सोत्साहानां नास्त्यसाध्यं नराणां मार्गारब्धाः सर्वयत्नाः फलन्ति ॥ इति ।

[illegible]तया काव्ये प्रवृत्तिराश्रयणीयेति भाव ॥ १०४ ॥

[उक्तार्थोपसंहार]

तदस्ततन्द्रैरनिशं सरस्वती ।
श्रमादुपास्या खलु कीर्त्तिमीप्सुभिः ।
कृशे कवित्वेऽपि जना कृतश्रमा
विदग्धगोष्ठीषु विहर्त्तुमीशते ॥ १०५ ॥

[illegible] कृतौ काव्यादर्शे मार्गविभागो नाम
प्रथम परिच्छेद ।



द्वितीयः परिच्छेदः ।

[अलङ्कारसामान्यलक्षणकथनम्]

¹काव्यशोभाकरान् धर्मानलङ्कारान्प्रचक्षते ।
ते चाद्यापि विकल्प्यन्ते कस्तान् कार्त्स्न्येन वक्ष्यति ॥ १ ॥

———·———

काव्यादर्शस्य वाणीयमलङ्कारभरान्विता ।
कुसुमप्रतिमा यत्र नरीनर्त्ति कविप्रिया ॥ १ ॥

प्रथमे परिच्छेदे काव्यस्वरूपमुक्तम्, रीतिद्वयभेदश्च सविस्तरं निरूपितः, प्रसङ्गप्राप्तया अनुप्रासाद्यलङ्कारस्य स्वरूपमपि प्रदर्शितम्, सम्प्रत्यस्मिन् द्वितीये परिच्छेदे विशेषतया अलङ्कारस्वरूपं निरूपयितुकामः श्रादण्ड्याचार्यः प्रथममलङ्कारसामान्यलक्षणमाचष्टे 'काव्य शोभाकरान्' इति । काव्यस्य='इष्टार्थव्यवच्छिन्ना पदावली काव्यम्' इत्युक्तलक्षणस्य शोभा=तत्तद्विशेषचमत्कारजनकज्ञानगोचरत्वं रूपं सौन्दर्यं श्लेषादिगुणविशेषकृतवैचित्र्यं वा तत्करान्=अर्थात् काव्यशरीरस्य वैचित्र्यातिशयहेतून् 'धर्मान्'=शब्दार्थनिष्ठान् अलङ्कारान् 'अलङ्कार' इत्याख्यातान् 'प्रचक्षते'=कथयन्ति 'प्राञ्चः सूरयः' इति शेषः ।

यथा कनककुण्डलाद्याः कान्ताशरीरमतिशोभयन्ति तथैव शब्दार्थरूपस्य काव्यवपुषः श्लेषादिगुणकृतवैचित्र्यं पोषयन्तोऽनुप्रासोपमादयोऽलङ्कारपदाभिख्यां भजन्ते । इत्थञ्च पूर्वोक्ताः श्लेषाद्याः गुणाः काव्यस्यान्तःशोभाधायकाः अलङ्कारास्तु बाह्यशोभाकरा इति गुणालङ्कारयोर्विवेक इत्युक्तं भवति । एतेनैवाभिप्रायेण वामनोऽपि **'काव्यशोभायाः कर्तारो धर्मा गुणाः'** [का० सू० ३ । १] **'तदतिशयहेतवस्त्वलङ्काराः'** [३ । २] इति गुणालङ्काराप्रभेदमाचख्यौ । तथाचोक्तमभियुक्तैः —

युवतेरिव रूपमङ्ग ! काव्यं स्वदते शुद्धगुणं तदप्यतीव ।
विहितप्रणयैर्निरन्तराभिः सदलङ्कारविकल्पकल्पनाभिः ॥
यदि भवति वचश्च्युतं गुणेभ्यो वपुरिव यौवनवन्ध्यमङ्गनायाः ।
अपि जनदयितानि दुर्भगत्वं नियतमलङ्करणानि संश्रयन्ते ॥ इति ॥

'ते च' इति । 'ते च' अलङ्काराः 'अद्य अपि'=एतावत्कालपर्यन्तमपि 'विकल्प्यन्ते'= विविधकल्पनाविपर्यासिक्रियन्ते 'कविभिः' इति शेषः । अतो हेतोः 'कः'=सुधीः साहित्य-

(प्र०)¹ अलङ्कारसामान्यलक्षणं सप्रमाणं लिख्यताम् । (उ०) अस्य पृ० ५० ।

चायोक्त सामान्यलक्षणस्वरूपमुपमाख्य विकल्पमूलभूत हेतु 'परिसस्कर्तुम्'=सम्यक् स्फोटयितु शब्दार्थाभिधानसम्बन्धपूर्वक विशदीकर्तुम् 'अयम् अस्मत्परिश्रम '=क्रियमाणोऽलङ्कारनिरूपणप्रयास ।*'अस्ति' इति शेष । तथा च नास्माक निष्फला प्रवृत्तिरिति भाव । बुद्धया सन्निधापितत्वात् निरूपणप्रयासस्य 'अयम्' इतीदमा निर्देश ।

सन्तु कल्पनावैचित्र्यात् नाना भेदा ये सङ्कलनानर्हा परन्त्वस्मद्दर्शितपरिपाटया ते स्वयमूहनीया इति ग्रन्थकर्तुर्हृदयम् ॥ २ ॥

[पूर्वनिरूपितालङ्कारभिन्नालङ्कारनिरूपणप्रतिज्ञा]

काश्चिन्मार्गविभागार्थमुक्ताः प्रागप्यलङ्क्रिया ।
साधारणमलङ्कारजातमन्यत् प्रदर्श्यते ॥ ३ ॥

अलङ्कारनिरूपणप्रसङ्गेन पूर्वनिरूपितानां श्रुत्यनुप्रासादीनां पुनर्निरूपणापत्त्या पिष्टपिष्टिः स्यादिति तदतिरिक्तालङ्कारनिरूपणं प्रतिजानीते—'काश्चित्' इति । 'काश्चित् अलङ्क्रिया = अलङ्कारा श्रुत्यनुप्रासाद्या 'मार्गविभागार्थम्'=गौडीवैदर्भीरीतिद्वयभेदप्रदर्शनार्थं 'प्राग् अपि' पूर्वस्मिन् परिच्छेदेपि 'उक्ता '=कथिता सम्प्रति नोच्यन्त इत्यर्थ । किन्तु 'अन्यत्'–ततो भिन्न 'साधारणम्'=द्वयोर्मार्गयो समानम् 'अलङ्कारजातम् प्रदर्श्यते'= निरूप्यते अस्मिन्परिच्छेद इति शेष ।

श्रुत्यनुप्रासच्छेकानुप्रासयमकरूपालङ्कारा गुणनिरूपणप्रकरणे द्वयोर्मार्गयोरसाधारणा उक्ता, ततोऽन्ये साधारणा उपमाद्या अत्रोच्यन्ते । तृतीयपरिच्छेदे यमकस्य पुनर्निरूपणन्तु विशेषभेदप्ररूपणार्थमेवेति न कश्चिद्दोष ॥ ३ ॥

स्वभावाख्यानमुपमा रूपकं दीपकावृती ।
आक्षेपोऽर्थान्तरन्यासो व्यतिरेको विभावना ॥ ४ ॥
समासातिशयोत्प्रेक्षा हेतु सूक्ष्मो लव क्रमः ।
प्रेयोरसवदूर्जस्वि पर्यायोक्तं समाहितम् ॥ ५ ॥
उदात्तापह्नुतिश्लेषविशेषास्तुल्ययोगिता ।
विरोधाप्रस्तुतस्तोत्रे व्याजस्तुतिनिदर्शने ॥ ६ ॥
सहोक्ति परिवृत्त्याशी सङ्कीर्णमथ भाविकम् ।
इति वाचामलङ्कारा दर्शिता पूर्वसूरिभि ॥ ७ ॥

प्रतिज्ञातस्यालङ्कारजातस्योद्देशमाह—'स्वभावाख्यानम्' इत्यादिना चतुर्भि श्लोकै । तत्र स्वभावाख्यानम्=स्वभावोक्ति । उपमा । रूपकम् दीपकावृती=दीपकम् आवृति आवृत्तिश्चेति द्वयम् आक्षेप, अर्थान्तरन्यास । व्यतिरेक । विभावना । समास =समासोक्ति । अतिशय = अतिशयोक्ति । उत्प्रेक्षा । हेतु । सूक्ष्म । लव । क्रम । प्रेय । ऊर्जस्वि । पर्या-

*'अस्तिर्भवन्तीपर प्रथमपुरुषो ऽप्रयुज्यमानोऽप्यस्ति' इति महाभाष्यकार । 'भवन्ती' इति लट पूर्वाचार्याणा सञ्ज्ञा ।

शास्त्रनिपुणमतिरपि 'तान् अलङ्कारान्' 'कार्त्स्न्येन'=साकल्येन 'वक्ष्यति'=कथयिष्यति न कोऽपि पण्डितस्तान् सर्वान् संकलयितुं समर्थ इत्याशय ।

उक्तिवैचित्र्यमेवालङ्कार, तच्च कल्पनैकमूलम्, कल्पनाश्च पुरुषबुद्धिप्रभवा पुरुषाश्चानन्ता इति ब्रह्मापि सकललोककल्पनासकलने न समर्थ इतरेषान्तु कैव कथा [इति मया] सुकुमारमतिसौकर्याय स्वाभीष्टा कतिपयेऽलङ्कारा सारल्येन सख्याता वस्तुत इतरे सन्ति न वा सन्ति इत्यस्मिन्नंशे विवादकरणमयुक्तमस्तीति गूढोऽभिसन्धि ।

प्रकाशकारस्त्वाह—

उपकुर्वन्ति त सन्त येऽङ्गद्वारेण जातुचित् ।
हारादिवदलङ्कारास्तेऽनुप्रासोपमादय ॥ इति ॥

अस्यायमाशय —शब्दार्थलक्षणाङ्गातिशयद्वारा ये सम्भविन रसमुपकुर्वन्ति यथा कण्ठाद्यङ्गानामुत्कर्षाधानद्वारेण शरीरिणोऽप्युपकारका हाराद्या, तद्वदतिशयहेतवोऽनुप्रासोपमादयोऽलङ्कारा अत्रत्य सूक्ष्मो विवाद परिनिष्ठितबुद्धिगम्य सुकुमारमतीना व्यामोहो माभूदिति कृत्वा नावतारित परिचयमात्रन्तूक्तम् ॥ १ ॥ *

[स्वोक्ते पूर्वाचार्यमूलकत्ववर्णनम्]

¶किन्तु वीजं विकल्पानां पूर्वाचार्यै प्रदर्शितम ।
तदेव परिसंस्कर्तुमयमस्मत्परिश्रम ॥ २ ॥

ननु—यदि अलङ्कारा सकलनानर्हा तर्हि कुतो भवान् तेषा वर्णने प्रवृत्त इत्याशङ्कामपनुदति—'किन्तु' इति । 'किन्तु विकल्पानाम्'=विविधानां कल्पनानां नवीनै कृतानामलङ्कारभेदानां 'वीजम्'=सामान्यमूल सादृश्याख्यमुपमास्वरूपम् 'पूर्वाचार्यै'=वाल्मीकिप्रभृतिभिरेव 'प्रदर्शितम्'=स्वरचितादिमहाकाव्येषूपनिवन्धनेन स्फुटीकृतम् । एतदेवाश्रित्य नवीनै वैचित्र्यभेदेनालङ्कारविषये नाना कल्पना समुद्भाविता इत्यभिप्राय । 'तदेव'=वीजम् पूर्वा-

(प्र०) सकलालङ्कारभेदसकलनाभावे वीजमुक्त्वा ग्रन्थकारोक्तौ प्रामाण्य समर्थय ? ।
(उ०) अस्य पृ० प० १५ ।

* **साहित्यसारे** अलङ्कारसामान्यलक्षणमित्थमुक्तम्—

रसादिभिन्नत्वे शब्द-विशेषश्रवणोत्तरम् ।
चमत्कारकरत्व यदलङ्कारत्वमत्र तत ॥

तदेव लक्षण नव्यनयानुसारिण एवमाकलयन्ति—

रसादिभिन्नव्यङ्ग्यभिन्नत्वे सति शब्दार्थान्यतरनिष्ठा या विषयितासम्बन्धावच्छिन्ना चमत्कृतिजनकतावच्छेदकता तदवच्छेदकत्वमलङ्कारत्वम्' इति अनुप्रासादिविशिष्टार्थज्ञानाच्च चमत्कारोदयात् तेषु लक्षणसमन्वय । शब्दार्थयोर्ज्ञाननिष्ठचमत्कृतिजनकताया विषयितयावच्छेदकत्वेन तद्विशेषणीभूतानुप्रासोपमादे तन्निष्ठावच्छेदकतावच्छेदकत्वादिति कुवलयानन्दी-
[illegible]

चायोक्त सामान्यलक्षणस्वरूपमुपमाख्य विकल्पमूलभूत हेतु 'परिसंस्कर्तुम्'=सम्यक् स्फोटयितु शब्दार्थाभिधानसम्बन्धपूर्वक विशदीकर्तुम् 'अयम् अस्मत्परिश्रम '=क्रियमाणोऽलङ्कारनिरूपणप्रयास ।*'अस्ति' इति शेष । तथा च नास्माक निष्फला प्रवृत्तिरिति भाव । बुद्धया सन्निधापितत्वात् निरूपणप्रयासस्य 'अयम्'इतीदमा निर्देश ।

सन्तु कल्पनावैचित्र्यात् नाना भेदा ये सङ्कलनानर्हा परन्त्वस्मद्दर्शितपरिपाटया ते स्वयमूहनीया इति ग्रन्थकर्तुर्हृदयम् ॥ २ ॥

[पूर्वनिरूपितालङ्कारभिन्नालङ्कारनिरूपणप्रतिज्ञा]

काश्चिन्मार्गविभागार्थमुक्ताः प्रागप्यलङ्क्रिया ।
साधारणमलङ्कारजातमन्यत् प्रदर्श्यते ॥ ३ ॥

अलङ्कारनिरूपणप्रसङ्गेन पूर्वनिरूपितानां श्रुत्यनुप्रासादीनां पुनर्निरूपणापत्त्या पिष्टपिष्टिः स्यादिति तदतिरिक्तालङ्कारनिरूपण प्रतिजानीते—'काश्चित्' इति । 'काश्चित् अलङ्क्रिया = अलङ्कारा श्रुत्यनुप्रासाद्या 'मार्गविभागार्थम्'=गौडीवैदर्भीरीतिद्वयभेदप्रदर्शनार्थं 'प्राग् अपि' पूर्वस्मिन् परिच्छेदेपि 'उक्ता '=कथिता सम्प्रति नोच्यन्त इत्यर्थ । किन्तु 'अन्यत्'-ततो भिन्न 'साधारणम्'=द्वयोर्मार्गयो समानम् 'अलङ्कारजातम् प्रदर्श्यते'= निरूप्यते अस्मिन्परिच्छेद इति शेष ।

श्रुत्यनुप्रासच्छेकानुप्रासयमकरूपालङ्कारा गुणनिरूपणप्रकरणे द्वयोर्मार्गयोरसाधारणा उक्ता, ततोऽन्ये साधारणा उपमाद्या अत्रोच्यन्ते । तृतीयपरिच्छेदे यमकस्य पुनर्निरूपणन्तु विशेषभेदप्ररूपणार्थमेवेति न कश्चिद्दोष ॥ ३ ॥

स्वभावाख्यानमुपमा रूपकं दीपकावृती ।
आक्षेपोऽर्थान्तरन्यासो व्यतिरेको विभावना ॥ ४ ॥
समासातिशयोत्प्रेक्षा हेतु सूक्ष्मो लव क्रमः ।
प्रेयोरसवदूर्जस्वि पर्यायोक्तं समाहितम् ॥ ५ ॥
उदात्तापन्हुतिश्लेषविशेषास्तुल्ययोगिता ।
विरोधाप्रस्तुतस्तोत्रे व्याजस्तुतिनिदर्शने ॥ ६ ॥
सहोक्ति परिवृत्त्याशी सङ्कीर्णमथ भाविकम् ।
इति वाचामलङ्कारा दर्शिता पूर्वसूरिभि ॥ ७ ॥

प्रतिज्ञातस्यालङ्कारजातस्योद्देशमाह—'स्वभावाख्यानम्' इत्यादिना चतुर्भि श्लोकै । तत्र स्वभावाख्यानम्=स्वभावोक्ति । उपमा । रूपकम् दीपकावृती=दीपकम् आवृति आवृत्तिश्चेति द्वयम् आक्षेप, अर्थान्तरन्यास । व्यतिरेक । विभावना । समास =समासोक्ति । अतिशय = अतिशयोक्ति । उत्प्रेक्षा । हेतु । सूक्ष्म । लव । क्रम । प्रेय । ऊर्जस्वि । पर्या-

*'अस्तिर्भवन्तीपर प्रथमपुरुषो ऽप्रयुज्यमानोऽप्यस्ति' इति महाभाष्यकार । 'भवन्ती' इति लट पूर्वाचार्याणा सञ्ज्ञा ।

योक्तम् । समाहितम् = समाधि । उदात्तम् । अपन्हुति । श्लेष । विशेषः । तुल्ययोगिता । विरोध । अप्रस्तुतस्तोत्रम्=अप्रस्तुप्रशसा । व्याजस्तुति । निदर्शना । सहोक्तिः । परिवृत्ति । आशी । सकीर्णम् । भाविकम् । 'इति'=उक्तप्रकारेण 'पूर्वसूरिभि'=प्राचीन कविभिर्भामहादिभि 'वाचाम्'=काव्यवाक्यानाम् 'अलङ्कारा'=स्वभावोक्तिमारभ्य भाविकपर्यन्ता पञ्चत्रिंशत्सख्या 'दर्शिता'=उद्दिष्टा नाममात्रेण सकीर्तिता इत्यर्थ । एतेषामर्थगतत्वेऽपि 'वाचा' मित्युक्ति शब्दार्थयोस्तादात्म्याङ्गीकाराद् बोध्या । **'स्थितोऽस्य वाचकस्य वाच्येन सहाभेद सम्बन्ध'** इति व्यासोक्ते । कुवलयानन्दे तु—

'इत्थ शतमलङ्कारा लक्षयित्वा निदर्शिता
प्राचामाधुनिकानाञ्च मतान्यालोच्य सर्वत '

इत्यलङ्काराणा शतसख्या कथिता । काव्यप्रकाशे पष्ठिरुक्ता । एव मतभेदा ऊह्या. ॥

[स्वभावोक्तिलक्षणम्]

[१]नानावस्थं पदार्थानां रूपं साक्षाद्विवृण्वती ।
स्वभावोक्तिश्च जातिश्चेत्याद्या सालङ्कृतिर्यथा ॥ ८ ॥

—○*○—

'स्वभाव सर्वभावानां भावाभावाश्रय भवम्
भावगम्य भवातीत भावये भावनातिगम् ॥ १ ॥

तत्र तावत् वस्तुस्वभावस्य प्रथम बुद्धिविषयत्वात् स्वभावोक्ति लक्षयति—'नानावस्थम्' इति । 'पदार्थानाम्'=जातिगुणक्रियायदृच्छानां 'नानावस्थम्'=नाना अनेकप्रकारा अवस्था दशाविशेषो यस्य तत् 'रूपम्'=अवयवसस्थानरूपामाकृतिं गौरादिवर्णं वा 'साक्षात्'=प्रस्फुट प्रत्यक्षमिव 'विवृण्वती'=निरूपयन्ती या 'सा आद्या'=प्रथमा मुख्येति यावत् अलङ्कृति'=अलङ्कार 'स्वभावोक्ति'=स्वभावोक्तिर्नामेत्यर्थ । 'च'=तथा च इयमेव 'जाति'='जाति रिति नाम्नाऽपि कथ्यते इति शेष । इत्थञ्च—'कविप्रतिभागोचरत्वे सति नानावस्थस्य वस्तुनो स्वभाववर्णन स्वभावोक्ति'रिति फलित लक्षणम् । उक्तञ्च अलङ्कारचन्द्रिकायाम्—

जातिक्रियागुणद्रव्ये स्वभावो यत्र दृश्यते ।
स्वभावाख्या तु सा प्रोक्ता अलङ्कारोत्तमा यथा ॥ इति ॥

अन्यत्राप्युक्तम्—

नानावस्थासु जायन्ते यानि रूपाणि वस्तुन
स्वेभ्य स्वेभ्यो निसर्गेभ्यस्तानि 'जाति' प्रचक्षते ॥ इति ।

मम्मटस्तु—

'स्वभावोक्तिस्तु डिम्भादे स्वक्रियारूपवर्णनम्' इति ।

---

[१] (प्र० " स्वभावोक्ति कि लक्षणम् " (उ०) अस्य पृ० ५० १२ ।

सर्वेषामेतेषा फले नैव विशेष । सा चेय चतुर्विधा—जातिस्वभावोक्ति, गुणस्वभावोक्ति, क्रियास्वभावोक्ति., यदृच्छास्वभावोक्तिश्चेति । क्रमश उदाह्रियते इत्याशयेनाह 'यथा' इति ॥ ८ ॥

[स्वभावोक्तेरुदाहरणानि]

तुण्डैराताम्रकुटिलै· पक्षैर्हरितकोमलै ।
त्रिवर्णराजिभिः कण्ठैरेते मञ्जुगिर शुकाः ॥ ९ ॥

उक्तां चतुर्विधां स्वभावोक्तिं लक्ष्ये योजयन्नादौ 'जातिस्वभावोक्ति'मुदाहरति—'तुण्डै' इति । 'एते'=पुरोदृश्यमाना 'मञ्जुगिर '=मञ्जु मनोरमा गीर्वाणी येषां ते हृदयहारिरावा' 'शुका.'=कीरा 'आताम्रकुटिलै '=आ समन्तात् ताम्राणि रक्तवर्णानि कुटिलानि वक्राणि च तानि आताम्रकुटिलानि तै तथाविधैः 'तुण्डै '=आननै, 'हरितकोमलै =हरिता हरितवर्णाश्च ते कोमला मृदव तैरेवम्भूतै 'पक्षै '=पत्रै तथा 'त्रिवर्णराजिभि '=त्रयोवर्णा यत्र सा त्रिवर्णा हरितरक्तधूसरवर्णवती तादृशी राजि लेखा यत्र तै तथाभूतै 'कण्ठै.'= उपलक्षिता 'राजन्ते' इति शेष । अत्र सर्वत्र 'इत्थम्भूतलक्षणे' [पा० । २ । ३ । २१] इति सूत्रेण उपलक्षणे तृतीया ।

अत्र शुकत्व जाति । तदवच्छिन्नानां सर्वेषामेव शुकानामाताम्रकुटिलत्वादिकमसाधारणो धर्म कविकृतवर्णनाचातुरीवैचित्र्येण प्रत्यक्षमिव शुकमात्रगतो भासते । यद्यपि शुका सर्वेषां प्रत्यक्षा तथापि अनवधानवशात् दर्शितधर्मावच्छिन्ना शुकजातिरप्रत्यक्षेव कविवर्णनया प्रत्यक्षमिवावभासते । एवमिय जातिस्वभावोक्ति । 'तुण्डमानन लपन मुख' मित्यमर । 'शुको व्याससुते कीरे रावणस्य तु मन्त्रिणि । शिरीषपादपे पुसि ग्रन्थिपर्णे नपुसकम्' इति मेदिनी । 'कान्त मनोरम रुच्य मनोज्ञ मञ्जु मञ्जुल'मित्यमर ।

उदाहरण यथा वा मम—

एते कपोतशिशवोऽल्पतनूरुहाङ्गा घर्मार्त्तिघूर्णनयना कृततुण्डकाश्च ।
व्यादाय तुण्डरसनां मुहुरर्थयन्ते पानीयविन्दुसहितान् कणकान् स्वमातु ॥

[शिशु] पक्षिजातिस्वभावोऽयम् ।

कलक्वणितगर्भेण कण्ठेनाघूर्णितेक्षणः ।
पारावत· परिभ्रम्य रिरंसुश्चुम्बति प्रियाम् ॥ १० ॥

क्रियास्वभावोक्तिमुदाहरति—'कलक्वणितगर्भेण=इति । 'कण्ठेन इत्यत्र पूर्ववत् उपलक्षणे तृतीया । 'कलक्वणितगर्भेण'=कल हृद्य क्वणित कूजित गर्भे यस्य तादृशेन कण्ठेन गलेन, उपलक्षित 'आघूर्णितेक्षण =आघूर्णिते मदाविष्टे ईक्षणे नयने यस्य स एवविध 'पारावत '=कपोत 'रिरंसु '=रन्तुमिच्छु 'परिभ्रम्य'=परितश्चङ्क्रमण कृत्वा 'प्रियाम्'=वल्लभां कपोतीं 'चुम्बति =तस्या वक्त्रेण स्ववक्त्र सयुनक्ति अत्र एवभूता एव पारावता रिरंसाकाले कपोता चुम्बन्तीति पारावतस्य चुम्बनक्रियास्वभावो

वर्णित । विद्यमानाप्यत्र कपोतगतिर्वैचित्र्यवर्णनाविषयत्वेन कवेर्न विवक्षिता तस्मादियं क्रियास्वभावोक्तिरेव ।

'रिरंसु'रित्यत्र सन्नन्ताद् 'रम्' धातो 'सनाशंसभिक्ष उ' [पा० ३ । २ । १६८] इति सूत्रेण 'उ'प्रत्यय । रिरंसतीति रिरंसु ।

बध्नन्नङ्गेषु रोमाञ्चं कुर्वन्मनसि निर्वृतिम् ।
नेत्रे चामीलयन्नेष प्रियास्पर्शः प्रवर्त्तते ॥ ११ ॥

गुणस्वभावोक्तिमुदाहरति—'बध्नन्' इति । 'एष'=अनुभूयमान 'प्रियास्पर्श'= प्रियाया कान्ताया स्पर्श आलिङ्गनविशेष 'अङ्गेषु'=भुजाद्यवयवेषु 'रोमाञ्चम्'=रोम्णां पुलकितभाव 'बध्नन्'=सम्पादयन 'मनसि'=हृदये 'निर्वृतिम्'=गाढमानन्द 'कुर्वन्' जनयन् 'च'=तथा 'नेत्रे'=नयने 'आमीलयन्'=सम्मुकुलीकुर्वन् मुद्रयन्नित्यर्थ 'प्रवर्त्तते'= परम्परारूपेण प्रसृतो भवति। अत्र प्रियायाः स्पर्शो गुणो वैचित्र्येण वर्णित इति गुणस्व- भावोक्तिः ॥ ११ ॥

कण्ठेकाल. करस्थेन कपालेनेन्दुशेखर ।
जटाभिः स्निग्धताम्राभिराविरासीद् वृषध्वज ॥ १२ ॥

द्रव्यस्वभावोक्तिमुदाहरति—'कण्ठेकाल' इति । 'कण्ठेकाल'=कण्ठे गले काल इति कण्ठेकाल । अलुक्तत्पुरुष समास॰ 'हलदन्तात्सप्तम्या सञ्ज्ञायाम' [पा॰ ६।३।६] इति सूत्रेण सप्तम्या अलुक् । [तथा] 'करस्थेन'=पाणिस्थितेन 'कपालेन'=नरशिरोऽस्थ्ना [तथा] 'स्निग्धताम्राभि.'=स्निग्धाभिश्चिक्कणाभि ताम्राभी रक्ताभि 'जटाभि'=सटाभि' उपलक्षित [पूर्ववत् तृतीया] 'इन्दुशेखर' इन्दुश्चन्द्र शेखर शिरोभूषण यस्य स' चन्द्रचूड 'वृषध्वज'=महादेव 'आविरासीत्'= प्रादुरभवत् ।

अत्र 'वृषध्वज' शब्दो यादृच्छिक [सञ्ज्ञावचन] 'सञ्ज्ञा एव प्रकृते 'द्रव्य' मुच्यते । सञ्ज्ञासञ्ज्ञिनोश्चाभेदात् शिवो द्रव्यम् तस्माद् वृषध्वजगतस्य कण्ठेकालत्वादिरूपस्यासाधारण- धर्मस्य वर्णनाविशेषात् द्रव्यगतेय स्वभावोक्ति ॥ १२ ॥

[स्वभावोक्तेरुपसंहार]

जातिक्रियागुणद्रव्यस्वभावाख्यानमीदृशम् ।
शास्त्रेष्वस्यैव साम्राज्यं काव्येष्वप्येतदीप्सितम् ॥ १३ ॥

स्वभावोक्तिमुपसंहरति—'जाति॰' इति। जाति =गोत्वादि क्रिया=पाकादि । गुण = शुक्लादि । द्रव्यम्=सञ्ज्ञा [ननु वैशेषिकतन्त्रसिद्ध गुणाश्रय पृथिव्यादि । वैयाकरणानां सञ्ज्ञायां द्रव्यशब्दव्यवहारात्] एतेषां यत् स्वभावाख्यान=स्वभावस्य आख्यान कथन स्वभा- वोक्ति 'ईदृशम्'=दर्शितप्रकार कविप्रतिभाकृष्ट विच्छित्तिविशेषशालि वर्णनमित्यर्थ । अस्यैव स्वभावविशेषस्य 'शास्त्रेषु'=न्यायादिदर्शनेषु पुराणेतिहासादिषु वा 'साम्राज्यम्'= प्रभुत्वम् 'अस्ति' इति शेष । अत 'काव्येषु अपि'=कविप्रणीतेषु प्रबन्धेष्वपि 'एतत्'=

स्वभावाख्यानम् मुख्यतया 'ईप्सितम्'=वाञ्छित 'कविभि रिति शेष । विशेषेण कवय स्वभावोक्तिमेवाद्रियन्त इति भाव ।

अलङ्कारचन्द्रिकाकारस्तु एकेनैव श्लोकेन चतुर्विधां स्वभावोक्तिमुदाजहार । तद्यथा—

वामेन पाणिकमलेन मनोरमेण लीलावगुण्ठनपट परिवर्त्तयन्ती ।

मन्दस्मिताञ्चलचलेन दृगञ्चलेन चेतो न कस्य तरुणी तरलीकरोति ॥ इति

अत्र 'तरुणी' जाति । 'मनोरमत्व' गुण. । 'परिवर्त्तन' तरलीकरणञ्च, क्रिया । वामादि सञ्ज्ञात्वात् द्रव्यम । एषां चेष्टाभिर्वस्तुभूतायास्तरुण्या कविप्रतिभोत्थवैचित्र्या स्वभावनिरूपणात् स्वभावोक्तिरलङ्कार । 'जयदेव' इत्थमाह—

'स्वभावोक्ति' स्वभावस्य जात्यादिस्थस्य वर्णनम् ।

कुरङ्गैरुत्तरङ्गाक्षि ! स्तब्धकर्णैरुदीक्ष्यते ॥'

आद्यार्धं लक्षणम् उत्तरार्धे लक्ष्यम् । आदिपदेन क्रियादीनां परिग्रह । अत्र कुरङ्गाणामेवमुदीक्षण स्वभाव । नायिकां प्रति नायकोक्तिरियम् । हे ! उत्तरङ्गाक्षि ! चञ्चलाक्षि ! 'उत्तरङ्गाक्षै'रिति पाठे तु हरिणविशेषणम् । उत्तरङ्गाणि चपलानि अक्षीणि येषां तै । इयञ्च जातिस्वभावोक्ति ।

किञ्च—

विधाय मूर्त्ति कपटेन वामनीं स्वय *बलिध्वंसिविडम्बिनीमयम् । उपेतपार्श्वश्चरणेन मौनिना नृप पतङ्ग समधत्त पाणिना ।' [नैषधम्] इयञ्च क्रियास्वभावोक्ति' सर्वोऽपि जन उत्पतनभयादेवमेव वामनीं मूर्त्ति कृत्वा नि शब्द पक्षिण गृह्णाति । कुवलयानन्देऽपि—

तौ समुखप्रचलितौ सविधे गुरूणा मार्गप्रदानरभसस्खलितावधानौ ।

पार्श्वोपसर्पणमुभावपि भिन्नदिक्क कृत्वा मुहुर्मुहुरुपासरतां सलज्जम् ॥ इति ।

इयञ्च वधूवरयो सलज्जक्रियास्वभाववर्णनेन क्रियास्वभावोक्ति ।

किञ्च श्रीहर्षचरिते—

† पश्चादङ्घ्री प्रसार्य त्रिकनतिविततं द्राघयित्वाङ्गमुच्चै, रासज्याभुग्नकण्ठो मुखमुरसि सटां धूलिधूम्रां विधूय । घासग्रासाभिलाषादनवरतचलत्प्रोथतुण्डस्तुरङ्गो, मन्द शब्दायमानो विलिखति शयनादुत्थित क्ष्मां खुरेण ॥

अत्र 'पश्चात' इत्यादिना संस्थानस्य 'घासग्रासे'त्यादिना क्रियाया वर्णनात् वर्णक्रियागतेय स्वभावोक्तिरिति तु साम्प्रदायिका । वयन्तु 'जातिस्वभावोक्तिरिय मिति ब्रूम । अश्वमात्रस्य तथाविधस्वभावदर्शनात ।

---

* बलिध्वंसी कपटवामनमूर्त्तिर्महाविष्णु तन्मूर्त्त्यनुसारिणीमित्यर्थ । समधत्त=सङ्घटितवान् जग्राहेत्यर्थ ।

† त्रिभिरस्थिभिर्घटित स्थान 'त्रिकम्' पृष्ठवश तस्य नतिर्नम्रता तया विततं विस्तृतम् अङ्ग शरीरम् उच्चै अतिशयेन द्राघयित्वा दीर्घं कृत्वा । अनवरत चलन् प्रोथो नासिका यस्य तादृश तुण्ड मुख यस्य स । शिष्ट स्पष्टम् ।

वाग्भटस्त्वित्थमुदाजहार—

*वर्हावलीवहुलकान्तिरुचो विचित्र-
भूर्जत्वचा रचितचारुदुकूललीला ।
गुञ्जाफलग्रथितहारलता. सहेल
खेलन्ति खेलगतयोऽत्र वने शवर्य ॥

अत्र चतुर्विधाऽपि स्वभावोक्तिरिति वक्तु शक्यते ।

यथा वा मदीय 'काव्यलतिकायाम्'—

चिनोति पाप कुरुते विगर्हणां तनोति दु ख ननु हन्ति सम्भ्रमम् ।
विपत्तिमातत्य सतां प्रहृष्यति क्रमो विचित्रोऽस्त्यसतां त्रिलोक्याम् ॥

अत्र दुर्जनक्रियास्वभावोक्ति । एवञ्च महाकाव्येषु भूयानस्या †समाचारो दृश्यते ।

---

*वर्हावलीभिर्मयूरपिच्छश्रेणिभि. वहुला महीया या कान्ति तया रोचन्ते या स्ता-स्तथाविधा , भूर्जत्वचा रचिता कृता चारु मनोज्ञा दुकूललीला प्रावरणवसनव्यापारविशेषो याभि , गुञ्जाफलैर्ग्रथिता हारलता याभिस्ता. खेलगतय शवर्यो भिल्ल्योऽत्र वने सहेलं सलील खेलन्ति दीव्यन्ति ।

†तथाच यशस्तिलके चम्पूकाव्ये द्वितीय आश्वासे—

आधीयते यदिह वस्तु गुणाय कान्त काये तदेव मुहुरेत्यपवित्रभावम् ।
छायाप्रतारितमतिर्मलरन्ध्रबन्ध किं जीव ! लालयसि भङ्गुरमेतदङ्गम् ॥

अत्राङ्गानां नश्वरस्वभाववर्णना जाति । छायया गौरश्यामादिवर्णेन प्रतारिता वञ्चिता मतिर्यस्य स त्वमेवभूत । मलरन्ध्रबन्धम्=मलानां विष्ठानां रन्ध्राणि छिद्राणि तेषां बन्ध प्रघट्को यत्र तत्तादृशमङ्गमित्यर्थ । शिष्ट स्पष्टम् ।

यथा वा रघुवशस्य त्रयोदशे सर्गे—

समत्वमादाय नदीमुखाम्भ सम्मीलयन्तो विवृताननत्वात्
अमी शिरोभिस्तिमय सरन्ध्रैरूर्ध्वं वितन्वन्ति जलप्रवाहान् ॥

अत्र तिमिगतेरेवाविरजलप्रवाहस्योर्ध्वविस्तारण स्वभाव इति सेय जातिक्रियास्व-भावोक्ति ।

यथा वा कुमारसम्भवे चतुर्थसर्गे ब्राह्मणवेषधारिमहादेववाक्यश्रवणोत्तर पार्वत्या अवस्थावर्णनम्—

इति द्विजातौ प्रतिकूलवादिनि प्रवेपमानाधरलक्ष्यकोपया ।
विकुञ्चितभ्रूलतमाहिते तया विलोचने तिर्यगुपान्तलोहिते ॥

अत्र पार्वत्या कोपजनितनादृशचेष्टावर्णनात्मिका लोचनप्रेरणक्रियास्वभावोक्तिरियम् । अनया रीत्या सर्वत्रोह्यम् । ग्रन्थगौरवभयान्न विस्तर ।

इदन्तु बोध्यम्—यत्र स्वभाववर्णनेऽपि चमत्कृतिविशेषो न दृश्यते तत्र नायमलङ्कार यथा—

गोरपत्यं बलीवर्दो घासमत्ति मुखेन स
मूत्रं मुञ्चति शिश्नेनापानेनैव तु गोमयम् ॥

इत्यादौ नालङ्कारत्वम् । परन्तु वस्तुनो रूप द्विविधम् । सहजमागन्तुकञ्च । तदुक्तमभियुक्तै —

स्वभाव एव भावानां स्वरूपमभिधीयते ।
निजमागन्तुकञ्चेति द्विविधं तदुदाहृतम् ॥ इति ।

ये तु वस्तुस्वरूपोल्लेखनाकारामर्थव्यक्तिं गुणेषु गणयन्ति तेषां मते स्वभावोक्तिर्नालङ्कार किन्तु गुण एव । भोजस्तु—सार्वदिकवस्तुनो रूपोल्लेखे गुणत्वम्, जायमानागन्तुकरूपवर्णनायामलङ्कारत्वमित्याचष्टे । तथाच तस्योक्ति —

'अर्थव्यक्तेरियं भेदमियता प्रतिपद्यते ।
जायमानमियं वक्ति रूपं सा सार्वकालिकम् ॥ इति कृतमतिलेखेन ।

[अथ—उपमाया सामान्यलक्षणम्]

यथाकथञ्चित्सादृश्यं यत्रोद्भूतं प्रतीयते ।
'उपमा'नाम सा तस्याः प्रपञ्चोयं निदर्श्यते ॥ १४ ॥

— ✻ —

यस्योपमा न लोकेऽस्मिन् यस्य नाम महद्यश ।
तमर्काभं स्वयञ्ज्योतीं रणात्कनमुपास्महे ॥ १ ॥

उपमां लक्षयति—'यथा'इति

'यत्र'=काव्ये 'यथाकथञ्चित्'=येन केनापि प्रकारेण धर्मेण गुणेन क्रियया अन्येन वेत्यर्थ 'उद्भूतम्'=स्फुटम् अभिधेयमित्यर्थ 'सादृश्यम्'=साम्य साधर्म्यमिति यावत् 'उपमानोपमेययो रिति शेष । 'प्रतीयते'=बुध्यते 'सा उपमा नाम'=सा साम्यप्रतीति उपमानामालङ्कार । 'तस्या '=उपमाया अलङ्कृते 'अयम्'=वक्ष्यमाण 'प्रपञ्च '=विस्तर नानाभेदरूप 'निदर्श्यते'=निरूप्यत इत्यर्थ । एवञ्च—'काव्यगतमलौकिकं चमत्कारकारि सादृश्यम्—उपमा' इति फलितम् । उक्तञ्च 'अप्पय्यदीक्षित ' कुवलयानन्दे—'यत्रोपमानोपमेययो सहृदयहृदयाह्लादकत्वेन चारु सादृश्यमुद्भूततयोल्लसति व्यङ्ग्यमर्यादां विना स्पष्टं प्रकाशते तत्रोपमालङ्कार ' इति 'पण्डितराजेन' अपि भणितम्—'सादृश्य सुन्दरं वाक्यार्थोपस्कारकारकमुपमालङ्कृति इति । सादृश्य, साधर्म्य सारूप्य, साम्य मिति चानर्थान्तरम । एतेन 'गौरिव गवय ' इत्यादौ सत्यपि साधर्म्ये नोपमाया अलङ्कारत्व चारुत्वाभावात् ।

इदमत्रावधार्यम्—उपमाया षट्काश्चत्वार पदार्था सन्ति—उपमानम्, उपमेयम्,

समानोधर्म, तद्वाचक इवादिश्च । तत्राधिकगुणमुपमान चन्द्रादि । वर्ण्यमानमल्पगुणमुपमेय कामिनीवदनादि, समानोधर्म आह्लादकत्वादि । वस्तुतस्तु—यस्योपमा दीयते तदुपमानम् । यस्मै उपमा दीयते तदुपमेयमिति वालवुद्धेरव्यामोहकरी सरणिः । उक्तञ्च वामनेन—'उपमानेनोपमेयस्य गुणलेशत साम्यमुपमा' (काव्या० अध्या० २ सू० १) उपमीयते सादृश्यमानीयते येनोत्कृष्टगुणेनान्यत् तद् उपमानम्, यदुपमीयते न्यूनगुण तद् उपमेयम् । सेयमुपमा तावत् द्विविधा लौकिकी कल्पिता च । लोकप्रसिद्धा लौकिकी, यथा 'कमलमिव मुख मनोज्ञम्' इत्यादौ मुखकमलयोरुपमानोपमेयभावो लोके प्रसिद्धः । यथा वा 'हसीव कृष्ण ते कीर्त्ति स्वर्गङ्गामवगाहते' इति हसीकीर्त्योरपि । कल्पिता तु—'गुणवाहुल्यतश्च कल्पिता' (काव्य० अध्या० २ । स० २) गुणानां वाहुल्य गुणवाहुल्यम्, तत उपमानोपमेययो साम्यात् कल्पितोपमा, कविभि कल्पितत्वात् कल्पिता ।

यथा—

उद्गर्भहूणतरुणीरमणोपमर्द-भुग्नोन्नतस्तननिवेशनिभ हिमांशो ।
विम्व कठोरविसकाण्डकडारगौरैर्विष्णोः पद प्रथममग्रकरैर्व्यनक्ति ॥

अत्र तादृशस्तनहिमांशुविम्वयोरुपमानोपमेयभावो न लोकप्रसिद्ध किन्तु कविकल्पित ।

उपमानोपमेयगतधर्मोश्च गुणक्रियादिरूपा यथायथमवगन्तव्या । तत्र—हसीव कृष्ण! ते कीर्त्तिर्विना लोकगामिनी इत्यादौ धवलत्वं गुण । 'हसीवेयमिहायाता कान्ता स्वकान्तमन्तिर्यो' इत्यादावागमनादिक्रियारूप । एवमन्यदप्यूह्यम् ॥ १४ ॥

[तत्रादौ धर्मोपमाया उदाहरणम्]

अम्भोरुहमिवाताम्रं मुग्धे ! करतलं तव ।
इति 'धर्मोपमा' साक्षात्तुल्यधर्मप्रदर्शनात् ॥ १५ ॥

प्रतिज्ञानुसारमुपमाप्रपञ्चं कुर्वाण प्रथमं 'धर्मोपमा'-मुदाहरति 'अम्भोरुहम्' इति । अयि ! मुग्धे ! अपरिपक्वमते ! सुन्दरि ! 'तव करतलम्'=पाणितलम् 'अम्भोरुहमिव'=कोकनदमिव 'आताम्रम्'=समन्ततो लोहितम् 'अस्ति' इति शेष । 'इति'=उक्ते वाक्ये 'साक्षात्'=स्फुटम् 'तुल्यधर्मप्रदर्शनात्'=आताम्रमितिपदोपात्तस्य तुल्यस्य धर्मस्य आताम्रत्वस्य रक्तताख्यसाधारणधर्मस्य प्रदर्शनात् उपादानात् इय 'धर्मोपमा' नाम उपमा । अर्थात् 'उपात्तधर्मा इयमुपमा । इयञ्च पूर्णा श्रौती, चतुर्णामपि उपमानोपमेयसाधारणधर्मतद्वाचकानामुपादानात् । अत्र अम्भोरुहमुपमानम्, करतलमुपमेयम्, आताम्रत्व समानो धर्म, इवशब्द उपमावाचक । एवमेवाग्रेपि यथासम्भव योजनीयम् ॥ १५ ॥

[वस्तूपमाया उदाहरणम्]

राजीवमिव ते वक्त्रं नेत्रे नीलोत्पले इव ।
इयं प्रतीयमानैकधर्मा 'वस्तूपमै'व सा ॥ १६ ॥

वस्तूपमां लक्ष्यलक्षणविधया दर्शयति—'राजीवम्' इति । 'ते'=तव 'वक्त्रम्'=आस्य 'राजीवम् इव'=कमलमिव तथा 'नेत्रे'=नयने 'नीलोत्पले इव'=रात्रिविकाशिकमले इव 'स्त' इति शेष ।[अस्मिन् 'काव्ये] वाक्ये 'प्रतीयमानैकधर्मा'=प्रतीयमानो गम्यमानो व्यङ्ग्य इति यावत् [नतु शब्देन साक्षादभिधीयमान] एक साधारणो धर्मो मनोज्ञत्वादि-रूपो यस्यां सा तादृशी 'इयम् वस्तूपमा' नाम अलङ्कार । वस्तुनो उपमानोपमेययोर्द्वयोरेवोपादानात् । वस्तूपमा धर्म्युपमा इति समानौ शब्दौ अत्र राजीवमुपमानम्, वक्त्रमुपमेयम् इवशब्दो वाचक । एव नीलोत्पलमुपमानम्, नेत्र उपमेयभूते, वाचक इवशब्द । उभयत्र मनोज्ञत्वादि साधारणो धर्म, स च नोपात्त किन्तु उपमानोपमेयवाचिशब्दयो-रुपादानादेव गम्यो ऽसावितीयम् 'अनुपात्तधर्मोपमा' ज्ञेया । इयमेवार्वाचां मते श्रौती धर्मलुप्तोपमा। प्राचां मते तु इय 'वस्तूपमा' इति कथ्यते । अत्र मूलमाभेय वच —

'यत्र साधारणो धर्म कथ्यते गम्यतेऽथवा ।
ते धर्मवस्तुप्राधान्यात् धर्मवस्तूपमे इमे'। इति ।

इदमपि बोध्यम्—यत्र सादृश्य नैव स्फुट वर्त्तते तत्र धर्मोपादान विना उपमाया नैव निर्वाह । यथा 'सकलकल पुरमेतज्जात सुधांशुविम्बमिव'=इत्यादौ 'सकलकल' मित्याद्यशानुपादाने नैव सुधांशुविम्बपुरयोर्लोकप्रसिद्ध किमपि सादृश्यमस्ति । अत एव नवीना एतादृशस्थले उपमायामनुचितार्थत्वदोषमाकलयन्ते । तथैव 'प्रथ्नामि काव्यशशिन विततार्थरश्मिम्' इत्यादावपि नहि काव्यशशिनो सादृश्य लोके प्रसिद्धम् । तस्मादेतादृशस्थले नैव वस्तूपमेति निश्चेतव्यम । परन्तु—कल्पितोपमायां क्वचिदनुचितार्थत्व क्वचिन्नेत्यस्मद्गुरुचरणा आहु । विस्तरस्तु अस्मत्काव्यप्रकाशप्रभायां द्रष्टव्य ॥ १६ ॥

[विपर्यासोपमाया उदाहरणम्]

तवाननमिवोन्निद्रमरविन्दमभूदिति ।
सा प्रसिद्धेर्विपर्यासात् विपर्यासोपमेष्यते ॥ १७ ॥

विपर्यासोपमां दर्शयति—'तव' इति । 'उन्निद्रम्'=विकासितम् 'अरविन्दम्'=कमलम् 'तव आननम् इव'=मुखमिव 'अभूत्'=अर्थात् विकसितमासीत् । 'इति'=उक्ते वाक्ये 'प्रसिद्धे'=उपमानोपमेयभावप्रसिद्धे 'विपर्यासात्'=वैपरीत्यात् [कविकल्पनाद्वारा इति शेष] 'सा'=[इयम] उपमा 'विपर्यासोपमा इष्यते'=कविभिरिति शेष ।

अय भाव —वर्णनीयानां [प्रस्तुतानाम्] मुखादीनामुपमेयत्वम् अप्रस्तुतानामरविन्दादीनामुपमानत्वमस्ति इति लोकप्रसिद्धि, ता त्यक्त्वा यदत्र वर्ण्यस्य मुखस्यैवोत्कर्षताप्रकटनायोपमानभाव अप्रस्तुतस्यारविंदस्य ततोऽपकर्षताबोधनाय उपमेयभाव कल्पित सोऽय प्रसिद्धिविपर्यास । अत एवेय 'विपर्यासोपमा' इत्याभण्यते मनीषिभि । इयमेव 'कल्पिता इत्याह वामन । तथाचोक्तमस्मान् । अयञ्च प्रतीपालङ्कार एवेति नव्या । तथाह जयदेव —

प्रतीपमुपमानस्योपमेयत्वप्रकल्पनम् ।
त्वल्लोचनसम पद्म त्वद्वक्त्रसदृशो विधु ॥

प्रसिद्धोपमानोपमेयभावस्य प्रतिलोम्यात् प्रतीपम् । पद्मवक्त्रयोरेवोपमानोपमेयभावो लोकप्रसिद्धो नतु वक्त्रपद्मयोरिति । कुवलयानन्दे चोदाहरणान्तरमपि—

यत्त्वन्नेत्रसमानकान्तिसलिले मग्न तदिन्दीवर
मेघैरन्तरित प्रिये ! तव मुखच्छायानुकारी शशी ।
येऽपि त्वद्गमनानुसारिगतयस्ते राजहसा गता-
स्त्वत्सादृश्यविनोदमात्रमपि मे दैवेन न क्षम्यते ॥ इति ।

प्रोषितस्य प्रियां प्रति वियोगवेदनावर्णनमिदम् । अत्रापि नेत्रादीनामुपमेयत्वम् इन्दीवरादीनामुपमानत्वमिति प्रसिद्धिविपर्यास कृत । चन्द्रालोके भङ्गयन्तरैरपि प्रतीपालङ्कार उक्त तत एवावगन्तव्य. ॥ १७ ॥

[अन्योन्योपमाया वर्णनम्]

तवाननमिवाम्भोजमम्भोजमिव ते मुखम् ।
इत्य'न्योन्योपमा' सेयमन्योन्योत्कर्षशंसिनी ॥ १८ ॥

अन्योन्योपमां दर्शयति—'तव' इति । 'अम्भोजम्'=कमल 'तव आननम् इव'= तवास्यमिव 'ते'=तव 'मुखम्'=आस्यम् 'अम्भोजम् इव' 'इति'=उक्तप्रकारे वाक्ये 'अन्योन्योत्कर्षशंसिनी'=अन्योन्यस्य परस्परस्य अर्थात् अम्भोजोपमानत्वेन मुखस्य, मुखोपमानत्वेन अम्भोजस्य च उत्कर्ष =सौन्दर्यवैचित्री तस्य शंसिनी लक्षयित्री 'सा इयम्'=उपमा 'अन्योन्योपमा' ज्ञेया ।

अत्र द्वे एव मुखाम्भोजे प्रस्तुते बोध्ये, अन्यथा एकस्य प्रस्तुतत्वे तदीयोत्कर्षप्रकटनप्रयासो व्यर्थ स्यात्कवे ।

'मुखमम्भोजञ्च तुल्यम्' इत्यादौ परस्परस्य उपमानोपमेयभावे सत्यपि वैचित्र्याभावान्नायमलङ्कार । पर्यायोपमाया औपम्यमेकवाक्यगतम् अत्र तु वाक्यद्वयगतमिति विशेष । इयमेवार्वाचां मते उपमेयोपमा । उक्तञ्च मम्मटाचार्यै —'विपर्यास उपमेयोपमा तयो' रिति । तयोरुपमानोपमेययोर्विपर्यासः परिवृत्तिरर्थाद् वाक्यद्वये स्यात्तदोपमेयोपमा [मता] ।

रुय्यकेणापि—

पर्यायेण द्वयोश्चेदुपमेयोपमा मता ।
धर्मोऽर्थ इव पूर्णश्रीरर्थो धर्म इव त्वयि ॥ इत्याह ।

यथा वा—

खमिव जलं जलमिव खं हंस इव चन्द्रश्चन्द्र इव हंसः ।
कुमुदाकारास्तारास्ताराकाराणि कुमुदानि ॥

अत्र प्रस्तुतेऽर्थे ... । शाङ्गि धर्मार्थसमृद्धे शरदि गगनादि-

नैर्मल्यस्य च वर्णनीयत्वात् । शरद्वर्णनमिदम् । यथा वा—

कौमुदीव भवती विभाति मे कातराक्षि ! भवतीव कौमुदी ।
अम्बुजेन तुलितं विलोचनं लोचनेन च तवाम्बुजं समम् ॥ इत्याद्यन्यदप्यूह्यम् ।*

[¶]त्वन्मुखं कमलेनैव तुल्यं नान्येन केनचित् ।
इत्यन्यसाम्यव्यावृत्तेरियं सा 'नियमोपमा' ॥ १९ ॥

नियमोपमा निरूपयति—'त्वन्मुखम्' इति । त्वन्मुखम्'=त्वदीयमाननं 'कमलेन एव' सरोजेनैव 'तुल्यम्'=सदृशम् 'अन्येन केनचिदपि न'=तुल्यमित्यर्थः । 'इति'=अनेन प्रकारेण अस्मिन् वाक्ये 'अन्यसाम्यव्यावृत्ते'=अन्यस्य कमलभिन्नस्य चन्द्रादेः साम्यम् औपम्यं तस्य व्यावृत्तेः निराकरणात् 'इयं सा'=सर्वप्रसिद्धा 'नियमोपमा इति नाम्नी उपमा 'मता' इति शेषः ।

अत्र 'अनेकेषामुपमानानां सद्भाव उपमेयस्य प्रस्तुतस्य अपकर्षतापर्यवसायी' इति तन्निरासकरणेन प्रकृष्टतमेनैकेन सादृश्यकल्पनमुपमेयस्यैव [मुखादेः] उत्कर्षातिशयं पुष्णातीति ह्येयं नियमोपमा । यथा वा मम—

इन्द्रेणैव समो भूपस्तन्मन्त्री गुरुणा तथा ।
राज्ञी तु कमलातुल्या नैषां साम्यं परैरगम् ॥

[अनियमोपमाया लक्ष्यलक्षणे]

पद्मं तावत्तवान्वेति मुखमन्यच्च तादृशम् ।
अस्ति चेदस्तु तत्कारीत्यसावनियमोपमा ॥ २० ॥

अनियमोपमां दर्शयति—'पद्मम्' इति । पद्मं तावत् तव मुखम् अन्वेति'=अनुसरति अनुकरोतीति यावत् । 'अन्यच्च'=पद्मभिन्नं चन्द्रादि 'तादृशम्'=पद्मवन्मनोहरं 'तत्कारि'=त्वन्मुखानुकारि 'अस्ति चेद् अस्तु'=नाम इति'=एवंरूपेणानुकारिनियमाभावात् वाक्योक्ता 'असा' = प्रसिद्धा 'अनियमोपमा' मता इति शेषः ।

अत्र 'पद्मम्' इति कर्तृ, 'मुखम्' इति तस्य कर्म तेन च मुखस्योपमानत्वेन वैचित्र्या-

---

(प्र०) ¶नियमोपमायाः किं लक्षणम् किञ्चोदाहरणम् ? कथञ्च तत्र तस्य सङ्गतिः ? (उ०) अस्य पृ० ५० ४ ।

* दर्पणकारस्तु [विश्वनाथ] एवमाह—'पर्यायेण द्वयोरेतदुपमेयोपमा मता' इति उदाहृतवांश्च—

हंसः प्रसूनमिव हासमिव प्रसूनं पाणिः प्रवाल इव पाणिरिव प्रवालः ।
केशो द्विरेफ इव केश इव द्विरेफः सा भाति वीरदिवमेव विभाति वीरा ॥ इति ॥

यथा वा मम—

शिवराज इवाम्बरमणिरम्बरमणिरिव चकास्ति शिवराजः ।
ज्योत्स्नेव तस्य कीर्तिस्तदीयकीर्तिरिव लसति लोके सा ॥ इति ॥

तिशय अतएवेयमुपमा नत्वन्यथा । प्रसिद्धोपमेय भावस्योपमानत्व एवास्या विच्छित्तिविशेष-शालित्वात् ।

केचित्तु—'तव मुख पद्ममन्वेति अन्यच्च पद्मवत् सुन्दर वस्तु चन्द्रादि अन्वेति इति पूर्वार्धान्वय' इत्यादि व्याकृतवन्त तन्मन्दम यस्य कस्याप्युपमानकल्पनाया नियमाभावत्वे तादृशविच्छित्तिविशेषाभावात् तस्माद् यथाव्याख्यातमेवास्तु । अत्रोत्तरार्ध लक्षणम् ॥२०

[समुच्चयोपमाया लक्ष्यलक्षणे]

समुच्चयोपमाप्यस्ति न कान्त्यैव मुखं तव ।
ल्हादनाख्येन चान्वेति कर्मणेन्दुमितीदृशी ॥ २१ ॥

समुच्चयोपमां निरूपयति—'समुच्चयोपमा' इति । [हे ! प्रिये !] तव मुखम्'=आनन 'कान्त्या'=वर्णशोभया 'एव'=केवल 'इन्दुम्'=चन्द्रम 'न अन्वेति'=न अनुसरति 'ल्हादनाख्येन'=ल्हादो मोदविशेष तदाख्येन तन्नामकेन च कर्मणा व्यापारेणापि 'इन्दु-मन्वेति' । अत्र चकार समुच्चायार्थ । 'इति'=दर्शितदिशा उक्तवाक्ये 'ईदृशी'=एवमा-कारा 'समुच्चयोपमा अपि अस्ति' । इयञ्च समुच्चयोपमा क्रियया, गुणेन, गुणक्रियाभ्याञ्चेति त्रिधा बोद्धव्या । अत्र ल्हादकान्तिरूपयो समुच्चितयोर्धर्मयो साम्योक्ते 'समुच्चयोपमा' इत्यर्थ ॥ २१ ॥

[अतिशयोपमाया लक्ष्यलक्षण]

त्वय्येव त्वन्मुखं दृष्टं दृश्यते दिवि चन्द्रमा ।
इयत्येव भिदा नान्येत्यसा 'वतिशयोपमा' ॥ २२ ॥

अतिशयोपमां दर्शयति—'त्वयि' इति । 'तव मुख त्वयि एव दृष्टम्' 'चन्द्रमा'=शशी [पुन] 'दिवि'=आकाशे 'दृश्यते'=दृग्गोचरो भवतीत्यर्थ । 'इयती'=एतावन्मात्रा अर्थात् आश्रयभेदहेतुका 'एव' [मुखचन्द्रमसो]'भिदा'=विशेष 'अस्ति' इति शेष । 'न अन्या'=गुणक्रियादिनिमित्ता भिदा नवास्तीत्यर्थ । 'इति'=एवमाकारा उक्तवाक्यनिष्ठा 'अतिशयोपमा' कथ्यते ।

भिन्नधर्मत्वेऽपि आपम्यमात्रेक चमत्कारोत्पादनात 'आतिशयोपमा' ज्ञेया । एवञ्च 'भिन्ना-श्रयत्वेऽपि एकमात्रस्य मतिशयोपमेति' पर्यवसित लक्षणम । अत्र इवादिपदप्रयोगाभावात् आर्थ्य [गम्य] त्वमस्याम् । नच रूपकध्वनिकाव्यमिदम् यत अधिकरणभेदेन दृष्टेर्मुखचन्द्रमसोर्भेदप्रतीतिरस्ति । अभेदप्रतीति विना रूपकाभावात् । नाप्ययं व्यतिरेक उपमानादुपमेयस्याधिक्यवर्णनात नात्र व्यतिरेकनिमग्नभाप्रतीतिरिति सहृदया ॥ २२॥

[उत्प्रेक्षितोपमाया लक्ष्यलक्षणे]

मय्येवास्या मुखश्रीरित्यलमिन्दोर्विकत्थनैः ।
पद्मेऽपि सा यदस्त्येवेत्यसा 'वुत्प्रेक्षितोपमा ॥ २३ ॥

उत्प्रेक्षितोपमां दर्शयति—'मयि' इति । 'अस्या.'=कान्ताया 'मुखश्री'=मुखस्य

कान्ति शोभा 'मयि एव'=नापरत्र, 'इति'=एवमाकारतया 'इन्दो'=चन्द्रस्य 'विकत्थने'= स्वात्मप्रशसने 'अलम्'=उत्कर्षेण तेनात्मश्लाघा न कर्त्तव्येत्यर्थ । 'यत्'=यस्माद्धेतो 'पद्मे'=कमले 'अपि' 'सा'=कान्तानानकान्ति 'अस्ति एव'=विद्यत एवेत्यर्थ । 'इति'= एवमाकारा असा 'उत्प्रेक्षितोपमा' ज्ञेया । उत्प्रेक्षितस्य अतात्त्विकत्वेन समारोपितस्योपमा उत्प्रेक्षितोपमा इत्यन्वर्था सञ्ज्ञैव लक्षणम् ।

अयमत्राशय —निरूपिता मुखशोभा वस्तुतश्चन्द्रे नास्तीति विवक्षितम, किन्तु नायकचाटुवचनेन सा सम्भाविता, सम्भावनञ्चोत्प्रेक्षा भवति अत तन्मूलकत्वादियमुत्प्रेक्षितोपमा मता । अत्रापि साम्य व्यङ्ग्यम । तद्वाचकेवादेरभावात् ।

नवानास्तु—अत्र चन्द्रस्य विकत्थनासम्बन्धेऽपि तत्सम्बन्धोक्ते 'सम्बन्धातिशयोक्तिः स्यादयोगे योगकल्पनम्' इति लक्षणघटनात् सम्बन्धातिशयोक्तिरलङ्कार इत्याहु ।

वयन्तु—'गर्वमसवाह्यमिमम' इत्यादिस्थलवत् 'अन्योपमेयलाभेन वर्ण्यस्यानादरश्च तत् इत्युक्त प्रतीपविशेषच्छायामपि ब्रूम । अत्रोत्प्रेक्षाया मूलत्वाकल्पन जैव ग्रन्थकारकल्पनाननुपाति इत्युपन्यस्यत एव सूरिभि ॥ २३ ॥

[अद्भुतोपमाया लक्ष्यलक्षणे]

यदि किञ्चिद्भवेत्पद्मं सुभ्रु ! विभ्रान्तलोचनम ।
तत्ते मुखश्रियं धत्ता मित्यसावद्भुतोपमा ॥ २४ ॥

अद्भुतोपमा दर्शति—'यदि' इति । 'हे ! सुभ्रु !'=सुष्ठु हृदयहारिणी मदनावेशकारिणी भ्रू भ्रुकुटी यस्या सा तत्सम्बुद्धौ 'यदि'=[नाम] 'पद्मम्'=कमलम् 'किञ्चित्'= ईषत् 'विभ्रान्तलोचनम्'=आघूर्णितनयनम् 'भवेत्'=स्यात् 'तत्'=तदा 'ते'=तव 'मुखश्रियम=आननकान्तिम् 'धत्ताम्'=धारयतु 'इति'=एवमाकारा असौ 'अद्भुतोपमा' मता इति शेष ।

अत्र यद्यर्थबलेन सादृश्यमधिक चमत्कारि द्योतितम् अर्थात् विभ्रान्तलोचनत्वादयो धर्मा वस्तुतो मुखनिष्ठ एव, तत्प्रतिद्वन्द्विनि पद्मे तु सम्भावनामात्रेणोपनीता अधिक चमत्कारमावहन्ति, अत इयम् 'अद्भुतोपमा' । अन्यैरप्युक्तम्—

यत्रोपमेयधर्मा स्युरुपमाने ऽधिरोपिता ।
चमत्कारविधानार्थं तामाहुरद्भुतोपमाम् ॥ इति ॥

अग्निपुराणे तु एवमुक्तम्—

'त्रैलोक्यासम्भवि किमप्यारोप्य प्रतियोगिनि ।
यद्विनोपमीयते या प्रथते साद्भुतोपमा' ॥ इति ।

एतामेव च प्रकाशकारादयो 'यद्यर्थोक्तौ च कल्पनम्' इति लक्षणेनातिशयोक्तिभेदमाहु । उदाहरन्ति च—

राकायामकलङ्क चेदमृतांशोर्भवेद् वपु ।
तस्या मुख तदा साम्यपराभवमवाप्नुयात ॥ इति ॥

अत्र राकेन्दोर्निर्लक्ष्मत्वस्य वस्तुतोऽसम्भवेऽपि कविना सम्भवद्रूपतयोक्तौ अस्य निरुपमतायां पर्यवस्यति ।

रुद्रटस्तु—इमामुत्पाद्योपमामाह । तथाहि—

'अनुपममेतदस्त्वित्युपमानं तद्विशेषणञ्चासत् ।
सम्भाव्य सयत्नं या क्रियते सोपमोत्पाद्या' इति ॥

उदाहृतञ्च तेनैव यथा—

कुमुददलदीधितीनां स्वक्सम्भूय च्यवेत यदि ताभ्यः ।
इदमुपमीयेत तया सुतनोरस्याः स्तनावरणम् ॥ इति ॥

अत्र हि कुमुददलदीधितित्वमुपमानम्, तद्विशेषणं च्यवनञ्च द्वयमपि सयत्नं सम्भावितम् । इतरे इमामेव 'सम्बन्धातिशयोक्ति'मचकथन् । यथा—

यदि त्रिलोकी गणनापरा स्यात् तस्याः समाप्तिर्यदि नायुषः स्यात् ।
पारे परार्धं गणना यदि स्याद् गणेयनिःशेषगुणोऽपि स स्यात् ॥ [श्रीहर्षः]

अत्र त्रिलोकीगणनापरत्वाद्यसम्बन्धेऽपि तत्सम्बन्धसम्भावनाकथनात् सम्बन्धातिशयोक्तिः । अथवा—

उभौ यदि व्योम्नि पृथक् प्रवाहावाकाशगङ्गापयसः पतेताम् ।
तेनोपमीयेत तमालनीलमामुक्तमुक्तालतमस्य वक्षः ॥ [माघः]

अत्र व्योम्नि गङ्गाप्रवाहद्वयासम्बन्धेऽपि सम्भावनायां सम्बन्धकथनात् सम्बन्धातिशयोक्तिः । अथवा—

पुष्पं प्रवालोपहितं यदि स्यान् मुक्ताफलं वा स्फुटविद्रुमस्थम् ।
ततोऽनुकुर्याद् विशदस्य तस्यास्ताम्रौष्ठपर्यस्तरुचः स्मितस्य ॥ [कालिदासः]

अत्र पुष्पादीनां प्रवालोपहितत्वाद्यसम्बन्धेऽपि सम्भावनया तत्सम्बन्धकथनादुक्तिरतिशयोक्तिः । कुवलयानन्दादिमते चेयं सम्भावनालङ्कारः । तथा चोक्तम्—

'सम्भावना यदीत्थं स्यादित्यूहोऽन्यस्य सिद्धये ।
यदि शेषो भवेद्वक्ता कथिताः स्युर्गुणास्तव ॥ इति ॥ २४ ॥

[मोहोपमाया लक्ष्यलक्षणे]

शशीत्युत्प्रेक्ष्य तन्वङ्गि ! त्वन्मुखं त्वन्मुखाशया ।
इन्दुमप्यनुधावामीत्येषा 'मोहोपमा' मता ॥ २५ ॥

मोहोपमां निरूपयति—'शशी' इति । हे ! 'तन्वङ्गि'=सुकुमारावयवे ! 'त्वन्मुखम्'=त्वदाननम् 'शशी'=चन्द्रः 'इति'=एवम्प्रकारम् 'उत्प्रेक्ष्य'=भ्रमेणाभिन्नं मत्वा अनन्तरं 'त्वन्मुखाशया'=त्वन्मुखप्राप्त्याशया 'इन्दुम् अपि'=चन्द्रमपि 'अनुधावामि'=अनुसरामि 'इति'=इत्थंरूपा 'एषा' [illegible] असन्दिग्धा प्रसिद्धा 'मोहोपमा'=अन्यस्मिन् अन्य-[illegible] मोहोपमा इति नामालङ्कृतिः 'मता'=मता मनीषिभिरिति शेषः ।

अत्र मुखभिन्नेऽपि [मुखत्वधर्माभावत्यपि] चन्द्रे यन्मुखत्वेन ज्ञान [भ्रम] तद्धेतु-कत्वादिय मोहोपमेति लक्षणसमन्वय । इमामेव नवीना 'भ्रान्तिमान् अलङ्कार' इत्याचक्षते । तथाचाह विश्वनाथ —'साम्यादतस्मिंस्तद्बुद्धिर्भ्रान्तिमान् प्रतिभोत्थिता' इति । उदाहरण यथा रुद्रटस्य--

पालयति त्वयि वसुधां विविधाध्वरधूममालिनी ककुभ ।
पश्यन्तो दूयन्ते घनसमयाशङ्कया हसा ॥

अत्र वर्षाकाले यज्ञधूमधारिणीषु दिशासु घनत्व—[मेघत्व]—धर्मेण हसानां भ्रान्ति । परमत्र साम्य व्यङ्ग्यम् ।

नलचम्पूकाव्ये चन्द्रोदयवर्णने यथा—

मुग्धा दुग्धधिया गवां विदधते कुम्भानधो वल्लवा
कर्णे कैरवशङ्कया कुवलय कुर्वन्ति कान्ता अपि ।
कर्कन्धू फलमुच्चिनोति शवरी मुक्ताफलशङ्कया
सान्द्रा चन्द्रमसो न कस्य कुरुते चित्तभ्रम चन्द्रिका ॥

अत्र वल्लवानां भ्रान्त्या तथावर्णनाद् भ्रान्तिमानलङ्कार । अत्रापि 'शशी' इत्युपक्रम्य 'इन्दुम्' इति प्रक्रमभङ्गो गौडसम्प्रदायानुरोधेन सोढव्य ॥ २५ ॥

[सशयोपमाया लक्ष्यलक्षणे]

किं पद्ममन्तर्भ्रान्तालि ! किन्ते लोलेक्षणं मुखम् ।
मम दोलायते चित्तमितीयं 'संशयोपमा' ॥ २६ ॥

सशयोपमां निरूपयति—'किम्' इति । 'अन्तर्भ्रान्तालि'=अन्तर्गर्भे भ्रान्तौ सभ्रमौ अलौ भ्रमरौ यत्र तत् तादृश 'किं पद्मम्'=कमल किम् अथवा 'ते'=तव 'किम् लोलेक्षणम्'=लोले चपले ईक्षणे नयने यस्मिन् एवम्भूत 'मुखम्'=आननमस्ति । 'मम चित्तम्'=मन 'दोलायते'=सशयारूढ भवति 'इति'=एवमाकारा 'इयम् सशयोपमा' सशयहेतुकत्वात 'सशयोपमा' ज्ञेया इति शेष ।

विच्छित्तिविशेषतया सादृश्यपर्यवसायिसशयहेतुकोपमा 'सशयोपमा' इति लक्षण मागतम्भवति। भ्रान्तालित्वलोलेक्षणत्वयोर्द्वयोर्धर्मयो विम्बप्रतिविम्बभाव सशयहेतु, स च सशय सादृश्ये पर्यवसित इति तद्धेतुकोयमुपमा । इयमेव नव्यै 'सदेहालङ्कार' इत्युच्यते । उक्तञ्च मम्मटेन—'ससन्देहस्तु भेदोक्तौ तदनुक्तौ च सशय' इति । द्विविधोऽपि 'काव्यप्रकाशे' उदाहृत । किन्तु 'अलङ्कारसर्वस्वे' तस्य लक्षणमित्थमुक्तम्—

सम्भावना निश्चयान्यतरभिन्ना मनोरमा ।
सादृश्यहेतुका बुद्धि 'सन्देहालङ्कृति' मता ॥

उदाहृतश्च तत्रैव—

किन्तु तुषारासार किं घनसार किममृतसारो वा ।
शमयति यदिद वचसामिति ससशायि जनं हरेर्दृशो विषये ॥

भेदोक्तौ यथा—

अयं मार्त्तण्डः किं स खलु तुरगैः सप्तभिरितः

कृशानुः किं सर्वाः प्रसरति दिशो नैव नियतम् ।

कृतान्तः किं साक्षान्महिषवहनोऽसाविति चिरं

समालोक्याजौ त्वां विदधति विकल्पान् प्रतिभटाः ॥

तदनुक्तौ यथा—

अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः

शृङ्गारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः ।

वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो

निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः ॥ इति ।

यथा वा पण्डितराजानाम्—

तीरे तरुण्या वदनं सहासं नीरे सरोजं विकसद्विकासम् ।

आलोक्य धावत्युभयत्रमुग्धा मरन्दलुब्धालिकिशोरमाला ॥ इति दिक् ॥ २६ ॥

[निर्णयोपमाया लक्ष्यलक्षणे]

(ड) न पद्मस्येन्दुनिग्राह्यस्येन्दुलज्जाकरी द्युतिः ।
अतस्त्वन्मुखमेवेदमित्यसौ 'निर्णयोपमा' ॥ २७ ॥

निर्णयोपमां निरूपयति—'न' इति । 'इन्दुनिग्राह्यस्य'=इन्दुना चन्द्रेण निग्राह्य तिरस्कार्यं तस्य चन्द्रकृतपराभवविशिष्टस्येत्यर्थः, 'पद्मस्य'=कमलस्य 'द्युतिः'=कान्तिः 'इन्दुलज्जाकरी'=चन्द्रपराभवकारिणी 'न' नास्त्येव ।' 'सर्वं वाक्यं सावधारणम्' इति न्यायेनान्वयः । 'अतः'=अतो हेतोः 'इदम् त्वन्मुखमेव' नान्यत् अर्थात् त्वन्मुखमेवेन्दुपराभवकारि 'इति'=एवमाकारा इयं 'निर्णयोपमा' संशयोत्तरकालिकत्वात् निर्णयस्य तद्धेतुकोपमा निर्णयोपमा । अग्निपुराणे [३४४] अध्याये निर्णयोपमाया लक्षणमित्थमुक्तम्—'उपमेयस्य संशय्य निश्चयान्निश्चयोपमा' इति । निर्णयोपमा निश्चयोपमा इत्यनर्थान्तरम् ।

अत्र पूर्वम् 'इदं त्वन्मुखं पद्मं वा' इति संशये जाते ततः उत्तरं विशेषज्ञानात् 'त्वन्मुखमेवेदम्' इति निश्चयः, निर्णयोपमेति लक्षणसङ्गतिः । एतामेवोपमां नव्याः 'निश्चयान्तसन्देहालङ्कारम्' इत्याहुः । अत एवोक्तं मम्मटेन 'न केवलमयं निश्चयगर्भः यावन्निश्चयान्तोऽपि सन्देहः' [illegible] । यथा—

इन्दुः किं क्व कलङ्कः सरसिजमेतत् किमम्बु कुत्र गतम् ।

ललितसविलासवचनैर्मुखमिति हरिणाक्षि ! निश्चितं परतः ॥

अत्र 'इन्दुः किं क्व कलङ्कः' इत्यादिभिः [illegible] । आदौ संशयः, अन्ते निश्चयश्च । 'निश्चनोमि' [illegible] ॥ २७ ॥

(ड) [illegible] प्रकरण ? (३०) [illegible] पृ० पं० १४ ।

[श्लेषोपमाया लक्ष्यलक्षणे]

[1]शिशिरांशुप्रतिस्पर्धि श्रीमत् सुरभिगन्धि च ।
अम्भोजमिव ते वक्त्रमिति 'श्लेषोपमा' स्मृता ॥ २८ ॥

श्लेषोपमा निरूपयति—'शिशिरांशुप्रतिस्पर्धि'=इति । 'ते'=तव 'वक्त्रम्'=आस्यम् 'अम्भोजम् इव'=कमलमिव 'अस्ति' इति शेषः । कीदृशम् इत्याह—'शिशिरांशु-प्रतिस्पर्धि'=शिशिरांशुः चन्द्रः प्रतिस्पर्धी प्रतियोगी विरोधी यस्य तत् इति अम्भोजपक्षेऽर्थः । शिशिरांशोः चन्द्रस्य प्रतिस्पर्धिनी निकारकारिणी या श्रीः कान्तिः सा अस्या अस्तीति तत् शिशिरांशुप्रतिस्पर्धिश्रीमत् इति वक्त्रपक्षेऽर्थः । अम्भोजपक्षे 'श्रीमत्' इति पृथक् पदम् सश्रीकमित्यर्थः । तथा 'सुरभिगन्धि'=सुरभिर्घ्राणतर्पणो गन्धो यस्य तत् इत्युभयत्रापि समानोऽर्थः । 'इति'=एवमाकारा उपमा श्लेषहेतुकत्वात् 'श्लेषोपमा' स्मृता 'सूरिभि'-रिति शेषः । श्लेषश्चात्र अर्थगतः शब्दपरिवृत्तिसहत्वात् । यत्र शब्दः परिवर्त्तनं न क्षमते तत्रासौ शब्दगतो भवति । स च समानोपमायामनुपदमेव स्फुटी भविष्यति । यद्यप्यत्र श्लेषोऽस्ति तथापि साक्षात् तज्जनिता नात्र वैचित्री किन्तु श्लेषेण केवलमुपमानोपमेयगतं साधर्म्यं द्योतितम्, द्योतितात्तस्मात्प्रधानतया उपमायाः प्रतीतिरिति तथैव व्यवहारः 'प्राधान्येन व्यपदेशा भवन्ति' इति न्यायादिति भावः । २८ ॥

[समानोपमाया लक्ष्यलक्षणे]

[2]सरूपशब्दवाच्यत्वात् सा 'समानोपमा' यथा ।
बालेवोद्यानमालेयं सालकाननशोभिनी ॥ २९ ॥

समानोपमा निरूपयति—'सरूपशब्दवाच्यत्वात्'=इति । समानरूपं यत् तत्सरूपम् अर्थात् वाच्य (अर्थ) भेदात् भिन्नमपि शब्दश्लेषकारणादभिन्नमिव प्रतीयमानं रूपं=तत्तद्वर्णात्मकं स्वरूपं यस्य तादृशो यः शब्दः तेन सरूपशब्देन वाच्यत्वात् सादृश्यस्य (साधारणधर्मस्य) प्रतिपाद्यत्वात् 'सा'=प्रसिद्धा कविसमाजे 'समानोपमा' ज्ञेया इति शेषः । उदाहरति उत्तरार्धेन यथा—इति 'इयम्'=पुरोदृश्यमाना उद्यानमाला आरामराजिः 'बाला'=[षोडशवार्षिकी] कामिनी 'इव' राजते इति शेषः । साम्यद्योतकं विशेषणमाह—'सालककाननशोभिनी' इति । कीदृशी 'सालकाननशोभिनी'=अलकं चूर्णकुन्तलम् तेन सह वर्त्तते इति सालकं सालकञ्च तदाननं तेन शोभिनी इति बालापक्षे उपमानविशेषणम्, सालाः सर्जतरवः तेषां काननेन वनेन शोभिनाति उद्यानमालापक्षे उपमेयविशेषणम् ।

अत्र भिन्नावप्युपमानोपमेययोः धर्मौ समानशब्दवाच्यत्वादभिन्नाविव सन्तौ सादृश्यं प्रयोजयतः, शब्दश्लेषमूलिका चेयं शब्दपरिवृत्त्यसहत्वात् । 'अथ बाला स्याद्वासः' ।'सालः सर्जतरौ प्राकारमात्रप्राकारयोरपि' इति रभसः । कादम्बर्यादिमहागद्यकाव्येषु श्लेषोपमाया भूयान् समावेशो द्रष्टव्यः ॥ २९ ॥

---

[1] (प्र० 'श्लेषोपमाया लक्ष्यलक्षणे दर्शयति' (उ०) पृ० ५० २ ।

[2] (प्र० 'श्लेषोपमा प्रपञ्चयति' (उ० पृ० ५० १७ ।

[निन्दोपमाया लक्ष्यलक्षणे]

पद्मं बहुरजश्चन्द्रः क्षयी ताभ्यां तवाननम् ।
समानमिति सोत्सेकमिति 'निन्दोपमा' स्मृता ॥ ३० ॥

निन्दोपमा निरूपयति—'पद्मम्' इति । 'पद्मम्'=कमल 'बहुरज '=प्रचुरपरागम् अथ च रजोगुणबहुलम् 'चन्द्र =शशी 'क्षयी'=कृष्णपक्षे स्वभावतः क्षीणकन अथ च क्षयरोगी 'ताभ्याम्'=पद्मचन्द्राभ्या 'तव आननम्'=त्वदीय मुख समानमपि गुणान्तरेण तुल्यमपि 'सोत्सेकम्'=आधिक्योत्कर्षापेतम् रजस्वलत्वाभावात् क्षयित्वाभावाच्चेत्यर्थ । 'इति =एवमाकारा 'सा' प्रसिद्धा [कविसमाजे] निन्दाहेतुकमाहस्यप्रतीते 'निन्दोपमा स्मृता' । उपमानभूतपद्मचन्द्रयो निन्दापूर्वक मुखे साम्यप्रतिपादनात् 'निन्दोपमा' इति नाम्ना कथितेत्यर्थ ।

उपमानयो पद्मचन्द्रयोरपेक्षया उपमेयस्य मुखस्याधिक्यवर्णनात् 'व्यतिरेकालङ्कारो' ऽत्रास्तीति न भ्रमितव्यम्, यतोऽत्र केवल साम्यबोधन एव कवेस्तात्पर्य व्यतिरेके तु साम्यपर्यवसितभेदे तात्पर्य भवतीति विशेष ॥ ३० ॥

[प्रशंसोपमाया लक्ष्यलक्षणे]

ब्रह्मणोऽप्युद्भव पद्मश्चन्द्रः शम्भुशिरोधृत ।
तौ तुल्यौ त्वन्मुखेनेति सा प्रशंसोपमोच्यते ॥ ३१ ॥

प्रशंसोपमा निरूपयति—'ब्रह्मण' इति । 'पद्म '=पङ्कज 'ब्रह्मण '=प्रजापतेरपि '[illegible] '=[illegible] 'चन्द्र '=शशी 'शम्भुशिरोधृत '=शम्भुना महादेवेन शिरसि [illegible] 'तौ =पद्मचन्द्रौ 'त्वन्मुखेन'=भवदाननेन 'तुल्यौ'=समौ 'वर्त्तेते' [illegible] । '[illegible]'—[illegible] सा प्रसिद्धा 'प्रशंसोपमा उच्यते =कथ्यते कविभि ।

अत्र [illegible] ब्रह्मा, तस्यापि उत्पत्तिस्थान पद्म, विष्णोर्नाभिकमला-[illegible] । शशी च शिवेन शिरसा धृतो [illegible] इति तयोर्महती प्रशंसा [illegible] 'प्रशंसोपमा' कथ्यते ।

[illegible] । तथाहि—

[illegible] ।
[illegible] ॥

[illegible] ।

[illegible] प्रसिद्धस्योपमेय-[illegible] । [illegible]-

---

(३०) [illegible] (३१) [illegible]

[illegible]

भाव सकर । अत्र 'पद्म' इति पुंस्त्वनिर्देशात् अप्रयुक्तत्व दोष' । स च पूर्वोक्तयुक्त्या गौडसम्प्रदायेन मत्त ॥ ३१ ॥

[आचिख्यासोपमाया लक्ष्यलक्षणे]

चन्द्रेण त्वन्मुखं तुल्यमित्याचिख्यासु मे मन ।
स गुणो वास्तु दोषो वेत्याचिख्यासोपमां विदुः ॥३२॥

आचिख्यासोपमां निरूपयति—'चन्द्रेण' इति 'त्वन्मुख'=तवास्यम् 'चन्द्रेण तुल्यम्'=शशिना समम् इति 'मे'=[मम] मन 'आचिख्यासु'=आख्यातुमिच्छु 'स'=आख्यानकामः 'गुणो वा दोषो वा अस्तु' 'इति' एवमाकारामुपमां 'आचिख्यासोपमा' 'विदु.'=जानन्ति कवय ।

अत्र कान्ताननविषयकस्य हृदयभावस्य प्रकटीकरणात् पूर्वतो विलक्षणश्चारुतातिशय इत्यन्यविधेयमुपमा ऽलङ्कारभूमिमासादयते ॥ ३२ ॥

[विरोधोपमाया लक्ष्यलक्षणे]

शतपत्रं शरच्चन्द्रस्त्वदाननमिति त्रयम ।
परस्परविरोधीति सा 'विरोधोपमा' मता ॥ ३३ ॥

विरोधोपमां दर्शयति—'शतपत्रम्' इति । 'शतपत्रम्'=कमल, 'शरच्चन्द्र'=शारद शशी, 'त्वदाननम्'=त्वदीयमुखम् 'इति त्रयम्=एतत्त्रितयम् 'परस्परविरोधि'=परस्परम अन्योन्य विरोधि प्रतिस्पर्धि । यदा शतपत्र विकसति चन्द्रो मलीनो भवति, चन्द्रे च चन्दिते [शोभिते] शतपत्र मुकुलीभवति, तवाननशोभाया जाताया तयोर्द्वयोरपि मालिन्य पोस्फुरीति इति तेषा परस्पर विरोध । सा [इयम्] मनोहरत्वाद्यनेकधर्मवत्त्वरूपविरोधवैचित्र्यग्रन्थननिमित्ता उपमा 'विरोधोपमा'=एतन्नामालङ्क्रिया 'मता'='सूरिभि रिति शेष । अत्र दर्शितप्रकारे विरोध समतायां पर्यवस्यतीति विरोधेनोपमा 'विरोधोपमा' इत्यन्वर्थेय सञ्ज्ञा ॥ ३३ ॥

[प्रतिषेधोपमाया लक्ष्यलक्षणे]

न जातु शक्तिरिन्दोस्ते मुखेन प्रतिगर्जितुम् ।
कलङ्किनो जडस्येति प्रतिषेधोपमैव सा ॥ ३४ ॥

प्रतिषेधोपमामाचष्टे—'न' इति । 'इन्दो'=शशिन 'ते'=तव 'मुखेन'=आननेन 'प्रतिगर्जितुम'=प्रतिस्पर्धा कर्तुम 'जातु'=कदाचिद् [अपि] 'न शक्ति' सामर्थ्य नास्ति कथम्भूतस्य इन्दो 'कलङ्किन'=मध्ये कालिमान दधत तथा 'जडस्य'=मूर्खस्य अथ च शिशिरस्य । 'इति' एवमाकारा सा प्रसिद्धा 'प्रतिषेधोपमा' = प्रतिषेधेनोपमा प्रतिषेधोपमा ज्ञेया ।

अत्र जडकलङ्किचन्द्रस्यादस्यप्रतिषेधेन मुखस्यातिशयो द्योत्यते । किञ्च भेदे तात्पर्याभावात् नाय व्यतिरेक । निन्दोपमाया प्रतिषेधो नास्ति अत्र त्वस्तीत्यनयोर्विशेषो न

विस्मर्तव्य । नव्यास्तु—'अकलङ्कं मुखं तस्या न कलङ्की विधुर्यथा' इत्यादिवत् उपमानाद् उपमेयस्याधिक्ये वर्ण्यमानात् व्यतिरेकालङ्कारोयमित्याहु ॥ ३४ ॥

[चटूपमाया लक्ष्यलक्षणे]

मृगेक्षणाङ्कं ते वक्त्रं मृगेणेवाङ्कितः शशी ।
तथापि सम एवासौ नोत्कर्षीति 'चटूपमा' ॥ ३५ ॥

चटूपमां निरूपयति—'मृगेक्षणाङ्कम्' इति । 'ते'= तव 'वक्त्रम्'=मृगेक्षणाङ्कम्'= मृगस्य हरिणस्य इक्षणाया नयनया अङ्गविशेषयो अङ्क. लक्ष्म यत्र तादृशम् 'शशी'= चन्द्रस्तु 'मृगेण'=सर्वावयवयुक्तेन हरिणेन 'एव आङ्कित'=चिह्नित मृगाङ्कत्वाच्छशिनः । 'तथापि'=आधिक्यापकरणवत्त्वेऽपि 'असौ'=शशी 'सम एव'=तवानेन तुल्य एव [त्वन्मुख-तुल्य एव] 'उत्कर्षी'=उत्कृष्ट 'न'=नास्ति 'इति' इत्याकारा 'चटूपमा' चटु प्रियवचनम् तदुपानयनवचित्र्यहेतो 'चटूपमा' उच्यते । इयञ्चोपमा 'विशेषोक्ति'नामकालङ्कारगर्भितेव भवति । अन्यथा सर्वत्रोपमायां चटुत्वविशेषो न स्यात् । उत्कर्षहेतौ सत्यपि उत्कर्षा-प्रतिपादनात् ।

तथाह वामदेव —

कार्याजननिर्विशेषोक्ति सति पुष्कलकारणे ।
हृदि स्नेहक्षयो नाभूत् स्मरदीपे ज्वलत्यपि ॥ इति ॥

अत्र तैलादिस्नेहक्षयहेतुभूते दीपे ज्वलति स्नेहक्षयेणावश्यम्भाव्यम्, प्रकृते तादृशे स्नेहक्षयस्य पुष्कलकारणे स्मरदीपज्वलने सत्यपि तस्याक्षयवर्णन विशेषोक्ति । स्नेह. तैलादि रागश्चेति श्लेष * ॥ ३५ ॥

[तत्त्वाख्यानोपमाया लक्ष्यलक्षणे]

न पद्मं मुखमेवेदं न भृङ्गौ चक्षुषी इमे ।
इति विस्पष्टसादृश्यात् तत्त्वाख्यानोपमैव सा ॥ ३६ ॥

तत्त्वाख्यानोपमां निरूपयति—'न' इ । 'इदम्' पद्म=कमलम् न [किन्तु] मुख-मेव, इमे चक्षुषी=नेत्रे न [किन्तु] भृङ्गौ=भ्रमरावेव 'इति'=एवम्प्रकारेण विस्पष्टसादृ-श्यात्'=स्पष्टात् अन्योन्यस्य विस्पष्टात विशेषेण स्पष्टीकरणादित्यर्थ सा [इयम्] तत्त्वाख्यानोपमा [...] 'तत्त्वाख्यानोपमा'=तत्त्वाख्यानेन याथातथ्यकथनेन उपमा इति

योगबलात् 'तत्त्वाख्यानोपमा' नाम उपमेव, अर्थात् भ्रमनिरासाय तत्त्वस्य कथनात् तद्धेतु-केयमुपमा। निर्णयोपमा संशयपूर्विका इयन्तु भ्रान्तिपूर्विकेति द्वयोर्विशेषः। जयदेवस्तु इमां भ्रान्तापह्नुतिं व्याजहार। तथाहि—

'भ्रान्तापह्नुति' रन्यस्य शङ्कायां भ्रान्तिवारणे।
तापं करोति सोत्कम्पं ज्वरः किं न सखि! स्मरः ॥ इति ॥

अत्र तापं करोतीति स्मरवृत्तान्ते कथिते तस्य ज्वरसाधारण्याद् ऋजुबुद्ध्या सख्या ज्वरः किमिति पृष्टे 'न सखि! स्मरः' इति तत्त्वोक्त्या भ्रान्तिवारणं कृतम् [तेनेयं भ्रान्तापह्नुतिः]। दीक्षितास्तु कल्पितभ्रान्तिपूर्वामुपमामुदाजह्रुः। तद्यथा—

जटा नेयं वेणीकृतकचकलापो न गरलं
गले कस्तूरीयं शिरसि शशिलेखा न कुसुमम्।
इयं भूतिर्नाङ्गे प्रियविरहजन्मा धवलिमा।
पुरारातिभ्रान्त्या कुसुमशर! किं मां प्रहरसि ॥ इति ॥

अत्र कल्पितभ्रान्तिर्'जटा नेयं' मित्यादिनिषेधमात्रोन्नेया पूर्वप्रश्नाभावात्। कस्याश्चन विरहिण्या उक्तिरियम् ॥ २८ ॥

[साधारणोपमाया लक्ष्यलक्षणे]

चन्द्रारविन्दयोः कान्तिमतिक्रम्य मुखं तव।
आत्मनैवाभवत्तुल्य मित्य'साधारणोपमा'॥ ३७॥

असाधारणोपमामाचष्टे 'चन्द्र०' इति। 'तव मुखं चन्द्रारविन्दयोः'=शशिपद्मयोः

---

* हे! कुसुमशर! पुरारातेः हरस्य भ्रान्त्या मां किं कुतः प्रहरसि पीडयसि। यतो नेयं जटा किन्तु वेणीकृतः अवेणी वेणी सम्पद्यते तथा कृतः कचानां कलापः, तथा गले गरलं नैतद् अपितु इयं कस्तूरी, एवं शिरसि नैषा शशिलेखा किन्तु कुसुमम्, तथा इयमङ्गे भूतिः भस्म न भवति परन्तु प्रियविरहाज्जन्म यस्य एवम्भूतो धवलिमा पाण्डिमेत्यर्थः। 'अवश्या बहुव्रीहिर्व्यधिकरणो जन्माद्युत्तरपदः' इति वामनसूत्राद् व्यधिकरणोऽपि बहुव्रीहिर्न दुष्टः।

'अपि च 'अलङ्कारमणिहारे अपह्नुतिसरे यदिदमुक्तम्—

न मुखमिदं लावण्याम्बुधिरेष न चाधरः प्रवालस्ते।
नेमे दशना मुक्ता न नयनयुगमेतदाशु मीनयुगम् ॥ इति ॥

तदपि दर्शिमते 'तत्त्वाख्यानोपमा' स्यात्, स्याद् यदि तत्त्वाख्यानम् परं भाववशं वदि भगवन्मुरारौ सौन्दर्यातिरेकयशनबुद्ध्या प्रवृत्त औपम्यमेवारोपितवानपह्नवपूर्वकम्। तस्मात्तन्मते शुद्धापह्नुतिरेवेयम्। यत उक्तं तेनैव—

आरोपफलो यः स्यात्प्रकृते धर्मनिह्नवः।
अलङ्कृति रियं शुद्धापह्नुतिर्नाम गद्यते ॥ इति शिवम् ॥

कान्तिम्'=द्युतिम् 'अतिक्रम्य'=उल्लङ्घ्य तिरस्कृत्येत्यर्थः 'आत्मना एव तुल्यम् अभवत्'=स्वेनैव समानमासीत् 'इति'=इत्थमियम् 'असाधारणोपमा'=असाधारणत्वेन सादृश्यस्य स्वमात्रगतत्वेनासाधारण्यात् उपमा असाधारणोपमा ज्ञातव्या ।

अत्रशशिपद्मयो कान्त्या अतिक्रमणकथनेन प्रकृतस्य मुखस्य स्वेनैव सादृश्यवचनात् आस्यसमासाधारण प्रतीयते इत्यसाधारणौपम्यनिमित्तेय तथा व्यपदिश्यते इत्यर्थः । औपम्यस्यासाधारण्यकथनेन सदृशान्तरव्यवच्छेदो अनुपमत्व बोधयति ।

अन्ये [नव्या] तु एनामेवाऽनन्वयालङ्कारमाहु । तथाहि चन्द्रालोके—

उपमानोपमेयत्व यदेकस्यैव वस्तुन ।
इन्दु रिन्दुरिव श्रीमानित्यादौ तदनन्वय ॥

'इन्दुरिन्दुरिव श्रीमान्' इत्युक्ते श्रीमत्त्वेन चन्द्रस्य नान्य सदृशोऽस्तीति सदृशान्तरव्यवच्छेदो लक्ष्यते । ततश्च स्वेनापि सादृश्यासम्भवादनुपमेयत्वे पर्यवसानम् । यथा वा मदीय 'काव्यवाटिकायाम्'—

असौ मा चन्द्रमुखी मनोज-राज्यस्य कोषोऽस्ति सुधाभिवर्षी ।
तस्या निपाता मम मानसे ये ते तत्कटाक्षा इव तत्कटाक्षा ॥ इति ॥

अत्र 'तत्कटाक्षा इव तत्कटाक्षा' इत्युक्ते तीक्ष्णत्वेन तत्सदृशोऽन्यो नास्तीत्यनुपमत्वे पर्यवसानम् ।

अत्र च एकस्योपमानोपमेयभावासम्भवेऽपि अनुपमेयत्वविवक्षया काल्पनिको भेदो [illegible] । यथा—'असमानमात्मना जाता' इत्यादौ ॥ ३७ ॥ †

[अभूतोपमाया लक्ष्यलक्षणे]

सर्वपद्मप्रभासारः समाहृत इव क्वचित् ।
त्वदाननं विभातीति ता'मभूतोपमां'विदुः ॥ ३८ ॥

अभूतोपमां दर्शयति—'सर्व०' इति । 'त्वदाननम्' = तवास्यम् 'क्वचित् सर्वपद्मप्रभासारः' = सकल [illegible] प्रधाना कमलानां या प्रभा शोभा तस्या सार पुञ्ज 'समाहृत इव विभाति' = एकत्र कृत इव राजते 'इति'=एवमाकारां 'ताम्' = प्रसिद्धां [इत्यां]

[illegible] ।

† [illegible]—[illegible]ऽनन्वयोपमामाह । तथाहि—

[illegible] ।
[illegible] ॥

[illegible]—

[illegible] ।
[illegible] ॥ इति ॥

[illegible] ।

'अभूतोपमाम' = अभूतत्वेनोपमा 'विदु' = जानन्ति पण्डिता इति शेष ।

अत्र वस्तुतस्तादृशप्रभासारसमाहरणमभूतमेव, तत एवेयमभूतोपमा ।

नव्याना मते अत्रेवशब्द सम्भावनार्थक असम्भविनश्च प्रभासारमयत्वस्य सम्भाव्यमानत्वात् तस्मादियमुत्प्रेक्षेव 'सम्भावनमथोत्प्रेक्षा प्रकृतस्य समेन यत्' इति मम्मटोक्ते । वस्तुत पद्मानां प्रभासारस्य समाहरणमसम्भवाति नोपमानत्व सम्भवितुमर्हति प्रसिद्धस्यैवोपमानताया अङ्गीकारात् ततश्चेवशब्दो ऽत्र सम्भावनार्थक । सम्भावनाचोत्कटकोटिक संशय । तस्मादियमुत्प्रेक्षैव युक्ता । उक्तञ्चाभियुक्तै —

यदायमुपमानांशो लोकत सिद्धिमृच्छति ।
तदोपमैव येनेवशब्द सादृश्यवाचक ॥
यदा पुनरयं लोकादसिद्ध कविकल्पित ।
तदोत्प्रेक्षैव येनेवशब्द सम्भावनापर ॥ इति ।

विवृतञ्चैतत् चित्रमीमांसायाम् 'अप्पय्यदीक्षितै —दृष्टञ्च लोके सम्भावनापरत्वमिव शब्दस्य । 'दूरे तिष्ठन् देवदत्त इव भाति' इति । यत्राप्रकृतस्य धर्मिण सम्भावन तत्रोत्प्रेक्षा, यत्र तु केवल धर्मस्य सम्भावनया द्वयो साम्यावगम तत्रोपमेत्यनयोर्विशेष इति प्राचामाशय भामतीग्रन्थे कल्पतर्वादावपि चास्मिन्विषये सूक्ष्म विवेचित ग्रन्थगौरवभयाद् बालबुद्धेरनुपयुक्तत्वाच्च नेह विस्तरितम् ॥ ३८ ॥

[असम्भावितोपमाया लक्ष्यलक्षणे]

चन्द्रबिम्बादिव विषं चन्दनादिव पावक ।
परुषा वागितो वक्त्रादित्यसम्भावितोपमा ॥ ३९ ॥

असम्भावितोपमा निरूपयति—'चन्द्रबिम्बाद्' इति 'इत'=अस्मात् 'वक्त्रात्'=आस्यात् 'परुषा'=कठोराक्षरा 'वाक्'=वाणी 'चन्द्रबिम्बात्'=विधुमण्डलात् 'विषम् इव, चन्दनात् पावक इव=अनल इव' । 'इति'=एवमाकारा असम्भावितार्थकत्वात् 'असम्भावितोपमा'='असम्भाविता' इत्याख्या उपमा ज्ञेया ।

यथा चन्द्रमण्डलाद्विषनिःसरणं चन्दनाच्चानलप्रादुर्भवनमसम्भावितं तथा एतस्माद् वक्त्रात् [सज्जनमुखात्] परुषाया वाचो निःसरणमप्यसम्भावितमित्यसम्भावितोपमाननिरूपितसादृश्यनिबन्धनेयमसम्भावितोपमाऽऽख्यायते इत्याशय । अत्र विषपरुषवचनयोरुपमाया चन्द्रचन्दनादेर्मुखस्य च बिम्बप्रतिबिम्बभावो बोध्य । यथा वा मम—

मरोरिव जलं प्राप्तं हिमाद्रौष्ण्यं यथा भवेत् ।
यथार्णव पेयमन्यथा स्याद् दुर्जनादर्भा ॥

अत्र वक्ष्यमाणा लुप्तापि ॥ ३९ ॥

[बहूपमाया लक्ष्यलक्षणे]

चन्दनोदकचन्द्रांशुचन्द्रकान्तादिशीतलः ।
स्पर्शस्तवेत्यतिशयं बोधयन्ती 'बहूपमा' ॥ ४० ॥

बहूपमां वर्णयति—'चन्दन०' इति । 'चन्दनम्'=मलयजम् उदकम्=वारि चन्द्रांशुः=शशिकिरणः । चन्द्रकान्तः=तदाख्यो मणिविशेषः चन्द्रकिरणसम्बन्धाद् यतो जलं स्रवतीति प्रसिद्धिः । आदिना हिमवालुकादीनां ग्रहणम् । चन्दनादीनां पूर्वं द्वन्द्वः चन्दनादिरिव शीतलः=शिशिरः 'तव स्पर्शः'=अर्थात् चन्दनवत् उदकवत् चन्द्रांशुवत् चन्द्रकान्तवत् आदिना तापशान्तिहिमवालुकाप्रभृतिपदार्थवच्च तव स्पर्शः शीतलोऽस्ति । 'इति'=इत्याकारम् 'अतिशयं'=शैत्यातिशयं बोधयन्ती व्यञ्जयन्ती [या उपमा सा] 'बहूपमा' इति कथ्यते ।

एकस्मिन्नेवास्य बहूपमानान्यानामुपमेये स्पर्शे शैत्यं सादृश्यधर्मं समधिकेन रूपेण प्रदर्शितो भवतीत्यत इयं बहूपमा । अत्र चन्दनादिपदानाम्—'उपमानानि सामान्यवचनैः' [पा० २ । १ । ५५] इति सूत्रेण कर्मधारयः [तत्पुरुषः] । इमामेव नवीना मालोपमामाहुः—'मालोपमा यदेकस्योपमानं बहु दृश्यते' इति दर्पणोक्तेः । उदाहरणं यथा—

वारिजेनेव सरसी शशिनेव निशीथिनी ।
यौवनेनेव वनिता नयेन श्रीर्मनोहरा ॥ इति ॥ ४० ॥

[विक्रियोपमाया लक्ष्यलक्षणे]

चन्द्रबिम्बादिवोत्कीर्णं पद्मगर्भादिवोद्धृतम् ।
तव तन्वङ्गि ! वदनमित्यसौ 'विक्रियोपमा' ॥ ४१ ॥

मानाना परस्पर सम्बन्धयोगात् 'मालोपमा' मता । यथा मालायामेकस्य कुसुमस्य परेण कुसुमेन योगो भवति तथात्रापि पूष्णोऽह्नि, अह्नो व्योम्नि, व्योम्नो वासरे योगदर्शनात् वैचित्र्यविशेषत्वादलङ्कारविशेषता । नन्वेयं बहूपमेति शङ्क्यम्, तत्र दर्शितविच्छित्तिविशेषाभावात् । नवीनानां मते तूभयत्रापि मालोपमैव । यथा वा मम—

क्षमा क्षमेव ते भूप ! धृतिर्यौधिष्ठिरी यथा ।
गुरोर्धिषणेव ते बुद्धिर्दया बौद्धी दया यथा ॥

रुद्रटोप्याह—

श्यामालतेव तन्वी चन्द्रकलेवातिनिर्मला सा मे ।
हंसीव कलालापा चैतन्यं हरति निद्रेव ॥ इति ।

अत्रोपमेया कान्ता तनुत्वाद्यनेकधर्मयुक्ता, श्यामालतादीन्येकैकधर्मयुक्तान्युपमानानि । वाक्योपमापीयम् ॥४२॥

[वाक्यार्थोपमाया लक्षणम्]

वाक्यार्थेनैव वाक्यार्थः कोपि यद्युपमीयते ।
एकानेकेवशब्दत्वात् सा 'वाक्यार्थोपमा' द्विधा ॥ ४३ ॥

वाक्यार्थोपमां लक्षयति—'वाक्यार्थेन' इति । 'वाक्यार्थेन'=पदसमूहो वाक्यम्, वाक्यस्यार्थः वाक्यार्थः शाब्दबोध इति । यदि कोपि प्राकरणिको वाक्यार्थः 'वाक्यार्थेन'= परेण वाक्यार्थेन 'उपमीयते'=समीक्रियते सा 'वाक्यार्थोपमा' भवति । 'सा च द्विधा एकानेकेवशब्दत्वात्'=अर्थात् एकेवशब्दनिबन्धना अनेकेवशब्दनिबन्धना चेति द्वौ प्रकारौ तस्या विज्ञेयौ ।

इदन्तु बोध्यम्—यत् प्रकृताप्रकृतयोर्वाक्यार्थयोः साङ्गेनोपमानभूतेनाङ्गिना सह साङ्गस्योपमेयभूतस्य [प्रस्तुतवाक्यप्रतिपाद्यस्य] अङ्गिनः साम्यं तदैव वाक्यार्थोपमा । वाक्यार्थमात्रसाम्ये वैचित्र्याभावात् वैचित्र्यस्य चालङ्कारत्वात् । अन्यथा—'यथाकाशे विधुर्भाति तथा भूमौ तवाननम्' इत्यादावपि वाक्यार्थोपमा स्यात्, सिद्धान्ते तु निष्कृष्टलक्षणासङ्गतेर्नात्र वाक्यार्थोपमा ॥ ४३ ॥

[एकेवशब्दाया वाक्यार्थोपमाया उदाहरणम्]

त्वदाननमधीराक्षमाविर्दशनदीधिति ।
भ्रमद्भृङ्गमिवालक्ष्यकेसरं भाति पङ्कजम् ॥ ४४ ॥

एकेवशब्दनिबन्धनां वाक्यार्थोपमामुदाहरति—'त्वदाननम्' इति । 'अधीराक्षम्'= अधीरे चपले अक्षिणी नयने यत्र तत् 'आविर्दशनदीधिति'=आविः आविर्भवन्ती दशनानां दन्तानां दीधितिः मयूखमाला यत्र तत् तादृशम् 'त्वदाननम्'=त्वन्मुखम् 'आलक्ष्यकेसरम्'=आ ईषत् लक्ष्याः प्रतीयमानाः केसराः किञ्जल्का यस्य तादृशम् 'भ्रमद्भृङ्गम्'= भ्रमन्तः उपरि सञ्चरन्तः भृङ्गाः भ्रमरा यत्र तादृशं 'पङ्कजम् इव'=कमलमिव 'भाति'=

शोभते । अत्र पूर्वमर्धवाक्यं परेणार्धवाक्येन एकेवशब्दघटितेन उपमानभावं भजत इति 'एकेवशब्दनिबन्धना' इयं वाक्यार्थोपमा ।

अयमाशयः—भृङ्गकेसररूपेणाङ्गेनाङ्गवता उपमानरूपेण पङ्कजेनाङ्गिना, नेत्रदशनदीधितिरूपेणाङ्गेनाङ्गवताऽङ्गिना उपमेयरूपस्याननस्य यत् साम्यं तद्वाक्यार्थगतमेवेति कृत्वेयं 'वाक्यार्थोपमा । अर्थात् प्रथममुपमानोपमेययोरेव सादृश्यमवगमयत् पार्यन्तिकविचारणया 'अक्षिणी भ्रमद्भृङ्गाविव' 'दशनदीधिति आननस्य केसरमिव' इत्यादिबोधोदयात् एकेवशब्दना वाक्येन सन्ततिमिति स्पष्टं वाक्यार्थोपमा ज्ञेया ॥ ४४ ॥

[अनेकेवशब्दाया वाक्यार्थोपमाया उदाहरणम्]

नलिन्या इव तन्वङ्ग्यास्तस्याः पद्ममिवाननम् ।
मया मधुव्रतेनेव पायं पायमरम्यत ॥ ४५ ॥

अनेकेवशब्दनिबन्धनां वाक्यार्थोपमामुदाहरति—'नलिन्या' इति । 'नलिन्या'=[illegible] 'तस्याः तन्वङ्ग्याः'=सुकुमार्याः 'पद्मम् इव'=कमलमिव 'आननम्'=मुखम् 'मधुव्रतेन इव'=भ्रमरेणेव 'मया' 'पायम् पायम्'=पुनः पुनः पीत्वा 'अरम्यत'=अक्रीड्यत। [illegible] तादृशं कमलमधुरं मुखमास्वादितमित्यर्थः । अत्रानेकेवशब्दनिबन्धना वाक्यार्थोपमा । 'पा' धातोः 'आभीक्ष्ण्ये णमुल् च' [पा० ३।४।२२] [illegible] णमुल् । 'नित्यवीप्सयोः' [८ । १ । ४] इति सूत्रेण [illegible] । '[illegible]' [७ । ३ । ३३] इति युक् । 'अरम्यत' इति भावे [illegible] ।

[प्रतिवस्तूपमाया लक्षणम्]

वस्तु किञ्चिदुपन्यस्य न्यसनात्तत्सधर्मणः ।
साम्यप्रतीतिरस्तीति 'प्रतिवस्तूपमा' यथा ॥ ४६ ॥

प्रतिवस्तूपमामुदाहरति—'नैक' इति। 'जायमानेषु'=उत्पद्यमानेषु जातेषु च 'राजसु'=भूपेषु मध्ये 'अद्य अपि'=अधुनापि 'त्वादृश '=त्वत्सदृश 'एक अपि नास्ति'=न वर्त्तते 'ननु'=निश्चितमेतत् यत् 'पारिजातस्य'=सुरतरुपुष्पस्य 'पादप '=वृक्ष. 'द्वितीय '=अन्य [तत्सदृक्ष] 'नास्ति एव'=नैव वर्त्तते ।

अत्र 'त्वत्सदृशो नास्ति' 'द्वितीयो नास्ति' इति वस्तुत साधारणधर्म एक एव, परं पुनरुक्तिभिया [कथितपदतादोषवारणाय] शब्दभेदेन उपात्त' । 'पारिजातस्य पादप' इत्यत्र 'राहो शिर ' इत्यादिवदौपचारिकी षष्ठी । 'पञ्चैते देवतरवो मन्दार पारिजातक' इत्यमर ।

* नवीनास्तु—प्रतिवस्तूपमा स्वातन्त्र्येणालङ्कारमाहु.—

वाक्ययोरेकसामान्ये प्रतिवस्तूपमा ता ।

तापेन भ्राजते सूर्य शूरश्चापेन राजते ॥

अस्यायमर्थ —यत्रोपमानोपमेययोरेक समानो धर्म पृथक् निर्दिश्यते सा प्रतिवस्तूपमा । यथात्रैव 'भ्राजते राजते' इत्येक एव धर्मः उपमानोपमेयवाक्ययो पृथक् भिन्नपदाभ्या निर्दिष्ट । कथितपदेन पुनर्निर्देशे तु कथितपद दोषमवोचाम । यथा वा—

स्थिरा शैली गुणवता खलबुद्धया न बाध्यते ।

◦ रत्नदीपस्य हि शिखा वात्ययापि न नाश्यते ॥

अत्र पूर्वार्धमुपमेयवाक्यम उत्तरार्धन्तूपमानवाक्यम, उभयत्र च नाशाभावरूप समानधर्म शब्दभेदेनोपात्त सामान्याभावमात्रबोधकस्यापि बाधतेरत्र नाशरूपविशेषपरत्वात् अयमेव च प्रवोदाहरणाद्विशेष ।

किञ्च—अर्थावृत्तिदीपक प्रस्तुतानामप्रस्तुतना वा, प्रतिवस्तूपमा तु [नियमेन] प्रस्तुताप्रस्तुतानामिति विशेष । आवृत्तिदीपक वैधर्म्येण न सम्भवति प्रतिवस्तूपमा तु वैधर्म्येणापि दृश्यते । यथा—

विद्वानेव हि जानाति विद्वज्जनपरिश्रमम ।

नहि वन्ध्या विजानाति गुर्वी प्रसववेदनाम ॥ इति ।

नन्व वाच्यम 'वैधर्म्येण उपमा' इति परस्परव्याहत वच उपमाया साधर्म्यरूपत्वात, उपन्यस्तेन वैधर्म्येण 'नहि वन्ध्या' इति वाक्यार्थेन आक्षिप्तस्य 'अपि तु प्रसविन्येव विजानाति' इति वाक्यार्थस्योपमानत्वेन विलक्षणत्वात, तत्त्वतो वैधर्म्यप्रतीतावपि साधर्म्य एव पर्यवसानाच्च । एवञ्चात्रापि पूर्वार्धमुपमेयवाक्यम उत्तरार्धन्तूपमानवाक्यम । परिश्रमज्ञानतदभावौ वाक्यार्थयो साम्य प्रयोजयत । अन्यदपि—

चकोर्य एव चतुराश्चन्द्रिकापानकर्मणि ।

विनावन्तीर्न निपुणा सुदृशो रतनर्मणि ॥ इति ।

◦ ज्योत्स्नाप्रसरण । रत्नमेवदीप रत्नदीप तस्य ।

अत्रापि चानुर्यचातुर्यभावौ वाक्यार्थयो साम्यप्रयोजकौ । इत्यत्र वस्तुप्रतिवस्तुभावापन्नसाधारणधर्मतो वाक्यार्थयोर्यत्रार्थिकमौपम्यं सा 'प्रतिवस्तूपमा' पृथगेवालङ्कारो नतूपमाविशेष इति नव्यानामाशयः । अतएव पण्डितराजा –'वस्तुप्रतिवस्तुभावापन्नसाधारणधर्मकवाक्यार्थयोरार्थमौपम्यं प्रतिवस्तूपमा इति प्रतिवस्तूपमामलक्षयन् । 'दिवि भाति यथा भानुस्तथा त्वं भासि वै भुवि' इत्यादौ वाक्यार्थोपमायामतिव्याप्तिवारणाय 'अर्थ'मिति पदम् ।

प्राचान्तु–साम्यस्य सम्भवादुपमात्वप्रसक्तौ नैवालङ्कारान्तरत्वम् किन्तूपमैव । + एतेनैव अभिप्रायेण वामनोऽपि 'प्रतिवस्तुप्रभृतिरुपमाप्रपञ्चः' [काव्या० सू० अध्या० ३ सू० १] इत्युक्तम् । अतोऽलङ्कृतिभूषणेन च तट्टीकायामुपमाप्रपञ्च उक्त ॥४७ ॥†

[तुल्ययोगोपमाया लक्षणम्]

[1]अधिकेन समीकृत्य हीनमेकक्रियाविधौ ।
यद् ब्रुवन्ति स्मृता सेयं 'तुल्ययोगोपमा' यथा ॥ ४८ ॥

तुल्ययोगोपमां लक्षयति—'अधिकेन इति । 'एकक्रिया विधौ'=एका चासौ क्रिया एकक्रिया एकजातीया क्रिया तस्या विधिर्विधानं करणमिति यावत् तस्मिन् एकजातीय-क्रियानुष्ठाने 'हीनम्'=न्यूनगुणं वस्तु 'अधिकेन'=अधिकगुणवता 'समीकृत्य'=सदृशयित्वा ['उदरं पूरयित्वा भुङ्क्ते' इत्यादिवत् प्राक्काले 'क्त्वा'प्रत्ययः समीकुर्वन्तित्यर्थः [समीकुर्वन्त] 'यत् ब्रुवन्ति=यत् निरूपयन्ति 'कवयः' इति शेषः । 'सा'=इयम् 'तुल्ययोगोपमा'=तुल्य-योगात् क्रियायामधिकहीनयोः समानसम्बन्धात् उपमा औपम्यमित्यन्वर्थबलात् 'तुल्ययोगो-पमा' नामालङ्कारः । इत्थञ्च—'समानजातीयक्रियाकरणेन प्रस्तुताप्रस्तुतयोः साम्याभिधानं तुल्ययोगोपमा' इति फलितं लक्षणम् । 'यथा' इत्युदाहरति अग्रिमेण श्लोकेन ॥४८॥

[तुल्ययोगोपमाया उदाहरणम्]

दिवो जागर्त्ति रक्षायै पुलोमारिर्भवान् भुवः ।
असुरास्तेन हन्यन्ते सावलेपास्त्वया नृपाः ॥ ४६ ॥

तुल्ययोगोपमामुदाहरति—' दिवः '=स्वर्लोकस्य ' रक्षायै '=असुरादिभयाद्रक्षणार्थं 'पुलोमारिः '=इन्द्रः 'जागर्ति'=सावधानो भूत्वा वर्त्तते । 'भवान् भुवः'=भूमेः रक्षायै जागर्ति' 'तेन'=पुलोमारिणा 'असुराः'=दैतेयाः 'हन्यन्ते'=नाश्यन्ते 'त्वया'=भवता 'साव-लेपाः'=सगर्वाः नृपाः'=राजानो हन्यन्ते इति पूर्वेणान्वयः ।

अत्र प्रस्तुतो राजा हीनः, अप्रस्तुतेनाधिकगुणेन इन्द्रेण सह जागरणहननक्रियाभ्यां समीकृत इत्येकजातीयक्रियात्मकसमीकरणेन इयं 'तुल्ययोगोपमा' ज्ञेया ।

नव्यानां मते त्वियं 'तुल्ययोगितालङ्कार' एव । यथोक्तं जयदेवेन—

वर्ण्यानामितरेषां वा धर्मैक्यं तुल्ययोगिता ।
सङ्कुचन्ति सरोजानि स्वैरिणी वदनानि च ॥

अयमर्थः—प्रस्तुतानामप्रस्तुतानां वा गुणक्रियारूपैकधर्मान्वयस्तुल्ययोगिता । अत्र प्रस्तुतचन्द्रोदयकार्यतया वर्णनीयानां सरोजानां प्रकाशभीरुस्वैरिणीवदनानाञ्च सङ्कोचरूपैक-क्रियान्वयो दर्शितः । एवमेव मौलिकतुल्ययोगोपमाया उदाहरणेऽपि प्रस्तुताप्रस्तुतयोर्नरेन्द्र-सुरेन्द्रयोरेकस्यैव जागरणक्रिययान्वयो निरूपितः । एवमेव—

नागेन्द्रहस्ताः त्वचि कर्कशत्वादेकान्तशैत्यात् कदलीविशेषाः ।
लब्ध्वाऽपि लोके परिणाहि रूपं जातास्तदूर्वोरुपमानवाह्याः ॥

इत्यादावपि वर्णनीयत्वेन प्रकृतयोस्तदूर्वोः अप्रकृतयोश्च नागेन्द्रहस्तकदलीविशेषयोर्बाह्य-त्वरूपैकधर्मान्वयत्वात् तुल्ययोगिता ज्ञेया । लक्षणे 'धर्मैक्य' मिति धर्मपदेन जातिक्रियादीनां सर्वेषां ग्रहः आलङ्कारिकाणां प्रायो वैयाकरणानुसारित्वादिति दिक् ।

[हेतूपमाया लक्ष्यलक्षणे]

कान्त्या चन्द्रमसं धाम्ना सूर्यं धैर्येण चार्णवम् ।
राजन्ननुकरोषीति सैषा 'हेतूपमा' मता ॥ ५० ॥

हेतूपमां निरूपयति—'कान्त्या' इति । हे 'राजन् !'=प्रकृतिरञ्जक ! नरपते ! 'कान्त्या'=शरीरप्रभया [देहद्युत्या] 'चन्द्रमसम्'=शशिनम् 'धाम्ना'=प्रतापेन [तेजसा] 'सूर्यम्'=भास्करम् तथा 'धैर्येण'=धृत्या [गाम्भीर्येणेत्यत्र तात्पर्यम्] 'अर्णवम् च'= समुद्रम् 'अनुकरोषि'=समीकरोषि इत्यन्वितार्थः । 'इति'=अनया रीत्या 'सा एषा'=प्राक्तन-कविसमाजप्रसिद्धा 'हेतूपमा'=हेतून्या उपमा 'हेतूपमा मता इति तन्नामोपमाभेदो ज्ञेय इत्याशयः ।

अत्र कान्त्यादिभिर्हेतुभिः सादृश्यप्रतीतिगमत्वाद् हेतूपमा ॥ ५० ॥

[उपमायां लिङ्गभेदाद्दोषप्ररूपणम्]

¶न लिङ्गवचने भिन्ने न हीनाधिकतापि वा ।

उपमादूषणायालं यत्रोद्वेगो न धीमताम् ॥ ५१ ॥

सप्रभेदा उपमा निरूपिता, सम्प्रति प्रसङ्गसङ्गत्या तद्दोषान् दिदर्शयिषुरादौ प्राचीन-रुक्तानां केषाञ्चिद्दोषाणां स्वमते अपवादमाह—'यत्र'=काव्यकरणे 'धीमताम्'=सहृदयानाम् 'उद्वेग'=प्रतीतिप्रतीघातरूपा हृदयविकलता 'न'=नैव 'जायते' इति शेषः । तत्र 'भिन्ने'=पृथग्भूते 'लिङ्गवचने'=लिङ्गम् पुंस्त्वादि, वचनम् एकत्वादि, लिङ्गञ्च वचनञ्च लिङ्ग-वचने 'उपमादूषणाय'=उपमायाः प्रतीतिविघाताय 'अलम् न'=पर्याप्ते न भवत इत्यर्थः । 'वा'=अथवा 'हीनाधिकता'=हीनञ्च अधिकञ्च हीनाधिके तयोर्भावो हीनाधिकता हीनपदता अधिकपदता चेत्यर्थः 'अपि'=एतद्द्वयमपि उपमादूषणाय नालमिति पुनः सम्बन्धनीयम् ।

इदमत्रावधेयम्—प्राचीनैरुपमादोषा उक्ताः तद्यथा—

हीनाधिकत्व वचनालिङ्गभेदो विपर्ययः ।
असादृश्यासम्भवौ च दोषाः सप्तोपमागताः ॥ इति ॥

एतेषु षड् दोषा वामनेन प्रपञ्चिताः । तत्र 'जातिप्रमाणधर्मन्यूनतोपमानस्य हीनत्वम्' जातिन्यूनत्वरूपं यथा—'चाण्डालैरिव युष्माभिः साहसं परमं कृतम्' । अत्र 'चाण्डालै-रिति साहसकारित्वं साधर्म्यम् । तच्च चाण्डालत्वजात्या न्यूनत्वे स्फुटम् । प्रमाणन्यूनत्वरूपं हीनत्वं यथा—'वह्निस्फुलिङ्ग इव भानुरयं चकास्ति' । 'वह्निस्फुलिङ्ग' इत्यत्र परिमाणन्यू-नत्वमतिस्फुटम् । उपमेयादुपमानस्य धर्मतो न्यूनत्वं यत् तत् धर्मन्यूनत्वं तद्रूपं हीनत्वं यथा—

स मुनिर्लाञ्छितो मौञ्ज्या कृष्णाजिनपटं वहन् ।
व्यराजन्नीलजीमूतभागाश्लिष्ट इवांशुमान् ॥ इति ॥

अत्र *मौञ्जीप्रतिवस्तु तटिन्नास्ति उपमान इति हीनत्वम् । 'तेनाधिकत्वं व्याख्यातम्' [४ । २ । ११] तेन हीनत्वेन अधिकत्वमपि व्याख्यातम्—जातिप्रमाणधर्माधिक्यमधि-कत्वमित्यर्थः । जात्याधिक्यरूपमधिकत्वं यथा—'विशन्तु विष्टयः शीघ्रं रुद्रा इव महौजसः'

[प्र०] ¶उपमायां लिङ्गभेदादिदोषान् प्ररूपय ? [उ०] अस्य पृ० प० ८ ।

* मौञ्ज्याः समानं वस्तु प्रतिवस्तु तटिन् सात्र नास्ति, उपमाविशेषणतया अनुपा-दानादित्यर्थः ।

इति । विष्टय कारव भृत्या वा । 'विष्टि कारो कर्मकरे' इकि वैजयन्ती । प्रमाणाधिक्य यथा—

पातालमिव नाभिस्ते स्तनौ क्षितिधरोपमौ ।
वेणीदण्ड पुनरय कालिन्दीपातसन्निभ ॥ इति ॥

धर्माधिक्यस्य यथा—

सरश्मि चञ्चल चक्र दधद्देवो व्यराजत ।
सवाडवाग्नि सावर्त्त स्रोतसामिव नायक ॥ इति ॥

'सवाडवाग्नि' रित्यस्य प्रतिवस्तुन उपमेयेऽभावाद्धर्माधिक्यमिति।

'उपमानोपमेययोर्लिङ्गव्यत्यासो लिङ्गभेद' [२ । १२] यथा—'सैन्यानि नद्य इव जग्मुरनर्गलानि' इत्यत्र 'सैन्यानि' इत्युपमेय नपुसक 'नद्य इत्युपमान स्त्रीति स्फुटो लिङ्गभेद । 'गङ्गाप्रवाह इव तस्य निरर्गला वाक्' इत्यत्रापि स्त्रीपुसयोर्भेदे । 'तेन वचनभेदोऽपि व्याख्यातः [२ । १५] तेन=लिङ्गभेदेन । यथा—

'म्यरस्तअभ्नैर्गलन्तिरैर्भिर्दशभिरक्षरै ।
समस्त वाङ्मय व्याप्त त्रैलोक्यमिव विष्णुना ॥

इत्यत्रवचनभेद 'अप्रतीतगुणसादृश्यमसादृश्यम्' (२।१६) अप्रतीतैरेवगुणैर्यत् सादृश्य तद् अप्रतीतगुणसादृश्यमसादृश्यमित्यर्थ । यथा—'ग्रथ्नामि काव्यशशिन विततार्थरश्मिम्' इत्यत्र काव्यस्य शशिना सह यत् सादृश्य तदप्रतीतैरेवगुणैरिति । 'अनुपपत्तिरसम्भव' [२।२०] उपमानस्य यदनुपपन्नत्व तदसम्भवाख्यो दोष उपमागत । यथा—

चकास्ति वदनस्यान्त स्मितच्छायाविकाशिन ।
उन्निद्रस्यारविन्दस्य मध्ये मुग्धेव चन्द्रिका ॥ इति ।

अत्र चन्द्रिकायामुन्निद्रत्वमरविन्दस्येत्यनुपपत्तिरेव उपमाया असम्भवो दोष । एते षड् दोषा वामनमते । उपमेयधर्मस्य हीनत्वमधिकत्वञ्चेतिरूपो विपर्ययस्तु सप्तमो भवन्नपि न तेन पृथग्गणित किन्तु लिङ्गभेद एवान्तर्भावित ।

एतेषु सप्तसूपमादोषेषु दण्डी स्वमत प्रकाशयति-यत् यदि सामाजिकाना कस्मिंश्चित्काव्ये उक्तदोषेष्वन्यतम सत्यपि आस्वादविघातो न जायते तदैते प्राचीनरुक्ता दोषा अदोषा एव । तदेतदग्रे उदाहरणेन स्फुटी करोति । ५१ ॥

प्रथ्यशकारास्तु—एतान दोषान पृथक् नव गणयन्ति,किन्तु 'उपमानस्य जातिप्रमाणगतन्यूनत्वम अधिकता वा तादृशी अनुचितार्थत्व दोष' धर्माश्रये तु न्यूनाधिकत्वे यथाक्रम हीनपदत्वमधिकपदत्वञ्च न व्यभिचरत इत्यादिना स्वाभिमतेषु दोषेष्वेवान्तर्भावयन्ति । मयापीनाऽपयव प्रपञ्च तत्रैवायामेव कृत ।

[लिङ्गवचनभेदस्यादोषत्ववर्णनम्]

स्त्रीव गच्छति षण्डोऽयं वक्त्येषा स्त्री पुमानिति ।
प्राणा इव प्रियोऽयं मे विद्या धनमिवार्जिता ॥ ५२ ॥

लिङ्गवचनभेदस्यादोषत्वं दर्शयति—'स्त्रीव' इति । 'अयम्'=सम्मुखवर्ती 'षण्ड'= क्लीबः 'स्त्री इव'=योषेव 'गच्छति'=याति 'एषा स्त्री पुमानिव वक्ति' । अत्रोभयत्र यथा-क्रमं गमनवचनक्रियारूपस्य साधारणधर्मस्यान्वयात् उपमानोपमेययोर्लिङ्गभेदे सत्यपि न दोषः श्रोतृणामनुद्वेगकरत्वात् । 'अयं जनः मे [मम] प्राणा इव प्रियः' । 'प्राणा' इति पदस्यात्र समूहत्वावच्छेदेन वाचकत्वात् नियतबहुवचनान्तः, तेन तत्सदृशपर्यन्तस्यमप्रसिद्ध-मिति कृत्वा 'प्राणा यथा प्रिया स्तथाऽयं प्रियः' इति वचनविपरिणामेनान्वये दोषाभावः । 'धनं' पदमपि नियतनपुंसकलिङ्गमिति लिङ्गविपरिणामेनान्वयो विधेयः अर्थात् 'धनं यथाऽ-र्जितम् तथा विद्याऽर्जिता' इत्यन्वये दोषाभावः । अनया रीत्या धीमतामत्रोद्वेगो न भवतीति उपमानोपमेययोर्लिङ्गवचनादिभेदेऽपि दोषाभावोऽवसेयः ।

अन्यत्रापि यत्रोभयत्रान्वययोग्या क्रिया वर्त्तते तत्र दोषाभावो यथा—

तद्वेषोऽसदृशोऽन्याभिः स्त्रीभिर्मधुरताभृतः ।
*दधते स्म परां शोभां तदीया विभ्रमा इव ॥ इति ।

अत्र 'धादध' धातुभ्यामेकवचने बहुवचने च निष्पन्नं 'दधते इति पदम् तस्या-स्य वचनश्लिष्टस्य क्रियापदस्य उभयत्रोपमानोपमेयवाक्येऽन्वययोग्यत्वाद्दोषाभावः । पुन्नपुं-सकयोरुपमानोपमेययोर्लिङ्गभेदस्तु प्रायेण दृष्ट इति न दोषः । उक्तञ्च वामनेन—'दृष्टं पुन्न-पुंसकयोः प्रायेण [काव्या० सू० अध्या० २ । सू० १३] अतः 'चन्द्र इव मुखम्' 'त्रैलोक्यमिव विष्णुना' इत्यादौ न दोषः । लौकिक्यामुपमायां समासाभिहितायामप्युप-मायाम् उपमाप्रपञ्चे चेष्टो लिङ्गभेदः । उदाहृतमिदं वामनेनैव—लौकिक्या यथा—'छायेव सा तस्याः' 'पुरुष इव स्त्री' इति । समासाभिहितायां यथा—'भुजलता नीलोत्पलसदृशी' इति । तत्र लोकतः प्रसिद्धा उपमा लौकिकी । समासेनाभिहिता लुप्ता । उपमाप्रपञ्चः प्रति वस्तुप्रभृतिः । उपमाप्रपञ्चे यथा—

† शुद्धान्तदुर्लभमिदं वपुराश्रमवासिनो यदि जनस्य दूरीकृता खलु गुणैरुद्यानलता वनलताभिः । इति 'शुद्धान्तदुर्लभं मित्यत्र प्रतिवस्तूपमा । एवमेव 'नेदं नभोमण्डलम म्बुराशिः इत्याद्यपह्नुत्यादावपि उपमानोपमेययोर्लिङ्गभेदे दोषाभावः । एवमन्यदपि महा-कविप्रयोगगतं द्रष्टव्यम् । ५२ ॥

---

* 'डुधाञ्' धारणपोषणयोः । इति जुहोत्यादिपठितस्य 'धा' धातोर्लटि प्रथमपु-रुषस्य बहुवचने रूपम् । तथा 'दध' धारणे इति भौवादिकस्यैकवचनान्तम् । † अत्राश्र-मवासिजनवनलतयोर्लिङ्गभेदः वचनभेदश्च न दोषकरः ।

[उपमानस्य हीनतायामधिकतायाञ्च दोषाभावकथनम्]

भवानिव महीपाल ! देवराजो विराजते ।
अलमंशुमतः कक्षामारोढुं तेजसा नृपः ॥ ५३ ॥

उपमानस्य हीनतायामधिकतायाञ्च दोषाभावमुदाहरणेन दर्शयति—'भवान्' इति । 'हे ! महीपाल !'='भवान् इव देवराज =इन्द्र 'विराजते =शोभते ।

अत्रोपमानो राजा, उपमेयो देवराजः । देवराजापेक्षया महीपतिर्न्यून मनुष्यत्वात् तथापि सकललोकपालांशभूतो राजा उपमानभूतोऽपि सहृदयहृदयेषु नात्यन्त वैरस्य-मासञ्जयतीति हीनत्वमुपमानस्य न दोष । उक्तञ्च—'अष्टानां लोकपालानां वपुर्धारयते नृप ' इति ।

उपमानस्याधिकताया दोषाभावस्थलमाह—'अलम्' इति । 'नृप ' = राजा 'अंशुमत ' = सूर्यस्य 'कक्षाम्' = [व्यञ्जनया] सादृश्यम् 'आरोढुम्' = प्राप्तुम 'अलम्' = समर्थ इति । अत्र नृप उपमेय , तस्योपमानमंशुमान् देवत्वादधिक तथापि सहृदय-प्रतीतेरविघातकत्वान्न दोष । एवमन्यत्रापि ॥ ५३ ॥

इत्येवमादौ सौभाग्यं न जहात्येव जातुचित् ।
अस्त्येव क्वचिदुद्वेगः प्रयोगे वाग्विदां यथा ॥ ५४ ॥

उक्ते उदाहरणद्वये स्वयमुद्वेगाभाव स्पष्टयति—'इति' इति । 'इति एवम् आदौ'= दर्शितकाव्ये तत्सदृशे चान्यत्रापि यत्र कुत्रचित 'जातुचित्'=कदाचिदपि लिङ्गभेदो वचन-भेदो हीनत्वमधिकत्वञ्चेति [कर्तृपदमूह्यम्] 'सौभाग्यम्'=प्रस्तुतस्य वर्णनीयस्य उपमे-यस्य उत्कर्षम् 'न जहाति'=नैव निरुणद्धि इत्यर्थ । 'क्वचित् प्रयोगे'=उपमानोपमेययो-र्लिङ्गादिभेदप्रयोगे तु 'वाग्विदाम्'=विपश्चिताम् 'उद्वेग =प्रतीतिव्याघात 'अस्ति एव'= भवत्येव । 'यथा इत्युदाहरति अग्रिमश्लोकेन । आह च भोजराज —

हीन यत्रोपमान स्यादुपमेय गुणाधिकम् ।
हीनोपम तदस्याहु कवय क्वाप्यदुष्टताम् ॥
यत्रोपमानमुत्कृष्टमुपमेय निकृष्यते ।
ज्ञेय तदधिकौपम्यमस्यापि क्वाप्यदोषता ॥ इति ॥ ५४ ॥

[दोषस्थलप्रदर्शनम्]

हंसीव धवलश्चन्द्र सरांसीवामलं नभ ।
भर्तृभक्तो भटःश्वेव खद्योतो भाति भानुवत् ॥ ५५ ॥

'हंसीव इति । 'हंसी इव'=हंसस्य योषित् वरटा इव 'चन्द्र '=धवल शुभ्रोऽस्ति । 'नभ '=गगनम् 'सरांसि इव 'अमलम्'=निर्मल वर्तते इति शेष । 'भट '=योद्धा मलिक श्वा इव कुक्कुर इव 'भर्तृभक्त '=स्वामिसेवक 'खद्योत '=ज्योतिरिङ्गण 'भानुवत् =सूर्य इव

'भाति'=शोभते । अत्र यथाक्रममुपमानानां लिङ्गभेदवचनभेदन्यूनत्वाधिकत्वानि सहृदयहृदयेषु प्रतीतिविघातं जनयन्तीति वैरस्यापादकत्वाद् दूषणानि ॥ ५५ ॥

[उपमागतदोषादोषविवेकोपसंहारः]

ईदृशं वर्ज्यते सद्भिः कारणं तत्र चिन्त्यताम् ।
गुणदोषविचाराय स्वयमेव मनीषिभिः ॥ ५६ ॥

उक्तमर्थमुपसंहरति—'ईदृशम्' इति । 'सद्भिः'=काव्यभावनाभावितमतिभिः पण्डितैः 'ईदृशम्'=हंसीवेत्यादि दर्शितं काव्यम् 'वर्ज्यते'=परित्यज्यते अर्थात् कवयः एतादृशे काव्ये आदरं न प्रदर्शयन्ति । तत्र 'मनीषिभिः'=सूरिभिः 'गुणदोषविचाराय'=गुणदोषविवेकाय 'स्वयम् एव'–'चिन्त्यताम्'=गुणग्रहणाय दोषवर्जनाय च विवेकः क्रियतामित्यर्थः ॥ ५६ ॥

[अथोपमाबोधकशब्दसंग्रहप्रदर्शनम्]

इववद्वायथाशब्दाः समाननिभसन्निभाः ।
तुल्यसंकाशनीकाशप्रकाशप्रतिरूपकाः ॥ ५७ ॥
प्रतिपक्षप्रतिद्वन्द्विप्रत्यनीकविरोधिनः ।
सदृक्सदृशसंवादिसजातीयानुवादिनः ॥ ५८ ॥
प्रतिबिम्बप्रतिच्छन्दसरूपसमसम्मिताः ।
सलक्षणसदृक्षाभसपक्षोपमितोपमाः ॥ ५९ ॥
कल्पदेशीयदेश्यादि प्रख्यप्रतिनिधी अपि ।
सवर्णतुलितौ शब्दौ ये चान्यूनार्थवादिनः ॥ ६० ॥
समासश्च बहुव्रीहिः शशाङ्कवदनादिषु ।
स्पर्द्धते जयति द्वेष्टि द्रुह्यति प्रतिगर्जति ॥ ६१ ॥
आक्रोशत्यवजानाति कदर्थयति निन्दति ।
विडम्बयति सन्धत्ते हसतीर्ष्यत्यसूयति ॥ ६२ ॥
तस्य मुष्णाति सौभाग्यं तस्य कान्तिं विलुम्पति ।
तेन सार्धं विगृह्णाति तुलां तेनाधिरोहति ॥ ६३ ॥
तत्पदव्यां पदं धत्ते तस्य कक्षां विगाहते ।
तमन्वेत्यनुबध्नाति तच्छीलं तन्निषेधति ॥ ६४ ॥
तस्य चानुकरोतीति शब्दाः सादृश्यसूचकाः ।
उपमायामिमे प्रोक्ताः कवीनां बुद्धिसौख्यदाः ॥ ६५ ॥

इत्युपमाचक्रम् ।

—•—

उपमाया लक्षणे 'प्रतीयते' इति पद दत्तम् तत्र उपमाप्रतीति अभिधया लक्षणाया व्यञ्जनया च भवतीति सम्प्रति शिष्यबुद्धिसौकर्याय तद्वाचकादीन् शब्दान् सगृह्णाति- 'इव' इत्यादिना। तत्र 'इव' इत्यादय शब्दा उपमाबोधका। एतेषु 'वत्' इति प्रत्यय। सच क्वचित् 'तत्र तस्येव' [पा० ५।१।११६] इति सूत्रेण षष्ठ्यन्ताद् इवार्थे विहित। क्वचित् 'तेन तुल्य क्रिया चेद्वति' [पा० ५।१।११५] इति सूत्रेण तृतीयान्तात् तुल्यार्थे विहित। 'वा' इति 'व' शब्दस्यापि उपलक्षणम्। निभादय केचित् समास-मध्यगा एव औपम्यप्रकाशका। कल्पबाद्या प्रत्यया 'ईषदसमाप्तौ कल्पब्देश्यदेशीयर' [५।३।६७] इति सूत्रेण विहिता ततस्तदन्ता शब्दा ग्राह्या। अन्यूनार्थ-वादिन =अहीनार्थवाचका। समासश्च बहुव्रीहि, अयञ्च कर्मधारयस्याप्युपलक्षक यथा- पुरुषव्याघ्र, शस्त्रीश्यामा इत्यादि। 'शशाङ्कवदनादिषु' इति। शशाङ्क इव वदन [शशा-ङ्कसदृश वदन] यस्या इत्यत्र बहुव्रीहौ शाकपार्थिवादित्वान्मध्यमपदलोप। इति **वाचक-शब्दा**। एवम् 'इव' इत्यारभ्य 'शशाङ्कवदनादिषु' इत्यन्ता शब्दा सादृश्यस्य [उपमाया] वाचका। 'स्पर्धते इत्यारभ्य 'असूयति' इत्यन्ता शब्दा उपमाया लक्षका। स्पर्धादि-धातूना सादृश्येऽर्थे व्याकरणसङ्केताभावात्। 'तस्य मुष्णाति सौभाग्यम्' इत्यारभ्य 'तन्नि-षेधति' इत्यन्ता शब्दा उपमाया व्यञ्जका। तस्य 'शीलम्' स्वभाव प्रकृतिमिति यावत् 'अनुबध्नाति' अनुकरोति इत्यर्थ। 'तत्' इति शीलमाह। 'निषेधति' तद्वदाचरितु वारयति। इमे सादृश्यसूचका शब्दा 'कवीनाम्'=ये काव्य कर्तु जानन्ति ये वा काव्य निर्विर्शन्ति सर्वेषा तेषा 'बुद्धिसौख्यदा'=अनायासेनोपमास्फुरतिकरत्वात् बुद्धिसुख-कारिण। 'उपमाया प्रोक्ता'=निर्दिष्टा। एवमादिषु शब्देषु उपमापरं कविभिरवश्यमादर करणीय इति भाव। इत्युपमाचक्रम्=उपमाया प्रकरण समाप्तमित्यर्थ।

इदन्तु बोध्यम्—वैयाकरणसिद्धान्ते इवाद्या शब्दा उपमाया द्योतका एव सन्ति न वाचका निपातत्वादुपसर्गवत्। उक्तञ्च भूषणे—

> द्योतका प्रादयो येन निपाताश्चादयस्तथा।
> उपास्येते हरिहरौ लकारो दृश्यते यथा॥

तथाप्यानन्दवर्धनादीनां सिद्धान्ते इवादीना वाचकत्वमेव। तद्बीजन्तु केषाञ्चिद्वैयाकर-णानां मते क्वचित् वाचकत्वमपि। तदुक्त हरिणा—

> निपाता द्योतका केचित्पृथगर्थाभिधायिन।
> आगमा इव केऽपि स्यु सम्भूयार्थस्य वाचका॥ इति॥

लघुमञ्जूषाया नागोजिभट्टेनाप्युक्तम्—क्वचित् 'क्रियागतविशेषबोधकातिरिक्तनिपातानां वाचकत्वमपि' इत्यादि। इवादियोगे साधारणधर्मसम्बन्धरूपोपमा वाच्या, सादृश्यप्रतीति-

---

उक्तञ्च वैयाकरणै —'मणीवोष्ट्रस्य लम्बेते प्रियौ वत्सतरौ मम' इत्यत्र इवार्थे 'वा' शब्दो 'व' शब्दो वा बोध्य।

स्त्वार्थी । सदृशादिप्रयोगे तु सादृश्यप्रतीति शाब्दी उपमात्वार्थी' इत्यादि च । तस्मादत्र इवादीनां वाचकत्वकीर्तन नामूलम् । एवम्—'इव' शब्द सादृश्ये शक्त । सादृश्यञ्च-'तद्भिन्नत्वे सति तद्गतभूयो धर्मवत्त्वम्' । तथाच—'चन्द्र इव मुखम्' इत्यादौ 'चन्द्रवृत्तिसादृश्यधर्मवन्मुखम्' इत्यर्थ । यत्र तु-साधारणधर्म [रमणीयत्वादि] साक्षादुपात्त [शाब्द] तत्र तद्रूपेणैव इवार्थो बोध्य । यथा—'चन्द्र इव मनोज्ञ मुखम्' इत्यादौ 'चन्द्रप्रतियोगिक भेदसमानाधिकरण यच्चन्द्रवृत्ति मनोज्ञत्व तदाश्रयो मुखम्' इति शाब्दबोध ।

आस्तामेतत् [प्रकृतमनुसराम —] [1] धर्मोपमा, वस्तूपमा, विपर्यासोपमा, अन्योन्योपमा, नियमोपमा, अनियमोपमा, समुच्चयोपमा, अतिशयोपमा, उत्प्रेक्षितोपमा, अद्भुतोपमा, मोहोपमा, सशयोपमा, निर्णयोपमा, श्लेषोपमा, समानोपमा, निन्दोपमा, प्रशसोपमा, आचिख्यासोपमा, विरोधोपमा, प्रतिषेधोपमा, चटूपमा, तत्त्वाख्यानोपमा, असाधारणोपमा, अभूतोपमा, असम्भावितोपमा, बहूपमा, विक्रियोपमा, मालोपमा, वाक्यार्थोपमा, प्रतिवस्तूपमा, तुल्ययोगोपमा, हेतूपमा, इति दण्डिना द्वात्रिंशद्भेदा [३२] उपमा कथिता ।

अर्वाचीनस्तु—सामान्यतो द्विविधा उपमोक्ता पूर्णा लुप्ता च । तत्र—* उपमानोपमेयसाधारणधर्मोपमावाचकाना चतुर्णामप्युपादाने **पूर्णा** † । एकस्य द्वयोस्त्रयाणा वा लोपे [अनुपादाने] ‡ **लुप्ता** । तत्र पूर्णा द्विविधा—श्रौती आर्थी च । उक्तञ्च विश्वनाथेन—

श्रौती यथेववाशब्दा इवार्थो वा वतिर्यदि ।
आर्थी तुल्यसमानाद्यास्तुल्यार्थो यत्र वा वति ॥ इति ।

अस्यायमाशय —'यथेववादिशब्दा यत्परा तस्यैवोपमानताप्रतीति'रिति यद्यपि उप-

---

[प्र०] [1] दण्डिमते कति भेदा उपमाया ? कानि च तेषामुदाहरणानि ? तस्या २ उपमाया लक्षण तस्मिन् २ उदाहरणे सङ्गमयतु भवान् ? ।

* तत्र साधारणधर्मवत्त्वेन प्रसिद्ध पदार्थ उपमानम् । तद्वत्तया वर्णनीय [कान्तामुखादि] पदार्थ उपमेयम् । उपमाने उपमेये च सङ्गतो धर्म [मनोज्ञत्वादि गुणक्रियादिरूप] साधारणधर्म । इवादितुल्यादिशब्दा उपमाप्रतिपादका । एतेषा चतुर्णामुपादाने **पूर्णा** । एतेषां मध्ये एकस्य द्वयोस्त्रयाणा वाऽनुपादाने **लुप्ता** इत्यर्थ । किञ्च—उपमीयते सदृशीक्रियते यत् तत् 'उपमेयम्' सादृश्याश्रय पदार्थ । यथा—'चन्द्रवत् मुखम्' इत्यादौ मुखादिकम् । उपमीयते सदृशीक्रियते येन 'तदुपमानम्' सादृश्यस्य नियतसम्बन्धी पदार्थ सादृश्यप्रतियोगीत्यर्थ । यथा—चन्द्रादि ।

† उपमानमुपमेय धर्मो वाचक मित्यद । चतुष्टयमुपात्त चेत्साहि पूर्णोपमा मता ॥

‡ वर्ण्योपमानयोर्धर्मोपमावाचकयोरपि । एकद्वित्र्यनुपादाने भवेल्लुप्तोपमाष्टधा ॥

[इति अलङ्कारमणिहारे]

मानविशेषणान्येते तथापि शब्दशक्तिमहिम्ना श्रुत्यैव [श्रवणमात्रेणैव] * षष्ठीवत् सम्बन्ध [प्रकृते साधारणधर्मरूपम्] प्रतिपादयन्ति इति तत्सद्भावे **श्रौती** उपमा । तथैव [यथेव-वादिशब्दोपादानवत्] 'तत्र तस्येव' [पा० ५ । १ । ११६] इत्यनेन इवार्थे विहिते वतेरुपादाने । तुल्यादयस्तु—'कमलेन तुल्यं मुखम्' इत्यादौ उपमेय एव, 'कमलं मुखस्य तुल्यम्' इत्यादावुपमान एव, 'कमलञ्च मुखञ्च तुल्यम्' इत्यादावुभयत्रापि विश्राम्यन्ति इति, † अर्थानुसन्धानादेव साम्यं प्रतिपादयन्ति इति तत्सद्भावे **आर्थी** । एवम्—'तेन तुल्यं क्रिया चेद्वतिः' [पा० ५ । १ । ११५] इति सूत्रेण तुल्यार्थे विहितस्य वतेरुपादाने । तत्र [पूर्णा] श्रौती आर्थी च प्रत्येकं त्रिविधा तद्धितगता, समासगता, वाक्यगता चेति । उदाहरणं यथा—[विश्वनाथस्य]

सौरभमम्भोरुहवन्मुखस्य कुम्भाविव स्तनौ पीनौ ।
हृदयं मदयति वदनं तव शरदिन्दुर्यथा बाले ! ॥

अत्र क्रमेण त्रिविधा श्रौती । तथा च—प्रथमवाक्ये सामान्यधर्मः सौरभम्, अम्भो-रुहमुपमानम्, मुखमुपमेयम्, 'वति' प्रत्ययश्चौपम्यवाचीति पूर्णोपमाया सामान्यलक्षण-सङ्गतिः । परमियमत्र पूर्णोपमा 'तत्र तस्येव' [५ । १ । ११६] इति सूत्रेण इवार्थे विहि-तस्य वतिप्रत्ययस्य सद्भावात् 'तद्धितगता श्रौती' [पूर्णा] । किञ्च—'गाम्भीर्यगरिमा तस्य सत्यं गङ्गाभुजङ्गवत्' इति । गङ्गाभुजङ्ग उपमानम्, तस्येत्युपमेयम्, गाम्भीर्यगरिमा इति साधा-रणो धर्मः । 'भुजङ्गवत्' इत्यत्र 'तत्र तस्येव' इति सूत्रेण पूर्ववत् षष्ठ्यन्तादिवार्थे वतिप्र-त्ययः, तृतीयमपि 'तद्धितगता श्रौती पूर्णा' । यथा वा मम—

सकलमनोहरणीया कान्तिर्यस्यास्ति कुमुदबान्धववत् ।
द्विजराजपक्षपाती स जयति शिवराजभूपतिर्मान्यः ॥

अत्र कुमुदबान्धव उपमानम्, यस्येत्युपमेयम्, सकलमनोहरत्वधर्मविशिष्टा कान्तिः साधारणो धर्मः 'कुमुदबान्धववत्' इत्यत्र 'तत्र तस्येव' इति सूत्रविहितो वतिप्रत्ययः उपमावा-चक इत्येव तद्धितगता श्रौती पूर्णा । पण्डितराजेनापीयमुदाहृता ।

यथा—'निखिलजगन्महनीया यस्याभा नवपयोधरवत् ।
अम्बुजवद्विपुलतरे नयने तद्ब्रह्म सश्रये सगुणम् ॥

अत्र पूर्वार्द्धे—पयोधर उपमानम्, अस्येत्युपमेयम्, उक्तविशेषणविशिष्टा आभा साधारणो धर्मः 'नवपयोधरवत्' इत्यत्रोक्तसूत्रविहितो वतिप्रत्यय उपमावाचक इतीयं तद्धि-तगता पूर्णा श्रौती ज्ञेया । एवमन्यदप्यूहनीयम् ।

---

* यथा 'राज्ञः पुरुषः' इत्यत्र राजनि [पदे] श्रूयमाणा षष्ठी तमेव विशेषयन्ती स्व-स्वामिभावादिकं सम्बन्धं पुरुषगतमपि प्रतिपादयति उभयत्रनिरूप्यसम्बन्धस्यैकत्वात्, तथेदमपि सुमदिभक्तिवत् श्रूयमाणं एकत्र विश्रान्तमपि उभयाश्रयं सम्बन्धमभिव्यनक्तीत्यर्थः ।

† तुल्यादिशब्दानां सादृश्यवति [साधारणधर्मवति] धर्मिणि शक्तत्वात् इत्यर्थः ।

द्वितीयवाक्ये 'कुम्भाविव स्तनौ' इत्यत्र 'इवेन नित्यसमासो विभक्त्यलोप पूर्वपदप्रकृतिस्वरत्वञ्च' इति वार्त्तिकेन इवशब्दप्रयोगे नित्यसमासे सति 'समासगता श्रौती पूर्णोपमा।' अन्यदपि—

हरिचरणकमलनखगणकिरणश्रेणीव निर्मला नितराम् ।

शिशिरयतु लोचनं मे देवव्रतपुत्रिणी देवी ॥ [रसगङ्गाधरे]

अत्र—श्रेणी उपमानम, देवी [गङ्गा] उपमेयम्, निर्मलत्व साधारणो धर्म', इवशब्दो वाचक परन्तु उक्तवार्त्तिकेन नित्यसमासत्वात् 'समासगता श्रौती पूर्णा'। 'हृदय' मित्यादिद्वितीयार्धस्य वाक्यरूपत्वात् 'यथा' शब्दस्य श्रौतीघटकत्वाच्च 'वाक्यगता श्रौती पूर्णा'।

यद्यपि प्रथमद्वितीययोरपि अध्याहृतक्रियाद्वारा वाक्यत्वेन तत्रापि 'श्रौती वाक्यगा पूर्णे'ति शक्यते वक्तुम् तथासति साङ्कर्यापत्तिश्च, तथापि कविसरम्भवशाद् बाध्यबाधकभावाङ्गीकारे दोषाभाव । वाक्यत्वञ्च—'सुप्तिङन्तचयो वाक्य क्रिया वा कारकान्विता' इति हरिलक्षणानुसारेण ज्ञेयम् । यथा वा—

* ग्रीष्मचण्डकरमण्डलभीष्म-ज्वालसंसरणतापितमूर्त्ते ।

प्रावृषेण्य इव वारिधरो मे वेदनां हरतु वृष्णिवरेण्य ॥ [रसगङ्गाधरे]

अत्र वारिधर उपमानम्, वृष्णिवरेण्य [श्रीकृष्ण] उपमेयम, वेदनाहरण साधारणो धर्म 'इव'शब्द उपमावाचक इति चतुर्णामुपादानात् सुप्तिङन्तचयत्वेन वाक्यत्वाच्चेयमपि 'वाक्यगता श्रौती पूर्णा'। नचात्र इवशब्दस्य समास, 'प्रावृषेण्य' इत्यस्य वारिधरविशेषणत्वेन निराकाङ्क्षतया सामर्थ्याभावात् । अतएवोक्त नागेशभट्टै गुरुमर्मप्रकाशाख्यायां व्याख्यायाम्-'एवञ्च वैकल्पिकत्वात्तदभाव इति भाव' इति ।

अन्यापि वाक्यगता पूर्णा श्रौती, यथा अलङ्कारमणिहारे—

आनन्दनिलयनामनि विमानधामनि विभासमान तत् ।

धाम चिरत्न रत्न श्यामलमिव हैमसम्पुटे जयति ॥

अत्र श्यामल रत्नमुपमानम्, चिरत्न धाम उपमेयम्, विभासमानत्व साधारणो धर्म इवशब्द उपमाया वाचक इति चतुर्णामुपादानात् उक्तरूपा पूर्णा । **अथ** त्रिविधा पूर्णा आर्यां । यथा—

मधुर सुधावदधर पल्लवतुल्योऽतिपेलव पाणि ।

चकितमृगलोचनाभ्यां सदृशी च चपले लोचने तस्या ॥

अत्र प्रथमवाक्ये 'मधुर सुधावद् अधर' इत्यत्र सुधा उपमानम्, अधर उपमेयम्, मधुरत्व साधारणो धर्म 'सुधावत्' इत्यत्र तृतीयान्तात् सुधाशब्दात् तुल्यार्थे 'तेन तुल्य

* ग्रीष्मस्य य चण्डकर सूर्य तस्य मण्डलम् बिम्बम् तस्य भीष्मा भयङ्करा ज्वाला यत्र तत्र देशे यत् संसरण गमन तेन तापिता सन्तप्ता मूर्त्ति तनुर्यस्य तस्येत्यर्थ ।

क्रिया चेद् वतिः' [५ । १ । ११५] इति सूत्रेण विहितो वतिप्रत्ययः उपमाबोधक परमसौ न साक्षात् धर्मिबोधकत्वात् 'सुधातुल्य' इत्यर्थे उपस्थिते औपम्यमर्थबललभ्य-मिति 'ताद्धितगता आर्थी पूर्णा ।

एवञ्च पूर्णाया षड् भेदाः—तद्धितगता, समासगता वाक्यगता [श्रौती पूर्णा] । ताद्धितगता समासगता, वाक्यगता [आर्थी पूर्णा] । [इति षड्]

अथ लुप्ता—साधारणधर्मादीनामेकस्य द्वयोः त्रयाणां वाऽनुपादाने भवति परन्तु सापि पूर्णावत् [भेदवती] स्यात्, किन्तु 'तत्र तस्येव' [५ । १ । ११६] इति सूत्रेण षष्ठ्यन्तात् सप्तम्यन्ताच्च वतिप्रत्ययो विधीयते, सा पुनः सप्तमी षष्ठी च विभ-क्तिर्यं कमपि सामान्यधर्मं [साधारणधर्मं] मपेक्ष्यैव सम्भवति । परन्तु—सामान्यधर्मा-नुपादाने तस्याः सप्तम्याः षष्ठ्याश्चासम्भवात् [तदन्त एव प्रसक्तस्य] वतिप्रत्ययस्याप्य-सम्भव इति कृत्वा सामान्यधर्मलोपे श्रौत्या [तद्धितगतया] अप्यसम्भव एव । एवञ्च लुप्ताया पञ्च प्रकारा आयाता भवन्ति । उदाहरणं यथा—

मुखमिन्दुर्यथा, पाणिः पल्लवेन समः प्रिये ।
वाचः सुधा इवोष्ठस्ते बिम्बतुल्यो मनोऽश्मवत् ॥

हे ! प्रिये ! तव मुखम् इन्दुर्यथा चन्द्र इव । अत्र उपमावाचकस्य 'यथा' शब्द-स्योपादानात् 'आनन्दयति' इति क्रियारूपस्य साधारणधर्मस्य अनुपादानात् 'वाक्यगता श्रौती [साधारणधर्म] लुप्तोपमा' । अस्या एवोदाहरणान्तरं यथा—[अलङ्कारम-णिहारे] ।

शरदिन्दुसदृशवदन स्फुरदिन्दिरमहिगिरीन्द्रकृतसदनम् ।
कुन्दसमोपमरदनं सन्द महसां धुनोतु भयकदनम् ॥

अत्राह्लादनादिसाधरणधर्मो नोपात्तः । यथा वा—[रसगङ्गाधरे]

कलाधरस्येव कलावशिष्टा विलूनमूला लवलीलतेव ।
अशोकमूले परिपूर्णशोका सा रामयोषा चिरमभ्युवास ॥

अत्र क्षामपरिम्लानत्वादि साधारणधर्मो नोपात्तः । यथा वा मम—

आदाय वीणां स्वशये विमुग्धा मुग्धेव कृष्णाङ्घ्रिसरोजलीना ।
प्रफुल्लकुञ्जे समये विविक्ते राधा स्थिता माधवमाननाय ॥

अत्र 'मुग्धेव' इत्युक्तावपि मुग्धाया नायिकाया नायकवशीकारानवबोधादिरूप सामान्यधर्माऽनुपात्तः ।

'पाणिः पल्लवेन समः' इत्यत्र समशब्दस्योपादानात् 'कोमल' इति गुणरूपस्य सामा-न्यधर्मस्यानुपादानात् 'वाक्यगता आर्थी [साधारणधर्म] लुप्तोपमा' । यथा वा—[रसगङ्गाधरे]

कोपेपि वदन तन्वि ! तुल्य कोकनदेन ते ।
उत्तमानां विकारेऽपि नापैति रमणीयता ॥ इति ॥

अत्राप्याह्लादकत्व नोपात्तम् 'तुल्य' शब्दोपादानाचार्थी । 'वाच सुधा इव' इत्यत्र 'इव' शब्दस्योपादानात् 'मधुरा' इति सामान्यधर्मस्य चानुपादानात् 'इव' शब्दस्य च प्रागुक्तरीत्या समासाश्रयणात् 'समासगता श्रौती धर्मलुप्तोपमा' ।

'ते=तव ओष्ठो 'बिम्बतुल्य' इत्यत्र तुल्यशब्दस्योपादानात् 'लोहितवर्ण' इति सामान्यधर्मस्य चानुपादानात् 'बिम्ब' शब्देन सह 'तुल्य' शब्दस्य समासाच्च 'आर्थी समासगता धर्मलुप्तोपमा' ।

'तथा मन अश्मवत्=पाषाणवत्' इत्यत्र तृतीयान्तात् अश्मशब्दात् तुल्यार्थे 'वति' प्रत्ययविधानात् 'काठिनम्' इति सामान्यधर्मस्य चानुपादानात् 'ताद्धितगता आर्थी धर्मलुप्तोपमा' [*] । एव सङ्कलनेन [११] एकादश भेदा ।

पुनरपि लुप्तोपमा प्रकारान्तरेण ज्ञेया । उक्तञ्च दर्पणे—

आधारकर्मविहिते द्विविधे च क्यचि क्यङि ।
कर्म कर्त्रोर्णमुलि च स्यादेव पञ्चधा पुन ॥

अस्यायमाशय —अधिकरणकारकाद् विहिते क्यचि एकविधा, कर्मकारकाद् विहिते क्यचि च एकविधा इत्येव मिलित्वा एकस्मिन्नेव क्यचि द्वे लुप्तोपमे । 'क्यङि' प्रत्यये एकविधा । तथा कर्मणि णमुलि कर्त्तरि णमुलि च प्रत्येकमेकविधा इत्येव द्विविधा । एव सामान्यधर्मलोपे पुनर्लुप्तोपमा पञ्चधा । एते प्रत्यया कलापव्याकरणे यिन्—आयि–णम मुग्धबोधेतु 'क्य-ट्य-चणम्' इति ज्ञेयम् । कर्मणोदाहरणम्—

अन्त पुरीयसि रणेषु सुतीयसि त्व
पौर जन, तव सदा रमणीयते श्री ।
दृष्ट प्रियाभिरमृतद्युतिदर्शमिन्द्र-
सञ्चारमत्र भुवि सञ्चरसि क्षितीश ! ॥

हे ! क्षितीश ! त्व रणेषु सङ्ग्रामेषु अन्त पुरीयसि अन्त पुरेषु इव आचरसि । अत्र 'उपमानादाचारे' [३ । १ । १०] इति पाणिनिसूत्रस्थेन 'अधिकरणाच्चेति वक्तव्यम्' इति वार्तिकेन अन्त पुरेषु इत्याधिकरणपदात् आचारेऽर्थे क्यच्प्रत्यय' । अत्र तु यत्वम् [स्वच्छन्दगमनादिरूप] आचारश्च क्यच्प्रत्यार्थ स एवात्र साधारणो धर्म, सचायमाचरोऽधिकरणतान्वययोग्या क्रिया [स्वच्छन्दगमनादिरूपा] । परन्तु व्युत्पत्तिवैचित्र्यवशात् तुल्यत्वस्य प्रकृत्यर्थे आचारस्य चाख्यातार्थेऽन्वय । यथा च—'अन्त -

[*] अत्र पञ्चानामेव स्थलाना वाक्यत्वेन सर्वत्रैव वाक्यगतोपमात्वप्रसक्तौ ताद्धितगताया समासगतायाश्च विशेषरूपत्वेन तदपवादतया नैव दोष, तद्भिन्नस्थल एव वाक्यगताया व्यवहार इति पूर्वोक्त न विस्मरणीयम् ।

परतुल्येषु रोगेषु सञ्चारकर्त्ता [सञ्चारानुकूलकृतिमान्] त्वम् इति वाक्यार्थबोध ।

तथा 'पौर जन त्व सुतीयसि=सुतामिवाचरसि । अत्र—'उपमानादाचारे' [३।१।१०] इति सूत्रेण 'सुतम्' इत्युपमानभूतात् कर्मपदात् आचारार्थे 'क्यच' । आचारोऽत्र मननम् पौरजन सुततुल्य [स्नेहनिर्भरास्पद] मन्यसे इत्यर्थ ।

तव 'श्री लक्ष्मी सदा रमणीयते, रमणी इव आचरति । अत्र 'कर्त्तु क्यङ् सलोपश्च' [३ । १ । ११] इति सूत्रेण उपमानभूतात् 'रमणी' इति कर्तृपदात् आचारार्थे 'क्यङ्' । [अत एवास्य ङित्त्वादात्मनेपदम्] अत्र आचार वर्त्तनम् [सुख-भोगसम्पादनम्] रमणीतुल्या [तव] श्रीर्वर्त्तेत इत्यर्थ । अत्रोपभोगसाधनत्वस्य साधारणधर्मस्य लोप ।

'प्रियाभि '=कान्ताभि 'अमृतद्युतिदर्शम्'=अमृतद्युति चन्द्र अमृतद्युतेरिव दर्शनम् इत्यमृतद्युतिदर्श [त्व] दृष्ट आलोकित । अत्र 'उपमाने कर्मणि च' (३ । ४ । ४५) इति सूत्रेण 'अमृतद्युतिम्' इति कर्मणि उपपदे सति 'दृश' धातो भावे 'णमुल्' 'तुमर्थे सेसेनसेअसेन०—[३।४।९।] इति पाणिनिसूत्रमहाभाष्ये दृष्टेन 'अव्ययकृतो भावे' इत्यनेन अव्ययकृता भाव एवानुशासनात्। अस्य च 'कृन्मेजन्त [१।१।३९]इति सूत्रेणाव्ययत्वम्'। कषादिषु यथाविध्यनुप्रयोग ' [३ । ४ । ४६] इति 'दृश धातोरेव 'दृष्ट' इत्यस्य अनुप्र-योग । मनोज्ञत्वादिश्चात्र साधारणो धर्मो नोपात्त । अत्र अमृतद्युति उपमानम्, राजा उपमेय ।

तथा—'अत्र'=अस्या भुवि 'इन्द्रसञ्चारम्'=इन्द्र इव सञ्चरणम् इति तत तथोक्तम् । 'इन्द्र इव सञ्चरसि' इत्यर्थ । अत्र 'उपमाने कर्मणि च' [३।४।४५] इति पाणिनिसूत्रेण चकाराऽनुवृष्टे उपमानवाचके 'इन्द्र' इति कर्त्तरि उपपदे सति सम्पूर्वकात 'चर' धातो-र्भावे 'णमुल्' प्रत्यय । निर्भयत्व साधारणधर्मो नोपात्त ।

अयमत्र पद्ये साधारणधर्मलोपविवेक —प्रथमे 'अन्त पुरीयसि' इत्यत्र सुखविहा-रास्पदत्वस्य, द्वितीये 'सुतीयसि' इत्यत्र स्नेहातिशयत्वस्य, तृतीये 'रमणीयते' इत्यत्र सन्तो-षप्रदायित्वस्य, चतुर्थे 'दृष्ट' इत्यादिवाक्ये आह्लादकत्वस्य, पञ्चमे 'इन्द्रसञ्चार' मित्यत्र निर्भ-यत्वादे साधारणधर्मस्य लोप । तदेव धर्मलोपे दश प्रकारा ।

'उपमानानुपादाने द्विधा वाक्यसमासयो ॥ इति ।

उदाहरण यथा—'तस्या मुखेन सदृश रम्य नास्ते नवा नयनतुल्यम्' ॥ अत्र मुखनयनप्रतिनिधिवस्त्वन्तरयो [कमलादयो] गम्यमानत्वाद उपमानलोप ।

अत्र च मुखेन सदृशम् इत्यत्र 'मुख यथेदम्' इति, 'नयनतुल्यम्' इत्यत्र ... इति पाठे ... अपि सम्भवति, तेन ... स्थाने ... प्राचाम्... ...म् ।

औपम्यवाचिनो लोपे समासे क्विपि च द्विधा। क्रमेणोदाहरणम् । † 'वदनं मृगशावाक्ष्या सुधाकरमनोहरम्' इति । अत्र 'सुधाकर इव मनोहरम्' इति वाक्ये [विग्रहरूपे] 'उपमानानि सामान्यवचनैः' [२ । १ । ५५] इति सूत्रेण कर्मधारयसमासे 'इव' इत्यस्य औपम्यवाचकस्य लोपे 'समासगता वाचकलुप्ता' । ‡ 'गर्दभति श्रुतिपरुषं व्यक्तं निनदन् महात्मनां पुरतः' । अत्र 'गर्दभति' इत्यत्र गर्दभ इवाचरति इति विग्रहे 'सर्वप्रातिपदिकेभ्यः क्विप् वा वक्तव्यः' इति वार्त्तिकेन 'गर्दभ' इत्युपमानपदात् आचारार्थे क्विप्, क्विपः सर्वापहारी लोपः । एवमत्रौपम्यवाचिनः क्विपो लोपः इति 'क्विपगता वाचकलुप्ता' । नचेह उपमेयस्यापि लोपः 'निनदन्' इत्यनेनैव निर्देशात् ।

द्विधा समासे वाक्ये च लोपे धर्मोपमानयोः ॥

'तस्या मुखेन' इत्यादौ 'रम्यम्' इति स्थाने 'लोके' इति पाठे अनयोरुदाहरणम् । अर्थात् 'रम्यम्' इति सामान्यधर्मानुपादानात् उपमानानुपादानाच्च 'वाक्यगता द्विलोपे उपमा' । 'नवा नयनतुल्यम्' इत्यस्य यथावस्थितमेव पाठे 'रम्यम्' इत्यस्य सामान्यधर्मस्यासम्बन्धनात् 'समासगता द्विलोपे उपमा' ।

क्विप्समासगता द्वेधा धर्मेवादिविलोपने ॥

धर्मः सामान्यधर्मः, इवादिः सादृश्यवाचकः, एतयोर्द्वयोर्लोपे=युगपदनुपादाने क्विप्प्रत्ययगता समासगता चेति द्वेधा ।

उदाहरणं यथा—'विधवति मुखाब्जमस्याः' । अत्र 'विधवति' इत्यत्र 'विधुरिवाचरति' इति विग्रहे 'सर्वप्रातिपदिकेभ्यः क्विप् वा वक्तव्यः' इति वार्त्तिकेन विहितस्य सादृश्यवाचकस्य क्विप्प्रत्ययस्य सर्वापहारिलोपः' सादृश्यञ्चात्र मनोहरत्वम् । 'मुखाब्जम्' इत्यत्र 'मुखम् अब्जमिव' इति विग्रहे 'उपमितं व्याघ्रादिभिः सामान्याप्रयोगे' [२ । १ । ५६] इति सूत्रेण समासे सति औपम्यवाचकस्य इवादेः तथा मनोहरत्वसौरभादेश्च सामान्यधर्मस्य लोपः । एवम्—'शशाङ्कवदना' इत्यादिबहुव्रीहिसमासेऽपि इयमेव 'धर्मवाचकलुप्तोपमा' ज्ञेया ।

'उपमेयस्य लोपे तु स्यादेका प्रत्यये क्यचि' ॥ उदाहरणं यथा—

अरातिविक्रमालोकविकस्वरविलोचनः ।

कृपाणोदग्रदोर्दण्डः स सहस्रायुधीयति ॥

अत्र 'सहस्रायुधमिवात्मानमाचरती'ति विग्रहे [वाक्ये] उपमेयस्यात्मनो लोपः अर्थात् 'उपमानादाचारे' [३ । १ । १०] इति सूत्रेण उपमानवाचकात् 'सहस्रायुधम्' इति कर्मपदात् आचारार्थे 'क्यच्' प्रत्ययः । आचारोऽत्र दुर्धर्षत्वादि ।

'धर्मोपमेयलोपेऽन्या' ॥ धर्मः=सामान्यधर्मः उपमेयश्च एतयोर्लोपे=युगपदनुपादाने

† 'कदलीसुन्दरगात्र्या मृणालसदृशौ भुजौ' इत्युत्तरार्धम् ।

‡ पुरुषाणि च पदानि विनिन्दन् परदत्तमात्रार्थी इति परार्धम् ।

अन्या=अपरा एकविधा लुप्तोपमा । यथा—

'यशसि प्रसरति भवत क्षीरोदीयन्ति सागरा सर्वे' । अत्र 'क्षीरोदमिवात्मानमाचरन्ती'ति । अत्र उपमेय आत्मा, साधारणधर्म शुक्लता च लुप्ता [नोपात्ती] ।

'त्रिलोपे च समासगा'=धर्मोपमानेवादिलोपे समासगता एका धर्मोपमानवाचकलुप्ताऽन्या उपमेत्यर्थ । यथा—* 'राजते मृगलोचना' इत्यत्र 'मृगस्य लोचने इव लोचने यस्या' इति विग्रहे 'अनेकमन्यपदार्थे' [२ । २ । २४] इति सूत्रस्थेन 'सप्तम्युपमानपूर्वपदस्य बहुव्रीहिरुत्तरपदलोपश्च' इति वार्त्तिकेन 'मृगलोचने त्युपमानभूतस्य पूर्वपदस्य 'लोचन' शब्देन सह बहुव्रीहिसमासे उपमानवाचिनि 'मृगलोचने' इति पूर्वपदे उत्तरपदभूतस्य लोचनशब्दस्य लोप सति इदमुदाहरणम्' । एवमत्र उपमानभूतस्य 'लोचने' इत्यस्य, औपम्यवाचकस्य 'इव' शब्दस्य 'चञ्चलत्व' रूपस्य च साधारणधर्मस्य लोपे (त्रिलोपे) समासगतेय लुप्तोपमा ।

'तेनोपमाया भेदा स्यु सप्तविंशतिसंख्यका' । इति ॥ पूर्णा षडविधा, लुप्ताचैकविंशतिविधा इति मिलित्वा सप्तविंशतिप्रकारोपमा । एतच्च निम्नन्यस्तचक्रेण सुखबोध्यम् । यथा—

		नामानि ।		उदाहरणानि ।
पूर्णोपमा ६	श्रौती ३	तद्धितगता	१	सौरभमम्भोरुहवन्मुखस्य ।
		समासगता	१	कुम्भाविव स्तनौ पीनौ ।
		वाक्यगता	१	हृदय मदयति वदन तव । शरदिन्दुर्यथा बाले ! ।
	आर्थी ३	तद्धितगता	१	मधुर सुधावदधर ।
		समासगता	१	पल्लवतुल्योऽतिपेलव पाणि ।
		वाक्यगता	१	चकितमृगलोचनाभ्या सदृशी चपले च लोचने तस्या ।
लुप्तोपमा २१ — सामान्यधर्मलोपे ५	श्रौती २	समासगता	१	वाच सुधा इव ।
		वाक्यगता	१	मुखमिन्दुर्यथा ।
	आर्थी ३	तद्धितगता	१	मनोऽस्मदन ।
		समासगता	१	ओष्ठस्ते बिम्बतुल्य ।
		वाक्यगता	१	पाणि पल्लवेन सम ।

मृगेन्द्रगमना श्यामा कोमला कोकिलस्वना ।
[illegible] प्रिया सेय राजते मृगलोचना ॥ इति पूर्णम् ।

	नामानि ।		उदाहरणानि ।
प्रत्यये ५ — क्यचि २	आधारात् क्यचि	१	अन्त पुरीयसि रणेषु ।
	कर्म्मणः क्यचि	१	पौर जन सुतीयसि ।
क्यङि १	कर्त्तु क्यङि	१	श्रीस्तव रमणीयते ।
णमुलि २	कर्म्मणि णमुलि	१	अमृद्युतिदर्श दृष्ट' ।
	कर्त्तरि णमुलि	१	इन्द्रसचार सञ्चरसि ।
उपमानलोपे २—	वाक्यगता	१	तस्या मुखेन सदृश रम्य नास्ते।
	समासगता	१	नवा नयनतुल्य रम्यमास्ते ।
इवादिलोपे २—	समासगता	१	सुधाकरमनोहर वदनम् ।
	क्विप्प्रत्ययगता	१	गर्द्दभति श्रुतिपरुपं व्यक्त निनदन् महात्मना पुरत ।
सामान्यधर्म्म उपमानञ्च एतयोरुभयोर्लोपे २	समासगता	१	लोके न वा नयनतुल्यमास्ते ।
	वाक्यगता	१	तस्या मुखेन सदृश रम्य लोके नास्ते।
सामान्यधर्म्म इवादिश्च एतयोरुभयोर्लोपे —२	क्विप्प्रत्ययगता	१	विधवति मुखाब्जमस्या ।
	समासगता	१	मुखाब्जमस्या ।
उपमेयलोपे क्यचि १	कर्म्मणः क्यचि	१	विकस्वरविलोचन स सहस्रायुधीयति ।
सामान्यधर्म्म उपमेयञ्च एतयोरुभयोर्लोपे—१	कर्म्मणः क्यचि	१	क्षीरोदीयन्ति सागरा ।
उपमानम्, इवादि ,सामान्यधर्म्मश्च एषा सर्वेषां लोपे	समासगता	१	राजते मृगलोचना ।

[अथ रूपकस्य सामान्यलक्षणपूर्वक निरूपणम्]

¶ उपमैव तिरोभूतभेदा रूपकमुच्यते ।
यथा बाहुलता पाणिपद्मं चरणपल्लवः ॥६६॥

सकलालङ्कारप्राणभूता उपमा निरूपिता, सम्प्रति रूपक लक्ष्यलक्षणाभ्यां निरूपयति— 'उपमा' इति । 'तिरोभूतभेदा'=तिरोभूत प्रच्छादित अप्रकटित इति यावत् भेद'= उपमानोपमेययो * वैधर्म्य यस्या सा उपमा एव 'रूपकम्'=रूपकालङ्कार 'उच्यते'= कथ्यते 'कविभि'रिति शेष । एवञ्च 'उपमानोपमेययोर्यद् गुणसाम्यादभेदारोपण अर्थात् उपमेये उपमानस्याहार्याभेदारोप तद्रूपक मिति फलित रूपकलक्षणम् । वामनोप्याह— 'उपमानोपमेयस्य गुणसाम्यात्तत्त्वारोपो रूपकम्' [काव्या० सू० ३ । ६] इति । प्रकृतम

[प्र०] ¶ रूपकस्य सामान्यलक्षण तदुदाहरणञ्च स्पष्टीकुरु । [उ० । अस्य पृ० ५० ?० ।

* 'वैधर्म्य भेद' इति पक्षावलम्बिन आलङ्कारिका ।

अकृतेन रूपवत् क्रियत इति 'रूपक' निरुक्ति ॥ उदाहरति—'यथा वाहुलता' इत्यादिना । 'वाहुलता =वाहु [भुजा] एव लता [वल्ली] इति वाहुलता । 'पाणिपद्मम्'=पाणिरेव पद्मम् पाणिपद्मम् । 'चरणपल्लव '=चरण (अङ्घ्रि) एव पल्लव इति चरणपल्लव ।

अत्र उपमेये वाहौ उपमानस्य लताया कोमलत्वादिगुणसादृश्येन [ऐच्छिक] लतात्वधर्मारोप । सच लतावाह्वोर्भेदज्ञाने सत्यपि ऐच्छिकत्वात् 'आहार्य' इति कथ्यते । एवं वाहौ लतात्वारोपेण 'वाहुर्लता इव' इत्युपमापेक्षया चमत्कारातिशय सहृदयसाक्षिक । एवमेव दिक् 'पाणिपद्मम्' 'चरणपल्लव' इत्यादावपि ज्ञेया ।

परमिद 'समस्तरूपकस्य' उदाहरणम् । उक्तञ्च **वाग्भटेन**—

रूपक यत्र साधर्म्यादर्थयोरभिदा भवेत् ।
समस्त वा ऽसमस्त वा खण्ड वाऽखण्डमेव वा ।

क्रमश उदाहरणम् । तत्र समस्त यथा—

कीर्णान्धकारालकशालमाना निवद्धताराश्थिमणि कुतोऽपि ।
निशापिशाची व्यचरद्दधाना महान्त्युलूकध्वनिफेत्कृतानि ॥

अत्र निशैव पिशाची महान्त्युलूकध्वनिफेत्कृतानि दधाना कुतोपि व्यचरत् इति सम्बन्ध । उलूकध्वनय एव फेत्कृतानि । कीर्णोविक्षिप्तोऽन्धकार एव अलका कुटिलकेशा' तै शालमाना शोभमाना । तथा निवद्धा तारा एव अस्थिमणयो यया सा तथा । एव दर्शितरीत्या 'निशा एव पिशाची' इति तयोस्तयोर्द्वयोरर्थयोरभेदात् रूपकम् । तच्च समासकरणात् समस्तम् ।

असमस्त तु पृथग् विभक्त्या ज्ञेयम् । यथा—

संसार एव कूप सलिलानि विपत्तिजन्मदु खानि ।
इह धर्म एव रज्जु स्तस्मादुद्धरति निर्मग्नान् ॥

अत्र पृथक् पृथक् विभक्तिभावाद् असमस्तो रूपकालङ्कार । खण्ड यथा—

अधर सुखेन नयनेन रुचिं सुरभित्वमाब्जमिव नासिकया ।
नववर्णिनीवदनचन्द्रमसस्तरुणा रसेन युगपन्निपपु ॥

अत्र नववर्णिनी नवोढा, तस्या वदनमेव चन्द्रमा तस्येति रूपकम् । तरुणा =युवान नववर्णिनीचन्द्रमस सुखेनाधरम् , नयनेन रुचिम्, नासिकया आब्जमिव सुरभित्वम निपपु = स्वदन्ते स्म । एवमत्र समासकरणात खण्डरूपकम । 'आब्जमिवे'त्यत्रोत्प्रेक्षा । अखण्ड यथा—

ज्योत्स्नया स्वच्छतां कुर्वन्नुर्वीं सकलपर्वणाम् ।
निशाविलासपद्मस्मुदेति स्म निशाकर ॥

अत्र अखण्ड एव चन्द्रो निशाया विलासपद्मत्वेन स्थित अतोऽखण्ड रूपकमेतत् ।

[व्यस्तरूपकस्योदाहरणम्]

¶ **अङ्गुल्यः पल्लवान्यासन् कुसुमानि नखार्चिषः ।**
बाहू लते वसन्तश्रीस्त्वं न प्रत्यक्षचारिणी ॥ ६७ ॥

व्यस्त रूपकमुदाहरति—'अङ्गुल्य' इति । [हे ! प्रिये !] 'त्व न =अस्माकम् प्रत्यक्षचारिणी =नयनगोचर 'वसन्तश्री ' मधुमासशोभा 'असि' इति शेष । *तथाहि- 'ते'=तव 'अङ्गुल्य '=करशाखा 'पल्लवानि =कोमलपत्राणि 'नखार्चिष =नखानां करजानामर्चिष किरणा 'कुसुमानि =पुष्पाणि तथा 'बाहू'=भुजे 'लते =वल्ल्यौ वर्त्तेते' इति शेषः

अत्र अङ्गुलीपल्लवादीनां समासानाश्रयणाद् व्यस्त रूपकम् । इदन्तु बोध्यम्— 'अङ्गुल्य पल्लवानि' इत्यादिरूपेण अत्र रूपकोदाहरणे लिङ्गभेदन्यसनेन रूपके लिङ्गभेदस्य दोषाभाव इति व्यक्तीकृतम् । 'शास्त्राणि चक्षुर्नवम्' इत्याद्यभियुक्तोक्ति वचनभेदेऽपि दोषाभाव व्यनक्ति । एतद्भिन्नस्थले तु 'मुख पद्मानि' इत्यादौ दोष एव ॥६७॥

[समस्तव्यस्तरूपकोदाहरणम्]

इत्येतदसमस्ताख्यं समस्तं पूर्वरूपकम् ।
स्मितं मुखेन्दोर्ज्योत्स्नेति समस्तव्यस्तरूपकम ॥ ६८ ॥

उक्तरूपके स्वोक्ति स्वय सङ्गमयन् उत्तरार्धेन 'समस्तव्यस्तरूपक' मुदाहरति—'इति' इति । 'इति'=उक्तम् 'एतत्' 'अङ्गुल्य पल्लवानि' इत्यादि 'असमस्ताख्यम्'=असमस्तसञ्ज्ञक रूपकम् । 'पूर्वरूपकम्'=पूर्वश्लोकोक्त 'बाहुलता इत्यादि तु 'समस्तम्'=समस्तरूपक 'ज्ञेयम्' इति शेष । बाहूलतादीनां समासकरणात् 'उपमानोपमेययो समासस्थले समस्त असमासस्थले तु असमस्तम्' इत्यर्थ । असमस्तमेव 'व्यस्तम्' इत्युच्यते । 'स्मितम्' इति । 'मुखेन्दो '=मुखमेवेन्दु तस्य 'स्मितम्' हास्यम् 'ज्योत्स्ना'=चन्द्रिका 'अस्ति' इति शेष एतच्च समस्तव्यस्तरूपकम् इत्यर्थ । 'मुखेन्दो' रित्यत्र समासात् 'स्मित ज्योत्स्ना' इत्यत्र समासाभावादिति भाव ॥ ६८ ॥

[सकलरूपकोदाहरणम्]

¶ **ताम्राङ्गुलिदलश्रेणि नखदीधितिकेसरम् ।**
ध्रियते मूर्ध्नि भूपालैर्भवच्चरणपङ्कजम् ॥ ६९ ॥

सकलरूपक प्ररूपयति द्वाभ्याम्—'ताम्र' इति । ताम्राङ्गुलिदलश्रेणि'=ताम्रा रक्ता अङ्गुलय करशाखा एव दलानि पल्लवा तेषा श्रेणय राजय यत्र तत् । 'नखदीधि-

(प्र०)¶ व्यस्तरूपकस्य किमुदाहरणम् ? कथञ्च तत्र रूपकसामान्यलक्षण घटते ? इति स्पष्ट व्याख्याहि ? (उ०) अस्य पृ० प० २ ।

[प्र०]¶ सकलरूपकस्योदाहरण निखित्वा तत्र तस्य लक्षण योजय ? [उ०] अस्य पृ० प० २५ ।

* 'वसन्तश्रीत्व' मेवोपपादयति ।

तिकेसरम्'=नखाना करजाना दीधितयो मयूखा एव केसरा किञ्जल्का यत्र तत् तादृशम् । 'भवच्चरणपङ्कजम्'=भवत चरणौ (तव अङ्घ्री) एव पङ्कज कमलम् तत् 'भूपालै'= राजभि 'मूर्ध्नि'=[स्व-] उत्तमाङ्गे 'ध्रियते'=उह्यते' । 'धृञ् धारणे' कर्मणि लिट् ।

अत्र चरणे पङ्कजत्वमारोपितम् यत कमल शिरसि ध्रियते' एष चरणस्य पङ्कजत्वेन रूपणे कृते तदनुगुणीभावाय ताम्राङ्गुलीषु दलत्वम्, नखदीधितिषु केसरत्वमारोपितमिति सकलाना पङ्कजावयवानामारोपणात् 'सकलरूपक' मिद रूपकम् ॥ ६६ ॥

[उक्तोदाहरणे रूपकलक्षणयोजनम्]

अङ्गुल्यादौ दलादित्वं पादे चारोप्य पद्मताम् ।
तद्योग्यस्थानविन्यासादेतत्सकलरूपकम् ॥ ७० ॥

उक्तोदाहरणे सकलरूपकस्य लक्षण स्वय घटयित्वा दर्शयति—'अङ्गुल्यादौ' इति। 'अङ्गुल्यादौ'=अङ्गुलिप्रभृतौ 'दलादित्वम्'=दलश्रेणित्वादिकम् 'पादे च'=चरणे च 'पद्मताम्'= कमलभावम् 'आरोप्य'=अध्यस्य तद्योग्यस्थानविन्यासात्'=तस्य पङ्कजस्य योग्ये स्थाने शिरसि 'विन्यासात्'=साधारणात् 'एतत् सकलरूपकम्'='सकलरूपक'सञ्ज्ञकमिद रूपकमित्यर्थ ।

एतदेव विश्वनाथप्रभृतिभि 'साङ्ग समस्तवस्तु विषय' वा रूपकमुच्यते । लक्षयन्ति च—¹ अङ्गिनो यदि साङ्गस्य रूपण साङ्गमेव तत्' इति । एवमुक्तोदाहरणे मूर्ध्नि धारण-रूप यत्साधारणो धर्म , तस्य उपमानभूते पङ्कज एवान्वयौचित्यात् 'मयूरव्यंसकादयश्च' [२ । १ । ७२] इति सूत्रेण 'चरणमेव पङ्कजम्' इति रूपकसमास , नतु 'उपमित व्याघ्रादिभि सामान्याप्रयोगे' [२ । १ । ५६] इति सूत्रेण 'चरण पङ्कजम् इव' इत्युपमितसमास , उपमेयस्य (चरणस्य) मूर्ध्नि धारणायोग्यत्वात् । इत्थञ्च—

² 'यत्र अङ्गिन तदङ्गानाञ्च रूपण शब्दोपात्त भवति तदेव 'सकलरूपक' मित्यलङ्कार-शास्त्रविदामाशय ॥

अस्योदाहरणान्तर यथा—

यात्राप्रावृषि वीररङ्गनृपतेर्निस्साणधाराधरे
वैरिक्ष्मापतिगर्वपर्वतभिदाभीम मुहुर्गर्जति ।
शत्रुस्त्रीनयनाम्बुभूरिसलिलाजाताऽधुना सर्वतो
रोहन्ते हरिदन्तरेषु जगदानन्दा यश कन्दला ॥

अत्र 'यात्राप्रावृषि' इत्यादावषयवरूपणम्, 'यश कन्दला' इत्यवयविरूपणम् ।

ननु—अत्र 'यशासि कन्दला इव' इत्युपमितसमास प्राप्नोति 'यशासि एव कन्दला' इति रूपकसमासोऽपि उभयो साधकबाधकाभावात् सन्देहसङ्कर एवाय ननु रूपकमेवेति

---

¹ अस्य पाठान्तरम्—'समस्तवस्तु विषय श्रौता आरोपिता यदा' इत्यलक्षणम् ।

² [सा० द० १० परि०] ...रूपकस्य पाठिक लक्षण वृत्ति ... २०] अलङ्का० पृ० ५० २१ ।

निश्चय इति चेन् ? उच्यते—'जगदानन्दा' इति सामान्यप्रयोगसम्भवात् तदप्रयोग एव चोपमितसमासशासनान्नोपमितसमास किंतु मयूरव्यंसकादित्वाद्रूपकसमास एव तेन रूपकमेवेद नोपमा । एवमन्यत्रापि साधकबाधकयोरुन्नयन ज्ञेयम् ॥ ७० ॥

[अवयवरूपकस्योदाहरणम्]

अकस्मादेव ते चण्डि ! स्फुरिताधरपल्लवम् ।
मुखं मुक्तारुचो धत्ते घर्माम्भ कणमञ्जरी ॥ ७१ ॥

[अवयवरूपकस्य लक्षणयोजनम्]

मञ्जरीकृत्य घर्माम्भ पल्लवीकृत्य चाधरम् ।
नान्यथाकृतमप्यास्यमतोऽवयवरूपकम् ॥ ७२ ॥

अवयवरूपक प्ररूपयति—'अकस्माद्' इत्यादि द्वाभ्याम् । हे ! 'चण्डि' !=समधिककोपने 'ते'=तव 'मुखम्'=आननम् 'अकस्मात् एव'=निर्हेतुकमेव 'स्फुरिताधरपल्लवम्'=स्फुरित कम्पनायुत अधर निम्नोष्ठ एव पल्लव पत्र यस्मिन् तत्तादृश सत् 'मुक्तारुची'=मुक्ताना मौक्तिकानां रुच इव रुच कान्तयो यासा तास्तादृशा 'घर्माम्भ कणमञ्जरी'—घर्माम्भसां स्वेदकणाना कणा बिन्दव एव मञ्जर्य शिञ्जर्य ता 'धत्ते'=धारयति ॥

अत्र काव्ये 'घर्माम्भ मञ्जरीकृत्य'=मञ्जरीत्वेनारोप्य अधरञ्च 'पल्लवीकृत्य' पल्लवत्वेनारोप्य 'आस्यम्'=मुखम् 'अन्यथा न कृतम्'=पद्मत्वेन नैवारोपितम् 'अत अवयवमात्ररूपणात् 'अवयवरूपकम्' उच्यते इति शेष । अत्र प्रस्तुते मुखे पद्मत्वारोप अर्थवशादेव उन्नेतव्यो भवति । इदमेव परं 'एकदेशविवर्तिरूपकम्' इत्युक्तम् । तथाहि—'यत्रावयवनिरूपणाद् अवयविनो रूपण गम्यते तदेकदेशविवर्ति रूपकम्' इति प्रतापरुद्रीये । उदाहरण यथा—

प्रमथिनाशावलयान्तराल शौर्याकर काकतिवीररुद्र
विकस्वरैर्वामनया त्रिलोकीं गुणप्रसूनै सुरभीकरोति ॥

अत्र अवयवाना गुणाना प्रसूनत्वरूपणेन नृपते कल्पशाखित्व निरूप्यते, परन्तु तद्गम्यम् न तु साक्षादङ्कितया शब्देन प्ररूपितम् । यथा वा—

'मथिताद्वैरिवाराशेर्भुजामन्दिरभूभृता । जाता प्रतापरुद्रस्य कीर्त्तिर्लोकान् धिनोत्यमून्' ॥

अत्र वैरिजनस्य वाराशित्वरूपणेन भुजस्य मन्दराद्रित्वरूपणेन च जाताया कीर्त्ते सुधात्वमर्थादापतति, लोकानाममरत्वञ्चेत्येकदेशविवर्ति रूपकम् । यथा वा—

माधुर्यं मधुभि पूर्णं दशनद्युतिकेशरम् ।
गोपनेत्रालिनिष्पीत पद्मालि ! वदन हरे ॥

अत्र माधुर्यादा मधुत्वारोप शाब्द , वदने पद्मत्वारोपस्त्वार्थ । यथा वा—
'समारसमरान्मुक्ता आडम्बानन्दकानने' इति । अत्र मुक्ताख्योपमेये अवयवे आरोप्यमाणत्वेनोक्तस्य [illegible] शब्दानुपात्तत्वम्, समारे पञ्जरत्वारोपश्च शाब्द इत्येकदेशविवर्त्तिलक्षणसङ्गति ॥ ७१ ७२ ॥

—[illegible]

[अवयविरूपकस्योदाहरणम्]

¶ वलिगतभ्रु गलद्घर्मजलमालोहितेक्षणम् ।
विवृणोति मदावस्थामिदं वदनपंकजम ॥ ७३ ॥

[अवयविरूपकस्य लक्षणयोजनम्]

अविकृत्य मुखाङ्गानि मुखमेवारविन्दताम् ।
आसीद्गमितमत्रेदमतोऽवयविरूपकम् ॥ ७४ ॥

अवयविरूपक प्ररूपयति—'वलितभ्रु०' इत्यादिना द्वाभ्याम ।'वलिगतभ्रु'=वलिते चलिते भ्रुवौ यत्र तत चालितभ्रूद्वन्द्वमित्यर्थ 'गलद्घर्मजलम्'=गलन्ति प्रच्यवन्ति घर्मजलानि स्वेदवारीणि यस्मात् तत्तादृशम, तथा 'आलोहितेक्षणम्'=आ समन्तात् लोहिते शोणिते रक्ते ईक्षणे दृष्टी यस्य तत ताहश सत् इद 'वदनपङ्कजम =वदनमेव [मुखमेव] पङ्कजम् कमलम 'मदावस्थाम =मदो मद्य तस्यावस्था शीधुपानजनिता विक्रिया 'विवृणोति'= प्रकटीकरोति ॥ 'वृञ' वरणे । स्वादि । विपूर्व । लटि प्रथमपुरुषैकवचने रूपम् ।

अत्र दर्शिते काव्ये 'मुखाङ्गानि'=मुखस्याङ्गानि भ्रूप्रभृतीनि 'अविकृत्य'=पङ्कजस्य अङ्गत्वेनाऽनारोप्य 'मुखम् एव 'अरविन्दताम् =पङ्कजत्वम् 'गमितम् आसीत्'=पङ्कजत्वेनारोपितमित्यर्थ 'अत ' अवयविनो मुखस्यैव केवल रूपणात् हेतो 'इदम् अवयविरूपकम्'= 'अवयविरूपक नाम रूपक भवति ॥ अत्र भ्रुव उपमान दलम, घर्मजलस्य उपमान मकरन्द लोहितेक्षणस्य उपमान परागरागभ्रमरो भ्रमरो नोपात्त इति । एतदेवाधुनिकै'र्निरङ्गम' इत्युच्यते । यदाह प्रकाशकार —'निरङ्ग तु शुद्धम' इति । उदाहरण यथा पण्डितराजानाम—

बुद्धिर्दीपकला लोके यया सर्व प्रकाशते ।
अबुद्धिस्तामसी रात्रिर्यया किंचिन्न भासते ॥

अत्र रूपकद्वयमपि सापेक्षरूपकसंघातात्मकत्वविरहात निरवयवम् । मालात्मकत्वविरहाच्च केवलम् । यथा वा मम—

दुष्टो जनो महाहालाहल लोके विलोक्यताम ।
यत्सङ्गादेव साधूना प्राणा नश्यन्ति तत्क्षणात ॥

अत्र महाहालाहलविषस्य कृष्णत्वतादिरूपावयवानामनपेक्षणात निरवयव रूपकम ।

[एकदेशादिरूपकभेदाना प्ररूपणम]

मदपाटलगण्डेन रक्तनेत्रोत्पलेन ते ।
मुखेन मुग्ध सोऽप्येष जनो रागमय कृत ॥७५॥

[प्र०]¶ अवयविरूपकोदाहरणा [illegible] तस्य [illegible] स्वनिर्मित । [उ० [illegible] प० ८०]

¹एकाङ्गरूपकं चैतदेवं द्विप्रभृतीन्यपि ।
अङ्गानि रूपयन्त्यत्र योगायोगौ भिदाकरौ ॥७६॥

अवयवरूपकस्य भेदान् दर्शयितुकाम प्रथम तस्य 'एकाङ्गरूपक' नाम भेदमाचष्टे—'मदपाटल०' इत्यादि द्वाभ्याम् । 'एष जनः'=मल्लक्षण, 'ते'=तव 'मदपाटलगण्डेन'=मदेन पाटलौ श्वेतरक्तौ गण्डौ कपोलौ यस्य तादृशेन 'रक्तनेत्रोत्पलेन'=रक्ते लोहिते नेत्रे नयने एव उत्पले यस्य तथाभूतेन 'मुखेन'=आननेन 'मुग्ध'=मोहित तथा 'रागमय'=रागो लौहित्यम् अनुरागश्च तन्मय रागपूरितः इत्यर्थ 'कृत'=सम्पादित ॥

'एतद्'=दर्शितप्रकारम् 'एकाङ्गरूपकम्' नाम रूपकम् 'रक्तनेत्रोत्पलेन' इत्यत्र केवलमेकस्यैव नेत्ररूपस्याङ्गस्य उत्पलत्वेन रूपणात् । 'एवम्'=इत्थम् 'द्विप्रभृतीनि अपि अङ्गानि रूपयन्ति' कवय इति शेषः। तेन 'द्व्यङ्गरूपकम्, त्र्यङ्गरूपकम्' इत्यादीन्यन्यान्यपि रूपकस्य नामानि [विशेषा] ज्ञेयानि । तेषु विशेषमाह—'योगायोगौ' इति । 'अत्र'=अवयवरूपके 'योगायोगौ'=आरोप्यमाणानां परस्पर सम्बन्धो योग तदभाव अयोग योगश्च अयोगश्च तौ 'भिदाकरौ'=भेदकौ विशेषकौ ज्ञेयौ, अर्थात् द्विप्रभृत्यङ्गारोपणेषु आरोप्यमाणाना परस्पर सम्बन्धासम्बन्धाभ्या कृत्वा युक्तरूपकमयुक्तरूपकमिति भेदद्वयमपि भवति । तदेवानुपद दर्शयति ॥ ७५ ॥ ७६ ॥

[युक्तरूपकस्योदाहरणकथनम्]

स्मितपुष्पोज्ज्वलं लोलनेत्रभृङ्गमिदं मुखम् ।
इति पुष्पद्विरेफाणां सङ्गत्या युक्तरूपकम् ॥७७॥

युक्तरूपकमुदाहरति—'स्मित' इति । 'स्मितपुष्पोज्ज्वलम्'=स्मितम् [हास्यम्] एव पुष्पम् [कुसुमम्] तेनोज्ज्वलम् निर्मलम् । 'लोलनेत्रभृङ्गम्'=लोले [चपले] नेत्रे [नयने] एव भृङ्गौ [भ्रमरौ] यत्र तत् तथाविधम् 'इद' [कान्तायाः] 'मुखम्' अस्ति 'इति'=उक्तप्रकारेण 'पुष्पद्विरेफाणां सङ्गत्या'=अर्थात् स्मिते पुष्पत्वस्यारोपणात्, नेत्रे भ्रमरत्वस्य च आरोपणात् 'युक्तरूपक मिदम्' । भोजराजस्तु—पुष्पभृङ्गादीनामन्योन्य योगोपपत्त्या 'युक्तरूपक' मिदमित्याशय प्रकटीचकार। किञ्च—मुखस्य अवयवयोरेव स्मितनेत्रयो यथाक्रम पुष्पभृङ्गत्वारोप कृत इत्यवयवारोपणाद् 'अवयवरूपक'मपीदम् । [न कस्य नन्दन सुभ्रु ! सुरभिश्वसितानिलम्' इति पराऽर्धम्] ॥७७॥ *

[अयुक्तरूपकस्योदाहरणम्]

इदमार्द्रस्मितज्योत्स्नं स्निग्धनेत्रोत्पलं मुखम् ।
इति ज्योत्स्नोत्पलायोगादयुक्तं नाम रूपकम् ॥७८॥

अयुक्तरूपकमुदाहरति—'इदम्' इति । 'आर्द्रस्मितज्योत्स्नम्'=आर्द्र सरस स्मितमेव

---

* क्वचित् [पुस्तकान्तरे] स्वयमपूर्वा अर्धादियोजना ।

[प्र०] ¹ एकाङ्गादिरूपकभेदे का युक्ति ? [उ०] अस्य पृ० पं० १ ।

ज्योत्स्ना चन्द्रिका यत्र तत् 'स्निग्धनेत्रोत्पलम्'=स्निग्धे सस्नेहे नेत्रे एव उत्पले यत्र तत् तथाभूतम् 'इदम्' मुखम् अस्ति ।

'इति=दर्शितप्रकारः 'ज्योत्स्नोत्पलायोगात्'=ज्योत्स्नायाः चन्द्रिकायाः उत्पलस्य च एतयोरारोप्यमाणयोः अयोगात् अर्थात् चन्द्रिकाकमलयोः एककालावच्छेदेन सम्बन्धानर्हत्वात् [उभयोरेवभिन्नकालिकत्वात्] 'अयुक्तं नाम रूपकमेतत् । ['जगन्नेत्रेन्दुरस्माकं कथं तापाय कल्पते'] इति उत्तरार्धम् । अन्वयः स्पष्टः ॥७८॥

[विषमरूपकस्य लक्षणम्]

*रूपणादङ्गिनोङ्गानां रूपणारूपणाश्रयात् ।
रूपकं विषमं नाम ललितं जायते यथा ॥७९॥

[विषमरूपकस्योदाहरणम्]

*मदरक्तकपोलेन मन्मथस्त्वन्मुखेन्दुना ।
नर्त्तितभ्रूलतेनालं मर्द्दितुं भुवनत्रयम् ॥८०॥

विषमरूपकं लक्षणोदाहरणाभ्यां दर्शयति—'रूपणात्' इति द्वाभ्याम् । 'अङ्गिनः'=अवयविनः प्रधानस्य 'रूपणात्=आरोपकरणात् 'अङ्गानाम्'=अवयवानां विशेषणानां 'रूपणारूपणाश्रयात्=रूपणञ्च अरूपणञ्चानयोः समाहारः रूपणारूपणं तस्य आश्रयणं द्वारीकरणं तस्मात् अर्थात् कस्यचिद् अङ्गस्य आरोपात् कस्यचिच्च अनारोपात् इदं 'ललितम्'=मनोहरम् 'विषमं नाम रूपकं जायते । 'यथा'—उदाह्रियते । 'मदरक्तकपोलेन'=[इति]—मदेन=यौवनगर्भेण रक्तौ=लोहितौ कपोलौ=गण्डौ यस्य तेन तथा 'नर्त्तितभ्रूलतेन'=नर्त्तिते चापल्यं नीते भ्रुवौ एव लते व्रतत्यौ यस्मिन् तत् तथाविधेन 'त्वन्मुखेन्दुना'=त्वन्मुखमेव इन्दुश्चन्द्रः तेन करणभूतेन 'मन्मथः'=मदनः 'भुवनत्रयम्'=त्रीनपि लोकान् 'मर्द्दितुम्'=उन्मथयितुम् 'अलम्'=समर्थो भवति ।

अत्र 'त्वन्मुखेन' इत्यत्र अङ्गिनि मुखे इन्दुत्वारोपः तदङ्गीभूतयोः भ्रूकपोलयोर्मध्ये भ्रुवोर्लतात्वारोपः कृतः, कपोलयोस्तु न किमप्यारोपितम् इति वैषम्यात् 'विषमं' नाम रूपकम् ॥ एवमन्यत्रापि ॥७९॥८०॥

[सविशेषणरूपकस्योदाहरणम्]

हरिपादः शिरोलग्नजह्नुकन्याजलांशुकः ।
जयत्यसुरनिःशङ्कसुरानन्दोत्सवध्वजः ॥ ८१ ॥

[उक्तरूपकस्य लक्षणयोजनाप्रकारः]

विशेषणसमग्रस्य रूपं केतोर्यदीदृशम् ।
पादे तदर्पणादेतत् सविशेषणरूपकम् ॥८२॥

[प्र०]* विषमरूपकस्य [च] लक्षणम्, विषमोदाहरणम् । तत्र लक्षणम् 'मलप्रा-रम्भ कारण' [उ] आप पु० ८० ८ ।

सविशेषणरूपकं निरूपयति—'हरिपाद' इति द्वाभ्याम् । 'शिरोलग्नजन्हुकन्याजलांशुकः'=शिरसि अग्रभागे लग्नं सङ्गतं यत् जन्हुकन्यायाः गङ्गाया जलमेव अंशुकं शुभ्रं वस्त्राञ्चलं यस्य स तथाविधः 'असुरनिःशङ्कसुरानन्दोत्सवध्वजः'=असुरेभ्यो दैतेयेभ्यो निःशङ्का असुरराजबलिमर्दनात् निर्भया ये सुराः देवाः तेषां य आनन्दोत्सवः हर्षजनको महः तस्य ध्वजः केतुः एवंविशेषणविशिष्टः 'हरिपादः'=हरेर्वामनावतारस्य विष्णोः पादः अङ्घ्रिः [कर्तृपदम्] 'जयति'=सर्वोत्कर्षेण वर्तते अतोऽसौ कन्यारोणभिर्नम्य इति भावः । उक्तोदाहरणे सविशेषणरूपकस्य' सङ्गतिं स्पष्टीकरोति—'विशेषण०' इति ।

अत्र 'विशेषणसमग्रस्य'=विशेषणोपेतस्य 'केतोः'=ध्वजस्य 'यत् ईदृशम्'=वर्णितं 'रूपम्' अस्ति इति शेषः । 'पादे'=अङ्घ्रौ तदर्पणात् तस्यारोपात् 'सविशेषणरूपकम्' इति नाम्ना रूपकं ज्ञेयम् । अर्थात् उक्तविशेषणविशिष्टो यो हरिपादः यश्च हरिहतासुरेभ्यो शङ्कारहितानां देवानामानन्दोत्सवे ध्वजः तयोः सविशेषणयोः एवं गम्यमानसादृश्ययोः परस्परमुपमानोपमेयभावः ।

¶ एवञ्च—'विशेषणविशिष्टयोरप्रकृतयोः प्रकृतेऽभेदारोपः सविशेषणरूपक' मिति निष्कर्षः ॥ ८१ ॥ ८२ ॥

[विरुद्धरूपकस्योदाहरणम्]

¶ न मीलयति पद्मानि न नभोऽप्यवगाहते ।
त्वन्मुखेन्दुर्ममासूनां हरणायैव कल्पते ॥ ८३ ॥

[उक्तोदाहरणे विरुद्धरूपकलक्षणयोजनम्]

अक्रिया चन्द्रकार्याणामन्यकार्यस्य च क्रिया ।
अत्र सन्दर्श्यते यस्माद्विरुद्धं नाम रूपकम् ॥ ८४ ॥

विरुद्धरूपकं प्ररूपयति—'न' इति द्वाभ्याम् । मानवतीं नायिकां प्रति कस्यचिन्नायकस्योक्तिरियम् । [हे ! प्रिये !] 'त्वन्मुखेन्दुः'=तव मुखमेव इन्दुः 'पद्मानि'=कमलानि 'न मीलयति'=न मुकुलयति प्रकाशरहितत्वादिति भावः । 'नभः'=गगनञ्च 'न अवगाहते'=न विलोडयति अर्थात् आकाशेऽपि न सञ्चरति ऊर्ध्वताभावात् । [केवलम्] 'मम असूनाम्'=मदीयप्राणानाम् 'हरणाय एव'=निश्चयेन हननाय 'कल्पते'=समर्थो भवति । विप्रलम्भस्योद्दीपकत्वादिति भावः ।

'अत्र'=उक्ते काव्ये [पद्ये] 'चन्द्रकार्याणाम्'=आरोप्यमाणस्य चन्द्रस्य शशिनः कर्मणां पद्ममुकुलीकरणादीनाम् आकाशे सञ्चरणादीनाञ्च या 'अक्रिया'=अकरणम्

¶ [प्र०] सविशेषणरूपकस्य लक्ष्यलक्षणे प्ररूपय ? तस्य निष्कृष्टं लक्षणञ्च लिख ? [उ०] अन्य पृ० प० १९ ।

¶ [प्र०] विरुद्धरूपकस्य लक्षणोदाहरणविवरणं विधीयताम् ? [उ०] अन्य पृ० प० १९ ।

'अन्यकार्यस्य=आरोप्यमाणचन्द्रभिन्नस्य कृतान्तस्य यत् 'कार्यम्'=प्रहरणाख्यम् तस्य 'क्रिया'=करणम् 'यस्माद्'=हेतो 'सन्दर्श्यते'=उपनिबध्यते तस्मात् 'विरुद्धम्—नाम रूपकम्' ज्ञातव्यमिति शेष । अय भाव —उपमेयभूतस्य मुखस्य उपमानाभेदेन उपमानगतकार्यकारित्वमेव युक्त नत्वन्यत् तदत्रान्यकार्यकरणोपनिबन्धनात अनौचित्यस्य विरोधस्यैवावभास, तस्मात् 'विरुद्ध' मिदमुच्यते। एवञ्च—[1] 'आरोपविषये [उपमेये] आरोप्यमाणविरुद्धकार्यत्वरूपण विरुद्धरूपक' मिति फलित लक्षणम् ॥ ८३ ॥ ८४ ॥

[लक्ष्यलक्षणयोजनै'हेतुरूपक' निरूपणम्]

[1]गाम्भीर्येण समुद्रोऽसि गौरवेणासि पर्वत ।
कामदत्वाच्च लोकानामसि त्वं कल्पपादय ॥ ८५ ॥
गाम्भीर्यप्रमुखैरत्र हेतुभि सागरो गिरि ।
कल्पद्रुमश्च क्रियते तदिदं हेतुरूपकम ॥ ८६ ॥

'हेतुरूपक' प्ररूपयति—'गाम्भीर्येण' इति द्वाभ्याम् । [हे ! राजन्] त्व 'गाम्भीर्येण'=गम्भारस्य भाव गाम्भीर्यम् तेन अक्षोभ्यत्वेन दुरवगाहत्वेनेत्यर्थ । 'समुद्रो असि=सागरोऽसि 'गौरवेण'= गुरोर्भाव गौरव सारवत्त्व तेन 'पर्वत' असि'=महीधरोऽसि 'लोकानाम्'=अर्थिजनानाम 'कामदत्त्वात'=वाञ्छाप्रपूरकत्वात 'कल्पपादप '=देवतरुरसि । अत्र सर्वत्र 'हेतौ' [२ । ३ । २३] इति सूत्रेण हेतौ तृतीया ।

'गाम्भीर्यप्रमुखै' रिति । 'अत्र'=उक्ते पद्ये [काव्ये] 'गाम्भीर्यप्रमुखै हेतुभि ' प्रस्तुते उपमेये राजनि 'सागर गिरि कल्पद्रुमश्च क्रियते'=नाम आरोप्यते तत तस्माद् इद 'हेतुरूपकम्' इत्युच्यते । 'आरोपविषये आरोप्यमाणगतहेतुभावारोपण हेतुरूपक' मिति लक्षणाकार इत्यर्थ ।

'विश्वनाथ'प्रभृतयस्तु—एतादृशस्थले उल्लेखालङ्कारमाहु । तल्लक्षणन्तु—

क्वचिद्भेदाद् ग्रहीतृणा विषयाणा तथा क्वचित ।
एकस्यानेकधोल्लेखो य स उल्लेख उच्यते ॥

उदाहरण यथा—[तत्रैव]

प्रिय इति गोपवधूभि शिशुरिति वृद्धैरधीश इति देवै ।
नारायण इति भक्तैर्ब्रह्मेत्यग्राहि योगिभिर्देव ॥

अत्रैकस्यापि भगवत तत्तद्गुणयोगादनेकधोल्लेखे गोपवधूप्रभृतीना रुच्यादयो यथायोग प्रयोजका ।

'गाम्भीर्येण समुद्रोऽसि गौरवेणासि पर्वत ' इत्यादौ चानेकधोल्लेखे गाम्भीर्यादिविषयभेद प्रयोजक । अर्थात् एकस्यैव पुनो हेतुभेदेन समुद्राद्यनेकरूपेणोल्लेख । उल्लेखन लिप्सावरण रूपणमिति यावत ।

---

[1] प्र०]—हेतुरूपकस्य लक्षणादिक रसगुर ० [उ०] स्याद पृ० ...

'चन्द्रालोके' तु—

बहुभिर्बहुधोल्लेखादेकस्योल्लेख इष्यते ।
स्त्रीभिः कामोऽर्थिभिः स्वर्द्रुः कालः शत्रुभिरर्थ्वि सः ॥

यथाऽत्र एक एव राजा कामत्वादिरूपेणोल्लिखितः एवमेव मूलदर्शित हेतुरूपकोदाहरणेऽपि एक एव राजा समुद्रत्वादिरूपेणोल्लिखितः । 'ऐक्षि' इति दर्शनार्थकात् 'ईक्ष' धातोः कर्मणि तङ् । ᳵएवमन्यत्राप्यूह्यम् । अपिच-

यमः प्रतिमहीभृतां हुतवहोसि तन्नीभृतां
सतां खलु युधिष्ठिरो धनपतिर्धनाकाङ्क्षिणाम् ।
गृहं शरणमिच्छतां कुलिशकोटिभिर्निर्मितं
-त्वमेक इह भूतले बहुविधो विधात्रा कृतः ॥ [पण्डितराजः]

इत्येवमादिस्थले उल्लेखो दण्डिमते 'हेतुरूपक'मेव ॥ ८५, ८६ ॥

[श्लिष्टरूपकप्ररूपणम्]

१ राजहंसोपभोगार्हं भ्रमरप्रार्थ्यसौरभम् ।
सखि ! वक्त्राम्बुजमिदं तवेति श्लिष्टरूपकम् ॥

'श्लिष्टरूपक'माचष्टे—'राजहंसो०' इति । हे ! सखि !'=आलि ! 'तव इदम्'=दृश्यमानम् 'वक्त्राम्बुजम्'=वक्त्रमेव अम्बुजम् मुखकमलम् 'राजहंसोपभोगार्हम्'=राजहंसः पक्षिविशेषः राजश्रेष्ठश्च तस्य उपभोगार्हं भोगयोग्यम् 'भ्रमरप्रार्थ्यसौरभम्'=भ्रमरः कामुकः भृङ्गश्च तस्य प्रार्थ्यं कामनीयं सौरभं सौगन्ध्यं यस्य तत् तथाविधम् 'अस्ति' इति शेषः । 'इति' उक्तरूपं 'श्लिष्टरूपकम्'=श्लिष्टशब्दनिबन्धनश्लेषालङ्कारानुप्राणितत्वात् उक्तनामकं रूपकं भवतीत्यर्थः । अयमाशयः —अत्र राजहंसोपभोग्यत्वादिरूपः साधारणधर्मः सच श्लेषोत्थापित इति श्लेषमूलकत्वात् 'श्लिष्टरूपक' मेतत् ।

'राजहंसस्तु कादम्बे कलहंसे नृपोत्तमे' इति हैममेदिन्यौ । 'भ्रमरः कामुके भृङ्गे' इति मेदिनी ।

श्लिष्टरूपकस्योदाहरणान्तरं यथा—

कमलामोदरोलम्बो महत्पङ्कक्षयांशुमान् ।
योगिचित्तमहंसोऽयं भवताद्भवतापभित् ॥

अत्र कमलायाः [श्रियः] मोदः हर्षः [विकासः] एव कमलानाम् आमोदः, महतां सतां पङ्कः किल्बिषमेव पङ्कः कर्दमः तस्य क्षये नाशे अंशुमान् रविः, योगिनां चित्त-

---

ᳵअत्र च सम्भवितेऽपि शास्त्रार्थाः ग्रन्थगौरवभयात् बालबुद्धिव्याकुलताभयाच्चोपेक्षिताः ।

१ प्र० । श्लिष्टरूपकं मुखाम्बुजम् । [द० अम्यु पृ० प० १३ ।

वृत्तिनिरोधवतां मानसं चित्तमेव मानसं तदाख्यं सरः तत्र हंसः पक्षी कृष्णश्च 'अथ भव-तापभित्=संसारदुःखध्वंसक भवतात् एवमादिरूपेणारोपः भवगवतो रोलम्बत्वाद्यारोपे हेतुः । अत्र वाचकं श्लिष्टम् । परमिदं मालारूपकम् श्लिष्टम् । यथा वा—

आहितापकरणभेषज ! नरनाथ ! भवान् करस्थितो यस्य ।
तस्य कुतोऽहिभयं स्यादखिलामपि मेदिनीं चरतः ॥

अत्र आहितानामपकरणमेव अहीनां [सर्पाणां] तापकरणमिति श्लेषमूलकेनारोपेण राजनि भेषजतादात्म्यमारोपितम् । कुतः 'अहिभयम्' स्वपक्षभीतिः । 'महीभुजामहिभयं स्वपक्षप्रभवं भयम्' इत्यमरः । 'कुतः' पृथ्वीतः 'हि' निश्चयेन भयं भीतिर्वा । एवमिदं श्लेषनिबन्धनं रूपकम् । यथा वा—

अलौकिकमहालोक-प्रकाशितजगन्त्रय ।
स्तूयते देव ! सद्वंशमुक्तारत्नं न कैर्भवान् ॥

अत्र अलौकिकः लोकोत्तरो यो महः उत्सवः तस्य आलोकः दर्शनमेव अलौकिको महान् आलोको द्योतः तेन प्रकाशितं जगन्त्रयं येन स तादृशः । 'आलोकौ द्योतदर्शनौ' इत्यमरः । सद्वंशो महत्कुलम् तदेव सद्वंशः उत्तमवेणुः [मुक्तोत्पत्तिस्थानम्] तत्र मुक्तारत्नं मौक्तिकश्रेष्ठः भवान् कैर्न स्तूयते अपि तु सर्वैः स्तूयते इत्यर्थः ।

अत्र आरोपविषयारोपणीययोः सत्कुलसद्वेण्वोः श्लिष्टसद्वंशशब्देनाभिधानम्, राजनि मुक्तात्वारोपे कुलगतो वेणुत्वारोपो निमित्तमिति श्लिष्टं परम्परितं रूपकमुच्यते । अत्र तु श्लिष्टरूपकत्वांश एव उदाहरणं ज्ञेयम् । एवमादि स्वयमूह्यम् । 'वंशः सङ्घेऽन्वये वेणौ पृष्ठाद्यवयवेऽपि च' इति हैमः । 'रत्नं स्वजातिश्रेष्ठेऽपि' इत्यमरः ॥ ८७ ॥

[उपमारूपकव्यतिरेकरूपकयोर्लक्षणम्]

[1] दृष्टं साधर्म्यवैधर्म्यदर्शनाद् गौणमुख्ययोः ।
उपमाव्यतिरेकाख्यं रूपकद्वितयं यथा ॥ ८८ ॥

उपमारूपकव्यतिरेकरूपके लक्षयति— दृष्टम्' इति । 'गौणमुख्ययोः'=गुणादागतं गौणं अर्थात् [आह्लादकत्वादि] गुणसम्बन्धाद आरोप्यमाणश्चन्द्रप्रभृतिः 'गौणः' मुखमिव-प्रथमप्रतीतिविषयत्वात् आरोपविषयो मुखादि 'मुख्यः' तयोः 'साधर्म्यवैधर्म्यदर्शनात्'= अर्थात् साधर्म्यदर्शनात्=साधारणधर्मसम्बन्धात् वैधर्म्यदर्शनात्=विरुद्धधर्मसम्बन्धात् यथा-क्रमं 'उपमाव्यतिरेकाख्यम् रूपकद्वितयम् अस्ति' इति शेषः । गौणमुख्ययोः साधारण-धर्मसम्बन्धात् 'उपमारूपकम्' । तयोरेव विरुद्धधर्मसम्बन्धात् 'व्यतिरेकरूपकं' इत्यन्वयः । 'यथा' इति अनुपदमुदाहरति ॥ ८८ ॥

---

[1] [प्र०] उपमाव्यतिरेकरूपकयोर्लक्षणं लिख । [उ०] अस्य पृ० प० २१ ।

[उपमारूपकस्योदाहरणम्]

¶ अयमालोहितच्छायो मदेन मुखचन्द्रमाः ।
सन्नद्धोदयरागस्य चन्द्रस्य प्रतिगर्जति ॥ ८९ ॥

उपमारूपकमुदाहरति—'अयम्' इति । 'मदेन'=मद्यपानजनितेन अवस्थाविशेषेण 'आलोहितच्छाय.'=आलोहिता ईषद्रक्ता छाया कान्तिर्यस्य स तादृश 'मुखचन्द्रमा'=मुखमेव चन्द्रमा 'सन्नद्धोदयरागस्य=सन्नद्ध सम्यक् स्फुरन् उदयराग उदयकालिकलोहितिमा यस्य तस्य तथाविधस्य 'चन्द्रस्य'=शशिन 'प्रतिगर्जति'=समानरागवन्त तादृश चन्द्र प्रति स्पर्धते, अर्थात् तमनुकरोति नतु सदृशीभवति । चन्द्रस्येति सम्बन्धविवक्षया षष्ठी ।

अत्रारोप्यमाणस्य चन्द्रस्य तदभिन्नतया आरोपविषयो मुखमुपमेयम्, तस्यौपम्यसूचनकर प्रतिगर्जन समानोधर्म तत्सम्बन्धादिदम्—'उपमारूपकम्' इत्युक्त भवति । यथा वा मम—

¶ गदोद्दण्डितदोर्दण्डो मदाघूर्णितचक्षुणाम् ।
अमर्षवैरिविक्रान्तिर्भीमोऽथ स्पर्धते बलम् ॥

'बलम्'=बलभद्र श्रीकृष्णभ्रातरमित्यर्थ, भीमः भीमसेनो मध्यमपाण्डव । अत्रापि आरोप्यमाणस्य बलस्याभिन्नतया भीमसेन उपमेयम्, तस्यौपम्यसूचनकर स्पर्धन समानो धर्म । तत्सम्बन्धादुपमारूपकमिदम् । 'स्पर्धते'=अभिभवपूर्वकमाह्वयते इत्यर्थ अन्यथा अकर्मकत्वापत्तिर्दुर्वारा । 'वोपदेव स्तु कविकल्पद्रुमे 'स्पर्धते बलिन बली' इति निर्मय 'स्पर्ध' धातु सकर्मकमाचचक्षे ॥८९॥

[व्यतिरेकरूपकस्योदाहरणम्]

¶ चन्द्रमा पीयते देवैर्मया त्वन्मुखचन्द्रमा ।
असमग्रोऽप्यसौ शश्वदयमापूर्णमण्डल ॥ ९० ॥

व्यतिरेकरूपकमुदाहरति—'चन्द्रमा' इति । 'देवै'=सुरैः 'असमग्र अपि' असम्पूर्णोऽपि 'चन्द्रमा'=शशी 'शश्वत्'=निरन्तरम् 'पीयते'=आस्वाद्यते 'मया [तु] आपूर्णमण्डल'=सम्पूर्णबिम्ब 'त्वन्मुखचन्द्रमा'=त्वन्मुखमेव चन्द्रमा 'पीयते'=सादरमालोक्यते इत्यर्थ । एकस्यैव क्रियापदस्यावृत्त्याऽन्वय ।

अत्र चन्द्रो मुख्य, मुख गौणमिति मुख्यगौणयो मुखचन्द्रमसो सम्पूर्णत्वासम्पूर्णत्वरूपवैलक्षण्यात् 'व्यतिरेकरूपक' मिदम् । 'व्यतिरेकानुप्राणित रूपक व्यतिरेकरूपकम्' इति तदर्थ । अर्थात्र उपमानात् चन्द्रात् उपमेयस्य मुखस्यापूर्णमण्डलत्वरूपत-

प्र० १ [illegible] [उ०] अस्य पु० ५० ३ ।

प्र० [illegible] ३१ ॥

योत्कर्ष सच व्यङ्ग्य., तन्मूलत्वादेवास्योक्ता सञ्ज्ञा। ननु—व्यतिरेक एवायमस्त्वलङ्कार ? नेति ब्रूम , सादृश्यप्रतीतिपूर्वकमुपमानोपमेययोर्भेदे पर्यवसानाभावात् । वक्ष्यति च स्वयमेव—

शब्दोपात्ते प्रतीते वा सादृश्ये वस्तुनोर्द्वयो ।
तत्र यद्भेदकथन व्यतिरेकः स उच्यते ॥ इति ॥

इदमेव **भोजराज** 'व्यतिरेकवन्नामरूपक मित्याचष्टे। तथा च सरस्वतीकण्ठाभरणस्य चतुर्थे परिच्छेदे उदाहृतम् ,

अनाघ्रात पुष्प किसलयमलून कररुहै ,
अनाविद्ध रत्न मधुनवमनास्वादितरसम् ।
अखण्ड पुण्यानां फलमिव च तद्रूपमनघ,
न जाने भोक्तार कमिह समुपस्थास्यति विधि ॥

अत्र पुष्पकिसलयरत्नमधुपुण्यफलानाम् 'अनाघ्रात' मित्यादिविशेषणापादितव्यतिरेकाणा प्रतीयमानसादृश्येन शकुन्तलारूपेण रूपणात् अर्थत शब्दतश्च प्राधान्यमवधार्येत इति 'व्यतिरेकवत्' नाम रूपकमिदम् ।

एतदेव **विश्वनाथेन** 'अधिकारूढवैशिष्ट्यम् इत्युच्यते, उदाह्रियते च यथा—

इद वक्त्र साक्षाद्विरहितकलङ्क शशधर',
सुधाधाराधारश्चिरपरिणत बिम्बमधर ।
इमे नेत्रे रात्रिन्दिवमधिकशोभे कुवलये,
तनुर्लावण्याना जलधिरवगाहे सुखतर ॥

अत्र मुखादीनां निष्कलङ्कत्वादिना शशधराद्यपेक्षया आधिक्येन वैशिष्ट्यम्। चन्द्रादे अत्यन्तासम्भविन कलङ्कराहित्यादिविशेषणस्य मुखादावारोपणात् ।

[आक्षेपरूपनिरूपणम्]

१ मुखचन्द्रस्य चन्द्रत्वमित्थमन्योपतापिन
न ते सुन्दरि ! संवादीत्येतदाक्षेपरूपकम् ॥६१॥

आक्षेपरूपक प्ररूपयति—'मुखचन्द्रस्य' इति 'हे ! सुन्दरि ! 'इत्थम् अन्योपतापिन '=कमलाना सङ्कोचकारित्वेनोपतापजनकस्य किवा वियोगिजनाना पीडाजनकत्वेन सन्तापकारिण चन्द्रस्य इति शेष । 'चन्द्रत्वम्'=चन्द्रभाव 'ते'=तव 'मुखचन्द्रस्य'=मुखमेव चन्द्र तस्य आस्यशशिन 'संवादि'=सदृशम् 'न' नास्तीत्यर्थ । चन्द्र परानुपतापयति तव मुखन्तु सर्वान् आह्लादयति एवमुपमानभूतस्य परोपतापिनश्चन्द्रस्य आक्षेप प्रतिषेधवचनम् [निन्दा] कृत इति हेतो 'एतत् आक्षेपरूपकम्'=आक्षेपपूर्वकत्वाद् रूपणस्य 'आक्षेपरूपकम्' इत्यभिधीयते इत्यर्थ ।

[प्र०] १ आक्षेपरूपक सार्वान्येन स्पर्धिनुर ? [उ०] अस्य पृ० प० २२ ।

नाय व्यतिरेक सादृश्यप्रतीत्यभावात् । नापि अपन्हुतिः प्रस्तुतस्य [मुखस्य] अनिषेधात् चन्द्रत्वस्य आरोप्यमाणत्वेन प्रस्तुतत्वाभावाच्च, अपन्हुतौ प्रकृतनिषिद्धत्वस्य अप्रकृतस्यापनत्वस्य चावश्यकत्वादित्यलमतिविस्तरेण ॥ ६१ ॥

[समाधानरूपकनिरूपणम्]

मुखेन्दुरपि ते चण्डि ! मां निर्दहति निर्दयम् ।
भाग्यदोषान्ममैवेति तत् समाधानरूपकम् ॥ ६२ ॥

समाधानरूपक निरूपयति—'हे ! चण्डि ! '=कोपने ! 'मम एव भाग्यदोषात्'= मदीयदिष्टदोषात् दुरदृष्टादिति यावत् 'ते'=तव 'मुखेन्दु '=मुखमेवेन्दु' 'अपि माम्' 'निर्दयम् =निष्कृप यथा स्यात्तथा 'निर्दहति'=नितान्त तापयति 'इति'=एव रीत्या [उक्ते काव्ये] स्वयमेव तापकत्वे हेतूपपादनात् अर्थात् अपेक्षितशकाया स्वय समाधानात् 'समाधानरूपकम्' इदमाख्यायते ॥ ६२ ॥

[रूपकरूपकस्य निरूपणम्]

मुखपङ्कजरङ्गेऽस्मिन् भ्रूलतानर्त्तकी तव ।
लीलानृत्यं करोतीति रम्यं 'रूपकरूपकम्' ॥ ६३ ॥

रूपकरूपक निरूपयति—'मुखपङ्कजरङ्गे' इति । 'तव अस्मिन् 'मुखपङ्कजरङ्गे'=मुखमेव पङ्कजम् मुखपङ्कजम् मुखपङ्कजमेव रङ्ग नर्त्तनशाला इति मुखपङ्कजरङ्गम् तत्र 'भ्रूलतानर्त्तकी'= भ्रूरेव लता वल्लीति भ्रूलता, भ्रूलता एव नर्त्तकी 'लीलानृत्यम्'=लीला विलास तद्धेतुक नृत्य 'करोति'=विधत्ते 'इति'=एवमाकारम् एतत् 'रम्यम्'=हृदयहारि 'रूपकरूपकम्'=रूपितस्यापि पदार्थस्य पुना रूपणान्तरकरणात् 'रूपकरूपक' नाम रूपकमुच्यते ।

अत्र पूर्व मुखे पङ्कजत्वारोपण कृत्वा मुखपङ्कजे रङ्गत्वारोप कृतः, तथैव भ्रुवि लतात्वारोप कृत्वा भ्रूलतायां नर्त्तकीत्वारोपो दर्शित इति । परमिद समासस्थले, असमासे तु एकस्मिन् बहूनामारोपे हेतुरूपक यथा पूर्वमुक्तम्, हेत्वभावस्थले तु मालावयविरूपकमित्यपि बोध्यम्—उदाहरण यथा—

सौन्दर्यस्य तरङ्गिणी तरुणिमोत्कर्षस्य हर्षोद्गम
कान्ते कार्मण कर्म नर्मरहसामुल्लासनावासभू ।
विद्या वक्रगिरा विधेरनवधि प्रावीण्यसाक्षात्क्रिया
बाणा पञ्चशिलीमुखस्य ललनाचूडामणि सा प्रिया ॥

अत्र हेतोरनुपादानात् एकस्यामेवोपमेयभूताया प्रियाया बहूनां तरङ्गिणीत्वादिधर्माणामारोपदर्शनात् मालारूपकविरूपकम् । यथा वा मम—

सौभाग्यस्य सरो स्वा तनुलता या मा[illegible]स्याभिनो
[illegible] [illegible] [illegible] [illegible] [illegible] [illegible] ।

- अत्र [illegible] । [illegible] । 'अपि भुवो [illegible]' [उ० ।५।१।]

सत्यस्यापि सती विलासभरतः कामस्य मुख्या क्रिया
सा सौभाग्यती मदीयहृदये कीर्णा निखाता नु धा ॥

अत्रापि एकस्यामेव सौभाग्यवत्यां [नायिकायां] सरस्त्वाद्यनेकधर्माणामारोपदर्शनात् 'मालावयविरूपक' बोध्यम् । अनयैव रीत्या एतादृशस्थले ऊहनीयम् । ९३ ॥

[तत्त्वापह्नवरूपकस्य लक्ष्यम्]

¶ नैतन्मुखमिदं पद्मं न नेत्रे भ्रमराविमौ ।
एतानि केसराण्येव नैता दन्तार्चिषस्तव ॥ ९४ ॥

[तत्त्वापह्नवरूपकलक्षणस्य लक्ष्ये योजनम्]

मुखादित्वं निवर्त्यैव पद्मादित्वेन रूपणात् ।
उद्भावितगुणोत्कर्षं तत्त्वापह्नवरूपकम् ॥ ९५ ॥

तत्त्वापह्नवरूपकं दर्शयति—'न' इति द्वाभ्याम् । 'एतत्'=समीपतरवर्त्ति पुरोदृश्यमानमित्यर्थः 'मुखम् न'=आननं न किन्तु 'पद्मम्'=कमलम् 'इमौ नेत्रे न'=किन्तु 'भ्रमरौ'=भृङ्गौ 'तव एताः दन्तार्चिषः न'=दन्तमयूखा न किन्तु 'एतानि केसराणि एव'=किञ्जल्का एव ।

अत्र काव्ये 'मुखादित्वम्'=मुखत्वादिधर्मं 'निवर्त्य'=प्रतिषिध्य यत् 'पद्मादित्वेन'=पद्मत्वादिधर्मेण 'रूपणात्'=[अन्यदीयरूपेण] रूपवत् करणात् अर्थात् मुखादिषु मुखत्वादिप्रतिषेधपूर्वकपद्मत्वादिधर्मस्थापनात् हेतोः 'उद्भावितगुणोत्कर्षम्'=उद्भावितः प्राकट्यं नीतः द्योतित इति यावत् गुणस्य उपमेयनिष्ठधर्मस्य [मुखादौ आह्लादकत्वकोमलत्वादेः] उत्कर्षः विच्छित्यातिशयो यस्य तत् इदं 'तत्त्वापह्नवरूपकम्'=तत्त्वस्य प्रस्तुतस्य मुखादौ मुखत्वादिधर्मस्य अपह्नवेन अप्रस्तुतस्वरूपारोपणात् हेतोः उक्तनाम्ना रूपकमित्यर्थः । रूपकान्तरेषु उपमेयस्योपमानाभिन्नतया प्रतिपादनाद् यावानुत्कर्षः ततोऽप्यत्र प्रतिषेधपूर्वकारोपेणोत्कर्षाधिक्यमिति सहृदयसाक्षिकम् । नचेयमपह्नुतिः अत्र रूपके प्रस्तुतस्य धर्म्मिणः प्रतिषेधेन धर्म्यन्तरस्यारोपकरणात्, अपह्नुतौ प्रस्तुतधर्मप्रतिषेधेन धर्मान्तरारोपसत्त्वात् । उभयोरुदाहरणे चैतत्स्पष्टं स्वयमूह्यम् । केचित्तु—सादृश्यप्रतीतिहेतुरारोपो रूपकम्, नच तथाऽपह्नुतिरिति विशेष इत्याहुः ।

विश्वनाथप्रभृतयस्तु—'रूपकं रूपितारोपाद् विषये निरपह्नवे' इति विषये निरपह्नवविशेषणप्रदानात् तत्त्वापह्नवरूपकस्थलेऽपि अपह्नुतिमेव स्वाकुर्वन्ति ।

[रूपकस्योपसंहारः]

न पर्यन्तो विकल्पानां रूपकोपमयोरतः ।
दिङ्मात्रं दर्शितं धीरैरनुक्तमनुमीयताम् ॥ ९६ ॥

[प्र०] तत्त्वापह्नवरूपकं लक्ष्यलक्षणाभ्यां समतभेदं विवेच्यम् । [उ०] अत्र पृ० ५० ५ ।

रूपकमुपसहरति—'न' इति । यत 'रूपकोपमयो'=रूपकस्य उपमायाश्च 'विकल्पानाम्'=विविधानां कल्पानां वाचित्रीविशेषाणाम् 'पर्यन्त न'=परितोऽन्त पर्यन्त परा सीमा न 'अस्ति' इति शेष । 'अत.'=हेतो मयाऽस्मिन ग्रन्थे 'दिङ्मात्रम्'=लेशमात्र रीतिमात्रमिति यावत् 'दर्शितम्'=निरूपितम् 'धीरै.'=बुद्धिमद्भि सप्रतिभ तु 'अनुक्तम्'=यदिहाकथित तत् स्वयम् 'अनुमीयताम्'=तद्दर्शितरीत्योहनीयमित्यर्थ । अयमाशय—समस्तरूपकम्, व्यस्तरूपकम् सकलरूपकम्, अवयवरूपकम्, अवयविरूपकम्, एकाङ्गरूपकम्, द्व्यङ्गादिरूपकम्, युक्तरूपकम्, अयुक्तरूपकम्, विषमरूपकम्, सविशेषणरूपकम्, विरुद्धरूपकम्, हेतुरूपकम्, श्लिष्टरूपकम्, उपमारूपकम्, व्यतिरेकरूपकम्, आक्षेपरूपकम्, समाधानरूपकम्, रूपकरूपकम्, तत्त्वापह्नवरूपकम्, [२०] इति विंशती रूपकभेदा इहोक्ता, नत्वेत एव सन्ति किन्तु अपरेऽपि प्रकारा स्वबुद्ध्या कल्पनीया, ग्रन्थान्तरेषु सूरिभिरुक्ता वा ततोऽवसेया ।

दर्पणे तु विश्वनाथेन—'तेनाष्टौ रूपके भिदा' इति अष्टविधमेव रूपकमुक्तम् तस्य सकलनाप्रकारो निम्नरीत्या ज्ञातव्य. । तद्यथा—

परम्परितम् ४	श्लिष्टशब्दनिबन्धनम्	केवलम् १	"आहवे जगदुद्दण्ड*" इत्यादि।
		मालारूपकम् १	"पद्मोदयदिनाधीश" इत्यादि।
	अश्लिष्टशब्दनिबन्धनम्	केवलम् १	"पान्तु वोजलदश्यामा" इत्यादि।
		मालारूपकम् १	"मनोजराजस्य" इत्यादि।

* एते श्लोका पूर्णरूपा—

"आहवे जगदुद्दण्ड ! राजमण्डलराहवे ।
श्रीनृसिंहमहीपाल ! स्वस्त्यस्तु तव बाहवे ॥"
"पद्मोदयदिनाधीश सदागतिसमीरण: ।
भूभृदावलिदम्भोलिरेक एव भवान् भुवि ॥"
"पान्तु वो जलदश्यामा शार्ङ्गज्याघातकर्कशा ।
त्रैलोक्यमण्डपस्तम्भाश्चत्वारो हरिबाहव ॥"
"मनोजराजस्य सितातपत्रं श्रीखण्डचित्रं हरिदङ्गनाया ।
विराजते व्योमसर सरोज कर्पूरपूरप्रभमिन्दुबिम्बम् ॥
रावणावग्रहक्लान्तमिति वागमृतेन स ।
अभिवृष्य मरुत्सस्य कृष्णमेघस्तिरोदधे ॥
"लावण्यमधुभि पूर्णमास्यमस्या विकस्वरम् ।
लोकलोचनरोलम्बकदम्बै कैर्न पीयते ? ॥"

साङ्गम् २	समस्तवस्तुविषयम्	१	"रावणावग्रहक्लान्तम्" इत्यादि।
	एकदेशविवर्त्ति	१	"लावण्यमधुभिः पूर्णम्" इत्यादि।
निरङ्गम् २	मालारूपम्	१	*"निर्म्माणकौशलं धातु" इत्यादि।
	केवलरूपकम्	१	"दासे कृतागसि" इत्यादि।

इति रूपकचक्रम्।

रूपकप्रकरणं समाप्तमित्यर्थः। चक्रं समुदायः।

कुवलयानन्दे अप्पय्यदीक्षितैः प्रकारान्तरेण रूपकं निरूपितम् तच्छिष्यबुद्धिवैशद्याये-होपन्यस्यते। तथाहि—

विषय्यभेदताद्रूप्यरञ्जनं विषयस्य यत्।
रूपकं तत्त्रिधाधिक्यन्यूनत्वानुभयोक्तिभिः॥
अयं हि धूर्जटिः साक्षाद्येन दग्धाः पुरः क्षणात्।
अयमास्ते विना शम्भुस्तार्त्तीयीकः† विलोचनम्॥
शम्भुर्विश्वमवत्यद्य स्वीकृत्य समदृष्टिताम्।
अस्या मुखेन्दुना लब्धे नेत्रानन्दे किमिन्दुना॥
साध्वीयमपरा लक्ष्मीरसुधासागरोदिता।
अयं कलङ्किनश्चन्द्रान्मुखचन्द्रोऽतिरिच्यते॥

विषय्युपमानभूतं पद्मादि, विषयस्तदुपमेयं वर्णनीयं मुखादि, विषयिणो रूपेण विषयस्य रञ्जनं रूपकम्। अन्यरूपेण रूपवतः करणात्। तच्च क्वचित्प्रसिद्धविषय्यभेदपर्यवसितं क्वचिद्भेदे प्रतीयमान एव तदीयधर्मारोपमात्रपर्यवसितम्। ततश्च रूपकं तावद् द्विविधम्। अभेदरूपकं ताद्रूप्यरूपकं चेति। द्विविधमपि प्रत्येकं त्रिविधम्। प्रसिद्धविषयाधिक्यवर्णनेन न्यूनत्ववर्णनेनानुभयोक्त्या चैव रूपकं षड्विधम्। अयं हीत्यादिसार्धश्लोकेनाभेदरूपकाणि। अस्या मुखेन्दुनेत्यादिसार्धश्लोकेन ताद्रूप्यरूपकाणि। आधिक्यन्यूनत्वानुभयोक्त्युद्देशक्रमप्रातिलोम्येनोदाहृतानि। 'येन दग्धा' इति विशेषणेन वर्णनीये राज्ञि प्रसिद्धशिवाभेदानुरञ्जनाच्छिवस्य

---

* 'निर्म्माणकौशलं धातुश्चन्द्रिका लोकचक्षुषाम्।
क्रीडागृहमनङ्गस्य सेयमिन्दीवरेक्षणा॥'

दासे कृतागसि भवत्युचितः प्रभूणां
पादप्रहार इति सुन्दरि नास्मि दूये।
उद्यत्कठोर-पुलकाङ्कुर-कण्टकाग्रै-
र्यत्खिद्यते मृदुपदं ननु सा व्यथा मे॥

† तार्त्तीयीकम् इति तृतीयमेव तार्त्तीयीकम्। 'तीयादीकक् स्वार्थे वा वाच्यः' इति वार्त्तिकात्।

पूर्वावस्थातो वर्णनीयराजभावावस्थायां न्यूनत्वाधिक्ययोरवर्णनाच्चानुभयाभेदरूपकमाद्यम् [१]। तृतीयलोचनप्रहाणोक्त्या पूर्वावस्थातो न्यूनताप्रदर्शनान्न्यूनाभेदरूपक द्वितीयम् [२]। न्यूनत्व-वर्णनमप्यभेददार्ढ्योपादकत्वाच्चमत्कारि विषमदृष्टित्वपरित्यागेन जगद्रक्षकत्वोक्त्या शिवस्य पूर्वावस्थातो वर्णनीयराजभावावस्थायामुत्कर्षविभावनादधिकाभेदरूपक तृतीयम् [३] । एवमुत्तरेषु ताद्रूप्यरूपकोदाहरणेष्वपि क्रमेणानुभयन्यूनाधिकभावा उन्नेया । अनेनैव क्रमेणो-दाहरणान्तराणि—

चन्द्रज्योत्स्नाविशदपुलिने सैकतेऽस्मिन्सरय्वा
वादद्यूतं चिरतरमभूत्सिद्धयूनो कयोश्चित् ।
एको वक्ति प्रथमनिहत कैटभ कंसमन्य—
स्तत्त्व स त्व कथय भगवन्को हतस्तत्र पूर्वम् ॥

अत्र 'स त्व'मित्यनेन य कंसकैटभयोर्हन्ता गरुडध्वजस्तत्तादात्म्य वर्णनीयस्य राज्ञ प्रतिपाद्य त प्रति कंसकैटभवधयो पौर्वापर्यप्रश्नव्याजेन तत्तादात्म्यदार्ढ्यकरणात्पूर्वावस्थात उत्कर्षापकर्षयोरविभावनाच्चानुभयाभेदरूपकम् ।

वेधा द्वेधा भ्रम चक्रे कान्तासु कनकेषु च ।
तासु तेष्वप्यनासक्त साक्षाद्भर्गो नराकृति ॥

अत्र साक्षादिति विशेषणेन विरक्तस्य प्रसिद्धशिवतादात्म्यमुपदिश्य नराकृतिरिति दिव्यमूर्तिराहित्यप्रतिपादान्न्यूनाभेदरूपकम् ।

त्वय्यागते किमिति वेपत एष सिन्धु-
स्त्व सेतुमन्थकृदत किमसौ बिभेति ।
द्वीपान्तरेऽपि न हि तेऽस्त्यवशवदोऽस्य
त्वां राजपुङ्गव ! निषेवत एव लक्ष्मी ॥

अत्र त्व सेतुमन्थकृदिति सेतोर्मन्थनस्य च कर्त्रा पुरुषोत्तमेन सह वर्णनीयस्य तादा-त्म्यमुक्त्वा तथापि त्वदागमनं सेतुबन्धाय मन्थनाय वेति समुद्रेण न भेतव्यम् । द्वीपान्त-[illegible] त्वदवशवदत्वेन [illegible]द्वीपान्तरे [illegible] गन्तव्याभावात्, प्राप्तलक्ष्मीकत्वेन मन्थनप्रसक्त्य-भावश्चेति पूर्वावस्थात उत्कर्षविभावनादधिकाभेदरूपकम् ।

किं पद्मस्य रुचि न हन्ति नयनानन्द विधत्ते न कि
वृद्धि वा झषकेतनस्य कुरुते नालोकमात्रेण किम् ।
वक्त्रेन्दौ तव सत्ययं यदपर शीतांशुरभ्युद्गतो
दर्प स्यादमृतेन चेदिह तदप्यस्त्येव बिम्बाधरे ॥

[illegible] [illegible]वर्णितेन वक्त्रेन्दौ प्रसिद्धचन्द्रतादात्म्यमाविष्कृत्य तस्य च प्रसिद्धचन्द्र-[illegible] [illegible] ताद्रूप्यरूपकम् ।

अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः ।
अभाललोचनः शंभुर्भगवान्बादरायणः ॥

अत्र हरावपर इति विशेषणान्त्रिष्वपि तादृप्यरूपकम् । इदं विशेषोक्त्युदाहरणमिति वामनमतम् । यदाह—'एकगुणहानौ गुणसाम्यदार्ढ्यें विशेषोक्तिः' ['काव्या० सू० अध्यो० ३ । सू० २३ ।] इति

किममुभिर्ग्लपितैर्जड मन्यसे मयि निमज्जतु भीमसुतामनः ।
मम किल श्रुतिमाह तदर्थिकां नलमुखेन्दुपरां विबुधः स्मरः ॥

अत्र दमयन्तीकृतचन्द्रोपालम्भे प्रसिद्धचन्द्रो न निर्याणकालिकमनःप्रवेशश्रुतितात्पर्यविषयः, किंतु नलमुखचन्द्र एवेति । ततोऽस्याधिक्यप्रतिपादनादधिकताद्रूप्यरूपकम् । रूपकस्य सावयवत्वनिरवयवत्वादिभेदप्रपञ्चन तु चित्रमीमांसायां द्रष्टव्यम् ॥ ६६ ॥

[दीपकलक्षणम्]

¶ जातिक्रियागुणद्रव्यवाचिनैकत्रवर्तिना ।
सर्ववाक्योपकारश्चेत् तमाहुर्दीपकं यथा* ॥ ६७ ॥

प्रदीपं सर्वदीपानां स्वयम्प्रभमनाश्रयम् ।
श्रये शान्तं शिवं देवं मेधाध्वान्तनिवृत्तये ॥ १ ॥

क्रमप्राप्तं दीपकं लक्षयति—'जातिक्रिया०' इति । 'एकत्रवर्त्तिना'=एकस्मिन् यस्मिन् कस्मिन्नपि प्रबन्धघटनकारिणि आदौ मध्येऽन्ते वा स्थितेन 'जातिक्रियागुणद्रव्यवाचिना'= जातिवाचिना क्रियावाचिना गुणवाचिना द्रव्यवाचिना पदेन 'चेत्'=यदि 'सर्ववाक्योपकारः'= सर्वस्य वाक्यस्य य उपकारः अन्वययोग्यता अर्थात् स्वार्थद्वारा वाक्यान्तरार्थस्यान्वयोपपत्तिर्भवति तदा तमलङ्कारं 'दीपकं' नाम 'आहुः'=कथयन्ति । यथा एकदेशस्थितो दीपो बहिरन्तः सर्वं वेश्माभिज्वलयति एवमेव एकवाक्यगतमपि जात्याद्यन्यतमवाचकं पदं काकाक्षिन्यायेन वाक्यान्तरे प्रविष्टं सत् स्वार्थं द्वारीकृत्य तदर्थान्वयं सम्पादयतीति दीपकसाम्यात् 'दीपकम्' इति बोध्यम् । अतएव 'अप्पय्यदीक्षितैरुक्तम्-प्रस्तुतकनिष्ठः समानो धर्मः प्रसङ्गादन्यत्रोपकरोति प्रासादार्थमारोपितो दीप इव रथ्यायामिति दीपसाम्याद्दीपकम् इति । 'सङ्ग्रा-

[प्र०] दीपकस्य किं लक्षणम् ? [उ०] अस्य पृ० प० १२ ।

'अलङ्कारचन्द्रिकायामित्थमुक्तम्—

गुणजातिक्रियाद्रव्यवाचकेन पदेन तु ।
एकत्र वर्त्तिना सर्ववाक्यार्थो दीपकं भवेत् ॥ इति ।

तत्र गुणः=असाधारणधर्मः । जातिः=सामान्यं विशेषव्यापिनी 'जातिर्नाम सामान्यम्' इत्यमरोक्तेः । क्रिया=धर्मिनिष्ठो व्यापारः । द्रव्यम्=द्रव्यपदेन व्यक्तिभूतो गृह्यते ।

याश्च' [५।३।९७] इति पाणिनिसूत्रेण इवार्थे 'कन्' प्रत्यय' इति । 'यथा' इति जातिगतम् क्रियागतम्, गुणगतम्, द्रव्यगतम्, इति चतुर्विध वक्ष्यमाणग्रन्थेनोदाहरति ॥ ९७ ॥

[आदिपादगत-जातिगतदीपकस्योदाहरणम्]

पवनो दक्षिणः पर्णं जीर्णं हरति वीरुधाम ।
स एवावनताङ्गीनां मानभङ्गाय कल्पते ॥ ९८ ॥

आदौ जातिगत दीपक दर्शयति—'पवन' इति 'दक्षिण' पवन'=दक्षिणानिलः 'वीरुधाम्'=वल्लीनाम् 'जीर्णम्'=पुरातन शुष्क 'पर्णम्'=पत्रम् 'हरति'=लाति । 'स एव'=पवन 'अवनताङ्गीनाम्'=सुन्दरीणा मानवतीनां 'मानभङ्गाय'=प्रणयकोपप्रशमनाय 'कल्पते'=समर्था भवति । दक्षिणानिलस्य कामोद्दीपकत्वादिति भाव । एतेन वसन्तकालो व्यज्यते ।

अत्र पूर्ववाक्ये 'पवन' इति जातिवाचक पदं बहुव्यक्तिवाचकत्वात् । उत्तरार्धे च स एव पवन तच्छब्दपरामृष्टो गम्यते, तेनैव तदर्थान्वयनिर्वाहश्च, अर्थात् एकेनैव 'पवन' पदेन पद्यगतसर्वपदं सहान्वयनिर्वाहकरणात् 'जातिगत दीपकम्' एतत् ॥ ९८ ॥

[आदिपादगत] क्रियागतस्य दीपकस्योदाहरणम्]

चरन्ति चतुरम्भोधिवेलोद्यानेषु दन्तिनः ।
चक्रवालाद्रिकुञ्जेषु कुन्दभासो गुणाश्च ते ॥ ९९ ॥

क्रियागत दीपकमुदाहरति—'चरन्ति' इति । 'दन्तिन'=दिग्गजा 'ते'=तव 'कुन्दभास'=माध्यदीप्तय [शुभ्रा] 'गुणा'=यशांसि च 'चतुरम्भोधिवेलोद्यानेषु'=चत्वार अम्भोधय सागरा तेषां वेला तीराणि तासाम् [तेषाम्] उद्यानेषु आरामेषु चतुःसागरतीरस्थारामेषु तथा 'चक्रवालाद्रिकुञ्जेषु'=लोकालोकाचलवर्त्तिलतापिहितद्वारेषु 'चरन्ति'= भ्रमन्ति ।

अत्र पूर्ववाक्ये 'चरन्ति' इति क्रिया निर्दिष्टा, उत्तरार्धवाक्ये च चकारेण सैव परामृष्टा 'गुणा' इति पदेनाप्यन्वेति इति उभयत्रैकक्रियान्वयप्रकाशनात् 'क्रिया [गत] दीपकमेतत् । माध्यं कुन्दम्' 'लोकालोकश्चक्रवाल' इत्युभयत्रामर । 'वेला' काले च जलधेस्तीरे नीरविकारयो । अक्लिष्टमरणे रोगे ईश्वरस्य च भोजने' इति मेदिनी ॥ ९९ ॥

=कोमलाभिः' 'नवशाद्वलराजिभिः'=हरिततृणहरितीकृतप्रदेशपङ्क्तिभिः 'श्यामला'= श्यामवर्णा 'सञ्जाता' इति शेषः ।

अत्र 'भुवश्च' इति चकारेण पूर्वार्धगतस्य 'श्यामला' इति गुणवाचकस्य पदस्यानुकर्षणात् एकान्वय इति गुणदीपकमेतत् । तस्य च [गुणवाचकपदस्य] सर्वपादादिगतत्वेन 'गुणगतमादिदीपक' मिदमुच्यते ॥ १०० ॥

[द्रव्यगतस्य आदिदीपकस्योदाहरणम्]

विष्णुना विक्रमस्थेन दानवानां विभूतयः ।
क्वापि नीताः कुतोप्यासन्नानीता दैवतर्धयः ॥ १०१ ॥

द्रव्य[गत]दीपकं मुदाहरति—'विष्णुना' इति । 'विक्रमस्थेन'=वामनावतारं कृत्वा त्रिभिः पद्भिः क्रममाणेन विष्णुना 'दानवानाम्'=बल्यादीनाम् 'विभूतयः'=राज्यश्रियः अनेकाः सम्पत्तयः इत्यर्थः । 'क्व अपि'=कुत्रापि अज्ञाते प्रदेशे 'नीताः'=नाशं गमिताः 'दैवतानाम्'=इन्द्रप्रभृतीनां सुराणाम् 'ऋद्धयः'=स्वर्गसम्पत्तयः 'कुतः अपि'= अनिर्दिष्टात्स्थानात् 'आनीताः'=उद्भाविताः 'आसन्'=अभूवन् ।

अत्र 'विष्णुना' इति पदं द्रव्यवाचि विष्णोरेकत्वात् । एकव्यक्तिकः पदार्थो न जातिरिति न्यायसिद्धान्तः । तस्य च पूर्ववाक्ये अन्वितस्य काकाक्षिन्यायेन उत्तरवाक्येप्यन्वय इति 'द्रव्यदीपकम्' । तच्च पदं सर्वपादादिगतम् इति द्रव्यगतमादिदीपकमिदं बोध्यम् ॥ १०१ ॥

[दीपकान्तरनिरूपणप्रतिज्ञा]

इत्यादिदीपकान्युक्तान्येवं मध्यान्तयोरपि ।
वाक्ययोर्दर्शयिष्यामः कानिचित्तानि तद्यथा ॥ १०२ ॥

जात्यादिभेदेन चतुर्विधं दीपकमुक्त्वा तेषां जात्यादिवाचकपदानां मध्यान्तवाक्यगतत्वात् प्रकारान्तरेण दीपकभेदं वक्तुं प्रतिज्ञां करोति— 'इति' इति । 'इति'=उक्तया दिशा 'आदिदीपकानि'=वाक्यादिपदगतानि दीपकानि 'उक्तानि'=कथितानि दर्शितोदाहरणानीत्यर्थः । 'एवम्'=आदिपदगतदीपकवत् 'मध्यान्तयोः अपि वाक्ययोः'='कानिचित् तानि दीपकानि दर्शयिष्यामः'=निरूपयिष्यामः इति प्रतिज्ञा । 'तद् यथा'=इति वक्ष्यमाणोदाहरणाभिप्रायेणोक्तम् । 'कानिचित्' इति कथनेन दिङ्मात्रं दर्शयामः ग्रन्थवृद्धिभिया सर्वाणि दर्शयितुं न शक्यन्त इति ध्वनितम् ॥ १०२ ॥

[जातिगतस्य मध्यदीपकस्योदाहरणम्]

नृत्यन्ति निचुलोत्सङ्गे गायन्ति च कलापिनः ।
बध्नन्ति च पयोदेषु दृशो हर्षाश्रुगर्भिणीः ॥ १०३ ॥

जातिगतं मध्यदीपकमुदाहरति— 'नृत्यन्ति' इति । वर्षाकालवर्णनमिदम् । 'कलापिनः'= बर्हिणः मयूराः 'निचुलोत्सङ्गे'=निचुलस्य हिज्जलस्य स्थलवेतसस्य उत्सङ्गे तलप्रदेशे

'नृत्यन्ति'=नर्त्तनं तन्वते गायन्ति च'=केकां च कुर्वन्ति । तथा 'पयोदेषु'=मेघेषु 'हर्षाश्रुगर्भिणी'=आनन्दाश्रुभरिता प्रमोदजनितबाष्पधाराप्रवाहिनीरिति यावत् 'दृशः च'=दृष्टी अपि चक्षूषि इति यावत् बध्नन्ति=निरन्तर धारयन्तीत्यर्थ ।

अत्र 'कलापिन' इति जातिपद वाक्यमध्यगतम्, तस्य चकारबलेन वाक्यान्तरेऽपि परामर्शे, एवञ्च वाक्यमध्यगतत्वात् जातिगतं मध्यदीपकमेतत् । 'निचुलो हिज्जलोऽम्बुज' इत्यमर ॥ १०३ ॥

[क्रियागतस्य मध्यदीपकस्योदाहरणम्]

मन्दो गन्धवहः क्षारो वन्हिरिन्दुश्च जायते ।
चर्चाचन्दनपातश्च शस्त्रपात प्रवासिनाम् ॥ १०४ ॥

क्रियागत मध्यदीपकमुदाहरति—'मन्द' इति । 'प्रवासिनाम्'=प्रोषितानां वियोगिनाम 'मन्द'=मन्दगमन कोमल इति यावत् 'गन्धवह'=समीरण 'क्षार'=खर क्लेशप्रद असोढ इत्यर्थ । 'इन्दु च'=चन्द्रश्च 'वन्हि'=अनल तद्वत्तापकरत्वात्, 'चर्चाचन्दनपात'=आर्द्रमजलवस्तुप्रक्षेप 'चर्चा' इति कथ्यते, चर्चारूपो यश्चन्दनपात चन्दनप्रक्षेप स च 'शस्त्रपात'= जायते'=भवति ।

अत्र 'जायते' इति क्रियापद मध्यवाक्यगत गन्धवहादिसकलवाक्यान्वयि इति क्रियया सर्ववाक्यदीपनत्वात् क्रियागत मध्यदीपकमिदम् ।

गुणगत मध्यदीपक यथा—

नदीभिर्वारिवाहानां योग स्त्रीभि प्रवासिनाम् ।
स्ताभि पादपानाञ्च समायाते घनागमे ॥ इति ।

अत्र 'योग' संयोग स च गुणो मध्यवाक्यगत, तेन च सर्ववाक्यस्यान्वयात् गुणगत मध्यदीपकमिदम् ।

द्रव्यगत मध्यदीपक यथा—

मुहुर्विश्वं स्पृशति बिभर्ति च मुहुर्हरि ।
मुहुश्च नागं नयति बालक्रीडनकौतुकी ॥ इति ॥

अत्र 'हरि' रिति द्रव्यम्, तस्य मध्यवाक्यगतस्य सर्ववाक्येनान्वयात् द्रव्यगत मध्यदीपकमिदम् ॥ १०४ ॥

[अन्तगतस्य जातिदीपकस्योदाहरणम्]

जलं जलधरोद्गीर्णं कुलं गृहशिखण्डिनाम् ।
चलञ्च तडितां दाम बलं कुसुमधन्वन ॥ १०५ ॥

रित्यर्थ एतत्सर्वं [त्रयम्] कुसुमधन्वन'–पञ्चबाणस्य 'बलम्'=सैन्यम् 'अस्ति' इति शेष । सर्वेषामेषा कामोद्दीपकत्वादित्याशय ।

अत्र 'बलम्' इति जातिवाचक पदमन्तगतम्, तेन च सर्ववाक्यस्यान्वयात् अन्त-जातिगतदीपक मिदम् । 'कुसुमधन्वन' कुसुम धनु र्यस्येति बहुव्रीहिः । 'वा सञ्ज्ञायाम्' [५ । ४ । ११३] इत्यनङ् ॥ १०५ ॥

[क्रियागतस्य अन्तदीपकस्योदाहरणम्]

त्वया नीलोत्पलं कर्णे स्मरेणास्त्रं शरासने ।
मयापि मरणे चेतस्त्रयमेतत्समं कृतम् ॥ १०६ ॥

क्रियागतमन्तदीपकमुदाहरति—'त्वया' इति । [हे ! प्रिये !] 'त्वया कर्णे'=श्रोत्रे 'नीलोत्पलम्'–नीलकमल, 'स्मरेण'=मन्मथेन 'शरासने'=धनुषि 'अस्त्रम्'=सायकरूपम् 'मया अपि'=त्वत्प्रणयकोपशान्तिपरेणापि अकृतार्थेन मया 'मरणे'=प्राणत्यागे 'चित्तम्'=चेत 'एतत् त्रयम् समम्'=युगपदेव 'कृतम्' = सम्पादितमित्यर्थ. । मानिनीं प्रति कस्यचित् नायकस्योक्तिरियम् ।

अत्र 'कृतम्' इति अन्तवाक्यगत क्रियापदम्, तेन सह सर्ववाक्यस्यान्वयदीपनात् 'क्रियागतमन्तदीपक' मिदम् ।

गुणगतमन्तदीपक यथा—

इदमुज्जृम्भते बिम्ब भानोस्तापयितु जगत् ।
ममैव हृदय चण्डि ! मुखञ्च तव लोहितम् ॥ इति ॥

अत्र लोहितम्' इति गुणवाचि पदम्, तच्चान्तवाक्यगत तेन सह सर्ववाक्यान्वयदीपनात् गुणगतमन्तदीपकमिदम् ।

द्रव्यगतमन्तदीपक यथा मम—

आह्लादयति संसारमोषधीन् तर्पयत्यपि ।
ग्रीष्मताप निहन्त्येष ! शिशिर किरण शशी ॥ इति ॥

अत्र 'शशी' इति अन्तगत द्रव्यवाचिपदम्, सर्ववाक्यान्वय दीपयति, अत इद 'द्रव्य-गतमन्तदीपक' मुच्यते ॥ १०६ ॥

[मालादीपकप्ररूपणम्]

शुक्ल. श्वेतार्चिषो वृद्ध्यै पक्ष. पञ्चशरस्य स ।
स च रागस्य रागोऽपि यूना रत्युत्सवश्रिय ॥ १०७ ॥
इत्यादिदीपकत्वेऽपि पूर्वपूर्वव्यपेक्षिणी ।
वाक्यमाला प्रयुक्तेति तन्मालादीपकं मतम् ॥ १०८ ॥

जात्यादिभिरुपाधिभिरुदितं दीपकभेदान्निरूप्य सम्प्रति प्रकारान्तरेण तद्वैचित्र्यं दर्शयन् लक्षणघटनापूर्वकं मालादीपकमुदाहरति—'शुक्ल' इति । 'शुक्ल'=सित 'पक्ष' = मासार्धम् 'श्वेतार्चिष'=सितमयूखस्य शशिन 'वृद्ध्यै'=पूर्णताय 'भवति' इति शेष ।

'मत्त'=चन्द्र 'पञ्चशरस्य'=कामस्य वृद्धये, 'स च'=काम 'रागस्य'=प्रीते वृद्धये, स 'राग अपि'='यूनाम्'=तरुणानाम् 'रत्युत्सवश्रिय'=रति भोग तस्य उत्सव' उत्कण्ठाविशेष-जनिता क्रीडा सैव श्री तस्या वृद्धये भवति ।

अत्र सर्वस्मिन्नपि वाक्ये 'वृद्धये' इति पदस्यानुषङ्ग । तस्य च आदिवाक्यो-पात्तस्यापि पूर्वपूर्ववाक्यापेक्षिणी उत्तरोत्तरानुषङ्गवती वाक्यसमूहात्मिका वाक्यमालाऽस्तीति विच्छित्तिविशेषशालि मालागत दीपकमिदम् ।

एतल्लक्षयति—'इत्यादि०' इति । 'इति'=अमुना प्रकारेण 'आदिदीपकत्वे अपि'=आदिवाक्यगतेन 'शुक्ल पक्ष' इति जातिगुणवाचकेन सह [अपि] सर्ववाक्यान्वये सत्यपि 'पूर्वपूर्वव्यपेक्षिणी'=पूर्वपूर्ववाक्यापेक्षां कुर्वती 'वाक्यमाला'=वाक्यसमुदाय मालेव प्रगुणा योजिता 'तत्'=अतो हेतो अर्थात् उक्तेभ्यो दीपकेभ्यो विलक्षणशोभातिशय-त्वात् मालागतकम् इति=एतन्नामको दीपकालङ्कार 'मतम्'=कविसम्मतमित्यर्थ । 'पूर्व-पूर्वस्माद्वाक्यादुत्तरोत्तरवाक्यगत दीपक मालादीपक'मिति मालादीपकस्वरूपसार ।

पण्डितराजोऽपि प्राचां मतानुरोधेन 'मालादीपक'मुदाहृतम् यथा—

> आस्वादेन रसो रसेन कविता काव्येन वाणी तया
>
> लोकान्त स्मरणानुरागरसिक सभ्य सभा चामुना ।
>
> शशिनाऽऽनन्दनमानजगतीपीयूषधाराधर-
>
> श्रीमान्नाथ! त्वया भवांश्च भवता भूमण्डल भासते ॥

अत्र सर्वस्मिन्नपि वाक्ये 'भासते' इति क्रियापदस्य अनुषङ्ग, तस्य च अन्तवाक्यो-पात्तस्यापि पूर्वपूर्वापेक्षिणी उत्तरोत्तरानुषङ्गवती वाक्यसमूहात्मिका वाक्यमाला पूर्ववद् विच्छित्तिविशेषवती भाति । 'विश्वनाथोऽपि साहित्यदर्पणे'—'मालादीपकमाद्यं चेद् यथोत्तरगुणावहम्' इति लक्षणमुक्त्वा एतदुदाजहार । यथा—

यत्र विशेषणभाव पूर्वं पूर्वं प्रति क्रमेणैव ।
भजति पर परमेषा ऽलङ्कृतिरेकावली कथिता * ॥ १०७, १०८ ॥

[विरुद्धार्थदीपकप्ररूपणम्]

अवलेपमनङ्गस्य वर्धयन्ति वलाहका ।
कर्षयन्ति तु घर्मस्य मारुतोद्धूतशीकरा ॥ १०६ ॥
अवलेपपदेनात्र वलाहकपदेन च ।
क्रिये विरुद्धे संयुक्ते तद्विरुद्धार्थदीपकम् ॥ ११० ॥

विरुद्धार्थदीपक लक्षणयोजनापूर्वकमुदाहरति द्वाभ्याम्—'अवलेपम्' इति । 'वलाहका '=वारीणा वाहका मेघा 'अनङ्गस्य'=मदनस्य 'अवलेपम्' गर्वं 'वर्धयन्ति'=समेधयन्ति । 'मारुतोद्धूतशीकरा '=मारुतेन पवनेन उद्धूता उत्कम्पिता स्ववेगेनेतस्तत समानिता शीकरा अम्बुकणा येषाम् एवम्भूता ते एव वलाहका' 'घर्मस्य'=ग्रीष्मतापस्य [अवलेपम्] 'कर्षयन्ति'=कृशीकुर्वन्ति क्षपयन्तीत्यर्थ ।

उक्तोदाहरणे विरुद्धार्थदीपकस्वरूप योजयति—'अवलेपपदेन' इति । 'अत्र'=दर्शिते वाक्ये [काव्ये] 'अवलेपपदेन'=कर्मभूतेन 'वलाहकपदेन'=कर्तृभूतेन च सह 'विरुद्धे क्रिये'=वर्धनकर्शनाख्ये 'सयुक्ते'=सान्वये वर्त्तेते । य एवैकत्र य वर्धयति स एवान्यत्र त कर्शयतीति विरोध , तदेव विरोधरूपार्थस्य दीपनकरणात् 'विरुद्धार्थदीपक मिदम् । परमिदमादिगतजातिदीपकगुणदीपकयो सङ्करो बोध्य । 'अवलेप'मित्यादिवाक्यगत गुणवाचि, तेन सह सर्ववाक्यान्वयात् । 'वलाहका' इति जातिवाचि पद तेनापि सर्ववाक्यान्वयादित्यधिकमपि ज्ञेयम् ॥ १०६, ११० ॥

[लक्ष्यलक्षणाभ्यामेकार्थदीपकप्ररूपणम्]

हरत्याभोगमाशानां गृह्णाति ज्योतिषां गणम् ।
आदत्ते चाद्य मे प्राणानसौ जलधरावली ॥ १११ ॥
अनेकशब्दोपादानात् क्रियैकैवात्र दीप्यते ।
यतो जलधरावल्या तस्मादेकार्थदीपकम् ॥ ११२ ॥

एकार्थदीपक निरूपयति द्वाभ्याम् 'हरति' इत्यादि । वर्षाकालवर्णनम् । 'असौ जल-

---

* अलङ्कारचन्द्रिकाया मालादीपकम् [एकावली] यथा—
शाखिनि शाखिनि विटपा विटपे विटपे च पुष्पितास्तबका ।
स्तबके स्तबके मधुपा मधुपे मधुपे च मञ्जुल ध्वानिनम् ॥
गेहे गेहे मधुरिमरसा कामिनी सापि दक्षा
[illegible] उपरि [illegible] काञ्चनाङ्गे ।
[illegible] लसति कमल तत्र तत्रैव [illegible]
[illegible] पुष्पकेन [illegible] ॥ इति ॥

धरावली'=जलधराणां मेघानां आवली पङ्क्ति मेघमाला 'आशानाम्'=ककुभां दिशामिति यावत् 'आभोगम्'=विस्तार 'हरति'=प्रावृणोति सर्वदिक्षु व्याप्ता भवतीत्यर्थ । 'ज्योतिषाम् =ग्रहाणां तारादीनाम् 'गणम्'=समूहम् 'गृह्णाति'=आवृत्य तिष्ठतीत्यर्थ 'अद्य मे'=मम प्राणान् 'आदत्ते'=हरति विरहित्वादिति भाव । वियोगिन उक्तिरियम् ।

उक्ते काव्ये एकार्थदीपकलक्षण घटयति—'अनेकशब्दोपादानात्'=इति । 'अत्र'=उक्ते वाक्ये 'अनेकशब्दोपादानात्'=अनेकेषां शब्दानां हरति, गृह्णाति, आदत्ते इति क्रियावाचकानां पदानाम् उपादानात् ग्रहणात् 'यत '=यस्मात् कारणात् 'जलधरावल्या'= 'जलधरावली' इत्येककारकेण कर्तृपदेन 'एका एव क्रिया' अर्थतोऽभिन्नरूपैव क्रिया 'दीप्यते =प्रकाश्यते अर्थात् अन्वयीक्रियते 'तस्मात् =हेतो 'एकार्थदीपक'मिदम् ॥ १११, ११२ ॥

[श्लिष्टार्थदीपकनिरूपणम्]

हृद्यगन्धवहास्तुङ्गास्तमालश्यामलत्विष ।
दिवि भ्रमन्ति जीमूता भुवि चैते मतङ्गजाः ॥ ११३ ॥

अत्र धर्मैरभिन्नानामभ्राणां दन्तिनां तथा ।
भ्रमणेनैव सम्बन्ध इति श्लिष्टार्थदीपकम् ॥ ११४ ॥

श्लिष्टार्थदीपक निरूपयति—'हृद्यगन्धवहा इति द्वाभ्याम् । 'हृद्यगन्धवहाः'=हृद्य [illegible] शीतलत्वात् गन्धवह गभीरणो येषु ते तादृशा इति जीमूतपक्षे । [illegible] । हृद्यानां गन्धाय इति हृद्यगन्ध तस्य वहा प्रवाहना [illegible] । [illegible] कुम्भास्थानम् तद्गन्धयोगि मृद्वयापत्ते] इति मतङ्गजपक्षे । [illegible] इति जीमूतपक्षे । तुङ्गा =उन्नतारोहा विशालाकृते इति [illegible] । '[illegible]' =तमालवत् श्यामला कृष्णवर्णा त्विष. कान्तयो [illegible] अनन्यात एवम्भूता 'जीमूता '=मेघा [illegible] '[illegible]' =मत्तदन्तिनश्च 'भुवि'=भूमण्डले 'भ्रम- [illegible] ।

[दीपकचक्रस्योपसहार]

अनेनैव प्रकारेण शेषाणामपि दीपके ।
विकल्पानामवगतिर्विधातव्या विचक्षणै ॥ ११५ ॥ *

इति दीपकचक्रम् ।

दीपकमुपसहरति—'अनेन इति । 'अनेन एव प्रकारेण'=दर्शितवैचित्रीमार्गेण 'दीपके'=दीपकाख्येऽलङ्कारे 'शेषाणाम् अपि'=मदुक्तावशिष्टानामपि 'विकल्पानाम्' भेदानाम् 'अवगति'=बोध 'विचक्षणै =कुशलै अलङ्कारशास्त्रप्रवणचेतोभिरित्यर्थ । 'विधातव्या'=सम्पाद्या । मदुक्तरीतिमनुरुध्य मदनुक्ता अपि भेदा स्वयमूहनीया । कवि प्रतिभानामनन्तत्वात् सकलदीपकदीपन कर्तुमसुगमिति भाव ।

एते दीपकभेदा —आदिजातिदीपकम्, आदिक्रियादीपकम्, आदिगुणदीपकम्, आदिद्रव्यदीपकम्, मध्यजातिदीपकम्, मध्यक्रियादीपकम्, अन्तजातिदीपकम्, अन्तक्रियादीपकम्, मालादीपकम्, विरुद्धार्थदीपकम्, एकार्थदीपकम्, श्लिष्टार्थदीपकम् । [१२] द्वादश इहोक्ता ।

मम्मटाचार्यास्तु—दीपकमेव लक्षयन्ति । तथाहि—

सकृद्वृत्तिस्तु धर्मस्य प्रकृताप्रकृतात्मनाम् ।
सैव क्रियासु बह्वीषु कारकस्येति दीपकम् ॥

अस्यायमाशय —प्रकृत प्राकरणिकम् उपमेयम् । अप्रकृतम् अप्राकरणिकम् उपमानम्, तदात्मना तद्रूपाणां धर्मिणां धर्मस्य [गुण] क्रियादिरूपस्य सकृद्वृत्ति =एकवारमेवोपादान यत तदेक दीपकम् क्रियादिदीपकमित्यर्थ । बह्वीषु क्रियासु सतीषु कारकस्य कर्त्रादिभेदेन षड्विधस्य मध्ये यस्य कस्यापि कारकस्य सा एव सकृद्वृत्तिरेव याऽस्ति तद् द्वितीय दीपकम् [कारकदीपकमित्यर्थ । एवञ्च सामान्यत क्रियादिदीपक कारकदीपकमिति द्विप्रकार दीपकम् । एतेनैवाभिप्रायेण आचार्यै —'प्राकरणिकाऽप्राकरणिकानाम् अर्थात् उपमानोपमेयाना धर्म क्रियादि एकवारमेव यदुपादीयते तत् एकस्थस्यैव समस्तवाक्यार्थदीपनात् दीपकम्' इति स्वय विवृतम । एवञ्च दीप इव 'दीपकम्' । 'सञ्ज्ञाया च' [५।३।९७] इति पाणिनिसूत्रेण प्रकृतिप्रत्ययसमुदायेन सञ्ज्ञाया ज्ञायमानायामिवार्थे 'कन्' प्रत्यय इति पूर्वमप्यवोचाम । प्रस्तुताप्रस्तुतप्रकाशकत्वेन च सादृश्य बोध्यम् । अपरे तु—प्रकृतार्थमुपात्तो धर्म प्रसङ्गादप्रकृतमपि दीपयति प्रकाशयति सुन्दरीकरोति इति'दीपकम् ।

[प्र०] कतिविध दीपकम् ? किञ्च तस्य सामान्यलक्षणम् ? विशेषलक्षणानि च कानि ? कानि च तेषामुदाहरणानि ? तत्र च तेषा योजनाप्रकारश्च कीदृश ? इति सर्व सुविविच्य लेख्यम् । [उ] दर्शितप्रश्नानामुत्तराणि सटीकमूलग्रन्थपरामर्शेन स्वय सम्पाद्यम् ।

'नहि दीपस्य रथ्याप्रासादयोर्युगपदुपकारकत्वेन सामान्यं धर्मिनस्य नृपस्य इति-चिन्त्य प्रथमपरिवेषणेन च प्राधान्यं च दृश्यते' इत्यप्पय्यदीक्षित ।

'दीपं दीपं' इति दैवादिकात् 'दीप्' धातोर्णिजन्तात् 'ण्वुल्तृचौ' [३ । १ । १३३] इति सूत्रेण कर्तरि 'ण्वुल्' प्रत्यय । तस्य 'युवोरनाकौ' [७ । १ । १] इति सूत्रेण अकादेश इत्याहु । सर्वथापितु—'सकलवाक्योपकारकत्व' दीपकसामान्यलक्षणमिति फलितम् ।

यद्यपि दीपक इव तुल्ययोगितायामपि साधारणधर्मस्य सकृदुपादानम् तथापि 'प्रकृताप्रकृतयो साधारणधर्मस्य सकृदुपादाने 'दीपकम्'। प्रकृतानामेव अप्रकृतानामेव वा साधारणधर्मस्योपादाने 'तुल्ययोगिता' इत्यस्त्यनयोर्विशेष ।

अपरमपरथानयोर्विशेष —उभयोरनयोरुपमालङ्कारस्य गम्यत्वाऽविशेषेऽपि अत्र [दीपके] अप्रस्तुतमुपमानम् प्रस्तुतमुपमेयम् इति व्यवस्थित उपमानोपमेयभाव , तत्र [तुल्ययोगितायां] तु विशेषाग्रहणादच्छिक स इति दीक्षितानामुक्ति ।

तत्र प्रथमदीपक [क्रियादिदीपकम्] द्विविधम् । क्रियादीपकम् गुणदीपकञ्चेति । [illegible] यथा—

किरणागा भण णाआणा फण मणी केशराइं सीहाण ।
कुलबालिआणँ थणआ कुत्तो छिप्पन्ति अमुआण ॥

अत्र [illegible] प्रकृतानां कुलबालिकानां [उपमेयानाम्] तदुपमानत्वेन प्रकृतानां [illegible] स्पर्शनक्रियारूपसाधारणधर्मस्य सकृदुपादानमिति 'क्रियादीपक' मिदम् । [गुणदीपक] [illegible] यथा—'श्यामला प्रावृषेण्याभि' रित्यादि मूलोक्तम् । कारकदीपकं यथा—

[illegible] वेशति विचलति निमिषति विलोकयति तिर्यक् ।
[illegible] नवपरिणाया वधू शयने ॥

[illegible] 'वधू' रिति कर्तृकारकस्य 'शयने' इत्यधिकरणकारकस्य [illegible] मिदम् । अत्र सर्वा क्रिया प्रकृता ।

अत्रापि गायनाद्या सर्वा क्रिया प्रकृता । तासु एकस्यैव 'पुमान्' इति कर्तृकारकस्य सकृदुपादानात् इदमपि कारकदीपकम् । एवमस्य भूयान् समादरो दृश्यते 'सुभाषितरत्नसन्दोहयशस्तिलक' प्रभृतिषु महाकाव्येषु । अप्रकृतानामेव दीपक यथा—

दूरीकरोति कुमतिं विमलीकरोति
चेतश्चिरन्तनमघ चुलकीकरोति ।
भूतेषु किञ्च करुणां बहुलीकरोति
सङ्ग सतां किमु न मङ्गलमातनोति ॥

अत्र सर्वक्रियाणामप्रकृतत्वम् । तासु च सकृदेवोपात्तस्य 'सङ्ग' इति कर्तृकारकस्यान्वयो दीपित । प्रकृताप्रकृतानां यथा—

वसु दातुं यशोधातु विधातुमरिमर्दनम् ।
त्रातु च मादृशान् राजन् ! अतीवनिपुणो भवान् ॥

अत्र वसुदानस्वत्राणे प्रकृते, अरिमर्दनयशोधाने चाप्रकृते, तत्र सकृदुपात्तस्यैकस्य 'नृप' कारकस्यान्वय. । अत्र 'दातुम्' इत्यादौ तुमुन्प्रत्ययेन असत्त्वभूत एव भावोऽभिधीयते 'अव्ययकृतो भावे' इत्युक्ते । एतच्च मञ्जूषादौ कृदर्थविचारे स्पष्टम् । यथा वा मम—

चिनोति पाप कुरुते विगर्हणां तनोति दु ख किल हन्ति सञ्चयम ।
विपत्तिमातत्य सतां प्रहृष्यति क्रमो विचित्रो ह्यसतां सनातन ॥

अत्राप्यनेकासु चयनादिक्रियासु एकस्य 'असता क्रम इति सकृदुपात्तस्य कर्तृकारकस्यान्वय । एवमादिरीत्या सर्वत्रोह्यम् ॥ ११५ ॥

[अथ सभेदा आवृत्ति]

[१] अर्थावृत्ति पदावृत्तिरुभयावृत्तिरेव च ।
दीपकस्थान एवेष्टमलंकारत्रयं यथा ॥ ११६ ॥

— —

आवर्त्तन्ते यदज्ञानात् घटीयन्त्रमिवातुरा ।
प्राणिन सोऽहमेवास्मि चिदानन्दमयोऽद्वय. ॥ १ ॥

— —

दीपक निरूप्य क्रमप्राप्त तत्सजातीयम 'आवृत्ति' नामानमलङ्कार प्ररूपयति—'अर्थावृत्ति' इति । 'दीपकस्थाने'=दीपकसम्भवे यत्र दीपक तत्रैवेत्यर्थ , 'अर्थावृत्ति पदावृत्ति, उभयावृत्ति एव च'=एतदुक्तनामकम् अलङ्कारत्रयम् इष्टम्' कविभिरिति शेष ।

[१] तत्र वाक्यान्तर्गतपदप्रतिपाद्यस्य अर्थस्य वाक्यान्तरे तत्समानार्थकपदान्तरश्रवण-

---

[प्र०] [१] कति विधा आवृत्ते ? कानि च तस्या उदाहरणानि ? तस्या तस्या आवृत्त्युदाहरणं तथा सामान्यविशेषलक्षणं शोध्यं ? [उ०] अस्य पृ० ९० । २१, २२

त्मिका पुनः प्रतीतिः 'अर्थावृत्तिः'। अर्थस्य=एकवाक्यार्थस्य वाक्यान्तरे पुनरुपस्थितिरित्यर्थः । पदस्य वाक्यान्तर्गतस्य आवृत्तिः वाक्यान्तरे पुनरुच्चारणं नाम 'पदावृत्तिः'। एवमेकत्रोभयोर्यत्रद्वयोः [अर्थस्य पदस्य च] आवृत्तिः 'उभयावृत्तिः'। एतदलङ्कारत्रयं दीपकस्य विषये एव भवतीति बोध्यम् । एवञ्चात्रापि योगार्थो लक्षणम् ।

परन्तु—दीपके वाक्यान्तरे तत्पदस्य अग्रहणेऽपि वाक्यान्तरसम्बन्धिनः पदस्य अनुषङ्गादिनान्वयः स्थितः आवृत्तौ तु तत्समानार्थकान्यपदस्य तत्पदस्यैव वा पुनरुपादानं भवतीत्युभयोर्विरोधः ॥ ११६ ॥

[अर्थावृत्तेरुदाहरणम्]

विकसन्ति कदम्बानि स्फुटन्ति कुटजद्रुमाः ।
उन्मीलन्ति च कन्दल्यो दलन्ति ककुभानि च ॥ ११७ ॥

अत्र 'अर्थावृत्ति'मुदाहरति—'विकसन्ति' इति । 'कदम्बानि'=नीपाः 'विकसन्ति'=प्रफुल्लन्ति । 'कुटजद्रुमाः'=गिरिमल्लिकाः 'स्फुटन्ति'। 'कन्दल्यः'=गुल्मविशेषाः 'उन्मीलन्ति'। 'ककुभानि च'=अर्जुनाख्य [तत्पुष्पाणीत्यर्थः] 'दलन्ति'=स्फुटन्ति । अत्र 'विकसन्ति' इत्यादीनि पदानि भिन्नभिन्नधातुप्रकृतिकान्यपि समानार्थानीति पुनःपुनस्तस्यैवार्थस्यावृत्तेः 'अर्थावृत्ति'रिति नाम अलङ्कारः । वर्षाकालवर्णनमिदम् ।

'नीपः प्रियककदम्बास्तु हलिप्रिये' 'अथ कुटजः शक्रो वत्सको गिरिमल्लिका' 'नदीसर्जो वीरतरुरिन्द्रद्रुः ककुभोऽर्जुनः' इति चामरः । 'द्रोणपर्णी कन्दली तु भूमिगुल्म- [illegible] ॥ ११७ ॥

[पदावृत्तेरुदाहरणम्]

उत्कण्ठयति मेघानां माला वृन्दं कलापिनाम् ।
यूनाञ्चोत्कण्ठयत्येष मानसं मकरध्वजः ॥ ११८ ॥

[उभयावृत्तेरुदाहरणम्]

जित्वा विश्वं भवानत्र विहरत्यवरोधने ।
विहरत्यप्सरोभिस्ते रिपुवर्गो दिवङ्गतः ॥ ११९ ॥

इत्यावृत्तिगणः

उभयावृत्तिमुदाहरति—'जित्वा' इति । 'अत्र'=भूलोके 'भवान् विश्वं जित्वा'=राजकं वशीकृत्येत्यर्थः 'अवरोधने'=अन्तःपुरवर्गे, 'विहरति'=रमते । 'ते'=तव 'रिपुवर्गः'=शत्रुगणः 'दिवम्'=स्वर्गं 'गतः'=प्राप्तः सन् 'अप्सरोभिः'=देवाङ्गनाभिः 'विहरति' ।

अत्र त्वया शत्रवो हता इति व्यङ्ग्यम्, युद्धे मृतौ सत्यां स्वर्गप्राप्तिरिति सिद्धान्तात् शत्रूणामप्सरोविहारश्चोक्तः । पूर्ववाक्यस्थितस्य एकस्यैव 'विहरति' इति पदस्य पुनरुत्तरवाक्येऽपि आवर्तनाकरणाद् अर्थस्य च समानत्वात् इयं पदतदर्थयोरावर्तनारूपा आवृत्तिः 'उभयावृत्ति'रित्युच्यते ।

इत्यावृत्तिगणः ।

इति दर्शितप्रकारः 'आवृत्ति'नामकालङ्कारस्य ।
गणः भेदः समाप्त इत्यर्थः ॥

'जयदेव प्रभृतिभिस्तु—दीपकस्यैवायं विशेषः स्वीकृतः । तथाहि—

त्रिविधं दीपकावृत्तौ भवेदावृत्तिदीपकम् ।
वर्षत्यम्बुदमालेयं वर्षत्येषा च शर्वरी ॥
उन्मीलन्ति कदम्बानि स्फुटन्ति कुटजोद्गमाः ।
माद्यन्ति चातकास्तृप्ता माद्यन्ति च शिखावलाः ॥

दण्डयभिप्रायमनुसरद्भिः 'अप्पय्यदीक्षितै'स्तु—'एवमावृत्तीनां प्रस्तुताप्रस्तुतोभयविषयत्वाभावेऽपि दीपकच्छायापत्तिमात्रेण दीपकव्यपदेशः' इत्यस्याः स्वातन्त्र्यमेव स्वीकृतम् ॥ ११९ ॥

[अथ—सभेदस्य आक्षेपालङ्कारस्य लक्ष्यलक्षणद्वारा निरूपणम्]

[1] प्रतिषेधोक्तिराक्षेपस्त्रैकाल्यापेक्षया त्रिधा ।
अथास्य पुनराक्षेप्यभेदानन्त्यादनन्तता ॥ १२० ॥

[प्र०] [1] आक्षेपस्य वि लक्षणम् [2] सामान्यनन्तास्य दण्डिसम्मता वनि भेदा तस्य आक्षेपस्योदाहरणानि च मूल [उ०] अस्य पृ० ५० २४ ।

[2] त्रिविधाया आक्षे निदर्शनानि अलङ्कारसर्वस्वेऽद्गुहानि तत्रो द्रष्टव्यानि ग्रन्थविस्तरभिया नैवोदाहृतानि ।

अनिषेध्य निषेध्येषु निषेध्यावधिमाक्षिकम् ।
कालातीत महामाय चिन्तये चिन्मय मह ॥ १ ॥

— —

[illegible]क्रमप्राप्तमाक्षेपालङ्कार निरूपयति—'प्रतिषेधोक्ति' इति । 'प्रतिषेधोक्ति'=प्रतिषेधस्य निषेधस्य उक्ति उक्तिमात्रम् केवल कथनमेव नतु वस्तुत प्रतिषेध स 'आक्षेप'='आक्षेप[illegible]लङ्कार इति लक्षणम् । वस्तुत प्रतिषेधे वैचित्र्याभावादनलङ्कारतेति भाव । '[illegible] आक्षेप' इति तु परमार्थ । सच 'त्रैकाल्यापेक्षया'=वर्त्तमानादित्रिविधकाल-[illegible] 'त्रिधा'=त्रिप्रकारो भवति अर्थात् वर्त्तमानाक्षेप, अतीताक्षेप, [illegible] इति [illegible] त्रिप्रकार आक्षेप । 'अथ अस्य'=प्रतिषेधस्य 'आक्षेप्यभे-[illegible]=[illegible] प्रतिषेध्यानां वस्तूना ये भेदा विशेषा तेषामनन्तत्वात् अनेक-[illegible] '[illegible]'=[illegible] ज्ञेया इति शेष । आक्षेपभेदगणनन्तु कर्त्तु न शक्यत [illegible] । [illegible] 'स्मृतेन'—

'[illegible] प्र[illegible] [illegible]मिति वाक्य वचनमाक्षिप्य ।

सायकरूपे 'पञ्चभि'=पुष्पे=अरविन्दप्रभृतिभि 'विश्वम्'=सकल [ब्रह्माण्ड] जगत् 'व्यजयत=पराजितवान् 'इति=एतत् तस्य विश्वविजयिन 'असम्भाव्यम्'=सम्भावयितुमशक्य विश्वासानर्हमित्यर्थ । 'अथवा वस्तुशक्तय'=सामर्थ्यविशेषा 'विचित्रा'=अनिर्वचनीया सन्तीति शेष । अर्थात् यदसम्भाव्य तदपि अलौकिकवस्तुशक्तिभि सम्भाव्यमिव प्रदर्श्यते ।

अय भाव —अत्र विजेता अनङ्ग । विजेतुरेवानङ्गत्व तावदसम्भाव्य नहि कश्चिदङ्गरहितोपि जयी स्यात, तत्रापि बाणाना पञ्चत्व पुष्पमयत्व सर्वथाऽसम्भवि, जेतव्यश्च विश्वोपि ससार इत्यहो ऽसम्भाव्यपरम्परा, तथापि वस्तुशक्तिरूपविशेषाभिधानेच्छयोपनिबद्धत्वादस्य प्रतिषेधस्य आक्षेपालङ्कारता ज्ञेया । इत्यञ्च 'विशेषमभिधित्सयेष्टस्य य प्रतिषेधः स आक्षेप' इत्याक्षेपलक्षण निष्कृष्टम्भवति । 'व्यजयत' इति 'विपराभ्यां जे' [१ । ३ । १९] इति पाणिनिसूत्रेण व्युपसृष्टात् 'जि धातोरात्मनेपदम् । लङि प्रथमपुरुषैकवचने रूपम् ॥ १२१ ॥

[उक्तोदाहरणे वृत्ताक्षेपस्वरूपसङ्गमनम्]

इत्यनङ्गजयायोगबुद्धिर्हेतुबलादिह ।
प्रवृत्तैव यदाक्षिप्ता 'वृत्ताक्षेप' स ईदृश ॥ १२२ ॥

उक्तोदाहरणे वृत्ताक्षेपस्य लक्षण घटयित्वा दर्शयति—'इति' इति । 'इति'=उक्तेन प्रकारेण 'प्रवृत्ता'=जाता अनङ्गजयायोगबुद्धि'=अनङ्गजयस्य कामजेतृत्वस्य अयोग सम्बन्धाभाव तस्य बुद्धि असम्भाव्यताज्ञानम् 'हेतुबलात्'=वस्तुशक्तिरूपोपपत्तिबलात् 'यत् आक्षिप्ता'=प्रतिषिद्धा अत 'स ईदृश'=प्रसिद्ध 'वृत्ताक्षेप,=वृत्ताक्षेप इति नाम आक्षेपभेद इत्यर्थ ॥ १२२ ॥

[वर्त्तमानाक्षेपस्योदाहरणम्]

कुत कुवलयं कर्णे करोषि कलभाषिणि !
किमपाङ्गमपर्याप्तमस्मिन् कर्मणि मन्यसे ॥ १२३ ॥

वर्त्तमानाक्षेपमुदाहरति—'कुत' इति । हे ! 'कलभाषिणि'=मधुरालापिनि ! [प्रिये !] 'कुत'=कस्मात् हेतो 'कर्णे'=श्रोत्रे 'कुवलयम्'=इन्दीवर 'करोषि'=धत्से । 'अस्मिन् कर्मणि'=कर्णशोभारूपे व्यापारे 'अपाङ्गम्'=कटाक्ष नेत्रप्रान्तभागम् 'किम् अपर्याप्तम्'=असमर्थम 'मन्यसे'=भावयसे, अर्थात् अपाङ्गेनैव कर्णशोभाया सम्पन्नत्वात् व्यर्थमेते कुवलयधारणप्रयास ॥ १२३ ॥

अरविन्दमशोकञ्च चूतञ्च नवमल्लिका ।
नीलोत्पलञ्च पञ्चैते पञ्चबाणस्य सायका ॥ इति ।

[उक्ते लक्ष्ये वर्त्तमानाक्षेपसङ्गमनप्रकारः]

स वर्त्तमानाक्षेपोऽयं कुर्वत्येवासितोत्पलम् ।
कर्णे काचित् प्रियेणैवं चाटुकारेण रुध्यते ॥ १२४ ॥

वर्त्तमानाक्षेपं घटयित्वा दर्शयति 'स' इति । 'असितोत्पलम्' कर्णे कुर्वती एव [न तु कृतवती न वा करिष्यन्ती] 'काचित्'=नायिका 'प्रियेण'=कान्तेन 'चाटुकारेण'=नर्मवादिना 'एवम्'=उपरितनरीत्या । 'रुध्यते'=प्रतिषिध्यते, अतो हेतोः वर्त्तमानस्य कुवलयधारणस्याक्षेपात् 'स अयम्'=सुप्रसिद्धः 'वर्त्तमानाक्षेपः' इत्युच्यते इति भावः ॥ १२४ ॥

[भविष्यदाक्षेपनिरूपणम्]

सत्यं ब्रवीमि न त्वं मां द्रष्टुं वल्लभ ! लप्स्यसे ।
अन्यचुम्बनसंक्रान्तलाक्षारक्तेन चक्षुषा ॥ १२५ ॥
सोऽयं 'भविष्यदाक्षेपः' प्रागेवातिमनस्विनी ।
कदाचिदपराधोऽस्य भावीत्येवमरुन्ध यत् ॥ १२६ ॥

धर्माक्षेपोयमाक्षिप्तमङ्गनागात्रमार्दवम् ।
कामुकेन यदत्रैवं कर्मणा तद्विरोधिना ॥ १२८ ॥

आक्षेपस्य स्थूल भेदत्रयमुक्त्वा तद्भेदानामनन्तत्वादपि शिष्यबुद्धिवैशद्याय कतिपयानपरानपि भेदान् निरूपयितुकाम प्रथम 'धर्माक्षेप' दर्शयति—'तव इति द्वाभ्याम् । हे ! तन्वङ्गि !=कोमलशरीरे ! 'तव अङ्गेषु'=अवयवेषु 'मार्दवम्'=मृदोर्भाव कोमलता 'रूटम्' = स्थितम् इति 'मिथ्या एव'=मृषैव। 'यदि सत्यम्'=अर्थतत् सत्यम् अर्थात् तव-अङ्गानि 'मृदूनि एव'=कोमलानि एव [सन्ति] तदा 'अकाण्डे'=अनवसरे निष्कारणम् 'मां किं रुजन्ति'=किमर्थं सन्तापयन्ति। 'मां रुजन्ति' इति। 'रुजो' भङ्गे। तौदादिक । नात्र भाववचनत्वम्, तथासति 'चोरस्य रुजति रोग ' इतिवत् 'रुजार्थानां भाववचनानामज्वरे' [२ । ३ । ५४] इति धात्वर्थस्य भावकर्तृकत्वे कर्मणि शेषे शष्ठी स्यात्। ततश्च अशेषविवक्षाया कर्मणि नित्य द्वितीयैव 'चोरं रुजति, नदी कुलानि रुजति इत्यादिवद् इदमुक्तसूत्रस्य प्रत्युदाहरण बोध्यम्। 'मार्दवम्' इति। 'पृथ्वादिभ्य इ मनिज्वा' [५ । १ । १२२] अत्र सूत्रे वावचनमणादिसमावेशार्थमित्युक्तम्। अत पक्षे भावेऽण्। पक्षान्तरे 'म्रदिमा' इति ज्ञेयम्।

लक्षणमभिनीय दर्शयति—'धर्माक्षेप' इति । 'अत्र'=उक्ते काव्ये 'कामुकेन'= नायकेन 'अङ्गनागात्रमार्दवम्'=नायिकावयवसौकुमार्यम् 'तद्विरोधिना कर्मणा'=मार्दवप्रतिद्वन्द्विभूतया तापदानक्रियया 'आक्षिप्तम्'=प्रतिषिद्धम् अतोऽस्य मार्दवरूपस्य धर्मस्याक्षेपात् 'धर्माक्षेप' इति नाम आक्षेपभेद इति निर्गलितोऽर्थ । १२७, १२८ ॥

[धर्म्याक्षेपोदाहरणम्]

सुन्दरी सा न वेत्येष विवेक केन जायते ।
प्रभामात्रं हि तरलं दृश्यते न तदाश्रय. ॥ १२९ ॥

'धर्म्याक्षेपम् उदाहरति—'सुन्दरी' इति। 'सा'=प्रसिद्धा नायिका 'सुन्दरी नवा, इति एष विवेक '=उक्ताकारो निर्णय 'केन'=कथ 'जायते' = सम्भवति कथमपि न जायत इत्यर्थ । अत्रोपपत्तिमाह—'हि' इति। हि'=यत 'तरलम्'=चपल समन्तात् प्रसरत् 'प्रभामात्रम'=दीप्तिमात्रम् 'दृश्यते =आलोक्यते 'न तदाश्रय '=तस्या प्रभाया आश्रय अधिकरण नायिकाग्य नैव [दृश्यते] दृग्गोचरीक्रियते इत्यर्थ ॥ १२९ ॥

[धर्म्याक्षेपलक्षणम्]

धर्म्याक्षेपोऽयमाक्षिप्तो धर्मी धर्म प्रभाह्वयम् ।
अनुज्ञायैव यद्रूपमत्याश्चर्यं विवक्षता ॥ १३० ॥

धर्म्याक्षेपस्वरूपमुक्ते काव्ये घटयितुमाह—'धर्म्याक्षेप इति । [उक्ते पद्ये] 'अत्याश्चर्यम्'=अद्भुततमम 'रूपम्'=स्वरूप नायिकाया सौन्दर्यम् 'विवक्षता'=वक्तुमिच्छता नायकेन 'प्रभाह्वयम्'=प्रभाख्यम 'धर्मम्'=आश्रयम 'अनुज्ञाय एव'= स्वीकृत्यैव 'यद =

'धर्मी'=नायिकाऽत्र 'आक्षिप्त'=प्रतिषिद्ध. 'तस्मात्'=धर्मिभूतनायिकाप्रतिषेधाद् अयं 'धर्म्याक्षेप' इति नामालङ्कार उक्तो भवति । यथा वा ममापि अपह्नुतिमूलोत्प्रेक्षास्थले धर्म्याक्षेपध्वनि ।

सुन्दरीति मुधालोका वदन्ति मतिविह्वला ।
तरन्नेव प्रभा नून पुञ्जीभूता विभाति मे ॥ इति ॥

[मदीयकाव्यलतिकायाम्]

अपह्नुतिमूलोत्प्रेक्षया धर्म्याक्षेपालङ्कारध्वनि ॥ १३० ॥

[कारणाक्षेपोदाहरणम्]

चक्षुषी तव रज्येते स्फुरत्यधरपल्लवः ।
भ्रुवौ च भुग्नौ न तथाप्यदुष्टस्यास्ति मे भयम् ॥ १३१ ॥

[कार्याक्षेपोदाहरणम्]

दूरे प्रियतमः सोऽयमागतो जलदागमः ।
दृष्टाश्च फुल्ला निचुला न मृता चास्मि किं न्विदम् ॥ १३३ ॥

'कार्याक्षेपम्' उदाहरति—'दूरे' इति । 'प्रियतमः'=प्रेयान् 'दूरे' वर्त्तते इति शेषः । 'सः अयम्'=ग्रैष्मसन्तापहारकत्वेन प्रसिद्धः 'जलदागमः'=प्रावृट्कालः 'आगतः'=समुपस्थितः 'फुल्लाः'=विकसिताः 'निचुलाः च'=स्थलवेतसाः [अपि] 'दृष्टाः'=मया दृग्गोचरतां नीताः तथापि अहं 'न मृता अस्मि'=एतादृशवर्षाकालस्य कामोद्दीपकत्वात् मम ... तस्या सहैव दशम्या दशाया भाव्यम् [अत आह] 'किं नु इदम्'=नितान्तमसम्भाव्यमेतदापतितमित्यर्थः ॥ १३३ ॥

[लक्ष्ये कार्याक्षेपसङ्गमनम्]

कार्याक्षेपः स कार्यस्य मरणस्य निवर्त्तनात् ।
तत्कारणमुपन्यस्य दारुणं जलदागमम् ॥ १३४ ॥

उक्ते वाक्ये कार्याक्षेपस्वरूपं घटयति—'कार्याक्षेपः' इति । [अत्रोक्ते काव्ये] 'दारुणम्'=भयकरम् 'तत्कारणम्'=मरणकारणं जलदागमरूपम् 'उपन्यस्य'=प्रतिपाद्य 'मरणस्य कार्यस्य'=मृतिरूपस्य कार्यस्य 'निवर्त्तनात्'=निषेधात् 'सः' प्रसिद्धः 'कार्याक्षेपः'=कार्यप्रतिषेधहेतुकः आक्षेपः 'कार्याक्षेप'नामालङ्कारो ज्ञेयः । अत्र विशेषोक्तिरपि । तथाहि—

> कार्याजनिर्विशेषोक्तिः सति पुष्कलकारणे ।
> हृदि स्नेहक्षयो नाभूत् स्मरदीपे ज्वलत्यपि ॥ [जयदेवः]

नचोभयोर्लक्षणसाङ्कर्यमिति वाच्यम् उपधेयसङ्करेऽपि उपाधेरसाङ्कर्यात् । इदमुक्तं भवति—यत्र प्रसिद्धकारणसत्त्वे कार्याभाववर्णनं तत्र कार्याक्षेपः, अप्रसिद्धकारणसत्त्वे फलाभाववर्णनं 'विशेषोक्ति'रित्यनयोरस्तु विशेषः, परमयमस्पष्ट एवेति विवक्षैवोभयसम्भेदे बीजमिति ममाभाति ।

> अनुरागवती सन्ध्या दिवसस्तत्पुरःसरः ।
> अहो दैवगतिश्चित्रा तथापि न समागमः ॥

इत्यादावपि तथादर्शनादिति दिक् ॥ १३४ ॥

[अनुज्ञाक्षेपोदाहरणम्]

न चिरं मम तापाय तव यात्रा भविष्यति ।
यदि यास्यसि यातव्यमलमाशङ्कयात्र मे ॥ १३५ ॥

'अनुज्ञाक्षेपम्' उदाहरति—'न चिरम्' इति । 'यात्रा' = प्रवासः दिदेशगमनम् 'मम' मत्कृते

---

[1] ... [illegible]

'चिरम्' चिरकालपर्यन्तं 'तापाय'=क्लेशाय 'न भविष्यति' = तव वियोगेन मम प्राणानां शीघ्रमेव निर्गमनादिति तात्पर्यम् । हे ! स्वामिन् !] 'यदि यास्यसि'=प्रवासं करिष्यसि तदा 'गन्तव्यम्'=त्वं याहीत्यर्थः । 'अत्र'=अस्मिन् मद्विषये 'आशङ्कया अलम्'=मयि प्रेम्णि कथमेव स्थास्यतीति आशङ्का न कार्या [अत्र 'न चिरं मम तापाय' इत्युक्त्या स्वमरणस्य सूचनेन गमननिषेधो गर्भीकृतः । अतोऽस्मद्भावनया त्वयम् ..'अनुज्ञाभा-सेऽस्ति' इति वक्तव्यं स्यात्, एवम्—भविष्यदाक्षेपसाङ्कर्यं न भविष्यति । यद्वा फले न भविष्यति इति गमनानुज्ञानमेवास्तु । १३५ ॥

[अनुज्ञाक्षेपनामकम्]

इत्यनुज्ञामुखेनैव कान्तस्याक्षिप्यते गतिः ।
मरणं सूचयन्त्यैव सोऽनुज्ञाक्षेप उच्यते ॥ १३६ ॥

[लक्ष्ये प्रभुत्वाक्षेपसङ्गमनम्]

इत्याचक्षाणया हेतून् प्रिययात्रानुबन्धिन ।
प्रभुत्वेनैव रुद्धस्तत् प्रभुत्वाक्षेप उच्यते ॥ १३८ ॥

एतद् घटयति—'इति' इति। 'इति'=एवमुक्तप्रकारे पद्ये 'प्रिययात्रानुबन्धिन '=प्रियस्य वल्लभस्य यात्रा विदेशगमनम् तदनुबन्धिन तदनुकूलान् 'हेतून्'=कारणानि 'आचक्षाणया'=कथयन्त्या [कयाचित् स्वाधीनभर्तृकया] यत् 'प्रभुत्वेन एव'=स्वायत्ततयैव 'प्रिय =वल्लभ 'रुद्ध'=यात्रातो निवारित 'तत्'=तस्माद् हेतो [एष] प्रभुतानिमित्तकत्वाद् आक्षेपस्य 'प्रभुत्वाक्षेप '=इतिनाम आक्षेप 'उच्यते' सूरिभिरिति शेष ।

[अनादराक्षेपस्योदाहरणम्]

जीविताशा बलवती धनाशा दुर्बला मम ।
गच्छ वा तिष्ठ वा कान्त ! स्वावस्था तु निवेदिता ॥१३९॥

'अनादराक्षेपम् उदाहरति—'जीविताशा' इति । हे ! कान्त !=प्रिय ! 'मम जीविताशा'=जीवनकामना 'बलवती =प्रबला बहुकाल जीवितु कामये 'धनाशा'=धनकामना तु 'दुर्बला'=क्षीणैव 'त्वयि प्रोषिते धनलाभो भवेत् इत्याकाङ्क्षा मम नास्ति इति भाव । [अत कारणात्] 'गच्छ वा तिष्ठ वा'=यथेच्छसि तथा कुर्वित्यर्थ 'स्वावस्था तु निवेदिता'=स्वाभिप्रायो मयाऽऽविष्कृत एव । विदेश गते त्वयि मरिष्यामीति वस्तुध्वनि ॥ १३९ ॥

[लक्ष्ये अनादराक्षेपस्य सङ्गमनम्]

असावनादराक्षेपो यदनादरवद्वच ।
प्रियप्रयाणं रुन्धत्या प्रयुक्तमिह रक्तया ॥ १४० ॥

अत्र अनादराक्षेप घटयति—'असौ' इति । 'इह'=उक्ते काव्ये 'प्रियप्रयाण'=स्ववल्लभविदेशगमन 'रुन्धत्या'=प्रतिषेधन्त्या 'रक्तया'=अनुरागवत्या कयाचिन्नायिकया यत् 'अनादरवत्'='गच्छ वा तिष्ठ वा' इत्यनास्थासूचक 'वच '=वाक्यम् 'प्रयुक्तम् =उक्तम् तत् असौ अनादरनिमित्तत्वादाक्षेपस्य 'अनादराक्षेप ' = इति भण्यते कविभि इति शेष ॥ १४० ॥

[आशीर्वचनाक्षेपस्योदाहरणम्]

गच्छ गच्छसि चेत् कान्त ! पन्थान सन्तु ते शिवा ।
ममापि जन्म तत्रैव भूयाद यत्र गतो भवान् ॥ १४१ ॥

आशीर्वचनाक्षेपम उदाहरति—'गच्छ' इति । हे ! कान्त !'= चेत्'=यदि 'गच्छसि =यासि विदेशम् [तर्हि] गच्छ' = याहि 'ते = तव 'पन्थान = मार्गा

गुप्तानिर्गर्भितो यस्या पार्श्वान प्रिय ।
सा सोग्गुणग्रस्ता गदेनदानिवर्तक ॥

'शिवा' = कल्याणकारिण्य' निष्प्रत्यूहा 'सन्तु' = भवन्तु । 'यत्र भवान् गत ममापि जन्म तत्रैव भूयात्' [इत्याशासे] इत्याशी । तव गमनोत्तरमेव मृता भविष्यामीति व्यङ्ग्यम् ॥ १४१ ॥

[लक्ष्ये आशीर्वचनाक्षेपस्वरूपयोजनम्]

इत्याशीर्वचनाक्षेपो यदाशीर्वादवर्त्मना ।
स्वावस्थां सूचयन्त्यैव कान्तयात्रा निषिध्यते ॥ १४२ ॥

उक्ते पद्ये आशीर्वचनाक्षेपलक्षणं योजयति—'इति' इति । 'इति' उक्तप्रकारे पद्ये 'आशीर्वादवर्त्मना'=आशीर्वादप्रकाशनमार्गेण अर्थात् 'तव पन्थानः शिवाः सन्तु' इत्यालपनद्वारा, किंवा प्रियार्थस्य प्राप्तीच्छारूपा आशंसा आशीः तस्य वादः ममापीत्याद्युत्तरवाक्येन यत् कथनम् तद्द्वारा 'स्वावस्थाम्'=भविष्यमरणात्मिकां दशां 'सूचयन्त्या'=प्रकाशयन्त्या कयाचित् कान्तया 'कान्तयात्रा'=कान्तस्य यात्रा प्रवासगमनं यत् निषिध्यते सोऽयम् 'आशीर्वचनाक्षेपः' ज्ञेय इति शेषः । स्वाभीष्टाशंसनपूर्वक आक्षेपः 'आशीर्वचनाक्षेपः' इत्यर्थः । यद्यत्र विधिर्वाच्यः तथापि निषेधो व्यङ्ग्यः ॥ १४२ ॥

[परुषाक्षेपस्योदाहरणम्]

यदि सत्यैव यात्रा ते काप्यन्या मृग्यतां त्वया ।
अहमद्यैव रुद्धास्मि रन्ध्रापेक्षेण मृत्युना ॥ १४३ ॥

'परुषाक्षेपम् उदाहरति—'यदि' इति । 'यदि ते यात्रा'=प्रदेशगमनं प्रयाणमिति यावत् 'सत्या एव' [तदा] त्वया कापि 'अन्या'=कान्ता 'मृग्यताम्'=गवेष्यताम् । 'अहम्' [पुनः] 'अद्य एव रन्ध्रापेक्षेण'=छिद्रान्वेषणशीलिना मृत्युना 'रुद्धा'=आक्रान्ता 'अस्मि'=भवामि । अचिरं मे मृत्युर्भावीति व्यङ्ग्यम् ॥ १४३ ॥

[परुषाक्षेपस्य लक्ष्ये योजनम्]

इत्येष परुषाक्षेपः परुषाक्षरपूर्वकम् ।
कान्तस्याक्षिप्यते यस्मात् प्रस्थानं प्रेमनिघ्नया ॥ १४४ ॥

परुषाक्षेपं लक्ष्ये योजयति—'इति' इति । 'इति'=दर्शितप्रकारवति काव्ये 'प्रेमनिघ्नया'=प्रेमपरवशया कयाचित् कान्तया 'परुषाक्षरपूर्वकम्'=कठोरवर्णवचनपूर्वकं यस्मात् 'कान्तस्य प्रस्थानम्'=विदेशगमनं 'आक्षिप्यते'=निषिध्यते अतो हेतोः 'एष परुषाक्षेपः'=अयं परुषाक्षरवचनाक्षेपरूपक आक्षेपो ज्ञातव्य इत्यर्थः ॥ १४४ ॥

[साचिव्याक्षेपस्योदाहरणम्]

गन्ता चेद् गच्छ तूर्णं ते कर्णौ यान्ति पुरा रवाः ।
आर्तबन्धुमुखोद्गीर्णाः प्रयाणपरिपन्थिनः ॥ १४५ ॥

आर्त्तानां मन्मृत्युना शोकपीडितानां बन्धूनां सम्बन्धिनां भ्रातृपुत्रादीनां मुखेन उद्गीर्णा उच्चारिता 'प्रयाणपरिपन्थिन'=प्रस्थानप्रतिकूला 'रवा'=मदीयमरणद्योतना वर्णा मरणोत्तरमवश्यम्भावीनि रोदनवचांसीत्यर्थ 'ते'तव 'कर्णौ'=श्रुती 'पुरा यान्ति'=यास्यन्ति निश्चयेन तव कर्णविषया भविष्यन्ति । 'यावत्पुरानिपातयोर्लट्' [३ । ३ । ४] इति सूत्रेण 'पुरा' योगे भविष्यति लट् । निपातश्चाय निश्चय द्योतयति ॥ १४५ ॥

[साचिव्याक्षेपस्य लक्ष्ये योजनम्]

साचिव्याक्षेप एवैष यदत्र प्रतिषिध्यते ।
प्रियप्रयाणं साचिव्यं कुर्वत्येवानुरक्तया ॥ १४६ ॥

उक्तोदाहरणे साचिव्याक्षेप योजयति—'साचिव्याक्षेप' इति । 'अत्र' उक्तपद्ये 'अनुरक्तया'=प्रियानुरागवत्या कयापि नायिकया 'साचिव्यम्'='तूर्णं गच्छ' इति साहाय्यम् 'कुर्वत्या एव'=व्यञ्जयन्त्या एव 'यत् प्रियप्रयाणम्'=वल्लभविदेशगमनम् 'प्रतिषिध्यते'=आक्षिप्यते स्वमरणद्योतनेन निवार्यते इति यावत् 'स एष' साचिव्याक्षेप'=साहाय्यसूचननिमित्तकत्वादाक्षेपस्य तथामञ्ज्ञक आक्षेप सुप्रसिद्ध इत्यर्थ ॥ १४६ ॥

[यत्नाक्षेपस्योदाहरणम्]

गच्छेति वक्तुमिच्छामि त्वत्प्रियं मत्प्रियैषिणी ।
निर्गच्छति मुखाद्वाणी मागा इति करोमि किम् ॥ १४७ ॥

'यत्नाक्षेपम्' उदाहरति—'गच्छ' इति । 'त्वत्प्रियम्'=त्वदिष्टम् 'गच्छ इति'=वाक्य 'वक्तुमिच्छामि' [किन्तु] 'मुखात्'=ममास्यात् 'मा गा इति'=मा याहीत्येवमाकारा मत्प्रियैषिणी वाणी निर्गच्छति'=मदीयहितकारिणी वाक् नि सरति इत्यहम् 'किं करोमि'=किं कुर्याम । गृहे तवावस्थानमेव ममेष्टमिति सर्वथा मागा इति व्यञ्जयम ॥ १४७ ॥

[यत्नाक्षेपस्य लक्ष्ये सङ्गमनम्]

यत्नाक्षेप स यदस्य कृतस्यानिष्टवस्तुनि ।
विपरीतफलोत्पत्तेरानर्थक्योपदर्शनात् ॥ १४८ ॥

यत्नाक्षेपस्वरूपमुक्तो लक्ष्ये योजयति 'यत्नाक्षेप'=इति । 'अनिष्टवस्तुनि'=गच्छेतिगमनविधिरूपे स्वानभिलषितेऽथ 'कृतस्य यत्नस्य'=वचनोद्यमरूपस्य 'विपरीतफलोत्पत्ते'=विपरीतम अनिष्ट यत फल 'मागा इति वारणानि मरणरूप तस्योत्पत्ते हेतो 'आनर्थक्योपदर्शनात्' = अनर्थसम्भावनाव्यञ्जनात यत् प्रवासगमनमाक्षिप्तम सोय यत्नमूलक आक्षेप यत्नाक्षेप इत्युच्यते इति शेष ॥ १४८ ॥

[परवशाक्षेपस्योदाहरणम्]

क्षणं दर्शनविघ्नाय पक्ष्मस्पन्दाय कुप्यत ।
प्रेम्ण प्रयाण त्वं ब्रूहि मया तस्येष्टमिष्यते ॥ १४९ ॥

'परवशाक्षेपम् उदाहरति—'क्षणं' इति । प्रस्थानेऽनुज्ञां प्रार्थयमान नायिकम्प्रति

कास्याग्निवृत्किरियम् । [हे ! प्रिय !] 'क्षण दर्शनविघ्नाय'=क्षणमभिव्याप्य दर्शनस्य विघ्नाय प्रतिबन्धकारिणे पक्ष्मस्पन्दाय पक्ष्मणां चक्षुलोम्नां स्पन्द किञ्चिचलनं तस्मै 'कुप्यत'=कोप कुर्वाणस्य अर्थात् नेत्रलोम्ना स्पन्दनमप्यसहमानस्य 'प्रेम्ण'=प्रियतायाः प्रणयादित्यर्थ 'प्रयाणम्'=प्रस्थानसम्मतिं 'ब्रूहि'=प्रार्थयेथा 'मया तस्य'=प्रेम्ण 'इष्टम्'=अनुकूलम् 'इष्यते'=काम्यते ।

त्वं यात्रार्थमनुज्ञां प्रार्थयसे अहञ्च प्रेमपरवशा, यदि तस्यानुज्ञा [प्रेम्ण आज्ञा] स्यात् कामं त्वं याहीति भाव ॥ १४६ ॥

[परवशाक्षेपसङ्क्रमनम्]

सोऽयं परवशाक्षेपो यत्प्रेमपरतन्त्रया ।
तया निषिध्यते यात्रेत्यन्यार्थस्योपदर्शनात् ॥ १५० ॥

उन्मोदाहरणे परवशाक्षेपस्वरूप योजयति—'सोऽयम्' इति । अत्र 'अन्यार्थस्योपदर्शनात्'=प्रेमानुज्ञारूपस्यार्थस्य कथनात् 'यात्रा'=प्रियस्य प्रवासगमनम् 'प्रेमपरतन्त्रया'=अनुरागपरवशया कयाचित् नायिकया यत् 'निषिध्यते'=आक्षिप्यते 'स अयम्'=अलङ्कारविशेष प्रेम्ण परवशतापूर्वकत्वादाक्षेपस्य 'परवशाक्षेप' ज्ञेय इति शेष ॥ १५० ॥

[उपायाक्षेपस्योदाहरणम्]

सहिष्ये विरहं नाथ ! देह्यदृश्याञ्जनं मम ।
यदक्तनेत्रां कन्दर्प प्रहर्त्ता मां न पश्यति ॥ १५१ ॥

[रोषाक्षेपस्योदाहरणम्]

प्रवृत्तैव प्रयामीति वाणी वल्लभ ! ते मुखात् ।
अयतापि त्वयेदानीं मन्दप्रेम्णा ममास्ति किम् ॥ १५३ ॥

'रोषाक्षेपम्' उदाहरति—'प्रवृत्ता' इति । [हे !] 'वल्लभ !'='ते'=तव 'मुखात्'=वक्त्रात् 'प्रयामि'=प्रतिष्ठे अहं प्रस्थानं करोमि 'इति'=एवमाकारा 'वाणी'=वाक् 'प्रवृत्ता एव'=निर्गता एव । [एवंविधे प्रेम्णि एतादृशाया वाण्या निर्गमनं ते मन्दप्रेमाणं द्योतयति अर्थात् भवान् शिथिलानुरागः सम्पन्न इति व्यङ्ग्यम्] । इदानीम्'=सम्प्रति त्वया 'मन्दप्रेम्णा'=मन्दानुरागेण 'अयता अपि' = अगच्छता अपि 'मम किम् अस्ति'= न किञ्चित् प्रयोजनमस्तीति भाव ।

'अयता' इति 'इण् गतौ इत्यत्र प्रश्लिष्टात् भौवादिकात् 'इ' धातौ शतृप्रत्यये रूपम् ॥ १५३ ॥

[रोषाक्षेपस्य लक्ष्ये योजनम्]

रोषाक्षेपोऽयमुद्रिक्तस्नेहनिर्यन्त्रितात्मना ।
संरब्धया प्रियारब्धं प्रयाणं यन्निषिध्यते ॥ १५४ ॥

उक्तमाक्षेप लक्ष्ये योजयति—'रोषाक्षेप' इति । 'उद्रिक्तस्नेहनिर्यन्त्रितात्मना'= उद्रिक्त समेधमान अतिशयितो यः स्नेह प्रेमा तेन निर्यन्त्रित निगडित बद्ध आत्मा हृदय यस्या सा तया तथाभूतया 'संरब्धया'=[प्रणय] कोपवत्या कयाचित् व्यञ्जनचतुर-धुरीणया नायिकया 'प्रियारब्धम्'=वल्लभोपक्रान्तम् 'प्रयाणम्'=प्रस्थान 'यत् निषिध्यते'= आक्षिप्यते अर्थात् गमनोद्यमभङ्ग क्रियते 'स अयम्'=कविसमाजप्रसिद्ध 'रोषाक्षेप'= रोषनिमित्तत्वादाक्षेपस्य उक्तसंज्ञ आक्षेपालङ्कारो ज्ञेय ॥ १५४ ॥

[मूर्च्छाक्षेपस्योदाहरणम्]

मुग्धा कान्तस्य यात्रोक्तिश्रवणादेव मूर्च्छिता ।
बुद्धा वक्ति प्रियं दृष्ट्वा किं चिरेणागतो भवान् ॥ १५५ ॥

'मूर्च्छाक्षेपम्' उदाहरति—'मुग्धा' इति । 'मुग्धा'=ऋजुप्रकृति 'कान्तस्य यात्रोक्तिश्रवणात् एव'=प्रियस्य प्रस्थानवचनाकर्णनात् एव 'मूर्च्छिता'=मोह गता । 'बुद्धा'=पुन प्राप्तसंज्ञा सती [चैतन्यमागता] 'प्रियम्'=कान्तम 'दृष्ट्वा'=विलोक्य 'किम् भवान् चिरेण आगत'=एतावद्विलम्ब विधाय आयातोऽसि इति 'वक्ति'=जल्पति । मलायवात्यस्तिकायान्तु—

यामीति वच श्रुत्वा प्रियस्य प्रेमविह्वला ।
मूर्च्छामाप पुन. संज्ञां लब्ध्वा नोवाच किञ्चन ॥

मुग्धालक्षणमुक्तं दर्पणे विश्वनाथेन—

प्रथमावतीर्णयौवनमदनविकारा रतौ वामा ।
कथिता मृदुश्च माने समधिकलज्जावती 'मुग्धा' । इति ॥ १५५ ॥

इत्यत्र आक्षेपध्वनिः ॥ १५५ ॥

[मूर्च्छाक्षेपस्य सङ्गमनम्]

इति तत्कालसम्भूतमूर्च्छयाऽऽक्षिप्यते गतिः ।
कान्तस्य कातराक्ष्या यन्मूर्च्छाक्षेपः स उच्यते ॥१५६॥

उक्तमाक्षेपं लक्ष्ये घटयति—'इति' इति । 'इति' = उक्तप्रकारवति काव्ये 'तत्काल-सम्भूतमूर्च्छया' तत्काले तस्मिन् कान्तगमनाकर्णनसमये सम्भूता सम्यक् जाता मूर्च्छा विचेतनत्वं यस्याः सा तया 'कातराक्ष्या' = कातरे भाविविरहखेदविह्वले अक्षिणी यस्याः तया मुग्धया नायिकया 'यत् कान्तस्य' = स्वप्रियस्य 'गतिः' प्रयाणम् 'आक्षिप्यते'= निषिध्यते 'सः' ईदृशः प्रसिद्धः कविषु उक्तकाव्योपनिबद्धः 'मूर्च्छाक्षेपः=मूर्च्छानिमित्तक आक्षेपः मूर्च्छाक्षेपालङ्कार इति वर्त्तुलोऽर्थः ॥ १५६ ॥

[अनुक्रोशाक्षेपस्योदाहरणम्]

नाघ्रातं न कृतं कर्णे स्त्रीभिर्मधुनि नार्पितम् ।
त्वद्द्विषां दीर्घिकास्वेव विशीर्णं नीलमुत्पलम् ॥ १५७ ॥

अनुक्रोशाक्षेपम् उदाहरति—'न' इति [हे ! राजन् !] 'त्वद्द्विषाम्'=तव वैरिणाम् 'स्त्रीभिः'= नारीभिः 'नीलम् उत्पलम्'=इन्दीवरम् 'न आघ्रातम्'=न सुग-[illegible], 'न [illegible] कृतम्'=[illegible]ऽपि नावतंसीकृतम्, 'मधुनि'=मद्येऽपि च 'न अर्पितम्'= [illegible] क्षिप्तम् किन्तु केवलं तत् 'दीर्घिकासु एव'=वापीषु एव 'विशीर्णम्'= [illegible] ।

[illegible] शत्रूणां पलायनकरणात् तेन [नीलोत्पलेन] व्यवहारा-[illegible] जातम् । अत्र राजविषयकरतिभावो व्यङ्ग्यः ॥ १५७ ॥

[अनुक्रोशाक्षेपस्य लक्ष्ये सङ्गमनम्]

असावनुक्रोशाक्षेपः सानुक्रोशमिवोत्पले ।
व्यावर्त्य कर्म तद्योग्यं शोच्यावस्थोपदर्शनात् ॥ १५८ ॥

श्लिष्टाक्षेपम्' उदाहरति—'अमृतात्मनि' इति [हे ! प्रिये !] 'अमृतात्मनि = अमृतस्य [पीयूषस्य] इव आत्मा [स्वरूप स्वभावो] वा यस्य पराह्लादकारिणि इत्येकोर्थ । अपरत्र—अमृत जलम् आत्मा यस्य स तस्मिन् जलमये इत्यर्थ । 'पद्मानां द्वेष्टरि'=कोमलतासुन्दरतादिगुणातिरेकात्पराजयकर्त्तरि, अन्यत्र सङ्कोचकारित्वात् द्वेषिणि । 'स्निग्धतारके'=स्निग्धे सस्नेहे तारके अक्षिकनीनिके यस्य तथाभूते, अपरत्र स्निग्धा प्रेम-विषया तारका अश्विनीभरणीप्रभृतयो यस्य तास्मिन् एवंविधविशेषणविशिष्टे 'तव मुखेन्दौ'=मुखमेवेन्दु तास्मिन् सति 'अपरेण'=गगनस्थेन 'इन्दुना'=शशिना किम् ? न किञ्चित्प्रयोजनमस्तीति भाव ॥ १५६ ॥

[श्लिष्टाक्षेपस्य सङ्गमनम्]

इति मुख्येन्दुराक्षिप्तो गुणान् गौणेन्दुवर्त्तिन ।
तत्समान् दर्शयित्वेह श्लिष्टाक्षेपस्तथाविधः ॥ १६० ॥

उक्तमाक्षेप लक्ष्ये योजयति—'इति' इति । 'इति'=अमुना दर्शितप्रकारेण [उक्त-काव्ये] 'गौणेन्दुवर्त्तिन '=गौणश्चासाविन्दुश्च अर्थात् गौणलक्षणया आरोपित इन्दुभावो-यस्मिन् तादृशे मुखे विद्यमानान् तत्समान्'=मुख्येन्दुसदृशान् अमृतात्मत्वादीन् गुणान् 'दर्शयित्वा'=स्पष्टयित्वा 'इह यत मुख्येन्दु '=चन्द्र 'आक्षिप्त '=प्रयोजनशून्यत्वेन प्रतिपिद्ध सोयम् 'तथाविध '=तादृश 'श्लिष्टाक्षेप '=श्लेषहेतुकत्वात् श्लिष्टपदप्रतिपाद्यधर्मनिरूपणपूर्व-कत्वात्] उक्तनामा आक्षेपालङ्कार इत्यर्थ ॥ १६० ॥

[अनुशयाक्षेपस्योदाहरणम्]

अर्थो न सम्भृत कश्चिन्न विद्या काचिदर्जिता ।
न तप सञ्चितं किञ्चित् गतञ्च सकलं वय ॥ १६१ ॥

अनुशयाक्षेप उदाहरति—'अर्थ' इति । 'साधित अर्थ '=सुवर्णरजतादिरूप किञ्चित् धनम 'न सम्भृत =नैव सञ्चित 'काचित् विद्या'=कला अर्थकरी 'न आर्जिता'=नैव शिक्षिता 'किञ्चित तप '=चान्द्रायणादि ज्ञानमय वा न सञ्चितम्'=नैवानुष्ठितम 'वय च'-आयुश्च 'सकलम =समग्रम [एव] गतम'=नष्टम । मुधैव यापित मयेति भाव यथा वा मम-

नैव शास्त्र न शस्त्रञ्च न हरिर्न शिवस्तथा ।
[ ]र्जित प्रार्जितश्चापि जीवन निष्फल गतम् ॥

अत्र 'य [ ]' मपि ॥ १६१ ॥

[अनुशयाक्षेपस्य सङ्गमनम]

अस्मात्यनुशयाक्षेपो यस्मादनुशयोत्तरम् ।
अर्थार्जनादेर्व्यावृत्तिर्दर्शितेह गतायुषा ॥ १६२ ॥

उक्तमाक्षेप लक्ष्ये घटयति—'अर्थो' इति । 'इह =अत्र दर्शिते काव्ये 'यस्मात् = [ ]यो 'अनुशयोत्तरम पश्चात्तापपूर्वम यथा स्यात्तथा 'अर्थार्जनादे =धनार्जनादे 'व्यावृत्ति =

प्रतिषेध 'दर्शित ' व्यक्तीकृत तस्मात् असौ अनुशयपूर्वकत्वात् प्रतिषेधस्य 'अनुशयाक्षेप' इति भण्यते ॥ १६२ ॥

[संशयाक्षेपस्योदाहरणम्]

किमयं शरदम्भोद किंवा हंसकदम्बकम ।
रुतं नूपुरसंवादि श्रूयते तन्न तोयद. ॥ १६३ ॥

'संशयाक्षेपम् उदाहरति—'किम्' इति । 'अयम्'=पुरोवर्त्ती 'किम् शरदम्भोद' =शरत्कालिक नीररहित नीरद किम् ? 'वा=अथवा 'हंसकदम्बकम् किम्=हंसानां कदम्बकम् शरत्कालत्वात् मानसाख्यसरोवरादायतो हंसानां श्रेणि किम् ? परन्तु 'नूपुरसंवादि'=मञ्जीरशिञ्जितसमम् 'रुतम्'=रव 'श्रूयते'=आकर्ण्यते 'तत्' तस्माद्धेतो 'तोयद '=मेघ 'न' नैवास्ति ॥ १६३ ॥

[संशयाक्षेपस्य सङ्गमनम्]

इत्ययं संशयाक्षेप संशयो यन्निवर्त्यते ।
धर्मेण हंससुलभेनास्पृष्टघनजातिना ॥ १६४ ॥

संशयाक्षेपस्योदाहरणे योजयति—'इति' इति । 'इति'=उक्ते काव्ये वर्णितप्रकारेण 'अस्पृष्टघनजातिना'=न स्पृष्ट घनजातियेन तादृशेन 'हंससुलभेन'=हंसमात्रगामिना 'धर्मेण'=[illegible] 'यत' यतो हेतो 'संशय '=सन्देह 'निवर्त्यते'=अपाक्रियते तस्माद [illegible] 'संशयाक्षेप ' इत्य । अर्थात पूर्व संशय्य पश्चात् प्रतिक्षेप्यतादर्शनात् तथाव्यपदेश [illegible] तु [illegible]तिरिच्यते ॥ १६४ ॥

[अर्थान्तराक्षेपस्योदाहरणम्]

चित्रमाक्रान्तविश्वोऽपि विक्रमस्ते न शाम्यति ।
कदा वा दृश्यते तृप्तिरुदीर्णस्य हविर्भुज ॥ १६५ ॥

[अर्थान्तराक्षेपस्य सङ्गमनम्]

अयमर्थान्तराक्षेप प्रक्रान्तो यन्निवार्यते ।
विस्मयोऽर्थान्तरस्येह दर्शनात् तत्सधर्मणः ॥ १६६ ॥

उक्ते उदाहरणे अर्थान्तराक्षेप घटयति—'अयम्' इति । इह' = उक्ते पद्ये तत्सधर्मण '=तस्य विक्रमस्य सधर्मण सदृशस्य 'अर्थान्तरस्य'=हविर्भुगम्तृप्तयभावरूपस्य अप्रकृतस्य 'दर्शनात्'=निबन्धनात् यत्'='चित्र' मित्यादिना 'प्रक्रान्त '=प्रस्तुत विस्मय 'निवार्यते'=अपोह्यते सोऽयम् 'अर्थान्तराक्षेप' इत्युच्यते । अर्थान्तरनिबन्धनपूर्वक आक्षेप अर्थान्तराक्षेप इति निर्गलितोऽर्थ ।अत्र राजविषयको रतिभावो व्यङ्ग्य ॥ १६६ ॥

[हेत्वाक्षेपस्योदाहरणम्]

न स्तूयसे नरेन्द्र ! त्वं ददासीति कदाचन ।
स्वमेव मत्वा गृह्णन्ति यतस्त्वद्धनमर्थिन ॥ १६७ ॥

हेत्वाक्षेपम्' उदाहरति—'न' इति हे ! 'नरेन्द्र !'=नरपते ! 'त्व ददासि इति'= अर्थिकामान् प्रपूरयसि इति कृत्वा 'कदाचन'=कदापि 'न स्तूयसे'=न श्लाघ्यसे । 'यत '=हेतो 'अर्थिन =याचका त्वद्धनम्'=तव वसु 'स्वम् एव मत्वा'=स्वकीयमिति ज्ञात्वा 'गृह्णन्ति =आददते । अनेन दातृराज्ञो दानशूरत्व व्यज्यते ॥ १६७ ॥

[हेत्वाक्षेपस्य सङ्गमनपूर्वक प्रकरणोपसहार]

इत्येवमादिराक्षेप हेत्वाक्षेप इति स्मृत ।
अनयैव दिशान्योऽपि विकल्प शक्य ऊहितुम् ॥ १६८ ॥

—•—

[इत्याक्षेपचक्रम्]

—•—

हेत्वाक्षेप लक्ष्ये योजयन् आक्षेपप्रकरणमुपसहरति—'इति' । 'इति एवम्-आदि आक्षेप '=उक्तकाव्ये प्रस्तुताया राजस्तुते 'स्वमेव गृह्णन्ति' इति हेतुपन्यासात् यो 'हेत्वाक्षेप '=हेतोराक्षेप निषेध सोयम् 'हेत्वाक्षेप' इति नामाक्षेप स्मृत '=बुधै कथित इति शेष । अनया एव दिशा' मदायनिरूपितमार्गेण 'अन्य अपि'=परोपि 'विकल्प '= आक्षेपभेद स्वयम् 'ऊहितुम् शक्य '=विपश्चिद्भिरिति शेष । पूर्वोक्त कारणस्याक्षेप अयन्तु कारणाक्षेप इत्यनयोर्भेद ।

एवम्—वृत्ताक्षेप वर्त्तमानाक्षेप भविष्यदाक्षेप धर्माक्षेप धर्म्याक्षेप कारणाक्षेप, कार्याक्षेप अनुज्ञाक्षेप प्रभुत्वाक्षेप अनादराक्षेप आशीर्वचनाक्षेप परुषाक्षेप साचिव्याक्षेप यत्नाक्षेप, परवशाक्षेप उपायाक्षेप, रोषाक्षेप, मूर्च्छाक्षेप, अनुक्रोशाक्षेप, श्लिष्टाक्षेप, अनुशयाक्षेप सशयाक्षेप अर्थान्तराक्षेप, हेत्वाक्षेप इति [illegible] आक्षेपाणा [२४] चतुर्विंशति [illegible] मते दर्शिता । इतो [illegible]

गम्या । अत्र बहुवक्तव्यमासीत् ग्रन्थवृद्धिभयात् कालातिपाताच्च नोक्तम् ॥ १६८ ॥

इति आक्षेपाणां चक्र समुदाय ।

[अथ—अर्थान्तरन्यासलक्षणम्]

¶ ज्ञेयः सोऽर्थान्तरन्यासो वस्तु प्रस्तुत्य किञ्चन ।
तत्साधनसमर्थस्य न्यासो योऽन्यस्य वस्तुनः ॥ १६९ ॥

—

अर्थमर्थम्प्रति न्यासो यस्यास्ति नान्तरं क्वचित् ।
अत्रायानन्तरं यत्तत्-ज्योतिरेकमुपास्महे ॥ १ ॥

क्रमप्राप्तमर्थान्तरन्यासं निरूपयन्नादौ तस्य लक्षणमाह—'ज्ञेय' इति । 'किञ्चन वस्तु प्रस्तुत्य'=किमपि [वस्तु] वाक्यार्थरूपं प्रकृतरूपेणोपन्यस्य 'तत्साधनसमर्थस्य'=[असम्भावनाभ्रान्तिनिवारणाय सयुक्तिकत्वसम्पादने इति यावत्] तस्य प्रकृतस्य साधने यथार्थतासम्पादने समर्थस्य 'अन्यस्य वस्तुनः'=अप्रकृतस्य वस्तुनः विषयस्य उपमानादेः यः 'न्यासः'=कथनं करणमिति यावत् स 'अर्थान्तरन्यासः ज्ञेयः'=ज्ञातव्यः अनुपपद्यमानतया सम्भाव्यमानस्य अर्थस्योपपादनार्थं यद् अर्थान्तरं न्यस्यते सोऽर्थान्तरन्यास इति फलितम् ।

¶ इदन्तु बोध्यम्—†दृष्टान्तालङ्कारे सामान्यं सामान्येन विशेषो विशेषेण समर्थ्यते अत्र तु समर्थ्यसमर्थनमिति ततो विशेषः । कारणेन कार्यस्य कार्येण वा कारणस्य समर्थनन्तु काव्यलिङ्गस्य विषयः, समर्थ्यसमर्थकयोः सामान्यविशेषभावसम्बन्धेऽर्थान्तरन्यासः तदितरसम्बन्धे काव्यलिङ्गमिति स्वीकारात् एतयोरपि विशेषः । ‡प्रतिवस्तूपमायान्तु उपमानो-

पमेयभावो विवक्षितः अत्र तु समर्थ्यसमर्थकत्वं विवक्षितम् इति ततोऽस्य भेदः ।

किञ्च—'प्रस्तुत्य' इति पूर्वकालिकक्त्वाप्रत्ययान्तपदोपन्यासेन पूर्वं समर्थनीयस्य प्रस्तुतस्योपन्यासः ततोऽप्रस्तुतस्य समर्थकस्येत्युक्तं भवति । परमिदं प्रायिकमेवाभाति विपर्ययस्यापि दर्शनात् । तथा च 'शिशुपालवधे' महाकाव्ये—

प्रतिकूलतामुपगते हि विधौ विफलत्वमेति बहुसाधनता ।
अवलम्बनाय दिनभर्त्तुरभून्न पतिष्यतः करसहस्रमपि ॥

अत्र प्रस्तुतायाः सन्ध्यायाः उत्तरार्धवाक्यार्थः समर्थनीयः, पूर्वार्धवाक्यार्थस्तु समर्थकः इति वैपरीत्यं स्पष्टमेव ।

अस्यैव सरस्वतीकण्ठाभरणकारमते 'विपरीतार्थान्तरन्यास' इति सञ्ज्ञा । एतावता प्रस्तुतवाक्यार्थस्य अप्रस्तुतवाक्यार्थेन समर्थनमर्थान्तरन्यास' इति लक्षणसारो बोध्यः । अत एवाह—वामनः 'उक्तसिद्ध्यै वस्तुनोऽर्थान्तरस्यैव न्यसनमर्थान्तरन्यासः' इति । [काव्या० सू० अधा० ३ । सू० २१] अस्यायमर्थः—उक्तसिद्ध्यै उक्तस्यार्थस्य सिद्ध्यै सिद्ध्यर्थं वस्तुनो वाक्यार्थान्तरस्यैव न्यसनमर्थान्तरन्यासः 'वस्तु'-ग्रहणात् पदार्थस्य हेतोर्न्यसनं नार्थान्तरन्यासः । तस्मात्समर्थ्यसमर्थकवाक्यार्थयोः नैकान्तिकः पूर्वापरीभावो वर्त्तते इति ध्येयम् ।

केचित्तु—न केवलं सामान्यविशेषयोरेव समर्थ्यसमर्थकत्वेऽर्थान्तरन्यासः यावत् कार्यकारणयोरप्यसौ समर्थकत्वे दृश्यते । अत एव अलङ्कारसर्वस्वकारेण उक्तम् 'सामान्यविशेषभावकार्यकारणभावाभ्यां निर्दिष्टप्रकृतसमर्थनमर्थान्तरन्यासः' इति । कार्यकारणयोर्यथा—

पृथ्वि ! स्थिरा भव भुजङ्गम ! धारयैनां
त्वं कूर्मराज ! तदिदं द्वितयं दधीथाः ।
दिक्कुञ्जराः ! कुरुत तत्त्रितये दिधीर्षां
देवः करोति हरकार्मुकमाततज्यम् ॥

अत्र हरकार्मुकस्य आततज्यीकरणं * पृथ्वीस्थैर्यादिप्रवर्त्तकत्वे कारणं समर्थकत्वेनोक्तम् ।

अत्र कार्यं कारणस्य समर्थकं तद् यथा—

सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ।
वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः ॥

अत्र सहसाविधानाभाव-विमृश्यकारित्वरूपं कारणं [पूर्वार्धवाक्यार्थभूतम्] । सम्पदां वरणञ्च तस्य कार्यम् [उत्तरार्धवाक्यार्थभूतम्] तदेतत् कार्यम् उक्तकारणस्य समर्थकम् । अन्ये तु—'वक्ष्यमाणो हेत्वलङ्कार एवायम्' इत्याचक्षते ॥ १६६ ॥

---

* कार्यस्य पृथ्वीस्थैर्यादेः समर्थकत्वमित्यर्थः ।

[अर्थान्तरन्यासस्य भेदाः]

विश्वव्यापी विशेषस्थः श्लेषाविद्धो विरोधवान् ।
अयुक्तकारी युक्तात्मा युक्तायुक्तो विपर्ययः ॥ १७० ॥

इत्येवमादयो भेदाः प्रयोगेष्वस्य लक्षिताः ।
उदाहरणमालेयं रूपव्यक्त्यै निदर्श्यते ॥ १७१ ॥

अर्थान्तरन्यासस्य सामान्यलक्षणमुक्त्वा अथास्य भेदानाचष्टे—'विश्वव्यापी' इत्यादि [illegible] । १ 'विश्वव्यापी'=सर्वत्रसम्भवस्वभावः । २ 'विशेषस्थः'=विशेषे तिष्ठतीति [illegible] इत्यर्थः । ३ 'श्लेषाविद्धः'=श्लेषविशेषणसम्पन्नः । ४ 'विरोधवान्'=[illegible] विरुद्धमर्थमवगमयति यावत् । ५ 'अयुक्तकारी'=स्वभावतोऽयु-[illegible] । ६ 'युक्तात्मा'=युक्त आत्मा स्वरूपं यस्य स आचितायामेव औचित्येन [illegible] इत्यर्थः । ७ 'युक्तायुक्तः'=युक्तोऽप्ययुक्तकारी कियतांशेन युक्तः कियता [illegible] इत्यर्थः । ८ 'विपर्ययः'=[illegible] 'अस्य'=अर्थान्तरन्यासस्य [illegible] 'इत्येवमादयः [illegible]'=उक्तप्रकाराः विश्वव्यापिप्रभृतयः विशेषाः [illegible] 'एषाम्'=उक्तभेदानाम् 'उदाहरणमाला'=लक्ष्याणां [illegible] 'निदर्श्यते'=निरूप्यते अर्थात् [illegible] लक्ष-[illegible] किन्तु दर्शितमार्गेणादेव लक्षणमाकलयितव्यानि [illegible] ॥ १७० ॥ १७१ ॥

[विश्वव्यापिन उदाहरणम्]

भगवन्तौ जगन्नेत्रे सूर्याचन्द्रमसावपि ।
पश्य गच्छत एवास्तं नियतिः केन लङ्घ्यते ॥ १७२ ॥

[विशेषावस्थस्योदाहरणम्]

पयोमुचः परीतापं हरन्त्येव शरीरिणाम् ।
नन्वात्मलाभो महतां परदुःखोपशान्तये ॥ १७३ ॥

'विशेषस्थम्' उदाहरति—'पयोमुच' इति । 'पयोमुच'=नीरदाः 'शरीरिणाम्'=तनुभृताम् 'परीतापम्'=घर्मजनित सन्तापम् 'हरन्ति एव'=दूरीकुर्वन्त्येव । उक्तमर्थं समर्थयति—'ननु' इति । 'परदुःखोपशान्तये'=परेषां दुःखस्य कष्टस्य उपशान्तये निवारणाय 'महताम्'=महापुरुषाणाम् 'आत्मलाभ'=जन्म शरीरधारणमिति यावत् 'ननु' निश्चितमित्यर्थः ।

अत्र पूर्वपादद्वयगतेन तापहरणरूपेण सामान्येन अर्थेन उत्तरवाक्यगत 'महता'मित्यादिप्राणिरूपो विशेषार्थः समर्थित इति सामान्येन विशेषसमर्थनात् 'विशेषस्थ सह्यो-ऽयमर्थान्तरन्यास । महतामिवेय प्रकृतिर्न सर्वसाधारणस्येति विशेषस्थता ॥ १७३ ॥

[श्लेषाविद्धस्योदाहरणम्]

उत्पादयति लोकस्य प्रीतिं मलयमारुतः ।
ननु दाक्षिण्यसम्पन्नः सर्वस्य भवति प्रियः ॥ १७४ ॥

'श्लेषाविद्धम् उदाहरति—'उत्पादयति' इति । 'मलयमारुत'=दक्षिणानिल''लोकस्य' जनस्य 'प्रीतिम्'=मुदम् 'उत्पादयति'=जनयति । उक्त समर्थयति—'ननु' इति । 'दाक्षिण्यसम्पन्न'=दाक्षिण्येन सारल्यादिगुणेन सम्पन्न सम्बद्ध, अथ च [दाक्षिण्यसम्पन्न] दक्षिणादिगागत. 'ननु'=निश्चयेन 'सर्वस्य प्रिय'=विश्वस्यापि हर्षकारी 'भवति' ।

अत्र सामान्येन श्लेषमूलकतया उत्तरार्धं पूर्वार्धगतविशेषार्थसमर्थक इति 'दाक्षिण्य' पदस्य श्लिष्टत्वेन 'श्लेषाविद्धोयमर्थान्तरन्यास ॥ १७४ ॥

[विरोधवत उदाहरणम्]

जगदानन्दयत्येष मलिनोऽपि निशाकरः ।
अनुगृह्णाति हि परान् सदोषोऽपि द्विजेश्वरः ॥ १७५ ॥

विरोधवन्तम् उदाहरति—'जगत्' इति । 'एष'=पुरतोदृश्यमान 'निशाकर'=दोषाकरश्चन्द्र 'मलिनो'=कलङ्कवान् अपि 'जगत्'=विश्वम् 'आनन्दयति'=आह्लादयति । उक्तमर्थं समर्थयति—'अनुगृह्णाति' इति—'हि'=तथाहि 'द्विजेश्वर'=द्विजानां ब्राह्मणानामीश्वर ब्राह्मणोत्तम 'सदोष'=कोपादिदोषग्रस्तोऽपि 'परान्'=अन्यान् 'अनुगृह्णाति'=शास्त्रोपदेशादिद्वारा अनुकम्पयति ।

अत्र द्विजराजत्व धर्मं समान निशाकरे ब्राह्मणे च विद्यमानत्वात्, एव द्विजराजत्वेन सामान्येन धर्मेण उत्तरार्धगतो ब्राह्मणानुग्रहरूपो विशेषोऽर्थ समर्थित, स च दोषवत्त्वानुग्रहादयोर्द्वयो परस्पर विरुद्धयोर्धर्मयोरसौ विरोधवान् इत्ययमर्थान्तरन्यास ।

अत्र [illegible]द्विजेश्वरपदे [illegible]ष्टे तथापि तदर्थप्रयुक्त समर्थ्यसमर्थकभावो नात्राभिप्रेतः [illegible]नु [illegible]नयोरेव समर्थ्यसमर्थकत्व साधर्म्यादिति प्रेक्ष्यम् ॥ १७५ ॥

[अयुक्तकारिण उदाहरणम्]

मधुपानकलात् कण्ठान्निर्गतोऽप्यलिनां ध्वनि ।
कटुर्भवति कर्णस्य कामिनां पापमीदृशम् ॥ १७६ ॥

अ[illegible] उदाहरति— 'म[illegible]पानकलात्' इति । 'मधुपानकलात्'-मधुपानेन [illegible] कलात् मधुरात् [illegible]लिनाम्=भ्रमराणाम् 'कण्ठात्'=गलात् 'निर्गत'= [illegible] '[illegible]'=गुञ्जारव 'कामिनाम'=मदनावेशवतां विरहिणाम् 'कर्णस्य'=श्रोत्रस्य '[illegible]'=[illegible] भवति इति शेष । एत समर्थयाति—'पापम्' इति तथाहि 'ईदृशम्'= [illegible] 'पा[illegible]'=[illegible]त्यर्थ ।

[illegible] मधुभ्रमरध्वनिरूपेणार्थेन पापरूपो विशेषोऽर्थ समर्थित [illegible] 'अयुक्तकारी' अर्थान्तरन्यासः ॥१७६ ॥

[युक्तात्मन उदाहरणम्]

[illegible] मम [illegible]मम्भोजदलसंस्तरः ।
हुताशनप्रतिनिधिर्दाहात्मा ननु युज्यते ॥ १७७ ॥

पापिना अथच कलङ्किना आचरितं कृतं परपीडात्मकं कर्म 'असाम्प्रतम्'=अयुक्तमेव'। 'ननु'=निश्चितमेतत् ।

अत्र उत्कृष्टस्य सुरभेरपकृष्टकर्मकरणमित्ययुक्तम्, अपकृष्टस्य मलिनस्य चन्द्रस्यापकृष्ट-कर्मकरणमिति युक्तम्। तदुत्तरार्धेन 'मलिनाचरित' मित्यादिना सामान्येन युक्तरूपेण अर्थेन पूर्वार्धगत कलङ्किचन्द्रकर्तृकपरपीडारूपोविशेषोऽर्थं समर्थित । तदयं 'युक्तायुक्त' इति नामाऽर्थान्तरन्यास ॥ १७८ ॥

[विपर्ययस्योदाहरणम्]

कुमुदान्यपि दाहाय किमयं कमलाकरः ।
नहीन्दुगृह्येषूग्रेषु सूर्यगृह्यो मृदुर्भवेत् ॥ १७९ ॥

इत्यर्थान्तरन्यासचक्रम्

'विपर्ययम्' उदाहरति—'कुमुदानि' इति। 'कुमुदानि'=कैरवाणि रात्रिविकाशीनि नीलोत्पलानीत्यर्थ । 'अपि'=अतिशीतलान्यपि 'दाहाय' तापाय 'सन्ति' इति शेष । 'अयं कमलाकर '=पद्मसहति 'किम्'=कुतो न दाहकर स्यात् अर्थात् सूर्यपक्षपातिनां पद्मानां दाहकत्व स्यात् इति किमु वक्तव्यम । उक्तमर्थं समर्थयति—'नहि' इति । 'इन्दु-गृह्येषु'=इन्दुपक्षाश्रितेषु [इन्दु चन्द्र] शीतलस्यापि चन्द्रस्य पक्षपातिषु 'उग्रेषु'=दाहकेषु सत्सु 'सूर्यगृह्य '=सूर्यपक्षाश्रित 'नहि '=नैव 'मृदु =कोमल 'भवेत्'=स्यात् । यत्र इन्दुपक्षोऽपि क्लेशकर तत्र सूर्यपक्षस्य क्लेशकरत्वमिति किमु वक्तव्यमिति भाव ।

अत्र इन्दुगृह्यसूर्यगृह्योक्तिरूपेण सामान्येनार्थेन पूर्वार्धगत कुमुदकर्तृकदाहकत्वरूपो विशेष समर्थित । सच दाहकरणानर्हस्यापि कुमुदस्य दाहकरणरूपविपरीतार्थकारित्वात् 'विपर्यय'नामाऽर्थान्तरन्यास । 'इन्दुगृह्येषु' 'सूर्यगृह्य ' इत्युभयत्रापि 'पदास्वैरिबाह्यापक्ष्येषु च [३ । १ । ११९] इति पाणिनिसूत्रेण 'पक्ष्ये ऽर्थे ग्रहेर्धातो 'क्यप्' । ग्रन्थान्तरेषु प्रकारान्तरेणाप्ययमुदाहृत । तत्र साधर्म्यात् सामान्य विशेषण यथा—

बृहत्सहायः कार्यान्तं क्षोदीयानपि गच्छति ।
सम्भूयाम्भोधिमभ्येति महानद्या नगापगा ॥

अत्र नगापगाना क्षुद्राणामपि महानद्या सह मिलित्वा समुद्रप्राप्तिरूपेण परार्धगतेन विशेषेण पूर्वार्धगत 'अतिक्षुद्रस्यापि बृहत्सहायस्य कार्यान्तगमनरूप सामान्यमर्थ समर्थित । सच 'गच्छति अभ्येति' क्रियाभ्या साधर्म्येणोक्त ।

नगापगा पर्वतस्य क्षुद्रा नदी । भारवेर्वचनम् ।

विशेषेण सामान्यस्य समर्थनं वैधर्म्येण यथा—

गुणानामेव दौरात्म्याद् धुरि * धुर्यो नियुज्यते ।
असञ्जातकिणस्कन्धः सुखं स्वपिति गौर्गलिः ।

अत्र 'धुर्य' इत्यादिना पूर्वार्धगतः सामान्यरूपोऽर्थः 'गौर्गलि' रित्युत्तरार्धगतेन विशेषेण समर्थितः । गुणाभावात् गलिर्गौर्न धुरि नियुज्यते इति वैधर्म्यम् । † 'गलि' दुष्टो वृषभः । सामान्येन विशेषस्य समर्थनं साधर्म्येण यथा—

निर्वेदमाप नच न भ्रमणे मुरारिर्नोचिन्तयद्व्यसनमृत्तविलप्रवेशे ।
आहृत्य हन्त ! मणिमेव पुरं प्रपेदे स्याद्युद्यमः कृतधियां हि फलोदयान्तः ॥

अत्र पादत्रयगतः मुरारिनिष्ठो निर्वेदाभावादिरूपो विशेषार्थः चतुर्थपादगतेन फलप्राप्तिपर्यन्तेन महासत्त्वनिष्ठोद्यमरूपेण सामान्येनार्थेन सोपपत्तिसमर्थितः । निर्वेदाभावादेः फलावसाप्युद्यमस्य च परस्परं साधर्म्यम् ।

सामान्येन विशेषस्य समर्थनं वैधर्म्येण यथा—

प्राणाः प्रयान्तु मे सद्यस्त्यक्ताया नन्दसूनुना ।
सत्यं ता एव जीवन्तु यासां फलवती कृतिः ॥

अत्र पूर्वार्धगतो कृष्णविरहिण्या प्राणप्रयाणव्याहरणरूपो विशेषार्थः परार्धगतेन नन्दसूनुसमागमानुकूलव्यापारवतीनां जीवनरूपेण सामान्येन सोपपत्ति समर्थितः । 'अहं न जीवामि ता जीवन्तु' इति वैधर्म्यम् । अनया रीत्याऽन्यत्राप्यूह्यम् ॥ १७६ ॥ ‡

[प्र०] १ कतिविधोऽर्थान्तरन्यासो दण्डिनाऽवतारितः ? कानि च तेषामुदाहरणानि ? तन्मतमनुसृत्य कीदृशः [उत्तरम्—'सटीकमूलग्रन्थानुपूर्व्या ज्ञेयम्]

* धुरं कार्यभारं वहतीति 'धुर्य'=धूर्वहनक्षमः । 'धुरो यड्ढकौ' [४ । ४ । ७७] इति पाणिनिसूत्रेण 'यत्' प्रत्ययः ।

† 'अथ गलिर्दुष्टवृषः शक्तोऽप्यधूर्वहः' इति हेमचन्द्रः ।

‡ यथा वा—

तथापि वित्र नृप ! तावकीनैः प्रह्वीकृतं मे हृदयं गुणौघैः ।
वीतस्पृहाणामपि मुक्तिभाजां भवन्ति भव्येषु हि पक्षपाताः । [भारविः]

अत्र पूर्वार्धगतः नृपतियुधिष्ठिरनिष्ठगुणावर्जनकारित्वरूपः व्यासमुनिगतो विशेषार्थः परार्धगतेन भव्येषु वीतरागकर्तृकेन पक्षपातरूपेण सामान्येन अर्थेन समर्थितः । तत्र गुणावर्जनभव्यपक्षपातभवनयोः परस्परं साधर्म्यमित्ययं सामान्येन विशेषसमर्थनरूपः साधर्म्यादर्थान्तरन्यासः ।

वाग्भटस्तु अर्थान्तरन्यासं द्विधाचष्टे—

उक्तसिद्ध्यर्थमन्यार्थन्यासो व्याप्तिपुरःसरः ।
कथ्यतेऽर्थान्तरन्यासः श्लिष्टोऽश्लिष्टश्च स द्विधा ॥

[व्यतिरेकस्य लक्षणम्]

¶शब्दोपात्ते प्रतीते वा सादृश्ये वस्तुनोर्द्वयो ।
तत्र यद्भेदकथनं व्यतिरेक स कथ्यते ॥ १८० ॥

— —

[प्र॰] ¶ व्यतिरेक लक्ष्यलक्षणतत्सङ्गमनप्रकारेण प्रपञ्चय ? [उ०] अस्य पृ० ५० २ । अग्रे व्यतिरेकप्रकरणान्तञ्च ।

तत्र श्लेषसहितो यथा—

शोणत्वमक्ष्णामसिताब्जभासां गिरां प्रचारस्त्वपरप्रकार. ।
बभूव पानान्मधुनो वधूना—मचिन्तनीयो हि सुरानुभाव ॥

अत्र मद्यपानान्नेत्राणां रक्तत्वमुक्तम् तस्योक्तस्य सिद्ध्यर्थं चतुर्थ पादोऽर्थान्तरत्वेनोपन्यस्त । अत्र सुरा देवा मदिरा वा । अयञ्च सामान्येन विशेषसमर्थनरूप' श्लिष्टशब्दनिबन्धन. । श्लेषरहितो यथा—

शुण्डादण्डै कम्पिता कुञ्जराणां पुष्पोत्सर्गं पादपाश्चारु चक्रु ।
स्तब्धाकारा किं प्रयच्छन्ति किञ्चित कान्ता यावन्नोद्धृत वीतशङ्कम् ॥

अत्र पूर्वार्धोक्तस्यार्थस्य परार्धोक्तेनार्थेन [सामान्येन] समर्थनम् । नात्र किमपि श्लिष्ट पदम् ।

यथा वा—

कृतान्तर्व्याहृतसान्त्ववादे जातस्पृहं पुण्यजन स जिष्णौ ।
इयाय सख्याविव सप्रसाद विश्वासयत्याशु सता हि योग. ॥ [भारवि]

अत्र पादत्रयगतो जिष्णौ पुण्यजनोपस्थितिरूपो वाक्यार्थो विशेषरूप सत्सदनिकेतविश्वासनरूपेण सामान्येन समर्थित । एवमाद्यम् ।

यथा वा—

अमानव जातमजं कुले मनो. प्रभाविन भाविनमन्तमात्मन ।
मुमोच जानन्नपि जानकी न य सदाभिमानैकधना हि मानिन [माघ]

अत्र जानक्या अमोचने कारण चतुर्थपादोक्तमिति कारणेन कार्यसमर्थनरूपोऽर्थान्तरन्यास ।

यथा वा—

मा गा चिरायैकचर प्रमाद वसन्नसम्बाधशिवेऽपि देशे ।
मात्सर्यरागोपहतात्मना हि स्खलन्ति साधुष्वपि मानसानि ॥ [भारवि]

अत्र प्रमादनिषेधलक्षणेनाऽप्रमादरूपकारणेन अर्थप्रतिरूपस्य कार्यस्य व्यतिरेककरण कथनात् वैधर्म्येण कारणसमर्थनरूपे ऽर्थान्तरन्यास ।

इत्यर्थभेदेन [illegible] अर्थान्तरन्यासस्य कृत लक्षण [तत्रापि प्रति-

यस्य सर्वास्ववस्थासु व्यतिरेको न दृश्यते ।
प्रत्यग्रूप तमात्मान केपि जानान्ति सूरय ॥ १ ॥

क्रमप्राप्त व्यतिरेक लक्षयति—'शब्दोपात्ते' इति । 'द्वयो' वस्तुनो '=उपमानोपमेययो 'सादृश्ये'=औपम्ये 'शब्दोपात्ते'=साधारणधर्मवाचकेवादिशब्दप्रयोगेण झटिति बोधिते 'वा'=अथवा साधारणधर्मवाचकशब्दानुपादानात् व्यञ्जिते [अर्थबललभ्ये] सति 'तत्र'=तयो 'यद् भेदकथनम'=वैधर्म्यप्रतिपादनम् 'स व्यतिरेक''=व्यतिरेकनामालङ्कार 'कथ्यते'=भण्यते । तथा च—'उपमानादुपमेयस्याधिक्यवर्णन व्यतिरेक' इति व्यतिरेकस्वरूपसार । आह च—वामन 'उपमेयस्य गुणातिरेकित्व व्यतिरेकः' [काव्या० सू० अध्या० ३ । २२] उदाहृतञ्च तेनैव यथा—

सत्य हरिणशावाक्ष्या प्रसन्नसुभग मुखम् ।
समान शशिन किन्तु स कलङ्कविडम्बित ॥

अत्र शब्दोपात्त साम्यम्, तद्वाचकसमानशब्दप्रयोगात् । गम्यमानगुणो व्यतिरेको यथा—

कुवलयवन प्रत्याख्यात नव मधु निन्दित
हसितममृत भग्न स्वादो पद रससम्पद ।
विषमुपहित चिन्ताव्याजान्मनस्यपि कामिना
चतुरललितैर्लीलातन्त्रैस्तवार्धविलोकितै ॥

नायिकां प्रति नायकोक्तिरियम् । अत्र कान्ताया अर्धविलोकितै कुवलयवनादीनां प्रत्याख्यानादिभिरुपमेयस्याधिक्यमार्थिकम् । अर्थान्तरन्यासे व्यतिरेको विपक्षव्यावृत्ति अत्र तु गुणाधिक्यमिति भेद इति कामधेनुव्याख्या ।

[शब्दोपात्तसादृश्ये एकव्यतिरेकस्योदाहरणतद्योजने]

धैर्यलावण्यगाम्भीर्य प्रमुखैस्त्वमुदन्वत ।
गुणैस्तुल्योसि भेदस्तु वपुषैवेदृशेन ते ॥ १८१ ॥

नत्वात्] परिचयार्थं प्रदर्श्यते—

समर्थकस्य पूर्वं यद्वचोऽन्यस्य च पृष्ठत ।
विपर्ययेण वा यत्स्याद् हिशब्दोक्त्याऽन्यथापिवा ॥

[illegible] सोऽर्थान्तरन्यास ' ॥ [काव्यालङ्कारसारे]

अत्रेदं बोध्यम—सूत्रे 'गुण' शब्दो धर्ममात्रपर । स च वाच्यो गम्यश्चेति [illegible] । [illegible] यदा उपमानगत तदपकर्षहेतु । उपमेयगतश्चेत् तदुत्कर्षहेतुश्च । [illegible] उपमेयस्य गुणातिरेकित्वमाश्रितम् । उपमेयगतत्वे तस्य गुणातिरेकित्व शाब्द- [illegible] 'तुल्योसि' [illegible] ।

इत्येकव्यतिरेकोऽयं धर्मेणैकत्रवर्त्तिना ।
प्रतीतिविषयप्राप्तेर्भेदस्योभयवर्त्तिनः ॥ १८२ ॥

अनेकभेदभिन्ने व्यतिरेके आदौ एकव्यतिरेकं निरूपयति—'धैर्य०' इत्यादि द्वाभ्याम् । [हे ! राजन्] त्वम् 'धैर्य०'=धैर्यम् = धृतिः औद्धत्याभावः अपरित्यक्त-[अनतिक्रान्त]-मर्यादत्वञ्च । 'लावण्यम्' = सौन्दर्यं लवणोपेतजलमयत्वञ्च । 'गाम्भीर्यम्' = दुरवगाह-प्रकृतित्वं अतलस्पर्शित्वञ्च । एतत्प्रमुखैः धैर्यप्रभृतिभिः 'गुणैः'=धर्मैः 'उदन्वतः'=समुद्रस्य 'तुल्यः' = सदृशः 'असि' । तेषु 'ते' = तव 'भेदः तु =उदन्वतो वैधर्म्यम् 'ईदृशेन वपुषा' = अतिसुन्दरकरचरणादिमता शरीरेणैव 'वर्त्तते' इति शेषः ।

अत्र प्रस्तुतो राजा उपमेयः, अप्रस्तुतः समुद्रः उपमानम् । धैर्यादिसाधारणधर्म-योगात्मकं तयोः सादृश्यञ्च धैर्यादिशब्दोपात्तम् । परमीदृशपदबोध्य समुद्रविलक्षण सुन्दर-करचरणादिमत्त्वोपेत वपुष्मत्त्वमेवोपमानाद् वैधर्म्यरूप भेदः । सच अप्रस्तुतात् समुद्रात् प्रस्तुतस्य राज्ञ उत्कर्षपर्यवसायीति एकमात्रगतत्वात् भेदकधर्मस्य 'एकव्यतिरेको'यमुच्यते इत्याशयं हृदि कृत्वा द्वितीयश्लोकेन तस्य स्वरूपं लक्षयन्नाह—'इति' इति । 'इति' = उक्ते काव्ये 'एकत्र' = उपमेये एव 'वर्त्तिना' = वर्त्तमानेन 'धर्मेण' = सुन्दरवपुष्मत्त्वरूपेण 'उभयवर्त्तिनः' = उपमानोपमेयानिष्ठस्य 'भेदस्य' = *उत्कर्षापकर्षरूपवैधर्म्यस्य 'प्रतीति-विषयप्राप्तेः' = प्रतीतिगोचरत्वात् हेतोः 'अयम् एकव्यतिरेकः' इत्यन्वितार्थः एकमात्रगत-धर्मेण उभयोः परस्परं व्यतिरिच्यमानत्वात् 'एकव्यतिरेक' इति पिण्डीभूतोऽर्थः ॥ १८१, १८२ ॥

[उभयव्यतिरेकस्योदाहरणतल्लक्षमने]

अभिन्नवेलौ गम्भीरावम्बुराशिर्भवानपि ।
असावञ्जनसङ्काशस्त्वन्तु चामीकरद्युतिः ॥ १८३ ॥
उभयव्यतिरेकोऽयमुभयोर्भेदकौ गुणौ ।
काष्ण्यं पिशङ्गता चोभौ यत्पृथग्दर्शिताविह ॥ १८४ ॥

'उभयव्यतिरेकं' निरूपयति—'अभिन्नवेलौ' इति द्वाभ्याम् । 'अम्बुराशिः'=पयोनिधिः [सागरः] 'भवान् अपि'=एतौ उभौ अपि 'अभिन्नवेलौ'=न भिन्ना अतिक्रान्ता वेला मर्यादा याभ्यां तौ तादृशौ, 'गम्भीरौ'=दुरवगाहौ एव स्वभावतः द्वितीयः अगाधतश्च । 'तु'=किन्तु 'असौ'=अम्बुराशिः 'अञ्जनसङ्काशः'=श्यामलः सागरजलस्य श्यामवर्णत्वादिति भावः । 'त्वम् तु चामीकरद्युतिः'=चामीकरं सुवर्णं तस्य द्युतिरिव द्युतिर्यस्य काञ्चनकान्ति-रतिगौरः इत्यर्थः । उक्तोदाहरणे उभयव्यतिरेकलक्षणं घटयति—'उभयव्यतिरेक' इति । इह =अत्र पद्ये 'यतः' = यस्मात् हेतोः 'काष्ण्यम्' =कृष्णवर्णता श्यामलत्वम् 'पिशङ्गता च' गौरवर्णत्वञ्च इति 'उभौ' =उपमानोपमेययोः 'भेदकौ'=विशेषकौ 'गुणौ' =

* उत्कर्षो हीनता, उपमानापकर्षश्च भेदः ।

[उक्तौ द्वौ धर्मौ 'पृथग्दर्शितौ'=विभज्य उक्तौ अत 'अयम् उभयव्यतिरेकः' इत्युच्यत इति शेषः ।

अत्र उपमानं समुद्रः । उपमेयो राजा । तयोरुपमानोपमेययोर्वर्तमानौ एव उत्कर्षापकर्षबोधकौ अञ्जनसङ्काशत्वचामाकरख्यातत्वरूपभेदकौ धर्मौ शब्दोपात्तौ इत्युभयव्यतिरेकोऽयम् ॥ १८३, १८४ ॥

[सश्लेषव्यतिरेकस्योदाहरणतत्सङ्गमने]

त्वं समुद्रश्च दुर्वारौ महासत्त्वौ सतेजसौ ।
अयन्तु युवयोर्भेद स जडात्मा पटुर्भवान् ॥ १८५ ॥
स एष श्लेषरूपत्वात् सश्लेष इति गृह्यताम् ।
साक्षेपश्च सहेतुश्च दर्श्यते तदपि द्वयम् ॥ १८६ ॥

सश्लेषव्यतिरेकं निरूपयति—'त्वम्' इति द्वाभ्याम् । [हे ! राजन् !] 'त्वम् समुद्रश्च इति द्वावपि दुर्वारो'=अवार्यवीर्यो एकः असह्यप्रतापत्वात् दुर्धर्षः परः अनिवार्यमहाप्रवाहित्वात्समुद्रश्च, तथा 'महासत्त्वौ'=महत् सत्त्वं गुणो यस्य इति राजपक्षे । महान्ति सत्त्वानि नक्रादयो जलचरा यस्मिन् इति समुद्रपक्षे । 'सतेजसौ'=तेजसा सह वर्तमानौ । राजपक्षे तेजः प्रतापः,समुद्रपक्षे तेजो वडवानलः ।एवं सत्यपि साम्ये 'अयन्तु युवयोर्भेद'=अयमेव विशेषः यत् 'स'=समुद्रः 'जडात्मा'=जलात्मा प्रचुरजलस्वरूपः डलयोरैक्यात् शान्तस्वभावो मूर्खश्चेत्यर्थः 'भवान् पटुः'=तीक्ष्णस्वभावः चतुरश्च ।

उक्तोदाहरणे 'उक्तव्यतिरेकं' सङ्गमयति—'स' इति अर्धश्लोकेन । 'स एष'=प्रसिद्धः 'श्लेषरूपत्वात्'=भेदकयोः जडात्मत्वपटुत्वधर्मयोः श्लिष्टत्वात् 'सश्लेष'='सश्लेषव्यतिरेक' इति नाम्ना 'गृह्यताम'=ज्ञायताम् ।

नन्वत्र दुर्वारत्वादिश्लिष्टसाधारणधर्मविशेषणद्वारैव सश्लेष इति व्यवहारः स्यादिति चेत् ? न, तथासति सर्वत्रैव क्वचित् शब्दश्लेषस्य क्वचिद् अर्थश्लेषस्य च सम्भावना दुर्वारा यतः । एवञ्च भेदकविशेषणानां श्लिष्टत्व एव सश्लेषव्यतिरेक इति व्यवहार इति सिद्धान्तः ।

अन्यदपि व्यतिरेकस्य भेदद्वयं वस्तु प्रतिजानीते—'साक्षेप' इति । स्पष्टम् । अनयोरुदाहरणमनुपद यथाक्रमं वक्ष्यति ॥ १८५ १८६ ॥

[साक्षेपव्यतिरेकस्योदाहरणम्]

स्थितिमानपि धीरोऽपि रत्नानामाकरोऽपि सन् ।
तव कक्षां न यात्येव मलिनो मकरालय ॥ १८७ ॥

'साक्षेपव्यतिरेकम्' उदाहरति—'स्थितिमान' इति । 'स्थितिमान् अपि' अनतिक्रान्तवेलोऽपि [illegible] गम्भीरोऽपि 'रत्नानाम'=माणिक्यादीनाम् 'आकर'=उत्पत्तिस्थानमपि 'मकरालय'=समुद्रः 'तव कक्षाम'=तुलां 'न एव याति'=नैव प्राप्नोति,तव गाम्भीर्यस्य न भजते

इत्यर्थः । यतः 'मलिनः'=मलीनः कृष्णवर्णत्वात् । राजपक्षे—स्थितिमान् अनुल्लङ्घितधर्ममर्यादः । धीरः=धैर्यशाली गभीरः=दुरवगाह्यप्रकृतिः । तथा रत्नपदोपलक्षितशौर्यादिगुणानामाकरः आश्रयः इति बोध्यम् ।

अत्रोपमाननिष्ठो मलिनत्वधर्मः तेन सहोपमेये साम्यस्याक्षेपात् साक्षेपव्यतिरेकः । साम्याक्षेपप्रयुक्तो व्यतिरेकः 'साक्षेपव्यतिरेकः' इत्यस्य स्वरूपनिष्कर्षः ॥ १८७ ॥

[सहेतुकव्यतिरेकस्योदाहरणम्]

वहन्नपि महीं कृत्स्नां सशैलद्वीपसागराम् ।
भर्तृभावाद् भुजङ्गानां शेषस्त्वत्तो निकृष्यते ॥ १८८ ॥

सहेतुकव्यतिरेकम् उदाहरति—'वहन्' इति । 'सशैलद्वीपसागराम्'=शैलाः पर्वताः, द्वीपानि जम्ब्वादीनि, सागराः समुद्राः, तैः सहिताम् 'कृत्स्नाम्'=सम्पूर्णाम् 'महीम्'=पृथ्वीम् 'वहन् अपि'=धारयन्नपि 'शेषः'=अनन्तः 'भुजङ्गानाम्'=सर्पाणाम् पक्षान्तरे विटानाम् 'भर्तृभावात्'=स्वामित्वात् 'त्वत्तः'=त्वया [भवत्सकाशात्] 'निकृष्यते'=निहीनीक्रियते । अत्रोपमानं शेषः, तस्य चोपमेयापेक्षया न्यूनत्वे भुजङ्गपतित्वं हेतुरिति 'सहेतुव्यतिरेकः' । 'त्वत्तः' इति 'सार्थात् हीयते' इत्यादिवत् अपादानसंज्ञकस्यापि कर्तृत्वविवक्षया 'निकृष्यते' इति कर्मणि तङ् ॥ १८८ ॥

[अथ प्रतीयमानसादृश्यनिरूपणप्रतिज्ञा]

शब्दोपादानसादृश्यव्यतिरेकोऽयमीदृशः ।
प्रतीयमानसादृश्योऽप्यस्ति सोऽप्यभिधीयते ॥ १८९ ॥

शब्दोपात्तसादृश्यनिमित्तकं व्यतिरेकं निरूपयित्वा प्रतीयमानसादृश्यनिमित्तकं व्यतिरेकं प्रतिजानीते—'शब्दोपादान०' इति । शब्दः=साधारणधर्मवाचकं पदम्, तस्य सादृश्यस्य=तदुपादानेन यत् सादृश्यम् तस्य व्यतिरेकः तन्निमित्तकः अयं व्यतिरेकः । 'ईदृशः'=दर्शितभेदः 'उक्तः'=निरूपितः इत्यर्थः । 'प्रतीयमानसादृश्यः अपि अस्ति'=प्रतीयमानं गम्यं सादृश्यं यत्र स तथाविधोऽपि व्यतिरेकोऽस्ति 'सः अपि अभिधीयते'=अनन्तरमेव निरूप्यते ॥ १८९ ॥

[प्रतीयमानसादृश्यव्यतिरेकस्योदाहरणम्]

त्वन्मुखं कमलञ्चेति द्वयोरप्यनयोर्भिदा ।
कमलं जलसंरोहि त्वन्मुखं तदुपाश्रयम् ॥ १९० ॥

प्रतीयमानसादृश्यव्यतिरेकम्' उदाहरति—'त्वन्मुखम्' इति । 'त्वन्मुखम्'=तवाननम् 'कमलं च'=पद्मं च इति 'अनयोः द्वयोः अपि भिदा'=वैधर्म्यम् अस्ति इति शेषः । तथाहि—'कमलम्'=पद्मम् 'जलसंरोहि'=जले जातं जलजमिति यावत् 'त्वन्मुखम् तदुपाश्रयम्'=त्वदाननं त्वदेकसमाश्रितम् । अत्र मुखकमलयोः संरोहणादिना वैधर्म्येण ... व्यतिरेकः प्रतीयमानः इति 'प्रतीयमानव्यतिरेकः' ॥ १९० ॥

अभ्रूविलासमस्पृष्टमदरागं मृगेक्षणम् ।
इदन्तु नयनद्वन्द्वं तव तद्गुणभूषितम् ॥ १९१ ॥

अन्यदुदाहरति—'अभ्रूविलासम्' इति । 'मृगेक्षणम्'=हरिणनयनम् 'अभ्रूविलासम्'=नास्ति भ्रुवोविलास कटाक्षपातो यस्य तत् तथाविधम्, तथा 'अस्पृष्टमदरागम्'=न स्पृष्ट प्राप्त मदरागः मदपानजनित लौहित्य येन तत् तथाविधम् 'अस्ति' इति शेष । नयनद्वन्द्वम्'=अक्षियुगलम् तद्गुणभूषितम्'=भ्रूविलासि स्पृष्टमदरागञ्च वर्त्तत इत्यर्थः ।

अत्र मृगेक्षणमुपमानम्, [कान्ता] नयनद्वन्द्वमुपमेयम् । तयो परस्पर विरुद्ध एव धर्मो दर्शित । तेन सादृश्य व्यङ्ग्यमोति अयमपि 'प्रतोयमानव्यतिरेक.' ॥ १९१ ॥

पूर्वस्मिन् भेदमात्रोक्तिरस्मिन्नाधिक्यदर्शनम् ।
सदृशव्यतिरेकश्च पुनरन्य. प्रदर्श्यते ॥ १९२ ॥

उक्तयोरुदाहरणयो प्रयोजन दर्शयन् 'सदृशव्यतिरेक' प्रतिजानीते—'पूर्वस्मिन्' इति । 'पूर्वस्मिन् =त्वन्मुखमित्याद्युदाहरणे 'भेदमात्रोक्ति '=उपमानोपमेययोर्द्वयो भेदको यो धर्म आश्रयभेदरूप' केवल तस्यैव कथन नतु सौरभवत्त्वादिसादृश्योक्ति [नतु प्रस्तुतस्योत्कर्षोक्तिरित्यर्थ] तत् गम्यमेव । 'अस्मिन्'=अभ्रूविलासमित्यादिद्वितीयोदाहरणे आधिक्यदर्शनम्'=उपमानोपमेययोरुत्कर्षापकर्षप्रतिपादकविशेषणै उपमेयभूतनयनसम्बन्धिन उत्कर्षमात्रस्य व्यञ्जयतेति द्वयोर्व्यतिरेकयोर्विशेष । 'पुन अन्य '=आभ्या विलक्षणप्रकार 'सदृशव्यतिरेक '=सादृश्यनिमित्तको व्यतिरेक सदृशधर्ममात्रप्रयोगेण व्यतिरेक 'सदृशव्यतिरेक ' प्रदर्श्यते ॥ १९२ ॥

[शाब्दसादृश्यस्य सदृशव्यतिरेकस्योदाहरणम्]

त्वन्मुखं पुण्डरीकञ्च फुल्ले सुरभिगन्धिनी ।
भ्रमद्भ्रमरमम्भोजं लोलनेत्रं मुखन्तु ते ॥ १९३ ॥

सदृशव्यतिरेकमुदाहरति—' त्वन्मुखम् ' इति । 'त्वन्मुखम् '=तवास्यम् 'पुण्डरीकम् =कमलञ्च इति द्वे अपि 'फुल्ले'=विकसिते [तत्र कमले पत्रविश्लेषात्मको विकास मुखे च स्मितमय स इति विशेष] तथा 'सुरभिगन्धिनी'=सौरभगन्धोपेते अब्जस्य सुगन्ध प्रकृतिसिद्ध मुखस्यापि स पद्मिनीनायिकासम्बन्धित्वात्स्वभावसिद्ध । अथ व्यतिरेक दर्शयति—'अम्भोजम् =कमलम् 'भ्रमद्भ्रमरम्'=भ्रमन्त मधुलोभित्वेन सञ्चरन्त भ्रमरा द्विरेफा यत्र तत्तादृशम 'ते [तव] मुखम् तु' 'लोलनेत्रम '=लोले चञ्चले नेत्रे नयने यस्मिन तत् तथाविधम 'अस्ति' इति शेष ।

अत्र फुल्लत्व सुरभिगन्धित्वयोरिति द्वयो साधारण्यात सादृश्य शब्दोपात्तम् । 'भ्रमद्भ्रमरत्व लोलनेत्रत्व' इति यद्यपि द्वयोरसाधारणो धर्म तथापि तद्द्वय विम्बप्रतिविम्ब-

भावेनात्र साधारणरूप । उक्तञ्च—'अयमेव भेदो भेदहेतुर्यद्विरुद्धधर्माध्याम कारणभेदश्च' इति । भेदश्चात्र द्वयोर्विम्बप्रतिविम्बभावेन प्रतीयते नतु स्फुटशब्देनाभिधीयते ।

भावेन सदृशमेव नतु विरुद्धम् । अत्र भ्रमरापेक्षया नेत्रस्योत्कर्षे तेन मुखस्याधिक्यमिति सदृशव्यतिरेकोऽयं शाब्दः, सादृश्यस्य शब्दोपात्तत्वात् ॥ १६३ ॥

[प्रतीयमानसादृश्यस्य सदृशव्यतिरेकस्योदाहरणम्]

चन्द्रोऽयमम्बरोत्तंसो हंसोऽयं तोयभूषणम् ।
नभो नक्षत्रमालीदमुत्फुल्लकुमुदं पयः ॥ १६४ ॥

प्रतीयमानसादृश्यं सदृशव्यतिरेकमुदाहरति—‘चन्द्र’ इति । ‘अयम्’=पुरोवर्त्ती ‘चन्द्रः’=शशी ‘अम्बरोत्तंसः’=अम्बरस्य गगनस्य उत्तंसः भूषणम् । ‘अयं हंसः तोयभूषणम्’=जलमण्डनम् । ‘इदं नभः नक्षत्रमालि’=नक्षत्राणां तारकाणां माला राजिर्यत्र तत्तादृशम् । ‘पयः’=जलम् अर्थात् कासारस्य ‘उत्फुल्लकुमुदम्’=विकसितनीलेन्दीवरम् ‘वर्त्तते’ इति अध्याहृत्य सर्वत्र योजनीयम् । ‘पुंस्युत्तंसावतंसौ द्वौ कर्णपूरे च शेखरे’ इत्यमरः ।

अत्र उपमानोपमेयभूतयोश्चन्द्रहंसयोः आकाशपयसोश्च सादृश्यमर्थबललभ्यं शब्दानुपात्तत्वात् तेनायम् ‘आर्थः सदृशव्यतिरेकः’ ॥ १६४ ॥

[उक्तार्थस्पष्टीकरणम्]

प्रतीयमानशौक्ल्यादिसाम्ययोश्चन्द्रहंसयोः ।
कृतः प्रतीतशुद्ध्योश्च भेदोऽस्मिन् वियदम्भसोः ॥ १६५ ॥
पूर्वत्र शब्दवत्साम्यमुभयत्रापि भेदकम् ।
भृङ्गनेत्रादितुल्यं तत् सदृशव्यतिरेकिता । १६६ ॥

उक्तयोर्द्वयोरुदाहरणयोर्गतिं स्वयं स्पष्टीकरोति—‘प्रतीयमान०’ इत्यादिद्वाभ्याम् । ‘अस्मिन्’=चन्द्रोऽयम् इत्यादि प्रथमोदाहरणे ‘प्रतीयमानशौक्ल्यादिसाम्ययोः’=प्रतीयमानं वाचकशब्दाप्रयोगात् गम्यमानम् आर्थमिति यावत् तादृशं यत् शौक्ल्यादि शुक्लगुणवत्त्वादि साम्यं साम्यं ययोः तयोस्तथाभूतयोः ‘चन्द्रहंसयोः’ तथा ‘प्रतीतशुद्ध्योः च’=प्रतीता लोकप्रसिद्धा शुद्धिः नैर्मल्यं ययोः तयोः ‘वियदम्भसोः’=आकाशपयसोश्च ‘भेदः’=वैधर्म्यम् ‘कृतः’=दर्शितः । एवमत्र सादृश्यं शब्देन [साक्षात्] नोपात्तमित्यार्थः ‘सदृशव्यतिरेकः’ ।

‘पूर्वत्र’=पूर्वस्मिन् त्वन्मुखमित्यादिद्वितीयोदाहरणे ‘उभयत्र अपि’=उपमानोपमेययोरुभयोरपि ‘शब्दवत्’=शब्दगृहीतं शब्दोपात्तमित्यर्थः ‘साम्यम्’=भृङ्गनेत्रादितुल्यम् भ्रमरस्य नेत्रस्य च नीलत्वादि साम्यं ‘भेदकम्’=विशेषकम् ‘अस्ति’ इति शेषः । तच्च निर्दिष्ट-प्रतीतिदार्ढ्यभावनया साम्यप्रतिपादकम् तत् तस्मादेते ‘सदृशव्यतिरेकिता’=शाब्दः सदृशव्यतिरेक इत्यर्थः ॥ १६५ ॥ १६६ ॥

[साम्यानिर्व्यतिरेकस्योदाहरणम्]

अस्तालोचकसंहार्यमवार्यं सूर्यरश्मिभिः ।
दृष्टिरोधकरं यूनां यौवनप्रभवं तमः ॥ १६७ ॥

'सजातिव्यतिरेकम्' उदाहरति—'अरत्नालोकसंहार्यम्' इति । 'यूनाम्'=तरुणानां 'यौवनप्रभवम्' यौवनं प्रभवः उत्पत्तिस्थानं यस्य तत् तादृशं,=तारुण्यसमुत्थमित्यर्थः 'तमः'=मोहः अन्धकारश्च 'अस्ति' इति शेषः । कीदृशं तत् इत्याकाङ्क्षायां विशेषणान्याह—'अरत्न०' इत्यादिना । रत्नानां=माणिक्यादीनां आलोकेन=प्रकाशेन यत् संहार्यं=निवार्यं न भवति तत् 'सूर्यरश्मिभिः'=भास्करगभस्तिभिः 'अवार्यम्'=वारयितुमशक्यम् । तथा 'दृष्टिरोधकरम्'=दृष्टिश्चक्षुः ज्ञानञ्च तयोः रोधकरं प्रतिबन्धकम् आवरकमिति यावत् ॥ १९७ ॥

[सजातिव्यतिरेकस्य लक्ष्ये सङ्गमनम्]

सजातिव्यतिरेकोऽयं तमोजातेरिदं तमः ।
दृष्टिरोधितया तुल्यं भिन्नमन्यैरदर्शि यत् ॥ १९८ ॥

इति व्यतिरेकचक्रम्

उक्तोदाहरणे सजातिव्यतिरेकं स्वयं घटयति—'सजातिव्यतिरेकः' इति । 'यत्'=यस्माद्धेतोः 'इदम् तमः'=मोहरूपम् 'दृष्टिरोधितया'=दृष्टेरावरणकर्तृत्वेन 'तुल्यम्'=समानम् 'अन्यैः'=साधारणधर्मैः रत्नालोकहार्यत्वादिभिः 'तमोजातेः'=अन्धकारजातितः 'भिन्नम्'=वैलक्षण्यं गतम् 'अदर्शि'=उपनिबद्धम् 'कविने'ति शेषः अतो हेतोः 'अयं सजातिव्यतिरेकः उच्यते' इति शेषः ।

प्रसिद्धं तमस्तु रत्नालोकादिभिर्निवार्यं भवति, यौवनप्रभवं मोहात्मकं तमस्तु न तादृशम्, तमस्त्व जातिस्तु एकैव उभयत्रानुगतप्रत्ययकारणात् । अत्र च श्लेषेणैव तमःपदेन उपमानोपमेयभूतयोर्मोहान्धकारयोरुभयोरुपादानं कृतमिति सामान्यलक्षणं सङ्गतमेव । मोहात्मकं तमः उपमेयम् । प्रसिद्धमन्धकारात्मकं तमस्तूपमानम् । केचित्तु—तम एव तम इति '[illegible]' मित्याहुः ।

इत्थम्—एकव्यतिरेकः, उभयव्यतिरेकः, सश्लेषव्यतिरेकः, साक्षेपव्यतिरेकः, सहेतुकव्यतिरेकः, प्रतीयमानसाम्यव्यतिरेकः, शाब्दसादृश्यसदृशव्यतिरेकः, प्रतीयमानसादृश्यव्यतिरेकः, सजातिव्यतिरेकः इति [९] नवसङ्ख्यो व्यतिरेको दर्शितः । सन्ति ग्रन्थान्तरेषु अन्यान्यप्युदाहरणानि व्यतिरेकस्य तत्र कानिचित् प्रपञ्च्यन्ते—

[illegible] कुमुदं [illegible] न [illegible] शशिनि पराञ्चि पर सरोरुहाणि ।
[illegible] प्रवर्तते विश्व[illegible] प्रतापरुद्र ॥

[illegible] । [२] पराञ्चि=प्रतिकूलानि । [३] कुवलयम=कुमुदम् [illegible] । कमला=[illegible], कमला लक्ष्मी च । [illegible]भेदात्त्ववर्णिते कुवल[illegible] [illegible]श्लेषमूलम् ।

अत्र रविशशिनोरसम्भवेन सर्वप्रियङ्करत्वेन उपमेयभूतस्य प्रतापरुद्रस्य 'कुवलयकमलाहृतप्रकाश' इति श्लेषमुत्थापितो व्यतिरेक । अस्यैव दण्डिमते 'सश्लेषव्यतिरेक' इति सञ्ज्ञा । यथा वा—

सकलङ्केन जडेन च साम्यं दोषाकरेण कीदृक्ते ।
अभुजङ्ग' समनयन कथमुपमेयो हरेणासि ॥

अत्रोपमानभूते चन्द्रे सकलङ्कत्वम्, राज्ञि चोपमेये कलङ्काभावेनाधिक्यम् । उत्तरार्धेऽपि उपमानस्य हरस्य विषमनेत्रवत्त्व भुजङ्गवत्त्वञ्च, उपमेये राज्ञि अभुजङ्गत्वसमदृष्टित्वाभ्यामाधिक्यम् । भुजङ्ग =विट सर्पश्च 'भुजङ्गो विटसर्पयो'रिति कोषात् । यथा वा—

'शैला इवोन्नता. सन्त किन्तु प्रकृतिकोमला' इति । अत्रोपमेयभूतानां सतां प्रकृतिकोमलत्व विशेष । अयमुपमेयाधिक्यपर्यवसायी व्यतिरेक । यथा वा—

हरवन्न विषमदृष्टिर्हरिवन्न विभो ! विधूतविततवृष ।
रविवन्न चातिदु सहकरतापितभू कदाचिदसि ॥

अत्र राजा उपमेय , हरादिरुपमानम्, विषमादय शब्दा' श्लिष्टा' उपमानगत विषमदृष्टित्वादिकमपकर्षहेतुरुपात्त । समदृष्टित्वादिना राज्ञ आधिक्यम् । यथा वा—

महेन्द्रतुल्य कवयो भवन्त वदन्तु किं तानिह वारयाम ।
भवान् सहस्र समुपास्यमान कथ समानस्त्रिदशाधिपेन ॥

अत्र त्रिदशाधिपत्वापेक्षया सहस्राधिपत्व राज्ञ उत्कर्ष । परन्तु श्लेषोत्थापितत्रिदशत्वसङ्ख्यामादयाय व्यतिरेक उपात्तोभयनिमित्तक । विश्वनाथादिभि प्रकारान्तरेणोक्ता अस्य भेदा तत एवावगन्तव्या ॥ १९८ ॥

[विभावनाया लक्षणम्]

'प्रसिद्धहेतुव्यावृत्त्या यत् किञ्चित् कारणान्तरम् ।
यत्र स्वाभाविकत्वं वा विभाव्यं सा विभावना ॥ १९९ ॥

— —

विभाविता यो भूतिमेव यच्छति प्रभावितो यो ऽभूतिमेव यच्छति ।
भव तमग्र शिवमस्य विभु सम्भावये सर्वरस निरञ्जनम् ॥ १ ॥

— —

क्रमप्राप्तां विभावनां निरूपयन्नादौ तस्या लक्षणमाचष्टे—'प्रसिद्धहेतु०=' इति । 'यत्र=यस्यां [illegible] [illegible] 'प्रसिद्धहेतुव्यावृत्त्या=प्रसिद्धस्य लोके स्वाभाविकस्य हेतो कारणस्य व्यावृत्त्या अभावेन यत् किञ्चित् कारणान्तरम्=यत्किमपि हेत्वन्तर वा= अथवा 'स्वाभाविकत्वम्=स्वत सिद्धभावो [वा] 'विभाव्यम्'=विशेषेण [illegible] [illegible] [illegible] [स्यात्] सा=प्रसिद्धा 'विभावना'=उच्यते' इति शेष । उक्तञ्च—

(प्र०) 'विभावना लक्षणलक्ष्यादिकं [illegible] स्फुटोक्तम्' । (उ०) काव्या० पृ० [illegible] ।

परन्तु मूलकृल्लक्षणे यत् 'कारणान्तरम्' इत्युक्त तत् क्वचित् शाब्द क्वचित् आर्थम् । शाब्द यथा—

अनायासकृश मध्यमशङ्कातरले दृशौ ।
अभूषणमनोहारि वपुर्वयसि सुभ्रुव ॥

अत्र हि वयोरूप कारणान्तरमुक्तम्, तस्य च कारणतयाऽनिर्देशाद् विभाव्यत्वम् । आर्थन्तु अनुपदमुदाहरिष्यते 'अपीतक्षीबकादम्ब' मित्यादिना ।

यत्र तु कारणविरुद्धसद्भावेन कारणाभावप्रतिपादन तत्रापीय भवति परन्तु सा न स्फुटतरा । यथा—

य कौमारहर स एव हि वरस्ता एव चैत्रक्षपा
स्ते चोन्मीलितमालतीसुरभयः प्रौढा कदम्बानिला ।
सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ
रेवारोधसि वेतसीतरुतले चेत· समुत्कण्ठते ॥

अत्र हि उत्कण्ठारूपकार्यस्य प्रसिद्धहेतूना पत्यभावादीनामभावो विरुद्धेन पत्यादिसद्भावेन प्रतिपादित इति नात्र स्फुटत्वमस्या । अतएव आचार्याः आहु —'अत्र स्फुटो न कश्चिदलङ्कार इति'। एवमेव स्वाभाविकत्वमपि क्वचिच्छाब्द क्वचिदार्थञ्चोहनीयम् ॥१९९॥

[कारणान्तरविभावनाया' उदाहरणम्]

अपीतक्षीबकादम्बमसंमृष्टामलाम्बरम् ।
अप्रसादितशुद्धाम्बु जगदासीन् मनोहरम् ॥ २०० ॥

तत्रादौ कारणान्तरविभावनामुदाहरति—'अपीतक्षीब०' इति । 'जगत् मनोहरम्'=सुन्दरम 'आसीत्'=अभूत् । कथंभूत जगत । 'अपीतक्षीबकादम्बम्'=न पीता अकृतमधुपाना [तथापि] क्षीबा मत्ता कादम्बा हंसा यस्मिन तत् । पुन कीदृशम् । 'असम्मृष्टामलाम्बरम्'=असम्मृष्ट मार्जन्या असंशोधित [तथापि] अमल निर्मल अम्बर गगन यस्मिन तत । पुन कीदृशम । 'अप्रमादितशुद्धाम्बु'=अप्रमादितम कतकादिना अनिर्मलीकृत [तथापि] शुद्ध स्वच्छ अम्बु जल यस्मिन् तत तादृशमित्यर्थ ।

अत्र क्षीबताया कारणं मधुपान प्रसिद्धम् तथा अमलत्वकारण मार्जनम्, शुद्धेश्च कारणं कतकादिना प्रसादनमिति तत्तत्कारणाभावेऽपि तत्तत्फलोत्पत्तिदर्शनात शरत्कालरूप कारणान्तरं विभाव्यत इति 'कारणान्तरविभावना' इयमुच्यते। तच्च [शरद्रूप] कारणान्तरमत्रानुक्तम् । 'पीता' इत्यत्र वर्तमाने क्त । पिबन्तीति पीता । 'मतिबुद्धि-पूजार्थेभ्यश्च' [३ । २ । १८८] इत्यत्र चकारस्यानुक्तसमुच्चयार्थत्वात् । न पीता [illegible] ।

[illegible]

[स्वाभाविकत्वविभावनाया उदाहरणम्]

अनञ्जिताऽसिता दृष्टिर्भ्रूरनावर्जिता नता ।
अरञ्जितोऽरुणश्चायमधरस्तव सुन्दरि ! ॥ २०१ ॥

'स्वाभाविकत्वविभावनाम्' उदाहरति—'अनञ्जिता' इति । हे ! सुन्दरि !'=सुभ्रु ! 'तव दृष्टि '=दृक् 'अनञ्जिता'=अञ्जनेन रहिता अपि 'असिता'=श्यामा 'भ्रू: अनावार्जिता' न आवर्जिता आकृष्टा अर्थात् अनाकृष्टा अपि 'नता'=नम्रीभूता वक्रा इत्यर्थ 'अयम् अधर '=अराञ्जित =यावकरागेण ताम्बूलादिना वा अनाक्तोपि 'अरुण '=रक्तः सर्वत्र 'अस्ति' इति क्रियाया अध्याहार ।

अत्र असितत्वस्य कारणमञ्जनम्, वक्रताया कारणमावर्जनम्, अरुणताया कारण रञ्जन लोके प्रसिद्धम्, परन्तु तदभावेऽपि तत्तत्फलवचनात् 'स्वाभाविकत्वविभावने'यम् । इयास्तु विशेष —उक्त स्वाभाविकत्व गम्यम्, प्रसिद्धकारणाभावश्च शब्दोपात्त ॥२११॥

[विभावनालक्षणसङ्गतिः]

यदपीतादिजन्यं स्यात् क्षीबत्वाद्यन्यहेतुजम ।
अहेतुकञ्च तस्येह विवक्षेत्यविरुद्धता ॥ २०२ ॥

उक्तयोरुदाहरणयो विभावनालक्षण सङ्गमयन् कारणाभावे कथ कार्याभाव इति विरोध परिहरति 'यद्' इति । पूर्वस्मिन्नुदाहरणे 'अपीतादिजन्यम्'=पानादिना अजनित यत 'क्षीबत्वादि तत् 'अन्यहेतुजम्'=शरदा कारणान्तरेण जन्यमस्ति । द्वितीये तु—अञ्जितत्वादिना अजन्य यद् असितत्वादि तद 'अहेतुकम्'=स्वाभाविकमस्ति । 'इह'=विभावनालङ्कारवति दर्शितकाव्ये 'तस्य'=अन्यहेतुजत्वस्य अहेतुकत्वस्य च 'विवक्षा = वक्तु कवेरिच्छा [एव नियामिका] इत्यतोहेतो 'अविरुद्धता'=विरोधस्याभाव ज्ञेय । इदन्य विचारान्तर सुकुमारमत्यनुपयुक्त मत्वा नावतारितम । इयञ्चान्यत्र उक्तनिमित्ता अनुक्तनिमित्ता चेति द्विधा उक्ता । तत्राद्या यथा—

असम्भृत मण्डनमङ्गयष्टेरनासवाख्य करण मदस्य ।
कामस्य पुष्पव्यतिरिक्तमस्त्र बाल्यात्पर साथ वय प्रपेदे ॥

अत्र द्वितीये पादे मदस्य प्रसिद्ध यदासवाख्य कारण तदभावेऽपि यौवनहेतुकत्वेनो-पनिबन्ध इत अत्र अस्य वयोरूपनिमित्तस्योक्तत्वात 'उक्तनिमित्ता । परा यथा—

आलेख्यामनवार्भितरसमालम्भनपिङ्गराम् ।
अनलक्तकताम्राभालोकलग्ना च बिभ्रतीम ॥

अत्र नरजद ग्म्यमानमित्यनुक्तनिमित्तेयम् ॥ २०२ ॥

क [illegible] निमित्तप्रकाशनं [illegible] इति नाद ।

[शाब्दस्वाभाविकत्वनिबन्धनाया उदाहरणम्]

वक्त्रं निसर्गसुरभि वपुरव्याजसुन्दरम् ।
अकारणरिपुश्चन्द्रो निर्निमित्ताऽसुहृत् स्मर. ॥ २०३ ॥

'शब्दस्वाभाविकत्वविभावनां' दर्शयति—'वक्त्रम्' इति । 'वक्त्रम्'=आस्यम् 'निसर्ग-सुरभि'=निसर्गेण प्रकृत्यैव सुरभि शोभनगन्धम् 'वपु'=शरीरम् 'अव्याजसुन्दरम्=' स्वाभाविकमधुरम् 'चन्द्र'=शशी 'अकारणरिपु'=निर्निमित्तवैरी तथा 'स्मर'=काम 'निर्निमित्तासुहृद्'=अकारणशत्रु, असुहृत् प्राणहृद्वा विरहिणा सन्तापकरत्वादित्यर्थ ।

सुरभित्वादीना स्वाभाविकत्व निसर्गादिपदबोध्यमिति शब्दोपात्तमेव स्वाभाविकत्व-मितीय शब्दनिष्ठस्वाभाविकत्वनिबन्धना विभावना ॥ २०३ ॥

[उक्तलक्ष्ये स्वोक्तिसङ्गमनम्]

निसर्गादिपदैरत्र हेतु साक्षान्निवर्तित ।
उक्तञ्च सुरभित्वादि फलं तत् सा विभावना ॥ २०४ ॥

— —

इति विभावनाचक्रम्

— —

[illegible] घटयित्वा दर्शयति—'निसर्गादि ०' इति । 'अत्र'=उक्तोदाहरणे 'निसर्गादिपदै [illegible]'=[illegible] 'हेतु'=लोकप्रसिद्धम् कारणम् 'निवर्तित'=बाधित अथवा [illegible] 'सुरभित्वादि फल च उक्तम्'=निरूपितम् 'तत्'=तस्मात् कारणाभा[illegible] फलस्य [कार्यस्य] उदयाद्धेतो तस्य स्वाभाविकत्वबोधाच्च 'सा'=उक्तरूपा [illegible]स्वाभाविकत्वस्वरूपा 'विभावना' ज्ञेयेति शेष ॥ २०४ ॥

[अथ समासोक्तिलक्षणम्]

वस्तु किञ्चिदभिप्रेत्य तत्तुल्यस्यान्यवस्तुन ।
उक्ति संक्षेपरूपत्वात् सा समासोक्तिरिष्यते ॥ २०५ ॥

— —

[illegible] तां नित्य यायै सरस्वतीम् ।
[illegible] शास्त्र समवस्थिता ॥

द्वयकथनात् 'समासोक्तिः' इति नाम अलङ्कारः 'इष्यते'=मन्यते इत्यर्थः। अर्थ संक्षेपस्यैव प्रकृते समानरूपत्वात् ।

यत्र प्रस्तुताप्रस्तुतयोर्द्वयोर्मध्ये एकस्य अप्रस्तुतस्य प्रयोगेण अपरस्य प्रस्तुतस्य व्यञ्जनया बोधः तत्र 'समासोक्ति' रिति दण्डिलक्षणसारः । अभिधया प्रतिपादनापेक्षया व्यञ्जनया वस्तुप्रतिपादनं हि समधिकं चमत्कारमावहति । उक्तञ्च ध्वनिकृता—वाच्योऽर्थो न तथा स्वदते प्रतीयमानः स एव यथेति । 'संक्षेपरूपत्वात्' इति संज्ञाया बीजमुक्तम् । एतद्विषये 'सरस्वतीकण्ठाभरणकार' इत्थमाह—

यत्रोपमानादेवैतदुपमेयं प्रतीयते ।
अतिप्रसिद्धेस्तामाहुः समासोक्तिं मनीषिणः ।
संक्षेपेणोच्यते यस्मात् समासोक्तिरियं ततः ॥ इति ॥

एवञ्च-शब्दोपात्तादुपमानाद् अत्यन्त प्रसिद्धस्योपमेयस्य प्रतीतिः समासोक्तिरित्यायातं भवति । आह च वामनः—'**अनुक्तौ समासोक्तिः**' [काव्या सू अध्या ४ सू ३ ।] अस्यायमर्थः—उपमेयस्यानुक्तौ समानवस्तुन्यासः समासोक्तिः—संक्षेपवचनात् समासोक्तिरित्याख्या । यथा—

श्लाघ्या स्वस्वाङ्गसन्ताने शरीरस्य मरौ स्थितिः ।
धिङ् मेरौ कल्पवृक्षाणां मरुत्पन्नार्थिनां श्रियः ॥

अत्र शरीरस्य मरुस्थितिश्लाघनेन कल्पवृक्षाणां मेरुस्थितिनिन्दनेन च तदुपमेययोः परोपकारप्रवणतद्विमुखयोः श्लाघानिन्दे समस्योक्ते इतीयं समासोक्तिः ।

[कार्यघटितायाः समासोक्तेरुदाहरणम्]

पिबन् मधु यथाकामं भ्रमरः फुल्लपङ्कजे ।
अप्यसन्नद्धसौरभ्यं पश्य चुम्बति कुड्मलम् ॥ २०६ ॥

तत्र कार्यलिङ्गविशेषणघटितां समासोक्तिम् उदाहरति पिबन् इति । 'भ्रमरः'=द्विरेफः 'फुल्लपङ्कजे'=विकसितकमले 'यथाकामम्'=यथाभिलाषम् 'मधु'=मकरन्दम् 'पिबन्'=आस्वादयन् 'असन्नद्धसौरभ्यम्'=न सम्यक् स्फुटीभूतं सौरभ्यं सुगन्धो यत्र तत् तादृशमपि 'कुड्मलम्'=कोरकम् 'चुम्बति'=वक्त्रेण संयोजयति स्पृशतीति यावत् [illegible] त्व

[प्र०] कार्यघटितायाः समासोक्तेरुदाहरणं लिखित्वा आरभ्य [illegible] तत्र [illegible] । [उ०] अत्र पृ० ५० ५६ ।

[illegible]
[illegible]
[illegible]

पश्य'=आलोकय । अत्र 'पश्य मृगो धावतीतिवद्' वाक्यार्थस्य कर्मता ॥ २०६ ॥

[लक्ष्ये लक्षणयोजनप्रकार]

इति प्रौढाङ्गनाबद्धरतिलीलस्य रागिणः ।
कस्याञ्चिदिह बालायामिच्छावृत्तिर्विभाव्यते ॥ २०७ ॥

एतद् [उक्तलक्ष्ये] घटयति—'इति' इति । 'इति'=अमुना प्रकारेण दर्शितोदाहरणे 'प्रौढाङ्गना'=प्रौढा युवति चासौ [या] अङ्गना=कामिनी तस्याम् आबद्धा समन्ताद् योजिता रतिलीला=कामक्रीडा येन तस्य तादृशस्य 'रागिणः'=कस्यचित् कामुकस्य 'कस्याञ्चिद् बालायाम्'=अमजातरजस्कायामपि 'इच्छावृत्ति'=कामोदय 'विभाव्यते'=व्यज्यते ।

एवमत्र अप्रस्तुतस्य भ्रमरस्य यत् कार्यम्, अर्थात् फुल्लपङ्कजमधुपानपूर्वक पकजकोरकमधुपानेच्छारूपम्, प्रस्तुतस्य कामुकस्य प्रौढाङ्गनासक्तिरतिलीलापूर्वकबालासम्भोगेच्छा च तयोर्द्वयो परस्पर बिम्बप्रतिबिम्बभावेन सादृश्यम् [साम्यम्] अस्ति, तेन चाप्रस्तुतभ्रमरवृत्तान्तात् प्रस्तुतकामुकवृत्तान्तप्रतीतिरिति 'कार्यलिङ्गविशेषणघटिता' समासोक्ति ॥१०७॥

[अन्यप्रकाराया समासोक्ते कथनम्]

विशेष्यमात्रभिन्नापि तुल्याकारविशेषणा ।
अस्त्यसावपराप्यस्ति भिन्नाभिन्नविशेषणा ॥ २०८ ॥

[illegible] समासोक्तिमाचष्टे—'विशेष्यमात्र०' इति । 'विशेष्यमात्रभिन्ना'=[illegible] विशेष्यपद भिन्न श्लेषाभावात एकार्थस्यैव बोधक यत्र सा तादृशी [illegible] 'तुल्याकारविशेषणा'=तुल्याकार समानाकार श्लेषभित्तिकारणात् वाच्यव्यङ्ग्ययोभयार्थ [illegible] विशेषण यत्र सा इति एका विधा 'अस्ति' । 'भिन्नाभिन्नविशेषणा'=भिन्नम [illegible] अभिन्नम् उभयार्थबोधक विशेषण यत्र सा 'असौ' तादृशी 'अपरा'=[illegible] विधा 'अस्ति' । [illegible] '[illegible]ष्टविशेषणा [illegible]ष्टविशेषणा' चेति अन्या [illegible] समासोक्ति [illegible] भवति ॥ २०८ ॥

[[illegible]ष्टविशेषणाया समासोक्तेरुदाहरणम्]

[illegible]मूल फलभरै पुष्पाग्न[illegible] ।
सान्द्रच्छायो महावृक्ष सोऽयमासादितो मया ॥ २०९ ॥

तत्र श्लिष्टविशेषणा समासोक्तिमुदाहरति—'रूढमूल' इति । 'रूढमूल'=रूढं वृद्धिं गतं मूलं शिफा, मूलधनं नीवी इत्याख्यं च यस्य स । 'अनिशम्'=अहोरात्रं यथा स्यात्तथा 'फलभरैः'=फलानां शस्यानां भरः अतिशयः, अन्यत्र फलहेतुवर्धनैः धनलाभैरित्यर्थः 'अर्थिन'=याचकान् 'पुष्णन्'=पोषयन् 'सान्द्रच्छाय'=सान्द्रा निविडा छाया आतपाभावः, अन्यत्र कान्तिर्यस्य सोऽयम् प्रसिद्धः उक्तविशेषणोपेतः 'महावृक्ष'=तरुराट् 'मया आसादित'=प्राप्तः । अत्र मूलादिशब्दा अनेकार्था इत्याभिधानि [श्लिष्टानि] विशेषणानि तत एवेयं श्लिष्टविशेषणा' समासोक्तिः ।

'मूलमाद्ये शिफाभयोः' इत्यमरः । 'मूलं शिफाययोः मूलं वित्तेऽन्तिके ना भे' इति, । 'छाया स्यादातपाभावे प्रतिविम्बार्कयोषितोः' इति च मेदिनी ॥ २०९ ॥

[श्लिष्टाश्लिष्टविशेषणाया उदाहरणम्]

*** अनल्पविटपाभोगः फलपुष्पसमृद्धिमान् ।**
सुच्छायः स्थैर्यवान् दैवादेष लब्धो मया द्रुमः ॥ २१० ॥

'श्लिष्टाश्लिष्टविशेषणा' मुदाहरति—'अनल्प०' इति । 'अनल्पविटपाभोग'=अनल्पः प्रचुरः विटपानां शाखानाम् आभोगः विस्तारो यस्य स । फलपुष्पसमृद्धिमान्'=फलानां शस्यानां पुष्पाणां सुमानां समृद्धिः सम्पत्तिः यस्य स । 'सुच्छाय'=शोभना मनोहारिणी छाया आतपाभावः अन्यत्र कान्तिर्यस्य स । 'स्थैर्यवान्'=स्थिरस्य भावः स्थैर्यं सारवत्ता तद्वान् अन्यत्र विघ्ने सत्यपि स्वव्यवसायादविचलनं स्थैर्यं तद्वान् सत्त्वसन्ध इत्यर्थः । एवंविधः 'एष द्रुम'=तरुः 'मया दैवात्'=भाग्यवशात् 'लब्ध'=आसादितः ।

अत्र अनल्पेत्यादीनि विशेषणानि अश्लिष्टानि सुच्छाय इत्यादीनि कानिचित् श्लिष्टानि सन्ति तस्मादियं 'श्लिष्टाश्लिष्टविशेषणा समासोक्तिः' ॥ २१० ॥

[उक्तोदाहरणद्वये लक्षणसमन्वयप्रकारः]

उभयत्र पुमान् कश्चित् वृक्षत्वेनोपवर्णितः ।
सर्वे साधारणा धर्माः पूर्वत्रान्यत्र तु द्वयम् ॥ २११ ॥

उक्तो उदाहरणद्वये स्वयं द्विविधसमासोक्तिलक्षणं सगमयति—'उभयत्र' इति । 'उभयत्र'=उभे पद्यद्वये 'कश्चित'=प्रस्तुतः पुमान् 'वृक्षत्वेन'=अप्रस्तुतवृक्षत्वधर्मेण अर्थात् उपमानत्वेन 'उपवर्णित'=निरूपितः अध्यवसानात् इति तु हृदयम् । 'पूर्वत्र'=रूढमूल' इतिपद्ये 'सर्वे धर्मा'=रूढमूलत्वाद्या साधारणा'=श्लेषमहिम्ना उपमानोपमेयगामिनः 'सन्ति' इति शेषः । केवलं समासस्य इति विशेषणपदं भिन्नम् अर्थात् असाधारणमस्ति नात्र कश्चित् [ ] इति भावः । 'अन्यत्र तु'=द्वितीयस्मिन् 'अनल्प'त्यादि पद्ये तु 'द्वयम्'=[ ] विशेषणमस्ति । अर्थात् आद्यन्तयोः विशेषणे श्लेषो नास्तीति अनल्पेत्यादि मध्यवर्तिनोः तु श्लेषो विद्यत इति हेतुना विशेषणद्वयं इति तु [ ] [illegible]-

* [illegible]

भिन्नमेव। समासोक्तौ विशेष्यस्याश्लिष्टत्वनियमादिति भाव ॥ २११ ॥

[अपूर्वसमासोक्तेरुदाहरणम्]

' निवृत्तव्यालसंसर्गो निसर्गमधुराशय' ।
अयमम्भोनिधि कष्टं कालेन * परिशुष्यते ॥ २१२ ॥

अपूर्वसमासोक्तिम्' उदाहरति—'निवृत्त०' इति। 'निवृत्तव्यालसंसर्गः='निवृत्त दूरीभूत व्यालानां सर्पाणाम् अन्यत्र खलानां संसर्ग सम्बन्धो यस्मात् स । 'निसर्गमधुराशय' निसर्गेण प्रकृत्या मधुराणां सुस्वादुजलानामाशय आधार अन्यत्र मधुर हृद्य क्रूरत्वादिमालिन्यरहितत्वेन निर्मल आशयो हृदयम् अभिप्रायो यस्य स । एवभूत 'अयम्' 'अम्भोनिधि =समुद्र 'कालेन'=कालकृतेन परिणामेन 'परिशुष्यते' शोषम्प्रति नीयते अन्यत्र नष्टसम्पत्ति क्रियते । 'व्यालो दुष्टगजे सर्पे शठे श्वापदसिंहयो ' इति हैम । अभिप्रायच्छन्द आशय ' इत्यमर ॥ २१२ ॥

[लक्ष्येऽपूर्वसमासोक्तिलक्षणायोजनम्]

इत्यपूर्वसमासोक्ति पूर्वधर्मनिवर्त्तनात् ।
समुद्रेण समानस्य पुंसो व्यापत्तिसूचनात् ॥ २१३ ॥

इति समासोक्तिचक्रम्

*तयो पृथगुपादानेनेति प्रकारद्वयम् । [इदञ्च प्रकारद्वय श्लेषेऽपि] । परन्तु—यत्र प्रस्तुतस्य गम्यत्व तत्राप्रस्तुतप्रशंसाविषय । अप्रस्तुतस्य गम्यत्वे तु समासोक्तिरिति । 'नवीना' अप्रस्तुतस्य गम्यत्वे हेतुस्तु विशेषणसाम्यम्, विशेष्यस्यापि साम्ये श्लेषापत्ते । अत एव—

†असावुदयमारूढ कान्तिमान्रक्तमण्डल ।
राजा हरति सर्वस्य हृदय मृदुलै करै ॥

इत्यादौ चन्द्रवर्णनप्रस्तावे 'राजा' इति विशेष्यपदेऽपि प्रकृतस्य प्रत्यग्रोदितचन्द्रस्य अप्रकृतस्य नवाभिषिक्तस्य नृपते श्लेष ।

विशेषणसाम्यात् प्रतीयमानमप्यप्रस्तुत स्वावच्छेदकव्यवहार[त्व]समारोपेणैव चारु तादृशं नतत्र रूपक इव रूपमात्रसमारोपोऽपि, तथा सति उभयोर्विशेषानवगमात् । ततश्च—

विशेषणानां साम्येन यत्र प्रस्तुतवर्त्तिनाम् ।
अप्रस्तुतस्य गम्यत्व सा समासोक्ति रिष्यते ॥‡

इत्यादि लक्षणे 'विशेषणानाम्' इति बहुत्वमविवक्षित विशेषणबहुत्वाभावेऽपि समासोक्तिदर्शनात् । एव 'विशेषणसाम्यादप्रस्तुतावच्छेद समासोक्ति' रित्युक्त भवति । यथाश्रुते तु—'अप्रस्तुतेन प्रस्तुतस्य रूपरूपितत्वाद्रूपसमारोप स्यात्र व्यवहार [मात्र] समारोप इति । विशेषणसाम्यञ्च क्वचित् [१] श्लेषवशात् [२] साधारण्येन, [३] औपम्यगर्भत्वेन चेति त्रिधा भवति । तत्र श्लिष्टतया यथा—

'अयमैन्द्री मुख पश्य रक्तश्चुम्बति चन्द्रमा' । इति । इन्द्रस्य इयम् ऐन्द्री=प्राची । मुखम्=आदिभाग वदनञ्च । रक्त =रक्तवर्णोऽनुरागश्च चुम्बनम्=सम्बन्ध पक्षसंयोग-विशेषश्च । अत्र चन्द्रस्य प्राचीप्रारम्भलक्षणमुखसम्बन्धलक्षणे उदये वर्ण्यमाने 'मुख'

---

* प्रस्तुतयोरप्रस्तुतयो प्रस्तुताप्रस्तुतयोश्चेत्यर्थ ।

† उदयम्=जन्म अभिवृद्धिञ्च । रक्तम्=रक्तवर्णम् अनुरक्तञ्च । मण्डलम्=बिम्बम् देशञ्च । राजा=चन्द्रो नृपश्च । मृदुलै =अभिनवै अल्पैश्च । करै =किरणै प्राप्यधनैश्च ।

‡ प्रकृतार्थेन वाक्येन तत्समानविशेषणै ।
अप्रस्तुतार्थकथने समासोक्तिरुदाहृता ॥ इति तु रुद्रटभट्ट ॥
अनवरतविषमा रात्रिर्याता तरङ्गितदिङ्मा
श[illegible]मर्णगुदो याप्यायन्ते निमीलति पद्मिनी ।
[illegible] नमोमोदा भूमिरूपाणि निदर्शत
[illegible] इन्द्रे ॥

[illegible] समासोक्ते [illegible] इति जयरथ ।

शब्दस्य प्रारम्भवदनसाधारण्याद्- 'रक्त'शब्दस्य अरुणकामुकसाधारण्याच्च † चुम्बतीत्यस्य प्रस्तुतार्थसम्बन्धमात्रपरस्य शक्यार्थान्तरसाधारण्याच्च चन्द्रम शब्दगतेन पुलिङ्गेन ऐन्द्री-शब्दगतस्त्रीलिङ्गेन‡ तत्प्रतिपाद्येन्द्रसम्बन्धित्वेन च [९] उपस्कृतात् अप्रस्तुतपरवनितासक्त-पुरुषवृत्तान्त | प्रतीयते ।

यथा वा—

• उपोढरागेण विलोलतारकं तथा गृहीतं शशिना निशामुखम् ।
यथा समस्तं तिमिरांशुकं तया पुरोऽपि रागाद् गलितं न लक्षितम् ॥

अत्र निशाशशिनो श्लिष्टविशेषणसामर्थ्यात् नायकनायिकयोर्व्यवहारव्यक्ति, अपरिलक्ष्यमाणयोर्निशाशशिनो नायकनायिकात्वधर्मविशिष्टयोरेव प्रतीते । यथा वा—

= विकम्पितमुखीं रागासङ्गाद् गलत्तिमिरावृतिं,
दिनकरकरस्पृष्टा मैन्द्री निरीक्ष्य दिशं पुर ।
जरठलवलीपाण्डुच्छायो भृशं कलुषान्तर
श्रयति हरितं हन्त ! प्राचेतसीं तुहिनद्युति ॥ [विश्वनाथ]

अत्र मुखरागादिशब्दा श्लिष्टा । प्राच्यां वन्धकीव्यवहारसमारोपः, चन्द्रे नायक-व्यवहारसमारोप प्रतीयते ।

यथा वा—

* पद्मिनीं लालयन् प्रातः स्ववियोगान्मुनिव्रताम् ।
रागी करपरामर्शैः स्मेरयन् भाति भास्करः ॥ [साहित्यसारे]

अत्र प्रकृते सूर्योदये वर्ण्यमाने श्लिष्टविशेषणसामर्थ्यात् 'भास्कर' इति विशेष्यपदस्य चाश्लिष्टत्वात् अप्रकृतनायकविशेषनिष्ठनायिकाविशेषपरितोषणव्यवहारः प्रतीयते, सेयमपि श्लिष्टविशेषणनिबन्धना समासोक्तिः ।

साधारण्येन यथा—

तन्वी मनोरमा बाला लोलाक्षी पुष्पहासिनी ।
विकासमेति सुभग ! भवद्दर्शनमात्रतः ॥

अत्र तन्वादिविशेषणसाम्यात् लोलाक्ष्या लताव्यवहारप्रतीतिः । तत्र च लतैकगामि 'विकासाख्य' धर्मसमारोपः कारणम् । अन्यथा विशेषणसाम्यमात्रेण नियतलताव्यवहारस्य प्रतीतिरेव न स्यात् विकासश्च प्रकृते औपचारिकः ।

यत्तत्र परपक्षक्षोददक्षैः पण्डितराजैः 'नात्र विशेषणसाम्यमात्रेण लताव्यवहारप्रतीतिः अपि तु लतारूपाप्रकृतासाधारणविकासारोपमहिम्नेति भवतैवोक्तम् । तथाच विशेषणसाम्यादप्रस्तुतस्य गम्यत्वमिति त्वदुक्तसमासोक्तिलक्षणस्य कथमत्र प्रवृत्तिः' रित्याद्युक्तं तदुक्तम् ग्रन्थकाराशयानवबोधनात् । तथाहि किमत्र विशेषणान्येव न साधारणानि ? आहोस्वित् अप्रकृतासाधारणविकासारोपमहिममात्रतैव चारुताहेतुः ? अथवा रूपकस्यात्र व्यङ्ग्यत्वमात्रमिति ? न तावदाद्यः—'तन्वी मनोरमा' इत्यादिविशेषणानां प्रस्तुतनायिकायामिव अप्रस्तुतलतायामपि स्फुटं योजयितुं शक्यत्वात् [निष्पक्षसहृदयानां तथा प्रतीतेश्च] । नापि द्वितीयः—आरोपस्य सर्वथाऽसमतायां स्वरूपसत्तानुपपत्तेः । औपचारिकत्यापि तस्य सम्भवाच्च । अत एव विशेषणसाम्यमात्रेण नियतलताव्यवहारस्याप्रतीतेः'

ध्वनिता कामिनाथ] । जरठा=परिणता या लवली वृक्षविशेषः अर्थात् तत्फलं तद्वत् पाण्डुः छाया कान्तिर्यस्य सः अन्योऽपि स्वनायिकां परासक्तामालोक्य मलिनमुखो भवतीति वाक्यार्थः ।

* भास्करः सूर्यः स च रागी आदित्यवर्णरक्तिमशाली, पक्षे अनुरागशालित्वम् । प्रातः । स्मेति । स्वावरणगर्भावान्मुकुलिताम्, पक्षे निजविरहात् [illegible] यावत् । एतेन निरतिशयविरहानिलस्य द्योत्यते । एतादृशां पद्मिनीं कमलिनीम्, पक्षे एत- [illegible] । एतेन निरतिशयमान्द्यं सूच्यते । करैः । किरणसञ्चारत्वं । पक्षे हस्तकरणादन्यपोतादि [illegible] । [illegible] [illegible] । [illegible] ।

रिति सूक्ष्मकृतैवोक्तम् । नापि तृतीयः—रूपकस्य व्यञ्जतामात्रावबोधे कविसंरम्भाप्रतीते अनङ्गारकृतचारुतायामेवात्र कविसंरम्भगोचरतया [सहृदयसाक्षिकाया] स्फुटप्रतीयमानत्वात् अन्ततः सर्वत्रैव यत्किञ्चिद्व्यञ्जयतीवश्रान्तेर्दूषणाभावाच्च । नच विकासस्याप्यधिकस्य गमकतया [समासोक्ति] श्लेषेऽतिव्याप्तिसम्भावनापि, प्रकृते विशेष्यस्य श्लिष्टताया अस्वीकारात् तस्मादत्रासाधारणविशेषमहिम्ना विकासोपचारसहकृतेन समासोक्तिरेवेति भवदुक्तविकल्पव्यवस्थापनमत्रापि घटयितुं शक्यते इत्युपरमामो बहुवाग्व्यामोहकरवितृ-तण्डनमर्मोद्घाटनाकरणात् ।

आसमासगर्भत्वेन यथा—

दन्तप्रभापुष्पचिता पाणिपल्लवशोभिनी ।
केशपाशालिवृन्देन सुवेषा हरिणेक्षणा ॥

अत्र 'दन्तप्रभा पुष्पाणीव' इति सुवेषत्ववशात् पूर्वमुपमितसमासाश्रयणे पश्चात् 'दन्तप्रभासदृशैः पुष्पैश्चिता' इति प्रकारान्तरेण उपमासमासाश्रयणेन समानविशेषणमाहात्म्यात् प्रस्तुतायां नायिकायामप्रस्तुताया लताया व्यवहारः प्रतीयते । व्यवहारश्चात्र विकासादिरूपो ज्ञेयः । 'हरिणेक्षणा' इति विशेष्यपदमश्लिष्टं स्फुटं [प्रकारान्तरेणापि] समासोक्तिं प्रकाशयति ।

[प्रकारान्तरेण समासोक्तिनिरूपणम्]

मालङ्कारा लसद्वर्णा सगुणा रसनिर्भरा ।
भावानुबन्धिनी भाति भारती काकतीश्वरे ॥

अत्रालङ्कारशास्त्रीये वस्तुनि भारत्याख्ये लौकिकनायिकाव्यवहारसमारोपः । समासोक्तौ विशेषणविशेष्ययोर्द्वयोरुपादानाभावाच्छ्लेषाद्विशेषः ।

साम्यात् [सादृश्यात्] अपि समासोक्ति दृश्यते । तथाहि—

पुरा यत्र स्रोतः पुलिनमधुना तत्र सरितां
विपर्यासं यातो घनविरलभावः क्षितिरुहाम् ।
बहोर्दृष्टं कालादपरमिव मन्ये वनमिदं
निवेशः शैलानां तदिदमिति बुद्धिं द्रढयति ॥

उत्तररामचरिते सीतात्यागानन्तरं कदाचिद् वनम्प्रति गतस्य भगवतो रामचन्द्रस्येयमुक्तिः । अत्र वनवर्णने प्रस्तुते तत्साम्यात् कुटुम्बिषु धनसन्तानादिसमृद्ध्यसमृद्धिविपर्यासं प्राप्तस्य तत्समाश्रयस्य ग्रामनगरादेर्वृत्तान्तः प्रतीयते । तथा चात्र समृद्ध्यसमृद्धिविपर्यासवदाश्रयत्वं सादृश्यमिति भावः ।

ननु—अत्र सादृश्यस्य किं मूलमिति चेत् ? घनविरलेति विपर्यासमिति च, ताभ्यामुक्तसादृश्यगर्भीकरणात् इति ब्रूमः । एतेन सादृश्यगर्भविशेषणोपस्थापितसादृश्यमूला समासोक्तिरिति मूलग्रन्थानवबोधस्तद्विरोधश्चेत्येवमर्थतया सगर्वमास्फालनं पण्डितराणानां न्युदस्तं वेदितव्यम् । नच—अप्रस्तुतवृत्तान्तविशेषणसाम्यगम्यत्वाभावादुक्तलक्षणाव्याप्तिरिति वाच्यम् विशेषणसाम्यगम्यसादृश्यगम्यत्वेऽपि विशेषणसाम्यगम्यत्वस्यानपायात्, प्राधान्यात्तु परं साम्यस्य गमकत्वोपप्रदर्शनं साम्यादिति ग्रन्थेनोक्तम् ।

एतान्युदाहरणानि मया नवीनमतानुरोधेन प्रपञ्चितानि दण्डिकृतसमासोक्तिलक्षणेन तु समासोक्तौ 'अप्रस्तुतेन प्रस्तुतस्य गम्यत्वं' स्थापितम् तदेतत् 'अप्रस्तुतप्रशंसा' लक्षणव्याख्याने प्रपञ्चयिष्यामः । यत्तु—जीवेन अर्थद्वयस्य उक्तिः प्रत्यायनं समासोक्तिरित्युक्तं तदज्ञानात् अर्थद्वयस्य गम्यत्वावधारणात ॥ २१३ ॥

[अथातिशयोक्तेर्लक्षणम्]

[1]विवक्षा या विशेषस्य लोकसीमातिवर्त्तिनी ।
असावतिशयोक्तिः स्यादलङ्कारोत्तमा यथा ॥ २१४ ॥

— —

निरस्तगाम्भीर्यातिशय महात्मनामप्युरु वचसामतानम् ।
[illegible] ॥ ९ ॥

— —

समग्रापातिशयोक्तिं लक्षयति—'विवक्षा' इति । विशेषस्य=प्रस्तुतविषयगतस्य

[प्र०] अतिशयोक्तिलक्षणं द्रष्टव्यं [illegible]

[illegible] ।

उत्कर्षस्य 'लोकसीमातिवर्त्तिनी'=लोकस्य सीमा मर्यादा तस्या अतिवर्त्तिनी अतिक्रमणकारिणी अर्थात् अतिमात्रमलौकिकचमत्कारविशेषजनिका इति यावत्, एवम्भूता 'या विवक्षा'=वक्तुमिच्छा अर्थात् उक्तिरेव [अत्र स्वार्थे सन् प्रत्यय इच्छायाः [illegible]हेतुत्वाभावात्] 'असौ'=अलङ्कारोत्तमा'=अलङ्कारेषु उत्तमा सर्वालङ्कारातिशायिनी 'अतिशयोक्ति'=अतिशयस्योत्कर्षस्योक्तिरतिशयोक्तिरित्यन्वर्थसञ्ज्ञोऽयमलङ्कार 'स्यात्'=भवतीत्यर्थः । उक्तञ्च वामनेन—'सम्भाव्यधर्मतदुत्कर्षकल्पनातिशयोक्तिः [काव्य० सू० अधि० ३ । १०] अस्यायमर्थः—सम्भाव्यस्य=उत्प्रेक्ष्यस्य धर्मस्य यथार्थानुसन्धेन कल्पना तदुत्कर्षस्य=तस्य सम्भाव्यधर्मस्य य उत्कर्षः [illegible] तस्य च कल्पना अतिशयोक्तिः । ¶ इत्यत्र—'प्रकृतस्य लोकोत्तरा[illegible] [उपमेयवाचिशब्दमनुपादायैव] यदुपमेये उपमानस्याहार्याभेदनिश्चय [illegible]' इति परेषामेव लक्षणम् । उक्तञ्चाग्निपुराणे—

लोकसीमातिवृत्तस्य वस्तुधर्मस्य कीर्त्तनम् ।
भवेदतिशयो नाम सम्भवोऽसम्भवो द्विधा ॥ इति ॥

[अतिशयोक्तेरुदाहरणम्]

'मल्लिकामालभारिण्यः सर्वाङ्गीणार्द्रचन्दनाः ।
क्षौमवत्यो न लक्ष्यन्ते ज्योत्स्नायामभिसारिकाः' ॥ २१५ ॥

[illegible] 'मल्लिका०' इति । 'मल्लिकामालभारिण्यः'=मल्लिकानां जाति[illegible] [पुनः पुनः] बिभ्रतीति ताः । 'सर्वाङ्गीणार्द्रचन्दनाः'=सर्वाङ्गाणि [illegible] तासाम् आर्द्रम् अशुष्कचन्दनं मलयजरसो यासां ताः [illegible] तथाभूताः 'अभिसारिकाः'=कान्तेन सह [illegible] 'ज्योत्स्नायाम्'=चन्द्रिकायां 'न लक्ष्यन्ते'=नैव प्रतीयन्ते अन्यजनै[illegible] ।

पत्रपात्र व्याप्नोति [पा० ५ । २ । ७] इति सूत्रेण व्याप्तावर्थे 'ख' प्रत्यय । *
अभिसारिकालक्षणन्तु— कान्तार्थिनी तु या याति सङ्केतं साभिसारिका' इति ज्ञेयम्
॥ २१५ ॥

[अतिशयोक्तिलक्षणयोजनम्]

चन्द्रातपस्य बाहुल्यमुक्तमुत्कर्षवत्तया ।
¹संशयातिशयादीनां व्यक्तौ किञ्चिन्निदर्श्यते ॥ २१६ ॥

उक्तोदाहरणे स्वयमतिशयोक्तिलक्षणं सङ्गमयति—'चन्द्रातपस्य' इति । अत्र 'चन्द्रातपस्य'=प्रस्तुताया ज्योत्स्नायाः [चन्द्रिकाया] 'उत्कर्षवत्तया'=उत्कृष्टताप्रतिपादनत्वेन 'बाहुल्यम्'=प्रगाढता 'उक्तम्'=अभिहितम् । अर्थात् 'मल्लिकामालभारिण्यः' इत्यादिविशेषणवतीनामभिसारिकाणां चन्द्रिकायां लक्ष्यत्वसम्बन्धेऽपि तदलक्ष्यत्ववर्णनेन प्रस्तुताया ज्योत्स्नायाः श्वैत्यस्योत्कर्षातिशय प्रत्यायित इत्युक्तलक्षणसङ्गति स्पष्टा । अधुना 'संशयातिशयादीनाम्'=संशयोत्कर्षप्रभृतीनां 'व्यक्तौ' स्फुटीकरणे 'किञ्चित्'=दिङ्मात्रं 'निदर्श्यते=उदाह्रियते अस्माभिरिति शेष । अर्थात् संशयातिशयोक्तिप्रभृतयोऽप्यतिशयोक्तिविशेषा प्रदर्श्यन्ते ॥ २१६ ॥

[संशयातिशयोक्त्युदाहरणम्]

स्तनयोर्जघनस्यापि मध्ये मध्यं प्रिये ! तव ।
अस्ति नास्तीति सन्देहो न मेऽद्यापि निवर्त्तते ॥ २१७ ॥

संशयातिशयोक्तिमुदाहरति—'स्तनयो' इति । हे ! 'प्रिये !'=प्राणेश्वरि ! 'तव मध्यम'=कटि 'स्तनयो'=कुचयो 'जघनस्य'=कटिपुरोभागस्य 'मध्ये'=मध्यभागे 'अस्ति नास्ति [वा] इति'=एवमाकार 'सन्देह'=संशय 'अद्य अपि'=इदानीमपि 'न निवर्त्तते'=नैव दूरीभवतीत्यर्थ । अत्र स्तनयोर्जघनस्य चातिस्थूलत्व कटयाश्चातिकृशत्व व्यक्तम् ।

अत्र तादृशसन्देहस्यासम्बन्धेऽपि तत्सम्बन्धकल्पनात् संशयातिशयोक्ति रिति पालितम् ॥ २१७ ॥

(प्र०) अतिशयोक्तिभेदान् विवृणु ? [उ०] अस्य पृ० ५० ६ ।

* 'सर्वादे पथ्यङ्गकर्मपत्रपात्रशरावान्व्याप्नोति' [२ । ३ । ५] इति शाकटायनसूत्रम् ।

† अप्पय्यदीक्षितैस्तु कुवलयानन्दे इदं पद्यं मीलितालङ्कारोदाहरणे धृतम् । चन्द्रिकाभिसारिकाणां धवलिमगुणसाम्याद् भेदानध्यवसाय । 'मीलित' लक्षणं 'कुवलयानन्दे' इत्युक्तम्—

'मीलितं यदि सादृश्याद् भेद एव न लक्ष्यते ।
रसो नालक्षि लाक्षायाश्चरणे सहजारुणे ॥

अत्र चरणालक्तकरसयोररुणगुणसाम्याद् भेदानवसाय । [illegible]
[illegible] इति [illegible] ॥

[निर्णयातिशयोक्तेरुदाहरणम्]

निर्णेतुं शक्यमस्तीति मध्यं तव नितम्बिनि ।
अन्यथा नोपपद्येत पयोधरभरस्थितिः ॥ २१८ ॥

निर्णयातिशयोक्तिमुदाहरति—'निर्णेतुम्' इति । हे ! 'नितम्बिनि'=ललने ! 'तव मध्यम्'=कटिः 'निर्णेतुम्'=निश्चेतुं 'शक्यम् अस्ति'=तस्य निश्चयः शक्यते कर्तुमित्यर्थः । 'अन्यथा'=यदि मध्यं न स्यात् तदा 'पयोधरभरस्थितिः'=पयोधरयोः वक्षोजयोः भरस्य भारस्य स्थितिः अवस्थानम् 'न उपपद्येत'=नैव घटेत निराधारस्य पयोधरभरस्य स्थातुमशक्यत्वादिति भावः ।

अत्र मध्यदेशस्य आसत्त्वनिर्णयासम्बन्धेऽपि तत्सम्बन्धकल्पनात् कटिभागस्य चाति-[illegible] । निर्णयसमुत्थातिशयोक्तिर्निर्णयातिशयोक्तिरित्यर्थः ।

'नितम्बिनि' इत्यत्र 'अत इनिठनौ' [५ । २ । ११५] इति सूत्रेण 'इनि'-प्रत्ययः । प्रशस्तौ नितम्बौऽस्या इति नितम्बिनी । 'ललना च नितम्बिनी' इत्यमर २।६

[[illegible]त्यातिशयोक्तेरुदाहरणम्]

अहो ! विशाल भूपाल ! भुवनत्रितयोदरम् ।
माति मातुमशक्योऽपि यशोराशिर्यदत्र ते ॥ २१९ ॥

[अतिशयोक्तेः सर्वालङ्कारोत्तमत्वकथनपूर्वकमुपसंहारः]

अलङ्कारान्तराणामप्येकमाहुः परायणम् ।
वागीशमहितामुक्तिमिमामतिशयाह्वयाम् ॥ २२० ॥

इत्यतिशयोक्तिचक्रम् ।

अतिशयोक्तिमुपसंहरन् तस्याः प्रतिज्ञातं सर्वालङ्कारोत्तमत्वं निगमयति–'अलङ्कारान्तराणाम्' इति । 'वागीशमहिताम्'=वागीशो बृहस्पतिः वाल्मीकादिमहाकविवृन्दो वा तैरपि महिता आदृताम् 'इमाम् अतिशयाह्वयाम्'=अतिशयाख्यामुक्तिम् अर्थात् अतिशयोक्तिम् 'अलङ्कारान्तराणाम्'=इतरेषामप्यलङ्काराणाम् 'एकम्'=मुख्यम् 'परायणम्'=उत्कृष्टमवलम्बनम् 'आहुः'=प्राचीनाः निबन्धारः इति शेषः ।

अयंभावः—इयं हि प्रस्तुतस्य वस्तुनः उत्कर्षातिशयस्वरूपत्वेन वैचित्र्यस्वरूपा, वैचित्र्यञ्चालङ्कारः तत्सर्वेष्वलङ्कारेषु वैचित्र्यस्याव्यभिचारित्वात् सर्वालङ्कारोत्तमत्वमस्याः सिद्धम् । एतस्या अभावे वैचित्र्याभावेनालङ्कारत्वमेव न सिद्ध्येत् , नहि 'गौरिव गवयः' इत्युक्तौ सत्यामपि उपमायां काचन वैचित्री । अत एवोक्तम्—

सैषा सर्वत्र वक्रोक्तिरनयार्थो विभाव्यते ।
यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना ॥ इति ॥

इत्थम्—'मल्लिकामाल्यभारिण्यः' इत्यादिस्थले मीलितम्, 'स्तनयोर्जघनस्यापि' इत्यादौ सन्देहः, 'निर्णेतुम्' इत्यादौ निश्चयः, 'अहोविशालम्' इत्यादौ अधिकम् इति परस्तानामलङ्काराणां वैचित्री अतिशयोक्तिसम्बन्धेनैवेति दण्डिनामाशयः ।

'अलङ्कारसर्वस्वे तु अस्याः प्रकारान्तरेण भेदा उक्ताः तद्यथा—

भेदेऽभेदः । अभेदे भेदः । सम्बन्धेऽसम्बन्धः । असम्बन्धे सम्बन्धः । कार्यकारणपौर्वापर्यविध्वंसश्च ।

तत्र भेदेऽभेदो यथा—

'कमलमनम्भसि कमले च कुवलये तानि कनकलतिकायाम् ।
सा च सुकुमारसुभगेत्युत्पातपरम्परा केयम् ॥'

अत्र मुखादीनां कमलाद्यभेदेऽप्यभेदः । अभेदे भेदो यथा—

[1]'अण्णा लडहत्तणअं अण्णा च्चिअ का वि वत्तणच्छाआ ।
सामा सामण्णपआवइणो रेह च्चिअ ण होइ ॥'

अत्र लडहत्वादीनामभेदेऽप्यन्यत्वेन भेदः । सम्बन्धेऽसम्बन्धो यथा—

---

१ अन्यत्सौकुमार्यम् अन्यैव च कापि वर्तनच्छाया ।
श्यामा सामान्यप्रजापतेः रेखैव च न भवति । [इति संस्कृतम्]

'मानस्यद्रविणव्ययो न गणितः क्लेशो महान्स्वीकृतः
स्वच्छन्दस्य सुखं जनस्य वसतश्चिन्तानलो दीपितः ।
एषापि स्वयमेव तुल्यरमणाभावाद्वराकी हता
कोऽर्थश्चेतसि वेधसा विनिहितस्तन्व्यास्तनुं तन्वता ॥'

अत्र तापजनकविरहस्य स्वयमसम्बन्धेऽप्यसम्बन्धस्तन्वीलावण्यप्रकर्षप्रतिपादनार्थं निबद्धः । यथा वा—

'अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः
शृङ्गारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः ।
वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो
निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो विधिः ॥'

अत्र पुराणप्रजापतिनिर्माणसंबन्धेऽप्यसंबन्ध उक्तः । असंबन्धे संबन्धो यथा—

'पुष्पं प्रवालोपहितं यदि स्यान्मुक्ताफलं वा स्फुटविद्रुमस्थम् ।
ततोऽनुकुर्याद्विशदस्य तस्यास्ताम्रौष्ठपर्यस्तरुचः स्मितस्य ॥'

अत्र [illegible] । यथा वा—

[illegible] प्रणालोञ्चित
[illegible] प्रदीपकलिका पाण्डिम्नि मग्नं वपुः ।
[illegible] मार्गवातायने
[illegible] स्थितिर्वर्तते ॥'

यद्विरहसततततापस्तप्ताङ्गयो मूर्च्छितस्वान्ता ।
उत्प्रेक्ष्य मेघरूप गोप्यो लीनास्तमाश्रये कृष्णम् ॥

—*—

क्रमप्राप्तामुत्प्रेक्षा लक्षयति—'अन्यथा' इति । 'चेतनस्य'=प्राणिन [जीवत] 'इतरस्य'=अचेतनस्य वा 'अन्यथा=अन्येनैव स्वभावसिद्धेन प्रकारेण 'स्थिता'=विद्यमाना 'वृत्ति =गुणक्रियादिरूपो व्यवहार' स्वासाधारण रूपश्च 'यत्र'=[वाक्ये] वैचित्र्याम् 'अन्यथा'=प्रकारान्तरेण अर्थात् अप्रस्तुतत्वेन रूपेण 'उत्प्रेक्ष्यते'=सम्भाव्यते 'ताम्'= विचित्रतारूपा सम्भावनाम् 'उत्प्रेक्षा' 'विदु'=जानन्ति [मन्यन्ते सूरय इत्यर्थ] । 'विदु' रिति दैवादिकस्य 'विद' ज्ञाने इत्यस्य धातोर्लटि प्रथमपुरुषस्य बहुवचने रूपम् 'विदो लटो वा' [३ । ४ । ८ । ५] इति सूत्रेण वेत्ते परस्मैपदानां णलादयो वा ॥

अथ भाव —उत्=उत्कटा प्र=प्रकृष्टस्य उपमानस्य ईक्षा ज्ञानमिति 'उत्प्रेक्षा'- पदार्थ । सम्भावनञ्च—उत्कटकोटिक. सशय इत्यञ्च—प्रकृतस्य=उपमेयस्य समेन= उपमानेन सह एकरूपतया [तादात्म्येन] यत् सम्भावनम् [सा] 'उत्प्रेक्षा' नामालङ्कार इत्यभिप्रायेणैव आचार्या 'सम्भावनमथोत्प्रेक्षा प्रकृतस्य समेन यत्' इति सूत्रयाम्बभूवु' दण्डिकृतलक्षणस्यापि 'प्रकारान्तरेण स्थितस्य वस्तुन अन्यप्रकारेणोत्प्रेक्षणमुत्प्रेक्षे' त्युक्त एवार्थ फलति, 'अन्यथोत्प्रेक्ष्यते' इति वचनात । 'अन्यधर्मसम्बन्धनिमित्तेनान्यस्यान्यता- दात्म्यसम्भावनमुत्प्रेक्षा इति सर्वस्वकार । नचाय सशय तत्र विषयद्वयस्य समकक्षत्वम् इह तु—उपमेय उत्कटोपमानकोटिक सशय, नतु द्वयो कोटयो समबलत्वम् । तस्मा- त्सशयादस्या विविक्तो विषय । अपिच—उपमायामुपमानोपमेयभाव तात्त्विको लोकप्र- सिद्ध, इह तु कविप्रतिभोत्थापितमेवोपमानत्वम् तदवच्छिन्नमुपमानमप्रसिद्धमेवेति उपमा- तोऽप्यस्या महदन्तरम् । अत एव **चक्रवर्त्तिभट्टाचार्यैरुक्तम्**—

यदायमुपमानाशो लोकत सिद्धिमृच्छति ।
तदोपमैव येनेवशब्द सादृश्यवाचक ॥
यदा पुनरस्य लोकादसिद्ध कविकल्पित ।
तदोत्प्रेक्षैव येनेवशब्द सम्भावनापर ॥ इति ।

परमिदमिवशब्दसमभिव्याहारस्थल एव, अन्यत्र तु लोकसिद्धेनापि तेन 'मुख चन्द्र मन्ये' इत्यादि सङ्ग्र । चन्द्र इव मुखम् इत्यादा तु रूपकमुपमा । [illegible]—[illegible] आहार्यसम्भावन तदोत्प्रेक्षा । यत्र तु अनाहार्या सम्भावना तत्र नोत्प्रेक्षा यथा—

[illegible] स्निग्धश्याम [illegible] विलोक्य घनगहने ।
[illegible] [illegible]ऽस्य [illegible]ति कुर्वन्ति केकिन ॥

अत्र केचित् [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]- [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] ।

रूपके तत्त्वाख्यानम् सन्देहे समकोटिकः संशयः, इह तूत्कटकोटिकः स इति स्फुटस्तद्विशेषः ।

अपि च—उत्प्रेक्षणीयश्च अर्थो जातिगुणक्रियाद्रव्यस्वरूपेण चतुर्धा, ते च भावाभावाभिमानित्वेनोत्प्रेक्ष्यमाणा उत्प्रेक्षामष्टधा सम्पादयन्ति । तत्रापि जातिस्वरूपोत्प्रेक्षा, इत्येवमादिक्रमेण जात्यादित्रय स्वरूपफलहेतुरूपत्वेनाप्युत्प्रेक्ष्यते, द्रव्यस्य स्वरूपमात्रत्वेन इत्येवमनेके उत्प्रेक्षाया भेदाः सन्ति, तेन दण्ड्याचार्यदर्शितरीत्या ग्रन्थान्तराणाञ्चावमर्शनेन च इमे भविष्यन्ति अस्माभिरपि यथोचित दर्शयिष्यन्ते । २२१ ॥

[चेतनगत्युत्प्रेक्षाया उदाहरणम्]

मध्यन्दिनार्कसन्तप्तः सरसीं गाहते गजः ।
मन्ये मार्त्तण्डगृह्याणि पद्मान्युद्धर्त्तुमुद्यतः ॥ २२२ ॥

याय'=सन्तापप्रदस्य सूर्यस्य वैरिणोऽपकारं विधातुमित्यर्थः । स्पष्टमन्यत्, फलतः कृतव्याख्यानबाधस्तात् ।

केचित्तु—पूर्वस्मिन् श्लोके 'प्रत्यनीकालङ्कार'मप्याचक्षते—तदुक्तं जयदेवेन—

'प्रत्यनीकं बलवतः शत्रोः पक्षे पराक्रमः ।
जैत्रनेत्रानुगौ कर्णावुत्पलाभ्यामधः कृतौ ॥'

अत्र पूर्वार्धं लक्षणमुत्तरार्धं लक्ष्यम् । तद्वदत्रापि सन्तापप्रतीकारे साक्षात्सूर्यं प्रत्यसमर्थेन गजेन तत्पक्षस्योद्धरणं कृतमतोऽत्र दर्शितलक्षणः 'प्रत्यनीकालङ्कारः' । ॥ २२३ ॥

[अचेतनवृत्त्युत्प्रेक्षाया उदाहरणम्]

कर्णस्य भूषणमिदं ममायतिविरोधिनः ।
इति कर्णोत्पलं प्रायस्तव दृष्ट्या विलङ्घ्यते ॥ २२४ ॥

अचेतनवृत्त्युत्प्रेक्षामुदाहरति—'कर्णस्य' इति । 'मम आयतिविरोधिनः'=आयतिः विशालता दीर्घता तस्या विरोधिनः निवारकस्य बाधकस्य 'कर्णस्य'='इदम्' उत्पलम् 'भूषणम्'=मण्डनम् 'अस्ति' इति शेषः । 'इति'=हेतोः 'तव दृष्ट्या'=चक्षुषा 'कर्णोत्पलम्'=कर्णेऽवतंसीकृतं कमलदलं 'प्रायः विलङ्घ्यते'=स्वकिरणसम्पर्केण आहन्यत इवेत्यर्थः ।

अत्र दृष्टिरचेतना, तस्या किरणानां सामीप्येन कर्णोत्पले स्पर्शाख्यो गुणः कर्णोत्पलस्याहननत्वेन सम्भावित इतीयम् 'अचेतनवृत्त्युत्प्रेक्षा' स्पर्शगुणस्याचेतनत्वात् । स च गुणः [उत्प्रेक्षाविषयः] अत्र नोपात्त इत्यनुपात्तविषया गुणस्वरूपोत्प्रेक्षा ॥ २२४ ॥

[उक्ते लक्ष्ये लक्षणयोजनम्]

अपाङ्गभागपातिन्या दृष्टेरंशुभिरुत्पलम् ।
स्पृश्यते वा नवेत्येवं कविनोत्प्रेक्ष्य वर्ण्यते ॥ २२५ ॥

उक्ते उदाहरणे उत्प्रेक्षालक्षणं सङ्गमयति—'अपाङ्गभाग०' इति । 'अपाङ्गभागपातिन्या'=नेत्रप्रान्तभागगामिन्या आकर्णान्तविश्रान्ताया इति यावत् 'दृष्टेः'=चक्षुषः 'अंशुभिः किरणैः 'उत्पलम्'=कर्णेऽवतंसितं कमलदलम् 'स्पृश्यते'=सम्बध्यते 'वा नवा' अथवा 'न स्पृश्यते'=इति अविद्यमानोऽपि विषयः समत्वाद्विशेषणत्वेन 'कविना'=[illegible] 'उत्प्रेक्ष्य'=सम्भाव्य उत्कटकोटिकसंशयनासाधारणं इति यावत् 'वर्ण्यते'=[illegible] । अत्र 'प्रायः' शब्द उत्प्रेक्षाव्यञ्जकः ।

[illegible]

[illegible]

[illegible]

अत्र चकितगीना [देवाङ्गनानाम्] निमेषाभाव स्वाभाविको धर्म , सोऽत्र तादृशा-न्नेत्रगाम्भीर्यत्वान्नहेतुत्वेनोत्प्रेक्षित , इवादिप्रयोगाभावाच्च गम्येयमुत्प्रेक्षा ।यथा वा-

तन्व्या यया स्तनयुग्मेन मुख न प्रकटीकृतम् ।

हाराय गुणिने स्थान न दत्त मिति लज्जया ॥

अत्राचेतनयो स्तनयोर्लज्जाया असम्भव तस्या चेतनधर्मत्वात् अतो 'लज्जया इव' इति गम्यते अत इव स्वन्याकशब्दानुपादानात् प्रतीयमानोत्प्रेक्षैव ॥२२५॥

[उत्प्रेक्षोपमयो परमतनिरासपूर्वक भेदस्पष्टीकरणम्]

'लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः ।

इतीदमपि भूयिष्ठ मुत्प्रेक्षा लक्षणान्वितम् ॥ २२६ ॥

इदमत्राकूतकम्—यत्रोपमानं सिद्धं तत्रोपमा, यत्र तु तत्साध्यं तत्रोत्प्रेक्षा इति स्थितोऽयं राजमार्गः । एवमुपमानस्य सिद्धत्वसाध्यत्वे उपमोत्प्रेक्षयोः प्रयोजके [भेदके] वर्तेते । सिद्धत्वञ्च—लिङ्गसङ्ख्याकारकान्वितत्वम्, तदनन्वितत्वं साध्यत्वम् । क्रियान्तराकाङ्क्षोत्थापकतावच्छेदकरूपधर्मवत्त्वं साध्यत्वम्, तद्भिन्नत्वं सिद्धत्वमिति यावत् । प्रकृते च उपमानभूतस्य तिङन्तपदप्रतिपाद्यस्य लेपनस्य वर्षणस्य च साध्यत्वमेव क्रियारूपत्वात् । उक्तञ्च वाक्यपदीये—

यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते ।
आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते ॥

क्रिया साध्यमिति, सिद्धं सत्त्वमिति चानर्थान्तरम् । तस्मादुक्तस्थले उपमावादिनां भ्रम एव । स्पष्टञ्चेदम्—'धातोः कर्मणः समानकर्तृकादिच्छायां वा [३ । १ । ८] इति पाणिनिसूत्रे महाभाष्ये 'न वै तिङन्तेनोपमानमस्ति' इति । 'तिङन्तेन=तिङन्तार्थेन' इत्यर्थः । क्रियायाः साध्यैकस्वभावत्वात् अनिष्पन्नरूपत्वात् 'इदं तत्' इति परामर्शविषयवस्तुगोचरत्वात् उपमानोपमेयभावस्य 'इदं तत्' इति परामर्शाभावादिति भाव इति च व्याख्यातं कय्यटेन । उक्तञ्चाभियुक्तैः—

सिद्धमेव समानार्थमुपमानं विधीयते ।
तिङन्तार्थस्तु साध्यत्वादुपमानं न जायते ॥ इति ।

तस्मात् उक्तपद्यपूर्वभागे प्रस्तुतमपि व्यापनं न शब्दोपात्तम्, तमस एव चोपमेयत्वस्य वक्तव्यत्वे तस्य लिम्पतीति तिङन्तार्थस्योपमानत्वमयुक्तम् । अपि च क्रियाया उपमेयभावोऽप्ययुक्तः क्रियान्तरापेक्षया न्यूनत्वविरहाविशिष्टत्वात्तस्याः, उपमानापेक्षया उपमेयस्य न्यूनगुणताया अङ्गीकारात् । हरिरप्याह—

येनैव हेतुना हस पततीत्यभिधीयते ।
आर्ता तस्य समाप्तत्वादुपमाधा न विद्यते ॥

इत्थं पस्पशमहाभाष्यकारोक्तिविरोधात् तिङन्तस्योपमानोपमेयभावं वदता साहसमात्रमिदं नितान्तमुपेक्षणीयं विचक्षणैरित्याचार्यदण्डिनामाशयः ॥ २२७ ॥

[उक्तस्थले उपमायाः स्वीकारे युक्तिविरोधः]

उपमानोपमेयत्वं तुल्यधर्मव्यपेक्षया ।
लिम्पतेस्तमसश्चास्य धर्मः कोऽत्र समीक्ष्यते ॥ २२८ ॥

अत्रोपमाङ्गीकारे प्रमाणाभाववचनादत्र [illegible] दूषणं [illegible]—'उपमानोपमेयत्वम्' इति । 'तुल्यधर्मव्यपेक्षया'=तुल्यो धर्मः प्रस्तुताप्रस्तुतयोः समानगुणक्रियादिरूपः साधारणो धर्मः तस्य व्यपेक्षया अपेक्षणेन 'उपमानोपमेयत्वम्'=उपमानोपमेयभावः [illegible] । [illegible]—'लिम्पते' इति ।

सर्वशास्त्रमर्मविज्ञानाय साहित्यं कुर्यादिति सर्वेषां विदुषां विदितचरमेवैतत् । एवञ्च—'साहित्य शब्दोऽयं सकलासु भरतादिमुनिप्रणीतासु नाट्यादिकलासु व्याप्तिं भजमाना वर्त्तते यस्यैकदेशमिदमलङ्कारशास्त्रमिति न प्रतिभाति।'अलङ्कार'शब्दश्च—अनुप्रासोपमालङ्कारादिषु प्रायः प्रसिद्धोऽस्ति तत्प्रतिपादकत्वाच्छास्त्रस्य तथा व्यपदेश इति युज्यते,तावता दोषगुणादीनां निरूपणपरस्यापि अस्य शास्त्रस्य अलङ्कारनाम्नैव व्यपदेशो न परं दोषशास्त्र गुणशास्त्र रीतिशास्त्र वेति जाग्रत शङ्का, यद्यप्यत्र न वयं साक्षात् किमपि बीजं पश्यामः तथापि अलङ्कृतिरलङ्कार इति भावप्रधाननिर्देशेन दोषापगमगुणालङ्कारादिसंवलनकृतसौन्दर्यपरोऽयं शब्दः, तत्प्रतिपादकत्वादेव अस्यालङ्कारनाम्ना समभिव्याहार इति युक्तमुद्भावयामः । अत एव **'काव्यं ग्राह्यमलङ्कारात्'** (१।१) **'सौन्दर्यमलङ्कारः'** (१।२) अलङ्कृतिरलङ्कारः । करणव्युत्पत्त्या पुनरलङ्कारशब्दोऽयमुपमादिषु वर्त्तते । **'स दोषगुणालङ्कारहानादानाभ्याम्'** (१।३) स खल्वलङ्कारो दोषहानात्, गुणालङ्कारादानाच्च सम्पाद्यः कवेरित्यादिसन्दर्भेण 'वामनो'ऽप्यमुमेवार्थं समुपोदबलयत् । आस्तां तावदेतत् । एतच्छास्त्रस्य प्रणेतारः अनेके प्राक्तना भामहप्रभृतयोऽर्वाञ्चश्च श्रीमम्मटाद्या अभूवन् । अर्थात् द्विविधमलङ्कारशास्त्रग्रन्थानसमीक्षामहे 'भामहा'द्युपदिष्टमेकं यदनुसारिणो भोजराजप्रभृतयः । अभिनवगुप्तपादादिभिरुद्भावितं यद्व्यसनपरतया मम्मटभट्टप्रभृतयो ग्रन्थाननेकान् वितेनिरे । तेषु प्राक्षु एवायं दण्ड्याचार्यः स्थितिपदमलभत । तत्र—

(२) कोऽयं दण्डी—

अस्य 'काव्यादर्शस्य' रचयिता कविकुलतिलकः 'दण्डी' कुत्र कदा कतमं देशमलञ्चकार इत्यादिनिश्चयाय नैकमपि दृढं प्रमाणमुपलभामहे । विज्ञानवतां पुरोगाणामपि प्राचीनानां प्रायः स्वकीयवृत्तनिबन्धनमलब्धवतामेव यशःसाम्राज्यस्य सर्वतो जागरूकत्वादिति तत्सदृशानस्य गवेषणारम्भस्य महत् कष्टास्पदं नापतति, तथापि 'यद्धातद्यान्याय' मनुसृत्य किञ्चिद् स्थापयितुं शक्यते—यदयं महाकविः महता आरम्भेणास्मिन् ग्रन्थे वैदर्भीं रीतिं प्रशशंस, तथैव चोपनिबबन्ध वैदर्भीप्रधानं 'दशकुमारचरितं' नाम गद्यकाव्यम् इति तेनायं दाक्षिणात्यो विदर्भदेशोद्भव इति । विदर्भेष्वेव 'बदाउ' नाम्ना प्रसिद्धिरस्तीति साम्प्रतिकाः । अपि च—'खिस्तीयषष्ठशतकादनन्तरमुत्पन्नो वासवदत्तागद्यप्रणेता 'सुबन्धु'र्महाकविरिति पुरातत्त्वविदां विमर्शः । 'सुबन्धु'श्च—'यश्च छन्दोविचितिरिव कुसुमविचित्राभिः 'छन्दोविचितिभिरिव मालिनीसनाथा' छन्दोविचितिभिरिव भ्राजमानतनुमध्याम्' इत्येवं वासवदत्तायामपि स्थलेषु दण्डिप्रणीतं 'छन्दोविचिति' नामानं छन्दोग्रन्थं सस्मार, तेन निर्णीयते तत्समकालिकस्तदग्रिमभागे वा जातः 'दण्डी' बभूवेति सम्भावयामः । यत—

> त्रयोऽग्नयस्त्रयो वेदास्त्रयो देवास्त्रयो गुणाः ।
> त्रयो दण्डिप्रबन्धाश्च त्रिषु लोकेषु विश्रुताः ॥

रक्तिभिया अभेदमादाय सामानाधिकरण्यसिद्धान्तात । कार्यकारणस्थलेऽपि प्रकारान्तरे-णैव भेदाभ्युपगमात् ननु स एव प्रकारो धर्मितावच्छेदकः स एव धर्मतावच्छेदक इति कस्याप्यभिमतं स्यात् अत एव भेदाभेदवादमुत्थाप्य सर्वतन्त्रस्वतन्त्रैर्वाचस्पतिमिश्रैरपि समन्वयसूत्रभाष्यव्याख्यानावसरे उक्तम् ।

कार्यरूपेण नानात्वमभेदः कारणात्मना ।

हाटकाद्यात्मना ऽभेदः कुण्डलाद्यात्मना भिदा ॥ इति ।

'राहोः शिरः' इत्यादिस्थले त्वगतिकगत्या वैकल्पिको व्यवहारः । तथाचोक्तम्परमर्षिणा 'शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः [या०पा०१।सू०९] इति । एवम् अनन्वयोपमायान्तु एकस्योपमानोपमेयत्वमनन्यसदृशत्वप्रतिपत्तये वैवक्षिकमेव, नचात्र तथा काचिदप्युपपत्तिः, तस्मात् प्रकृते एकस्यैव लेपनस्य धर्मधर्मिभावो सर्वथा ऽसङ्गत इति सम्प्रदायविदः ॥२२९॥

कर्त्ता यद्युपमानं स्यान्न्यग्भूतोऽसौ क्रियापदे ।
स्वक्रियासाधनव्यग्रो नालमन्यद्व्यपेक्षितुम् ॥ २३० ॥

ननु—लेपनव्यापार एवात्र धर्मः स्यात् तस्याश्रयः कर्त्ता, स च तिङा बोधित एव तेनैवचात्र औपम्यं निर्वक्ष्यामः अर्थात् कर्त्तारं धर्मित्वेन लेपनञ्च धर्मत्वेन परिकल्प्य उप-मानोपमेयभावो भविष्यति इत्याक्षेपं प्रतिक्षिपति 'कर्त्ता' इति । 'यदि कर्त्ता'=तिङा लेप-नव्यापारस्य आश्रयभूतः 'उपमानं स्यात'=तमसः उपमानत्वेन धर्मित्वेन निर्दिश्येत तदपि न युक्तमिति शेषः । कुत इत्याह—'न्यग्भूत' इति । यतः 'असौ'=कर्त्ता 'क्रियापदे'= 'लिम्पति' इत्याख्यातपदे 'न्यग्भूतः'=उपसर्जनीभूतः विशेषणीभूत इति यावत् 'तिङर्थस्तु विशेषणं' मित्युक्तम्, नहि विशेषणं धर्मी भवितुमर्हति सिद्धस्यैवोपमानत्वं सर्वसम्मतमित्यत्र तात्पर्यम्, लेपनव्यापारे विशेषणतयाऽन्वितः कर्त्ता उपमानतया कथं तमसा सहान्वयी स्यादिति तु परो निष्कर्षः । ननु—एकत्रान्वितस्य अपरत्राप्यन्वयः स्यात् को दोष इत्याश-ङ्कामपनुदति—'स्वक्रियासाधनव्यग्र'=इति । स्वस्य कर्त्तुः या क्रिया धात्वर्थव्यापाररूपा लेपनरूपा तस्या साधने सिद्धौ सम्पादने व्यग्रः तत्परः अर्थात् विशेषणभावं प्राप्तः असौ कर्त्ता 'अन्यत्'=कार्यान्तरम् 'अपेक्षितुम्'=साधयितुं, 'न अलम्'=नैव समर्थः

अयमाशयः—यः कश्चित् यदा यस्यायत्तो भूत्वा कार्यं करोति तदासौ अन्याधीनो भूत्वा कार्यं कर्त्तुं नैव पारयते एवमेव स्वक्रियापरतन्त्रो विशेषणीभूतः कर्त्ता प्रकृते उपमा-

परमतमिदमुक्तं न सिद्धान्तरचना, सिद्धान्ते तु वास्तवभेदपक्षं परास्य 'अभेदो-पादानादभिदमानयभेदक पक्षा' इति साधितम । अस्माभिस्तु यथाश्रुतग्रन्थस्वारस्यानु-रोधेन इदं योजितं अनिर्वचनीयपक्षेऽपि व्यवहारकाले उपमानोपमेयभावादिव्यवहार-सम्भवोपपत्तेरिति दिक् ।

। [illegible] प्रकार० वि० १०।१ ।।८२ ।

मानसम् 'निर्दयम्'=निर्गता दया यस्यां क्रियायां तत् यथा स्यात् तथा [निर्दयम्' इति क्रियाविशेषणम्] 'हन्तुम्'=चोदयितुम् 'उद्यतम्'=उदयं प्राप्तम् 'चान्द्रमसम्'=ऐन्दवं चन्द्रसम्बन्धीत्यर्थः 'विम्बम्'=मण्डलम् 'पश्य'=आलोकयेति सान्वयोर्थः ।

अत्र प्रथमे पादे चाकारयोः रुकारयोश्च स्वरविशिष्टयोः सादृश्यम् तेनात्र वृत्त्यनुप्रासः द्वितीये पादे म्बम्बयोः, तृतीये च मन्ममन्मयोः रिति सकृत्साम्यात् छेकानुप्रासः चतुर्थ पादे तु दकारयोः तकारयोश्च स्वरवैसादृश्यम् तेनात्र अन्यप्रकारोऽपि वृत्त्यनुप्रासः अत्र काव्ये शब्दगतमर्थगतञ्च द्विविधमपि माधुर्यं गुणः । सोयमेव शब्दार्थोभयगतत्वेन चमत्कारकरत्वात् विप्रलम्भशृङ्गारस्य परिपोषकः ।

अत्र च विरहिणि निर्दयतया हननोद्यमस्यासम्बन्धेपि तत्कल्पनात् सम्बन्धातिशयोक्तिरलङ्कारः * । उक्तञ्च जयदेवेन—

सम्बन्धातिशयोक्तिः स्यात् तदभावेऽपि तद्वचः ।
पश्य सौधाग्रसंसक्तं विभाति विधुमण्डलम् ॥ इति ॥

इत्यत्र स्वरसादृश्येन स्वरवैसादृश्येन च द्विविधोऽप्यनुप्रासो दर्शितः ।

उदाहरणान्तरं यथा वा मम—

मनो मनोहारिणि हारियौवने वने पिकीगीतवने ऽवने प्रिये ।
अत्यन्तमासक्तिमदः निपीय मदीयमामूर्च्छति मूर्च्छतीत्यपि ॥

अत्र प्रथमे पादे 'मनो मनो' इत्येवमादि सकृत्साम्यात् छेकानुप्रासः । तृतीयचतुर्थे पादे 'निपीय मदीय' इत्यत्र स्वरविशिष्टयोर्यकारयोः सादृश्यात् वृत्त्यनुप्रासः । तथैव चतुर्थे छकारयोः स्वरविशिष्टयोरेव सादृश्यम् । केषाञ्चिन्मते तु—यदि 'वने वने' इत्यादि द्वयोः स्वरव्यञ्जनसमुदाययोरेकदैवावृत्तिर्विवक्षिता स्यात् तदा वृत्त्यनुप्रास एव ।

[अनुप्रासलक्षणे 'अदूरता' पदस्य फलकथनम्]

इत्यनुप्रासमिच्छन्ति नातिदूरान्तरश्रुतिम् ।
न तु रामामुखाम्भोजसदृशश्चन्द्रमा इति ॥ ५८ ॥

'अदूरत्वेनानुप्रासं प्रयोजयति' इति अन्वयव्यतिरेकाभ्यां स्पष्टीकरोति—'इति' इति । 'नातिदूरान्तरश्रुतिम्'=अतिदूरम्=अत्यधिकम् अन्तरं=व्यवधानं यस्याः तादृशी वर्णश्रुतिः इति अतिदूरान्तरश्रुतिः न अतिदूरान्तरश्रुतिर्यस्य स तथाविधः तं नातिदूरान्तरश्रुतिम् । सूरय इति समासः । तादृशम् 'अनुप्रासम्' उक्तमलङ्कारम् 'इच्छन्ति'=कामयन्ते [illegible] इति शेषः । 'रामामुखाम्भोजसदृशः'=रामा रमणी तस्याः मुखम् आननमेव अम्भोजं कमलम् तत्सदृशः, 'चन्द्रमाः'=शशी 'अयमस्ति' इति शेषः । 'इति'=इत्यादौ [illegible] मकारयोः साम्येऽपि अतिदूरान्तरश्रुतिम् अनुप्रासं 'न तु'=नैव

* [illegible] । 'त्वमिन्द्रैव सम्भोगं देहि' अथवा 'कामेनार्त्तापि मयि तव [illegible], अत्यन्तमपि निर्दयासि' इत्यादि व्यङ्ग्यमपि ज्ञेयम् ।

द्वानुपातोऽपि अप्रसिद्ध एवेति सर्वथैहोपमावादपक्षो गर्हणीयः । एतच्च वक्ष्यमाणयुक्त्यापि स्फुटं प्रदर्श्यते ॥ २३१ ॥

यथेन्दुरिव ते वक्त्रमिति कान्तिः प्रतीयते ।
न तथा लिम्पतौ लेपादन्यदत्र प्रतीयते ॥ २३२ ॥

नन्वत्र साधारणधर्माप्रयोगे लुप्तोपमैव स्याद् इति चेत् ? अत्राह—'यथा' इति । 'ते वक्त्रम् इन्दुः इव इति =इत्यत्र यथा 'कान्तिः'=सौन्दर्य्यम् [आह्लादकत्वादि] 'प्रतीयते'=वाचकाप्रयोगेऽपि साधारणधर्मत्वेनावगम्यते, 'अत्र'=उक्त काव्ये 'लिम्पतौ'=लिम्पतिपदघटितप्रयोगे लेपनकर्त्तर्युपमाने सतीति वा 'लेपात् अन्यत् किमपि तथा'=तद्वत् 'न प्रतीयते'=नैव ज्ञायते इत्यर्थः ।

यद्यपि धर्मलुप्तोपमास्थले साधारणधर्मस्य प्रयोगो न भवति तथापि तत्र सादृश्यं प्रसिद्धमिति कृत्वा साधारणधर्मः स्फुटः एवावभासते अत्र तु—तमस लेपनकर्त्तृत्वेनैव कश्चित्स्फुटः साधारणो धर्मः तस्मान्नात्र लुप्तोपमाऽपि भवितुमर्हतीति साधारणधर्माप्रतीतौ उपमाकथनं नितान्तमसङ्गतमित्याशयः ॥ २३२ ॥

[परमतनिरासपूर्वकः स्वसिद्धान्तोपसंहारः]

तदुपश्लेषणार्थोऽयं लिम्पतिर्ध्वान्तकर्त्तृकः ।
अङ्गकर्मा च पुंसैवमुत्प्रेक्ष्यत इतीष्यताम् ॥ २३३ ॥

एवं विपक्षे दोषानुपसंहरन् स्वमतं दृढीकरोति—'तद्' इति । 'तत्'=तस्मात् कारणात् 'उपश्लेषणार्थः'=उपश्लेषणं व्यापनमेवार्थो यस्य स तादृशः 'ध्वान्तकर्त्तृकः'=ध्वान्तं तमः कर्त्तृ यस्य स तमःकर्त्तृकः तथा 'अङ्गकर्मा'=अङ्गानि कर्म यस्य सः 'लिम्पतिः'= लेपनक्रिया 'पुंसा'=कविनिबद्धेन वक्त्रा 'उत्प्रेक्ष्यते'=सम्भाव्यते 'इति इष्यताम्' स्वीकामेनाप्यङ्गीक्रियतामिति भावः ।

विषयः, प्रस्तुतोऽर्थः, उपमेयः, प्रकृतमित्यनर्थान्तरम् । एवं विषयी, अप्रस्तुतोऽर्थः उपमानम् अप्रकृतमित्यनर्थान्तरम् । प्रकृते च तमः कर्त्तृकमङ्गव्यापनमुत्प्रेक्षाया विषयः, तादृशलेपनञ्च विषयी, एवं प्रस्तुतं तमोव्यापनं विषयः तादृशविषयिभूतेन लेपनत्वेन रूपेण उत्प्रेक्ष्यत एवं तत्पर्यायत इति परः सारः । २३३ ॥

अयमत्राभिसन्धिः—'लिम्पति' इति 'लिप' उपदेहे । तुदादिः । 'शे मुचादीनाम्' [७ । १ । ५९] इति नुमि लटि प्रथमपुरुषैकवचने रूपम् । उपदेहो वृद्धिः । सा च प्रकृते गुणागुणद्रव्याविवरणको द्रव्यादीनां योगविशेष लेपनक्रिया, [illegible] [तद्रूपायां लेपनक्रियायाम्] लिप धातोः [illegible] । अत एव कविकल्पद्रुमादिषु 'लिम्पति लिम्पते वा चन्दनेन गात्रं सुधा' इत्युदाहरणं दृश्यते । ननु प्रकृते च धन-[illegible] लिम्पति [illegible] [illegible] । [illegible]

समानोधर्म, तद्वाचक इवादिश्च। तत्राधिकगुणमुपमान चन्द्रादि। वर्ण्यमानमल्पगुणमुपमेय कामिनीवदनादि, समानोधर्म आह्लादकत्वादि। वस्तुतस्तु—यस्योपमा दीयते तदुपमानम्। यस्मै उपमा दीयते तदुपमेयमिति बालबुद्धेरव्यामोहकरी सरणिः। उक्तञ्च वामनेन—'उपमानेनोपमेयस्य गुणलेशत साम्यमुपमा' (काव्या० अध्या० २ सू० १) उपमीयते सादृश्यमानीयते येनोत्कृष्टगुणेनान्यत् तद् उपमानम्, यदुपमीयते न्यूनगुण तद् उपमेयम्। सेयमुपमा तावत् द्विविधा लौकिकी कल्पिता च। लोकप्रसिद्धा लौकिकी, यथा 'कमलमिव मुख मनोज्ञम्' इत्यादौ मुखकमलयोरुपमानोपमेयभावो लोके प्रसिद्धः। यथा वा 'हसीव कृष्ण ते कीर्त्ति स्वर्गङ्गामवगाहते' इति हसीकीर्त्योरपि। कल्पिता तु—'गुणबाहुल्यतश्च कल्पिता' (काव्य० अध्या० २। स० २) गुणानां बाहुल्य गुणबाहुल्यम्, तत उपमानोपमेययो साम्यात् कल्पितोपमा, कविभि कल्पितत्वात् कल्पिता।

यथा—

उद्गर्भहूणतरुणीरमणोपमर्द-भुग्नोन्नतस्तननिवेशनिभ हिमांशो।
बिम्ब कठोरबिसकाण्डकडारगौरैर्विष्णोः पद प्रथममग्रकरैर्व्यनक्ति॥

अत्र तादृशस्तनहिमाशुबिम्बयोरुपमानोपमेयभावो न लोकप्रसिद्ध किन्तु कविकल्पित।

उपमानोपमेयगतधर्माश्च गुणक्रियादिरूपा यथायथमवगन्तव्या। तत्र—हसीव कृष्ण! ते कीर्तिर्वना लोकगामिनी इत्यादौ धवलत्वं गुण। 'हसीवेयमिहायाता कान्ता स्वकान्तमन्दिरम्' इत्यादावागमनादिक्रियारूप। एवमन्यदप्यूह्यम्॥ १४॥

[तत्रादौ धर्मोपमाया उदाहरणम्]

अम्भोरुहमिवाताम्रं मुग्धे! करतलं तव।
इति 'धर्मोपमा' साक्षात्तुल्यधर्मप्रदर्शनात्॥ १५॥

प्रतिज्ञानुसारमुपमाप्रपञ्चं कुर्वाण प्रथमं 'धर्मोपमा'-मुदाहरति 'अम्भोरुहम्' इति। अयि! मुग्धे! अपरिपक्वमते! सुन्दरि! 'तव करतलम्'=पाणितलम् 'अम्भोरुहमिव'=कोकनदमिव 'आताम्रम्'=समन्ततो लोहितम् 'अस्ति' इति शेष। 'इति'=उक्ते वाक्ये 'साक्षात्'=स्फुटम् 'तुल्यधर्मप्रदर्शनात्'=आताम्रमितिपदोपात्तस्य तुल्यस्य धर्मस्य आताम्रत्वस्य रक्ततारूपसाधारणधर्मस्य प्रदर्शनात् उपादानात् इय 'धर्मोपमा' नाम उपमा। अर्थात् 'उपात्तधर्मा इयमुपमा। इयञ्च पूर्णा श्रौती, चतुर्णामपि उपमानोपमेयसाधारणधर्मतद्वाचकानामुपादानात्। अत्र अम्भोरुहमुपमानम्, करतलमुपमेयम्, आताम्रत्व समानो धर्म, इवशब्द उपमावाचक। एवमेवाग्रेपि यथासम्भव योजनीयम्॥ १५॥

[वस्तूपमाया उदाहरणम्]

राजीवमिव ते वक्त्रं नेत्रे नीलोत्पले इव।
इयं प्रतीयमानैकधर्मा 'वस्तूपमै'व सा॥ १६॥

वस्तुस्वरूपस्यैव सम्भाव्यमानत्वात् [1] स्वरूपोत्प्रेक्षेयं बोध्या ॥ यथा वा—

[2] नभस्तले किञ्चिदिव प्रविष्टाग्रकाशिरे चन्द्ररुचिप्ररोहा ।
जगद्गिलित्वा स्मृत प्रमोदात्-दन्ता इव ध्वान्तनिशाचरस्य ॥ [वाग्भटे]

अत्रान्यरूपेण स्थितस्याचेतनस्य चन्द्रमयूखस्य स्वरूप ध्वान्तराक्षसस्य दन्तरूपत्वेनोत्प्रेक्षितम् । 'ध्वान्तमेव निशाचर' इत्यत्र तु रूपकम् ।

यथा वा मम 'दर्पभङ्गाभिनन्दने —

क्षीरसमुद्रविलोडनकरणादुत्था सुधाकणिका ।
ताभिर्धाता नन तव नेत्रे रचितवान् दयाक्रान्ते ॥

अत्र शास्त्रीयाचारपरिपालनलब्धदैवीसम्पत्तिमतो राज्ञो नेत्रयोर्दयाक्रान्ततारूपा वृत्ति स्वरूपेण स्थिता, परमेवरूपा तयो सा वृत्ति कविना क्षीरसमुद्रोद्भूतसुधाकणिकाजन्यत्वेन सम्भाविता इतीय हेतूत्प्रेक्षा अन्यरूपेण स्थितयोरऽपि नेत्रयोर्दयाक्रान्तत्वे सुधाकणिकाजन्यत्व तत्र हेतुत्वेनोत्प्रेक्षितम । किञ्च—[यशस्तिलके]

---

[1] 'सरस्वतीकण्ठाभरणकार '-तु इमा क्रियोत्प्रेक्षामाह । विवृणोति चैवम्—अत्र अङ्गुलीभि केशेषु गृहीत्वा प्रियामुख चुम्ब्यते, सा च लोचने मीलयतीति प्रायोवाद । तत्र मुखचुम्बनादिक्रिया प्रधानमङ्गभूता प्रतीयते, केशग्रहणाक्षिनिमीलने चाङ्गभूतेऽप्रधाने, तत्र अङ्गीभूताया क्रियाया' उत्प्रेक्षणेन अवयवभूता क्रियोत्प्रेक्षिता भवति । यथाहि— 'कुड्मलीकृतसरोजलोचनम्' इत्यत्र नोत्प्रेक्षापदम । एवम 'अङ्गुलीभिरिव मरीचिभि तिमिर-केशसञ्चय सन्निगृह्य' इत्यत्रापि तन्न प्राप्नोति । मरीच्यङ्गुलीभिर्निगृहीततिमिरकेशसञ्चयमिव इत्येव वा वक्तव्य भवति । तत्र योऽयमवयवक्रियायामपि अन्यपदार्थाहृतायावयवक्रियाविलक्षणा इवप्रयोगेण पृथक् पदतया वावयवरूप स इत्यस्यापि व्याख्यानपरत्वेन अप्यनुयोज्यमान सर्वैभि उत्प्रेक्षावयव इत्युच्यते ।

अन्ये पुनर्यत्र प्रधानक्रिया नोत्प्रेक्ष्यते अवयवक्रिया तु उत्प्रेक्ष्यते तमुत्प्रेक्षावयव वर्णयन्ति । यथा—

लीनेव प्रतिबिम्बितेव लिखितेवोत्कीर्णरूपेव च
प्रत्युप्तेव च वज्रलेपघटितेवान्तर्निखातेव च ।
सा नश्चेतसि कीलितेव विशिखैश्चेतोभुवः पञ्चभि
श्चिन्तासन्ततितन्तुजालनिबिडस्यूतेव लग्ना प्रिया ॥

अत्र प्रधानक्रिया लग्ना नोत्प्रेक्ष्यते । [illegible]

[2] [illegible]

* या कामकेलीशुकतुण्डकान्ता पातु मुखामोदमिवायताऽभूत् ।
सा गन्धवाहा विवरावशेषे-निवेशनिर्गच्छदतुच्छपूया ॥

अत्र स्वभावत सुन्दर्यां नासिकाया स्थिता दीर्घा वृत्ति कविना मुखामोदपानकर्तृत्वेन रूपेण उत्प्रेक्षिता । यथा वा—[सरस्वतीकण्ठाभरणे]

सेनागजा स्वकरपल्लवलेखनीभिर्गण्डस्थलान्मदमसीमुहुराददाना ।
मन्ये नरेन्द्र ! तव तोयधितीरतालीपत्रोदरेषु विजयस्तुतिमालिखन्ति ॥

अत्र सेनागजानां गण्डस्थलेभ्यो लेखन्याकारै करैर्मसीरूपस्य मदपयसो यदादानम्, यश्च तीरतालीपत्रोदरेषु महार्णवतया निक्षेप' स उक्तरूपेण अन्यथोत्प्रेक्ष्यते इति सेयमुत्प्रेक्षा 'क्रियोत्प्रेक्षा' भवति । यथा वा—

पूर विधुर्वर्धयितु पयोधे शङ्केयमेणाङ्कमणि कियन्ति ।
पयासि दोग्धि प्रियविप्रयोगे सशोककोकीनयने कियन्ति ॥

अत्र चन्द्रेण कृत समुद्रस्य बृहण सदेव [स्वरूपेण स्थितमेव] कृतस्य चन्द्रकान्तद्रावणस्य कोकाङ्गनावाष्पस्रावणस्य च फलत्वेनोत्प्रेक्ष्यत इति सिद्धविषया [उपात्तविषया] फलोत्प्रेक्षेयम् । चन्द्रोदयवर्णनमिदम् । यथा वा—

विवस्वतानायिषतेव मिश्रा स्वगोसहस्रेण सम जनानाम् ।
गावोऽपि नेत्रापरनामधेयास्तेनेदमान्ध्यं खलु नान्धकारै ॥

अत्र विवस्वता कृत स्वकिरणै सह जनलोचनानां नयनमसदेव रात्रावान्ध्यम्प्रति हेतुत्वेनोच्यते इत्यसिद्धविषया हेतूत्प्रेक्षेयम् । सूर्यास्तवर्णनमिदम् ॥ यथा वा—

परीतमुक्षावजये जयश्रिया नदन्तमुच्चै क्षतसिन्धुरोधसम् ।
ददर्श पुष्टिं दधत स शारदीं सविग्रह दर्पमिवाधिप गवाम् ॥ [भारवि॰]

अत्र चेतनस्य उक्षण॰ उक्षावजयनदननदीतटोत्खाननात्मिका स्थिता वृत्ति मूर्तिमद्दर्पत्वेनोत्प्रेक्षिता । अन्यदपि—

भूयस्तराणि यदमूनि तमस्विनीषु
ज्योत्स्नीषु च प्रविरलानि तत प्रतीम ।
सन्ध्यानलेन भृशमम्बरमूषिकाया-
मावर्त्तितैरुडुभिरेव कृतोऽयमिन्दु ॥ [मुरारि]

अत्र—ताराविरलत्वरूपेणान्यमात्रधर्मेण चन्द्रस्य [अचेतनस्य] सन्ध्यानलमध्यगाम्बरमूषिकावर्त्तिततारानिकरनिमित्तत्वमुत्प्रेक्षितम [अत इय हेतूत्प्रेक्षा] । किञ्च—

---

* गन्धवाहा=नासिका । कामस्य य केलीशुक क्रीडाकीर तस्य तुण्डवत् मुखवत् कान्ता मनोज्ञा । विवरस्य छिद्रस्य अवशेष उद्धारो योऽसौ निवेश स्थानं तस्मात् निर्गच्छत् निर्गलत् अतुच्छ प्रचुर पूय नष्टरुधिर यस्यां सा तथा भूता । स्पष्टमन्यत् ।

सेयं मदीया जननीव तेन मान्येन राज्ञा सरयूर्वियुक्ता ।

दूरे वसन्तं शिशिरानिलैर्मां तरङ्गहस्तैरुपगूहतीव ॥ [रघुवंशे]

अत्राचेतनानां तरङ्गाणामूर्ध्वप्रसरणं नाम स्थिता इति उपगूहनत्वेन [आलिङ्गनत्वेन] रूपेण सम्भावितेति क्रियोत्प्रेक्षा । यथा वा—

रुचयोस्तमितस्य भास्वतः स्खलिता यत्र निराश्रया खलु ।

अनुमाय मभुविलेपनापणकाश्मीरजपण्यवीथय ॥ [नैषधे]

अत्र—पण्यस्थितानामचेतनानां काश्मीरकुङ्कुमकेसराणां स्थिता इति आहृत्यसावर्ण्यात् सायन्तनार्कत्विट्त्वेन रूपेणोत्प्रेक्षिता । परमियं गम्योत्प्रेक्षा । वाचकशब्दाप्रयोगात् । यथा वा—

रावणस्यापि रामास्तो भित्त्वा हृदयमाशुगः ।

विवेश भुवमाख्यातुमुरगेभ्य इव प्रियम् ॥

अत्र—उरगान् प्रति प्रियाख्यानमसदेव भूप्रवेशस्य फलत्वेन सम्भावितमित्यसिद्धविषया फलोत्प्रेक्षा । अन्यच्च—

गोवर्धनं गिरिमुपेत्य कटाक्षबाणान्

वर्णान्तस्फुरन्मणिशिलोपरि सन्दधानाः ।

का भ्रूधनुर्धुवनसञ्चितलुब्धनेय

स्यग्रीकरोत्यहह मामपि सम्भ्रमेण ॥

अत्र—वर्णप्रान्ते नेत्रान्तगतागतमेव तद्वन्निमणिशिलोपरि कटाक्षबाणतेननतादात्म्येन सम्भाव्यते [उत्प्रेक्षितम्] । किञ्च—[हरविजये]

मन्दाकिनीसलिलनिर्भरपूर्यमाणगम्भीरकुक्षिकुहरोद्गततारनादम् ।

अद्यापि यस्य शिरसि श्रियमेत्यशान्तवेदध्वनीव परमेष्ठिशिरःकपालम् ॥

अत्र सदेव परमेष्ठिशिरःकपालं मन्दाकिनीसलिलगतागतनादावच्छिन्नम् अनारतवेदध्वनिसोभावत्त्वेन रूपेणोत्प्रेक्षितम् ।

अपि च—

यस्याः हरिन्मणिविनिर्मितहर्म्यरश्मि-

लीढोदरा प्रतिदिनं निशि तारकौघाः ।

उद्भिन्नकोमलयवाङ्कुरकोटिलक्ष-

नैशोदबिन्दुपटलश्रियमालिलिङ्गुः ॥

अत्र—अचेतनानां तारकाणां मरकतमणिनिर्मितप्रासादमनुप्रविश्य स्थितानां स्थिता इति इन्द्रनीलमणिप्रभासम्पातनिबद्धत्वाद्बिन्दुप्रकल्पनात्वेन रूपे-

---

मरकतमणिनिर्मितप्रासादात् कुर्वाणः ।

त्प्रेक्षिता इत्यस्मिन्मते द्रव्यस्वरूपोत्प्रेक्षेयम्, मतान्तरे तु क्रियोत्प्रेक्षेति युक्तायुक्तं सुधीभिर्विवेच्यम् । यथा वा—

पल्लवितं चन्द्रकरै रखिलं नीलाश्मकुट्टिमोर्वीषु ।
ताराप्रतिमाभिरिदं पुष्पितमवनीपतेः सौधम् ॥ [रुद्रट]

अत्र—सौधाख्यस्य वस्तुन अपल्लविता अपुष्पिता च स्थिता वृत्ति चन्द्रतारकाप्रतिबिम्बसम्पर्कात् तद्योग्यतायां सत्यामसम्भाव्यमानापि पल्लवितत्वेन पुष्पितत्वेन च रूपेणोत्प्रेक्षिता इवार्थस्य सामर्थ्याद् गम्यमानत्वाद् गम्या [प्रतीयमाना] उत्प्रेक्षेयम् परमिय स्वरूपस्यैव । यथा वा—

कमनीयविशालभालगां कुटिलां चारुकलां कलानिधे ।
दहनस्य तृतीयदृग्जुष प्रशमायेव बिभर्त्ति योऽनिशम् ॥ [लक्ष्मीकाव्ये]

अत्र—महादेवशिरसि स्थिताया एव कलानिधे [शशिन] कलाया वृत्ति तृतीयनेत्रजन्मनोऽनलस्य प्रशमनार्थत्वेन सम्भाविता । धारणन्तु नोत्प्रेक्षाविषय । यथा वा—

विलोलकल्लोलकरप्रहारैर्वार्वारणाघातनिपातदन्तैः ।
यद्वप्रमुच्छेत्तुमजातशक्ति फेनैर्वेलक्षो हसतीव सिन्धु ॥ [नेमिनिर्वाणे]

अत्र सिन्धो फेनवमनरूपा वृत्ति हसनत्वेनोत्प्रेक्षितेति क्रियोत्प्रेक्षेयम् । एवमुत्प्रेक्षाया भूयान् समाचारो महाकाव्येषु द्रष्टव्य । ताश्च नानाप्रकारा सन्तीति ग्रन्थगौरव मन्यमानेन मया सकला न समाहृता ग्रन्थान्तरतो ऽवसेया *

साहित्याचार्यै कृतानि उत्प्रेक्षाया लक्षणानि बहुदर्शित्वसम्पादनाय प्रदर्श्यन्ते—

'सम्भावनमथोत्प्रेक्षा प्रकृतस्य समेन यत्' इति [काव्यप्रकाशे] ।

'तत्त्वेन चारु तद्वत्त्वेन वा सम्भावन भवेत् ।
उत्प्रेक्षा वाच्यगम्यत्वभेदात् सा द्विविधोच्यते' ॥ [साहित्यसारे] तत्त्वेन=उत्प्रेक्ष्य धर्मित्वेन । तद्वत्त्वेन=उत्प्रेक्ष्यधर्मविशिष्टत्वेन वा ।

'सम्भावना स्यादुत्प्रेक्षा वस्तुहेतुफलात्मना' [चन्द्रालोके]

'अध्यवसाये व्यापारप्राधान्ये उत्प्रेक्षा' [अलङ्कारसर्वस्वे]

तद्भिन्नत्वेन तदभाववत्त्वेन वा प्रमितस्य पदार्थस्य रमणीयतद्वृत्तितत्समानाधिकरणान्यतरतद्धर्मसम्बन्धनिमित्तक तत्त्वेन तद्वत्त्वेन वा सम्भावनमुत्प्रेक्षा' [रसगङ्गाधरे]

'भवेत्सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना' [साहित्यदर्पणे]

'यत्रान्यधर्मसम्बन्धादन्यत्वेनोपतर्कितम् ।
प्रकृत हि भवेत् प्राज्ञास्तामुत्प्रेक्षा प्रचक्षते [चित्रमीमांसायाम्]

'अन्यथावस्थित वस्तु यस्यामुत्प्रेक्ष्यते ऽन्यथा ।
द्रव्य गुण क्रिया वापि तामुत्प्रेक्षा प्रचक्षते ॥ [सरस्वतीकण्ठाभरणे]

'कल्पना काचिदौचित्यादयत्रार्थस्य सतोऽन्यथा ।

[हेतोर्वर्णनम्]

हेतुश्च सूक्ष्मलेशौ च वाचामुत्तमभूषणम् ।
कारकज्ञापकौ हेतू तौ चानेकविधौ यथा ॥ २३५ ॥

—*—

हेतुं समस्तजगतां सकलेश्वरो यो ब्रह्मादिभिर्हृदि धृतो विधुनोति पुंसाम् ।
पापानि पुण्यफलकानि च सन्तनोति तं कृष्णनीलिममणिं शरणं प्रपद्ये ॥

— —

परमतं खण्डयन्नेव क्रमप्राप्तानां हेतुसूक्ष्मलवानां स्वरूपं निरूपयति—'हेतुश्च' इति । 'हेतुः सूक्ष्मः' तथा उद्देशसूत्रे 'लव' पदेनोक्तो लेशश्च एते त्रयः 'वाचाम्'=कविभणितीनाम् 'उत्तमभूषणम्'=एते त्रयोऽपि उत्कृष्टा अलङ्कारा इत्यर्थः । तस्माद् 'भामहादिभि'रुक्तम्—यद्

हेतुश्च सूक्ष्मलेशौ च नालङ्कारतया मताः ।
समुदायाभिधेयस्य वक्रोक्त्यनभिधानतः ॥ इति—

तत् परास्तं वेदितव्यम् । तत्र सामान्यतो हेतोर्द्वौ प्रकारौ कारको ज्ञापकश्चेति । 'तौ च कारकज्ञापकौ हेतू अनेकविधौ'=अनेकप्रकारौ भवतः इति शेषः 'यथा' इत्यग्रेऽनुपदमुदाहरणम् ॥ २३५ ॥

योतिनिवादिशब्दैरुत्प्रेक्षा सा स्मृता यथा ॥ [वाग्भटे]
'यत्रातितथाभूते सम्भाव्येत क्रियाद्यसम्भाव्यम् ।
सम्भवमतद्वति वा विज्ञेया सेयमुत्प्रेक्षा ॥ [काव्यालङ्कारे]

अथवा—

अतिसाम्यादैक्यं विधाय सिद्धोपमानसद्भावम् ।
आरोप्यते च तस्मिन्नतद्गुणादीति सोत्प्रेक्षा ॥ [काव्यालङ्कारे]

• इदमत्रावधार्यम्—'हेतुमता सह हेतोरभिधानमभेदतो हेतुः' इति—हेतुमता कार्येण सह हेतोः कारणस्य अभेदतः अभेदेन अभिधानं कथनं हेतुः हेत्वलङ्कार इति 'भट्टोद्भटस्य' मतम् । तस्यायमाशयः—यथा सारोपा गौणी लक्षणा रूपकालङ्कारस्य नैव सादृश्यमात्रस्य प्रयोजिका तथैव कार्यकारणभावसम्बन्धनिबन्धनतया शुद्धसारोपाश्रयगोऽयं हेत्वलङ्कारोऽपि । परन्तु—दण्डिप्रभृतीनां प्राचीनां 'भामहाद्या' अर्वाञ्चश्च 'मम्मटाद्या' नात्र वैचित्र्यं मन्यन्ते, ते तु 'काव्यलिङ्ग'मेव हेतुं मन्यन्ते । वस्तुतस्तु—

अविरलकमलविकासः सकलालिमदश्च कोकिलानन्दः ।
रम्योऽयमेति सम्प्रति लोकोत्कण्ठाकरः कालः ॥

इत्यादिषु विच्छित्तिः सहृदयानुभवसिद्धा [illegible] इति

[illegible] । परमस्माभि [illegible] , 'हेतुमत' [illegible]
'[illegible] काव्यालङ्कारे [illegible] परन्तु [illegible] प्राचीनाः [illegible] [illegible]
[illegible] ।

[सप्रभेदस्य कारकहेतोरुदाहरणादिप्रपञ्च]

अयमान्दोलितप्रौढचन्दनद्रुमपल्लवः ।
उत्पादयति सर्वस्य प्रीतिं मलयमारुत ॥ २३६ ॥

तत्रादौ कारकहेतुमुदाहरति—'अयम्' इति । 'अयम्' इति । 'अयम्'= पुरतश्चलन् 'मलयमारुत'=दक्षिणोऽनिल 'सर्वस्य'=विश्वस्यापि कामिनो जनस्य प्रीतिम्'=हर्षम् 'उत्पादयति'=जनयति रतिविलासाय चेतश्चञ्चलीकरोतीत्यर्थ । कथम्भूत 'आन्दोलित-प्रौढचन्दनद्रुमपल्लव'=आन्दोलिता मन्दमन्दमवधूनिता प्रौढा. वासन्तिकत्वाद् बहुलीभूता अर्थात् वसन्तकालत्वात् प्रचुराङ्कुरोपेताः चन्दनद्रुमानां पल्लवा पत्राणि [प्रवाला इति यावत्] येन स. तादृश । अनेन मलयमारुतो मन्द सुगन्ध शीतलश्चेति व्यक्तीकृतम् ।

अत्र मलयमारुत प्रीतिजनने कारको हेतु । आन्दोलितेतिविचित्रार्थविशेषणवत्तया सहृदयहृदये समाधिकचमत्कारजनकत्वात्तस्यालङ्कारत्वमिष्टमेवेति स्फुटोऽभिप्राय । इदञ्चोत्पादनक्रियाया प्रवृत्तौ हेतुरुक्त । निवृत्तावपि च भवति । यथा—

मुग्धे तव मुखामोदलोलुपो मधुपो भ्रमन् ।
कर्णिकाकमल फुल्लमपि नाभिसरत्ययम् ॥ इति ।

अत्राभिसरणक्रियाया प्रतिषेध [निवृत्ति] उक्त ॥२३६॥

[उक्तोदाहरणे हेतुस्वरूपयोजनम्]

प्रीत्युत्पादनयोग्यस्य रूपस्यात्रोपबृंहणम् ।
अलङ्कारतयोद्दिष्टं निवृत्तावपि तत्समम ॥ २३७ ॥

उक्त घटयति—'प्रीत्युत्पादनयोग्यस्य इति । 'प्रीत्युत्पादनयोग्यस्य'=प्रीतिरानद तस्या उत्पादनम् जनन तद्योग्यस्य 'रूपस्य'=आन्दोलनादिविशेषणोपेतस्य मलयमारुतस्य प्रीत्युत्पादनक्रियाया कर्तु यद् 'उपबृंहणम्'=विचित्रतयोपन्यास तद् [उक्तपद्ये] 'अलङ्कारतया'=कारक हेत्वलङ्कारत्वेन उद्दिष्टम्'=कथितम् ततश्च वैचित्र्यसत्त्वे कथमस्यालङ्कारत्व न स्यादिति भाव । न केवल प्रवृत्तावेवायमलङ्कारो यावद् निवृत्तावपि इत्याह—'तत्' इति । 'तत् निवृत्तौ अपि समम्' समानम्=अर्थात् क्रियाया निवृत्तावपि हेत्वलङ्कारो भवति तद्यथा—अधस्तात् टीकायामुदाहृतम् । मूले चाग्रेऽनुपदमपि ॥ २३७ ॥

[अभावसाधने हेतोरुदाहरणम्]

चन्दनारण्यमाधूय स्पृष्ट्वा मलयनिर्झरान् ।
पथिकानामभावाय पवनोऽयमुपस्थित ॥ २३८ ॥

भावसाधने उदाहरणमुक्त्वा अभावसाधनेऽपि दर्शयति—'चन्दनारण्यम्' इति । 'चन्दनारण्यम्'=चन्दनवनम् 'आधूय'=मन्द मन्द घूर्णयित्वा ईषत्कम्पयित्वा 'मलयनिर्झरान =मलयपर्वतनिस्यन्दीनि प्रस्रवणानि 'स्पृष्ट्वा'=चुम्बित्वा 'अयं पवन '=पुरतश्चलन्

मारुत 'पथिकानाम्'= पान्थानाम् 'अभावय'=क्षयाय 'उपस्थित'=सन्नद्ध । तादृशो मारुतो विरहिणो जनान् अत्यन्त खेदयतीति भाव । अत्र चन्दनारण्यधवनकथनेन सौगन्ध्यमान्द्ये मलयनिर्झरस्पर्शकथनेन शैत्यञ्च व्यक्तीकृतम् ॥ २३८ ॥

[दर्शितलक्ष्ये अभावसाधनहेतो सङ्गमनम्]

अभावसाधनायालमेवम्भूतो हि मारुत ।
विरहज्वरसम्भूतमदनाग्न्यातुरे जने ॥ २३९ ॥

उक्तोदाहरणे दर्शितमभावसाधन [हेतु] स्वय घटयति—'अभावसाधनाय' इति । 'हि'=यत 'एवम्भूत'=सौरभ्यादिगुणोपेत 'मारुत'=पवन 'विरहज्वर०' विरहज्वरेण वियोगतापेन सम्भूत सञ्जनित य मदनाग्नि मदन काम एवाग्नि अनल तेन अर्थात् वियोगजनितकामानलेन आतुरे पीडिते 'जने'=कामिनि 'अभावसाधनाय'=मारणाय 'अलम्'=समर्थ उपस्थितिद्वारेति शेष । एवमत्र पथिकाभावसाधनसमर्थता मलयमारुतवर्णनाविचित्री हेत्वलङ्कारतां प्रयोजयति ॥ २३९ ॥

निर्वर्त्त्ये च विकार्ये च हेतुत्वं तदपेक्षया ।
प्राप्ये तु कर्मणि प्राय क्रियापेक्षैव हेतुता ॥ २४० ॥

उक्तयोरुदाहरणयो क्रियापेक्षयैव हेतुभावो दर्शित क्वचित् कर्मापेक्षयाप्यसौ भवतीति तद्दर्शयति—'निर्वर्त्त्ये' इति । 'निर्वर्त्त्ये च विकार्ये च'=कर्मणि इति शेष 'तदपेक्षया'= तत्तद्घटपटादिकर्मापेक्षया 'हेतुत्वम्'=तत्तत्कर्मापेक्षो हेतुरित्यर्थ । 'प्राप्ये तु कर्मणि'= प्रासादादौ 'प्राय'=बाहुल्येन 'हेतुता'=हेतुभाव हेतुरित्यर्थ 'क्रियापेक्षा एव'=क्रियाया अपेक्षा यत्र सा तथाभूता [हेतुता] अर्थात् क्रियापेक्षो हेतुरिति वस्तुतोऽर्थ । तदुक्त 'वाक्यपदीये' तृतीयकाण्डे—

निर्वर्त्त्यञ्च विकार्यञ्च प्राप्यञ्च त्रिविध मतम् ।
तत्रेप्सिततम कर्म चतुर्धाऽन्यत्तु कल्पितम् ॥

पूर्वमसदेव कर्त्तु क्रियया उत्पद्यमान, अथवा विद्यमानमेवानक्षित सत् कर्त्तु क्रियया प्रकाश्यमानमिति द्विविध 'निर्वर्त्त्य' कर्म । आद्य यथा—'घट करोति' द्वितीय 'वत्स सूते' इति । यत्तु—पूर्वं सदेव पूर्वावस्थापरित्यागपूर्वकमवस्थान्तरमापद्यते तद् 'विकार्यम्' । यथा 'इन्धन दहति' 'कनक कुण्डल करोति' इत्यत्र कनकमिति । यत्र—कर्त्तु क्रियया [व्यापारेण] व्याप्तिमात्रमवसीयते तत 'प्राप्यम्' इति अर्थात् यत्र क्रियाकृतविशेषस्य कस्यापि न प्रतीतिर्भवति तत 'प्राप्यम्' इति ।

सती वा विद्यमाना वा प्रकृति परिणामिनी ।
यस्य नाश्रीयते तस्य निर्वर्त्त्यत्व प्रचक्षते ॥
प्रकृतेस्तु विवक्षाया विकार्यं कैश्चिदन्यथा ।
निर्वर्त्त्य च विकार्य च कर्म शास्त्रे प्रदर्शितम् ।

कथमित्याह—

यदसञ्जायते सद्वा जन्मना यत्प्रकाश्यते ।
तन्निर्वर्त्यं विकार्यंच कर्म द्वेधा व्यवस्थितम् ॥
प्रकृत्युच्छेदसम्भूतं किञ्चित् काष्ठादिभस्मवत् ।
किञ्चिद् गुणान्तरोत्पत्त्या सुवर्णादि विकारवत् ॥
क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते ।
दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यते ॥ इत्यादि ॥*

अधिकञ्च—'व्याकरणमञ्जूषावैयाकरणभूषणादौ' द्रष्टव्यम् ॥ २४० ॥

[हेतुभेदकथनाय प्रतिज्ञा]

हेतुर्निर्वर्त्तनीयस्य दर्शित. शेषयोर्द्वयो. ।
दत्त्वोदाहरणद्वन्द्वं ज्ञापको वर्णयिष्यते ॥ २४१ ॥

सम्प्रति कतिपयहेतुविशेषदर्शनार्थं प्रतिजानीते—'हेतु' इति । 'निर्वर्त्तनीयस्य'= निवर्त्यस्य कर्मण 'हेतु दर्शित'= अयमान्दोलिते' त्याद्युदाहरणेन निरूपित 'शेषयो' द्वयो'=विकार्यप्राप्ययो 'उदाहरणद्वन्द्वम्'=उदाहरणद्वयम् 'दत्वा=दर्शयित्वा 'ज्ञापक'= ज्ञापकनामा कारकहेतुभिन्न [प्रकाशको] हेतु 'वर्णयिष्यते'=निरूपयिष्यते शिष्योत्कण्ठा-वारणाय प्रतिज्ञेयम् ॥ २४१ ॥

[विकार्यकर्महेतोरुदाहरणम्]

उत्प्रवालान्यरण्यानि वाप्यः सम्फुल्लपङ्कजा ।
चन्द्र पूर्णश्च कामेन पान्थदृष्टे विषं कृतम् ॥ २४२ ॥

तत्र तावत् विकार्य [कर्म] हेतुमुदाहरति—'उत्प्रवालानि' इति । 'अरण्यानि'= वनानि 'उत्प्रवालानि'=उद्गता प्रवाला नवपल्लवा येषु तानि । वाप्य' दीर्घिका ['वापी तु दीर्घिका' इत्यमर] 'सम्फुल्लपङ्कजा'=सम्फुल्लानि विकसितानि पङ्कजानि कमलानि यासु ता । [चन्द्र'=शशी 'पूर्ण =पूर्णमण्डल । अतो हेतो 'कामेन'= मदनेन 'पान्थदृष्टे'=पान्थाना प[थि]काना दृष्टे चक्षुष' 'विषं कृतम्'=एतत्त्रयमेव विषी-भावरूपविकारमापादितम् ।

---

* व्युत्पत्तिवादे च—कर्म हि त्रिविध भवति-प्राप्य प्रकृतिविकृती च । तत्र प्राप्य कर्म-क्रियाजन्यफलशालि गम्यादे ग्रामादि ज्ञानादेर्विषयश्च । क्रियानिष्पाद्य यत् तद् विकृतिरूपम् यथा-पाकादेरोदनादि, यथा वा कृतेर्माल्यादि कटादि च । प्रथमे तण्डुलादिरूपपूर्वद्रव्य विनाश्य ओदनादेर्निर्वर्त्तनम, द्वितीये-पुष्पादिरूपपूर्वद्रव्य मविनाश्यैव [illegible]विशेषनिष्पादनेन विशिष्टस्य माल्यादेर्निर्वर्त्तनम । तृतीये च—काशादिरूपपूर्व-[illegible] तत्रैव कटादिरूपस्य निष्पादनम, [illegible] कर्म प्रकृतेरसमभिव्याहार [illegible] । '[illegible] पचति [illegible] करोति, काशान् कट

अत्रारोपित एव प्रकृतिविकृतिभावश्चमत्कारहेतुरिति 'विकार्यहेत्वलङ्कार' । वास्तवे प्रकृतिविकृतिभावे तु 'सुवर्णं कुण्डलं करोति' इत्यादिवत् चमत्काराभावान्नायमलङ्कार-विषय । 'सम्फुल्ल' इति । 'उत्फुल्लसम्फुल्लयोरुपसङ्ख्यानम्' [पा० ८ । २ । ५५] इति वार्त्तिकेन निपात्यते ॥ २४२ ॥

[प्राप्यहेतोरुदाहरणम्]

मानयोग्यां करोमीति प्रियस्थानस्थितां सखीम् ।
बाला भ्रूभङ्गजिह्माक्षी पश्यति स्फुरिताधरा ॥ २४३ ॥

प्राप्य [कर्म] हेतुमुदाहरति—'मानयोग्याम्' इति । 'बाला'=अप्रगल्भा मुग्धेत्यर्थ' 'भ्रूभङ्गजिह्माक्षी'=भ्रुवोर्भङ्गेन कटाक्षविशेषेण जिह्मे कुटिले अक्षिणी नयने यस्या सा तादृशी 'स्फुरिताधरा'=स्फुरित कम्पमान अधरो यस्या सा । 'मानयोग्याम् करोमि'= मानस्य योग्या अभ्यास ताम् मानाभ्यास विदधे 'इति'=एवमभिप्रेत्य 'प्रियस्थानस्थि-ताम्'=प्रियस्य स्थाने सन्निधौ 'स्थिताम्' विद्यमानां 'सखीम्'=वयस्यां 'पश्यति'= आलोकते ।

अत्र 'सखीम्' इति प्राप्य कर्म, तद्विषयकदर्शनक्रियापेक्षिणी बाला भ्रूभङ्गविशेष-सम्भावितकोपदर्शने हेतु रिति 'प्राप्यहेत्वलङ्कार' । सोऽयम्—तथाविधाभिप्रायोपेतभ्रूभङ्गे-त्यादिविशेषणपूर्वकचमत्काराधानविशेषतया अलङ्कारपदवीमध्यास्ते । 'भ्रूभङ्गजिह्माक्षी' इति । अत्र—'बहुव्रीहौ सक्थ्यक्ष्णो स्वाङ्गात् षच्' [पा० ५ । ४ । ११३] इति सूत्रेण समासान्त 'षच्' । षित्त्वात् 'षिद्गौरादिभ्यश्च' [४ । १ । ४१] इति सूत्रेण 'ङीष्' । 'मानयोग्याम्' इति—योग्या अभ्यास । 'अभ्यास खुरली योग्या' इत्यमर-माला ॥ २४३ ॥

[अथ ज्ञापकहेतुभेदोदाहरणम्]

गतोऽस्तमर्को भातीन्दुर्यान्ति वासाय पक्षिण ।
इतीदमपि साध्वेव कालावस्थानिवेदने ॥ २४४ ॥

ज्ञापकहेतुमुदाहरति—'गत' इति । 'अर्क'=सूर्य 'अस्तं गत'=सायङ्कालो जात इत्यर्थ । 'इन्दु'=चन्द्र 'भाति'=प्रकाशते चन्द्रोऽपि उदित इत्यर्थ । 'पक्षिण'=पक्षिण 'वासाय'=स्वनिवासस्थानाय 'यान्ति'=गच्छन्ति 'इति इदम् अपि'=एतदुक्तरूपमपि 'काला-वस्थानिवेदने'=सायन्तनसमयप्रकाशने 'साधु एव'=सम्यगेव । [illegible] ।

अत्र अस्तमितत्वादय ज्ञापका [illegible] इति 'ज्ञापकहेत्वलङ्कार' । अत्र साध्य साक्षात् शब्दोपात्तमिति प्रतीयमानम् । [illegible]

करोति' इत्यादौ प्रकृतिकर्माभ्याहारस्थलेऽपि [illegible] इति [illegible] [illegible] निर्वर्त्यतादि तथापि [illegible] [illegible] । [illegible]-निर्देश —'गतो' इत्यादि ।

द्वौ प्रकारौ, । तत्सम्बन्धेन ज्ञापकोऽपि द्विविध । द्वितीय प्रकारमनुपद दर्शयति ॥२४४॥

[शब्दोपात्तज्ञाप्यज्ञापकहेतोरुदाहरणम्]

अवध्यैरिन्दुपादानामसाध्यैश्चन्दनाम्भसाम ।
देहोष्मभि सुवोधं ते सखि ! कामातुरं मन ॥ २४५ ॥

यत्र शब्दोपात्त ज्ञाप्य, तादृश ज्ञापकहेतुमुदाहरति—'अवध्यै ' इति । हे ! सखि'= आलि ! 'ते'=तव 'कामातुरम्'=मदनविह्वल[विरहव्याकुल] 'मन '=हृदयम ['स्वान्तं हृन्मानस मन इत्यमरः] 'इन्दुपादानाम्'=चन्द्रमयूखाना 'अवध्यै '=अवाध्यै अविनाश्यैरित्यर्थ तथा 'चन्दनाम्भसाम्'=चन्दनाक्तजलानाम् 'असाध्यै '=प्रतीकारानर्हे 'देहोष्मभि =देहस्य सन्तापै 'सुवोधम्'=अनायासेनानुमातु शक्यमित्यर्थ ।

अत्र मनस' कामातुरभावो ज्ञाप्य शब्दोपात्त , तस्य देहतापाश्च ज्ञापका इति शब्दोपात्ते ज्ञाप्ये 'ज्ञापको हेतु ' । अत्र तु 'अवध्यै' रित्यादिविशेषणद्वयोपन्यासमुखेन असाधारणविरहप्रतिपादनशल्या विचित्रतातिशय कविनां पुष्णाति, तथाविधवैचित्र्यस्यैवालङ्कारत्वादिति तु न विस्मरणीयम् ॥ २४५ ॥

[अवान्तरप्रकरणोपसहारपूर्वक प्रतिज्ञान्तरम्]

इति लक्ष्या प्रयोगेपु रम्या ज्ञापकहेतवः ।
अभावहेतव केचिद् व्याह्रियन्ते मनोहराः ॥ २४६ ॥

'इति' इति । 'इति'=दर्शितप्रकारा. 'रम्या '=सहृदयहृदयावर्जका 'प्रयोगेपु'=प्राचां सूरीणां प्रबन्धेषु 'ज्ञापकहेतव '=ज्ञापकरूपा हेतव [हेत्वलङ्कारा.] 'लक्ष्या '=ऊहनीया. मयोक्ता इति शेष । केचित् मनोहरा '=हृद्या 'अभावहेतव ' अभावरूपा [प्रागभावादिरूपा] हेतव [सम्प्रति] 'व्याह्रियन्ते'= कथ्यन्ते इति प्रतिज्ञान्तरम् । नचाऽभावस्य हेतुभावत्व नास्तीति कथ वैचित्र्ये सत्यपि तस्यालङ्कारत्वम इति वाच्यम । आचार्यैरभावस्यापि कारणत्वस्वीकारात् । तदुक्तम्—

भावो यथा तथाभाव कारण कार्यवन्मत. ।
प्रतिवन्धो विसामग्री तद्धेतु प्रतिबन्धक ॥ इति ॥ [न्यायकुसुमाञ्जलौ]

द्वितीयतृतीयादिविभक्तिघटितलक्षणा भेदा सरस्वतीकण्ठाभरणे भोजेनोक्ता, ते तु स्वयमन्तव्या , ग्रन्थगौरवभिया अत्युपयोगाभावाच्च मया नात्र प्रपञ्चिता ॥२४६॥

[प्रागभावहेतोरुदाहरणम्]

अनभ्यासेन विद्यानामसंसर्गेण धीमताम् ।
अनिग्रहेण चाक्षाणां जायते व्यसनं नृणाम् ॥ २४७ ॥

तत्र तावत् प्रागभावरूप हेतुमुदाहरति—'अनभ्यासेन' इति । विद्यानाम् व्याकरणादिशास्त्राणाम् 'अनभ्यासेन'=अभ्यासाभावेन [योग्याभावेनेत्यर्थ] धीमताम'=

बुद्धिमताम् सदसद्विवेकिनां महापुरुषाणाम् 'असंसर्गेण'=संसर्गाभावेन, तथा 'अक्षाणाम्'=इन्द्रियाणाम् 'अनिग्रहेण'=संयमाभावेन हेतुना 'नृणाम्'=मनुष्याणाम् 'व्यसनम्'=नीचा प्रवृत्ति 'जायते'=भवति ।

अत्र विद्याभ्यासादीनां प्रागभावो व्यसनोत्पत्तिम्प्रति हेतुरिति 'प्रागभावरूपो हेत्वलङ्कार'। प्रागभावादेर्लक्षण न्यायमुक्तावल्यादौ मत्प्रणीततत्प्रभादौ च स्पष्टम्। तथाहि—'इह कपाले घटो भविष्यति' 'इह तन्तुषु पटो भविष्यति' इति प्रत्ययसाक्षिक उत्पत्तेः पूर्वं कार्यस्याभावो य स प्रागभाव.। अनादि. सान्तोऽभाव इत्यर्थ इति दिक् ॥ २४७ ॥ *

[ध्वंसाभावहेतोरुदाहरणम्]

गत कामकथोन्मादो गलितो यौवनज्वरः ।
गतो मोहश्च्युता तृष्णा कृतं पुण्याश्रमे मन ॥ २४८ ॥

ध्वंसाभावस्य हेतुमुदाहरति—'गत' इति । 'कामकथोन्माद'=कामस्य कथा मदनोत्पादको हेलाविलासादि तज्जनित उन्माद सदसद्विवेकाभाव 'गत' नष्ट इत्यर्थ । 'यौवनज्वर'=तारुण्याहङ्काररूप सन्तापः 'गलित'=प्रच्युत । 'मोह'=अज्ञानम् प्रमादो मत्युरित्यर्थ' 'गत'=ध्वस्त 'तृष्णा'=विषयाधि 'च्युता'=स्खलिता, अतो हेतो 'मन'=स्वान्तम् 'पुण्याश्रमे'=चरमाश्रमे सन्यासे 'कृतम्'=स्थापितम् । अपरिपक्वकषायाणां सन्यासानधिकारादिति भाव ।

---

* अनिग्रहे सति मिथ्याचारो भवति—तथा च 'भगवद्गीतायां' तृतीयेऽध्याये—

कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् ।
इन्द्रियार्थान् विमूढात्मा मिथ्याचार स उच्यते ॥

तस्मादनया सर्वेन्द्रियाणां निग्रह शुभाया प्रवृत्तेर्हेतुरित्यर्थोऽत्र भवति ।

अन्यत्राप्युक्तम्—

अकुर्वन्विहित कर्म निन्दित च समाचरन् ।
प्रसक्तश्चेन्द्रियार्थेषु नर पतनमृच्छति ॥

मनुनापि च—

मृगयाक्षो दिवास्वप्न परीवाद स्त्रियो मदः ।
तौर्यत्रिक वृथाट्या च कामजो दशको गण ॥

इत्यादिरूपाणि मनो. सप्तमाध्याये उक्तानि ज्ञेयानि ॥

[illegible] 'सनत्सुजातीये'—

[illegible] इन्द्रियाणि [illegible] मोहो [illegible] स्मरते च [illegible] ।
प्रमाद [illegible] महाऽप्रमाद [illegible] ।
[illegible] ।
[illegible] ।

अत्र कामकथादीनां [पूर्वोत्पन्नानां] ध्वसाभावो पुण्याश्रमगमनम्प्रति हेतुरिति ध्वसाभावरूपो हेत्वलङ्कार । वैचित्री च पूर्ववदूहनीया । ध्वसाभावश्च–'जन्याभावत्व ध्वसत्वम्' इति लक्षणक सादिरनन्तो वेद्य ॥ २४८ ॥

[अन्योन्याभावहेतोरुदाहरणम्]

वनान्यमूनि न गृहाण्येता नद्यो न योषित ।
मृगा इमे न दायादास्तन्मे नन्दति मानसम् ॥ २४९ ॥

अन्योन्याभावरूप हेतुमुदाहरति—'वनानि'=इति । गृहाद्विरक्तस्य वनम्प्रयातस्य [वानप्रस्थाश्रमिण] उक्तिरियम् । 'अमूनि वनानि'=अरण्यानि 'गृहाणि न' 'एता नद्य '=सरित 'योषित '=रमण्य न, 'इमे मृगाः दायादा '=बान्धवा न, 'तत्'=तस्माद्धेतो 'मे'=मम 'मानसम्' हृदय 'नन्दति'=ह्लादते ।

अत्र 'अमूनि वनानि' स्वेष्टाशनादिविरहाण्यपि न गृहाणि अर्थात् दुःखातिरेकप्रदातृगृहभिन्नानि' इत्येवमादिरूपेण वनगृहादीनामन्योन्याभाव मानसनन्दनम्प्रति हेतुरिति 'अन्योन्याभावरूपो हेत्वलङ्कार ' । अन्योन्याभावश्च—'तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताक' इति लक्षणको ज्ञेयः । अत्र सादृश्यातिशयहेतुकमभेदप्रतीतिपूर्वकमेदप्रतिपादनमेव चमत्कारजनकम् इति वनगृहादीनामस्त्येव सादृश्यम्, तथापि न तद्विवक्षितमिति नात्र 'निर्णयोपमाया 'शङ्कापि कार्यत्यापि कश्चित् ॥ २४८ ॥

[अत्यन्ताभावहेतोरुदाहरणम्]

अत्यन्तमसदार्याणामनालोचितचेष्टितम ।
अतस्तेषां विवर्धन्ते सततं सर्वसम्पद ॥ २५० ॥

अत्यन्ताभावरूप हेतुमुदाहरति—'अत्यन्तम्' इति । 'आर्याणाम'=सच्चरित्राणाम् सज्जनानाम् 'अनालोचितचेष्टितम्'=अविचार्यकारित्वम् 'अत्यन्तम असत्'=कालत्रयेऽपि न भवत्यत्र । 'अत '=हेतो 'तेषाम्'=साधूनाम् 'सततम्'=निरन्तरम 'सर्वसम्पद '=सर्वा सम्पत्तयो मित्रपुत्रकलत्रादिरूपा 'विवर्धन्ते'=एधन्ते ।

अत्र अविमृश्यकारिताया' अत्यन्ताभाव सर्वसम्पत्तिवृद्धिम्प्रति हेतुरिति अत्यन्ताभावरूपो हेत्वलङ्कार । त्रैकालिको यो [illegible]ऽभाव सोयमत्यन्ताभाव । यथा—'[illegible] नास्ति' । 'महाकुलकुलीनार्यसभ्यसज्जनसाधव ' इत्यमर ॥ २५० ॥

[अभावाभावहेतोरुदाहरणम्]

उद्यानसहकाराणामनुद्भिन्ना न मञ्जरी ।
देय पथिकनारीणां सतिल सलिलाञ्जलि ॥ २५१ ॥

[illegible] हेतुमुदाहरति 'उद्यान०' इति—'उद्यानसहकाराणाम्'=उद्या[illegible] [illegible] 'अनुद्भिन्ना न'=अपि तु उद्भि[illegible] [illegible] '[illegible]नारीणाम्'=[illegible] प्रोषितभर्तृकाणाम्

'सतिल'=तिलसहित 'सलिलाञ्जलि'=तोयाञ्जलि [तिलतोयाञ्जलिरिति समप्रोऽर्थ] 'देय'=निर्वाप्य । अत्र वसन्तोदये चूतमञ्जर्यादीनामतिमात्र कामोद्दीपकत्वात् प्रोषितभर्तृकाणा कृते मरणमेवोपस्थितमिति व्यज्यते ।

अत्र चूतमञ्जरीणामुद्भेदाभावस्याभाव विरहिणीनां मरणहेतुत्वेनोपनिबद्ध इत्यभावाभावरूपो हेत्वलङ्कार । अयञ्च प्रागभावाभावरूपो हेतु । [वस्तुन] प्रतियोगिन उत्पाद एव 'प्रागभावाभाव' उच्यते । 'अभावविरहात्मत्व वस्तुन प्रतियोगिता' इत्याचार्योक्तेः । एवमेव प्रध्वंसाभावादेरपि हेतुत्वमूह्यम् ॥ २५१ ॥*

[अभावहेतुप्रकरणोपसहार]

प्रागभावादिरूपस्य हेतुत्वमिव वस्तुन ।
भावाभावस्वरूपस्य कार्यस्योत्पादनं प्रति ॥ २५२ ॥

अभावहेतुमुपसहरति—'प्रागभावादिरूपस्य' इति । 'इह'=उक्तेषु उदाहरणेषु 'भावाभावस्वरूपस्य'=अर्थात् भावरूपस्य 'अभावरूपस्य च 'कार्यस्य उत्पादनम्'=उत्पत्तिं प्रति 'प्रागभावादिरूपस्य वस्तुन '=विषयस्य 'हेतुत्वम्'=कारणभाव वर्णनमिति शेष ॥ २५२ ॥

---

*तत्र प्रध्वंसाभावाभावो यथा—

पादश्रोणि गभीरनाभि निभृत मध्ये भृशोच्चस्तन
पायाद्व परिरब्धमब्धिदुहितु कान्तेन कान्त वपु ।
स्वावासानुपघातनिर्वृतमनास्तत्राकलमात्मद्दशे
यस्मै सोऽच्युतनाभिपद्मवसतिवेधा शिव ध्यायति ॥

अत्र नारायणस्य नाभिपङ्कजरूपस्यावासस्य उपघाताभाव विधेर्मनोनिर्वाणकारणं भवति अत प्रध्वंसाभावाभावहेतुरयम । अन्योन्याभावाभावो यथा—

अवनिरुदक तेजो वायुर्नभ शशिभास्करौ
पुरुष इति यत्केचिद् भिन्ना वदन्ति तनूस्तव ।
तदनघ ! वचो येषांविर्भाभिर्निरावरणस्य ते
विदधति पय परोन्मीलन्मुधा भिदिरोपमाम् ॥

अत्र 'भिन्ना' इत्यन्योन्याभावमुपन्यस्य भेदेनैतान्यो निषेध अन्योन्याभाव । न च भिदिरोपमात्वकारणत्वाद्व अन्योन्याभावहेतुरयम् हेत्वलङ्कार ।

अत्यन्ताभावाभावो यथा—

न वियोगो यदपि पूर्ववासिन गुणाद [illegible] प्रतिभानकदम्बम् ।
[illegible] च बाणपाणि [illegible] वक्त्रकुसुमम् ।

अत्र [illegible] [illegible] प्रतिभा [illegible] प्रतिबन्ध । [illegible] बाणपाणि [illegible] हेतु इति [illegible] । [illegible] हेतु ।

[चित्रहेतुभेदनिरूपणम्]

दूरकार्यस्तत्सहजः कार्यानन्तरजस्तथा ।
अयुक्तयुक्तकार्यौ चेत्यसंख्याश्चित्रहेतव ॥ २५३ ॥

कारकत्वज्ञापकत्वाभावत्वरूपोपाधिभि' हेतो त्रैविध्यमभिहितम्, सम्प्रति 'चित्रनामक' हेतुभेदमाचष्टे—। दूरकार्य' इति । 'दूरकार्य '=दूरे कार्यं यस्य स दूरकार्य' । 'तत्सहज'= तेन कार्येण सह जात इत्यर्थ । तथा 'कार्यानन्तरज '=कार्यस्यानन्तर जायमान· । 'अयुक्तायुक्तकार्यो'=अयुक्तकार्य =अयुक्तमनुचित कार्यं यस्य स, तथा 'युक्तकार्य'= युक्तमुचित कार्यं यस्य स इति द्वौ भेदावित्यर्थ । 'इति'=एवप्रकारा 'चित्रहेतव '= चित्रसज्ञा हेत्वलङ्कारा 'असङ्ख्या '=न सख्या येषां ते अनेकप्रकाराश्चित्राख्या हेतव इति भावार्थ· । उक्तञ्च सरस्वतीकण्ठाभरणे 'भोजराजेन'—

क्रियाया कारणं हेतु कारको ज्ञापकस्तथा ।
अभावश्चित्रहेतुश्च चतुर्विध इहेष्यते ॥ इति ॥ २५३ ॥

[चित्रहेतूनां गौणवृत्तिनिबन्धनत्वम्]

तेऽमी प्रयोगमार्गेषु गौणवृत्तिव्यपाश्रया ।
अत्यन्तसुन्दरा दृष्टास्तदुदाहृतयो यथा ॥ २५४ ॥

चित्राख्यहेतुविषये किञ्चिद्विशेषतामाह—'ते' इति । 'ते'=उक्ता 'अमी'=चित्रहेतव 'गौणवृत्तिव्यपाश्रया·'=गौणी चासौ वृत्ति· गौणवृत्ति =सादृश्यसम्बन्धप्रयुक्ता लक्षणा सैव व्यपाश्रय अप्रस्तुतविषयाभेदप्रतीतिजनिका आलम्बन येषां ते तादृशा सन्त 'प्रयोगमार्गेषु'=प्रयोगाणां काव्यानां मार्गेषु वैदर्भ्यादिरीतिषु 'अत्यन्तसुन्दरा '=अतिमात्र हृदयहारिणो 'दृष्टा '=प्रतीता 'यथा उदाहृतय '=तेषामुदाहरणानि अग्र उच्यन्त इत्यर्थ । गौणी वृत्ति द्विधा भवति सारोपा, साध्यवसाना च । यत्र—विषयस्य [प्रस्तुतस्य] अपि उपादान भवति सा 'सारोपा गौणी' । यथा—गौर्वाहीक । साध्यवसाना=यत्र विषयस्य [आरोपविषयस्य] अनुपादान भवति सा 'साध्यवसाना गौणी' । यथा—गौरयम् । प्रकृते च हेतून· तदुभयाश्रयत्वे सारोपाया एव गौण्या ग्रहणम् । वैचित्र्यार्थं विषयोपादानस्ये-ष्टत्वात् । परन्तु 'गौणवृत्तिव्यपाश्रय' इत्युपलक्षणमध्यवसायमात्रविषयत्वे हेतूनां चमत्का-रातिशयकत्वात् । तत्र 'आविर्भवति नारीणाम्' इत्यादिवक्ष्यमाणोदाहरणे घटितं द्रष्टव्यम् । 'तरुणवाचस्पति'स्तु—अतिशयोक्तिरपि गौणवृत्तिव्यपाश्रयत्व मन्यते । यथा 'पश्चात् पर्यस्य' इति वक्ष्यमाणोदाहरणे ॥ २५४ ॥

[दूरकार्यस्य चित्रहेतोरुदाहरणम्]

त्वदपाङ्गाह्वयं जैत्रमनङ्गास्त्रं यदङ्गने ।
मुक्तं तदन्यतस्तेन सोऽप्यहं मनसि क्षत ॥ २५५ ॥

तत्रादौ दूरकार्यं चित्राख्य हेतुमुदाहरति—'त्वदपाङ्गाह्वयम्' इति । हे 'अङ्गने !'=

वरवर्णिनि ! 'यत्'=तत् प्रसिद्धं 'जैत्रम्'=जयसाधनम् 'तव'=त्वदीयम् 'अपाङ्गाख्यम्'=कटाक्षाख्यम् 'अनङ्गस्य'=अतनोरपि मदनस्य 'अस्त्रम्'=अमोघं शस्त्रमित्यर्थः 'तत्' 'अन्यत्र'=अन्यस्मिन् जने 'मुक्तम्'=भवति आपातितमित्यर्थः. 'तेन'=त्वदपाङ्गरूपेणानङ्गास्त्रेण स लक्ष्यः सन् 'अपि' [अपिभिन्नक्रमः] अहमपि च लक्ष्यभूतः 'मनसि'=हृदये 'क्षतः'=विद्धः मर्मणो जात इत्यर्थः ।

अत्र लक्ष्यवेधरूपं निकटवर्त्ति कार्यम्प्रति अनङ्गास्त्ररूपं कारणम्, अलक्ष्यवेधनरूपं कार्यन्तु दूरवर्त्त्येव इति तत्प्रत्यपि अनङ्गास्त्रं हेतुः । परं तस्यासम्भवत्वादत्र हेतोश्चित्रता ज्ञेया । परमत्र कार्यस्य देशतो दूरस्थता । कालतो यथा—

अनस्तुवानेन युगोपमानमलब्धमौर्वीकिणलाञ्छनेन ।
अस्पृष्टखड्गत्सरुणापि चासीद् रक्षावती तस्य भुजेन भूमिः ॥

अत्र—बाल्यावस्थायामेवाभिनवयौवनकार्यकारित्वात् दूरकार्योऽयं चित्रहेतुः ॥२५५॥

[तत्सहजचित्रहेतोरुदाहरणम्]

आविर्भवति नारीणां वयः पर्यस्तशैशवम् ।
सहैव विविधैः पुंसामङ्गजोन्मादविभ्रमैः ॥ २५६ ॥

तत्सहजं चित्रहेतुमुदाहरति—'आविर्भवति' इति । नारीणाम्'=स्त्रीणां 'पर्यस्तशैशवम्'=पर्यस्तं व्युदस्तं शैशवं शिशोर्भावो येन तादृशं 'वयः'=तारुण्यम् 'पुंसाम्'=तरुणानाम् 'विविधैः'=नानाप्रकारैः 'अङ्गजोन्मादविभ्रमैः'=अङ्गजः मनोभवः तेन यः उन्मादः मनसः अवस्थाविशेषः तज्जनितैः विभ्रमैः विलासैः 'सह एव'=साकमेव 'आविर्भवति'=प्रकटीभवति । 'वयः' इति कर्तृपदम् ।

अत्र नारीणां यौवनरूपं कारणं कार्यभूतैः पुंसां विभ्रमैः सहैव प्रकटीभवति इति कारणस्य क्षिप्रकार्यकारित्वबोधनाय कार्यकारणयोर्यौगपद्येन वैचित्र्यं गुम्फितमिति 'तत्सहजो विचित्रो' हेत्वलङ्कारः । नात्र सारोपगौण्यपाश्रयत्वम्—अपितु यौवनरूपकारणोत्तरमुत्पद्यमानानां विभ्रमाणां प्रागुत्पद्यमानत्वेनाध्यवसायादध्यवसायमूलत्वं हेयम् । तस्मादत्र साध्यवसानव्यपाश्रयो हेतुःचमत्कारातिशयपोषको न तु सारोपगौणव्यपाश्रय इति ॥२५६॥

[कार्यानन्तरजहेतोरुदाहरणम्]

पश्चात्पर्यस्य किरणानुदीर्णं चन्द्रमण्डलम् ।
प्रागेव हरिणाक्षीणामुदीर्णो रागसागरः ॥ २५७ ॥

कार्यानन्तरजं हेतुमुदाहरति—'पश्चात्' इति । 'हरिणाक्षीणाम्'=[illegible] [illegible] [illegible] 'रागसागरः'=राग [प्रेम] एव सागर [समुद्र] [illegible] [illegible] एव=पूर्वमेव उदीर्णः=[illegible] [illegible] प्राप्त । चन्द्रमण्डलम्=[illegible] [illegible] [illegible] 'किरणान्'=[illegible] [illegible] [illegible] उदीर्णम्=उद्गतम् ।

अत्र चन्द्रोदयो रागोद्दीपकत्वात् रागहेतुः क्षिप्रकार्यकारित्वेन च कार्यभूतस्य रागस्य पश्चाद्भावित्वे पूर्वभावित्वेनाध्यवसित इति कार्यानन्तरजो हेत्वलङ्कारः । अत्र च पश्चाद्भाविनः पूर्वभावित्वेनाध्यवसाय एव चमत्कारहेतुरित्यस्यालङ्कारत्वे बीजम् । अतिशयोक्तेः छटाऽप्यत्राऽनिवार्या ॥ २५७ ॥

[अयुक्तकार्यचित्रहेतोरुदाहरणम्]

राज्ञां हस्तारविन्दानि कुड्मलीकुरुते कुतः ।
देव ! त्वच्चरणद्वन्द्वरविबालातपः स्पृशन् ॥ २५८ ॥

अयुक्तकार्यं हेतुमुदाहरति—'राज्ञाम्' इति । हे । 'देव !'=राजन् ! 'त्वच्चरणद्वन्द्वरविबालातपः'=तव चरणयोः पादयोर्द्वन्द्वं युगलमेव रविबालातपः अभिनवोदितसूर्यघोतः 'राज्ञाम्'=नृपतीनाम् 'हस्तारविन्दानि'=हस्ताः [कराः] एव अरविन्दानि [कमलानि] तानि 'स्पृशन्'=चुम्बन् 'कुतः'=कस्मात् हेतोः 'कुड्मलीकुरुते'=मुद्रितानि करोति निमीलयतीत्यर्थः ।

बालातपस्पर्शात् पद्मानां विकासभावो युज्यत इति वस्तुस्थितिः । अत्र तु कारणभूतस्य बालातपस्पर्शस्य पद्मसंकोचरूपं कार्यमयुक्तमिति 'अयुक्तकार्याख्यो' हेत्वलङ्कारः । सोऽयं राजविषयकरतिभावं पुष्णातीत्यस्य वैचित्र्यवहत्वेन चित्रता बोध्या । अयमत्र—'न मीलन्ति पद्मानि' इत्यत्रापि । अत्र रूपकमपि ॥ २५८ ॥

[युक्तकार्यचित्रहेतोरुदाहरणम्]

पाणिपद्मानि भूपानां सङ्कोचयितुमीशते ।
त्वत्पादनखचन्द्राणामर्चिषः कुन्दनिर्मलाः ॥ २५९ ॥

युक्तकार्यं हेतुमुदाहरति—'पाणिपद्मानि'=इति । 'कुन्दनिर्मलाः'=माघ्यकुसुमवच्छुभ्राः 'त्वत्पादनखचन्द्राणाम्'=त्वच्चरणनखरचन्द्राणाम्' 'अर्चिषः'=मयूखाः 'भूपानाम्'=राज्ञाम् 'पाणिपद्मानि'=करकमलानि 'सङ्कोचयितुम्'=निमीलयितुम् 'ईशते'=समर्था भवन्ति ।

अत्र चन्द्रकिरणात्मकहेतोः पद्मसङ्कोचरूपं कार्यं युक्तमिति 'युक्तकार्याख्यो' हेत्वलङ्कारः, तत्र राजविषयकरतिभावं व्यञ्जयन्नयमधिकचमत्कारीति युक्तस्यापि चित्रता ॥ २५९ ॥

[हेतोरुपसंहारः]

इति हेतुविकल्पानां दर्शिता गतिरीदृशी ।

इति हेतुचक्रम् ।

हेतुमुपसंहरति—'इति' इत्यादि । 'इति'=दर्शितप्रकारेण 'हेतुविकल्पानाम्'=

---

२५८ । हेतौ कि [illegible] ? हेतोः मते हेतोर्नानाकारता ? हेतोरलङ्कारत्वे [illegible] । [३८] [illegible] पृष्ठस्य आरभ्य [illegible] पृष्ठान्तम्—

हेतुभेदानाम् 'ईदृशी'=उक्तप्रकारा 'गति'=रीति 'दर्शिता'=निरूपिता, अनयैव दिशाऽनुक्ता अप्यपरे हेतुभेदा ऊहनीया इति भाव ॥ २५९ ॥

हेतूना चक्र गरण समाप्त इत्यर्थ ।

[अथ सूक्ष्मलक्षणम्]

[1]इङ्गिताकारलक्ष्योऽर्थः सौक्ष्म्यात्सूक्ष्म इति स्मृत ॥२६०॥

सूक्ष्मातिसूक्ष्म य प्राहु श्रुतयो यद्भवा अपि ।
जना ! तमेव शरण यात वाञ्छथ चेत्सुखम् ॥ १ ॥

क्रमप्राप्त सूक्ष्म लक्षयति—'इङ्गिताकारलक्ष्य' इति । इङ्गित हृद्गतो भाव' इति विश्वोक्ते हृदयाभिप्रायाविष्करण प्रकृते इङ्गितम्, आकार =रतिरागादिबोधको मुखरक्तता दिरूपोऽवस्थाविशेष ताभ्या लक्ष्य =लक्षयितु योग्य अनुमेय इति यावत् 'अर्थ'= वाग्गाभ्यन्तररूपो विषय 'सौक्ष्म्यात्'-परेण ज्ञातुमशक्यत्वात् 'सूक्ष्म इति =सूक्ष्म इति नामाऽलङ्कार 'स्मृत'=उक्त । 'इङ्गिताकाराभ्या चतुरबुद्धिगम्यत्व सूक्ष्मत्व'मिति फलित सूक्ष्मलक्षणम् । आह च 'मम्मटाचार्य'—

कुतोऽपि लक्षित सूक्ष्मोऽप्यर्थोऽन्यस्मै प्रकाश्यते ।
धर्मेण केनचिद् यत्र तत् सूक्ष्म परिचक्षते ॥

कुतोऽपि आकारादिङ्गिताद्वा, सूक्ष्म तीक्ष्णमतिसंवेद्य तस्य यद भङ्ग्यन्तरेण यत् सूचन स सूक्ष्म इति तात्पर्यम् ॥ २६० ॥

[इङ्गितलक्ष्यसूक्ष्मोदाहरणम्]

कदा नौ सङ्गमो भावीत्याकीर्णे वक्तुमक्षमम् ।
अवेक्ष्य कान्तमबला लीलापद्मं न्यमीलयत् ॥ २६१ ॥

अथ इङ्गितलक्ष्य सूक्ष्ममुदाहरति—'कदा' इति । 'कदा'=कस्मिन् काले 'नौ'= आवयो 'सङ्गम'=समागम 'भावी'=भविष्यति इति =एतत 'आकीर्णे'=जनसङ्कुले स्थाने 'वक्तुम्'=कथयितुम् 'अक्षमम्=असमर्थम् 'कान्तम्'=वल्लभमुपपतिम् 'अवेक्ष्य'=दृष्ट्वा 'अबला'=[illegible] कामिनी 'लीलापद्मम्'=लीलार्थ हस्ते [illegible] कमल 'न्यमीलयत्'= समकोचयत । अत्र नायिकाया इङ्गितेन [illegible] सूक्ष्म पद्मनिमीलनरूपम् [illegible] ॥ २६१ ॥

[उक्तोदाहरणे लक्षणयोजनम्]

पद्मसंमीलनादत्र सूचितो निशि सङ्गम ।
आश्वासयितुमिच्छन्त्या प्रियमङ्गजपीडितम् ॥ २६२ ॥

---

(1) [illegible]

उक्तोदाहरणे स्वय सूक्ष्मलक्षणं घटयति—'पद्मसमीलनात्' इति। 'अत्र'=उक्तवाक्ये 'अनङ्गपीडितम्'=मदनातुरम् 'आश्वासयितुम्'=धीरयितुम् 'इच्छन्त्या'=कामयमानया कयाचिन्नायिकया 'पद्मसम्मीलनात्'=कमलमुकुलीकरणात् 'निशि सङ्गम'=रात्रौ समागम 'सूचित' तादृशचेष्टया व्यक्तीकृत ।

अत्र पद्मनिमीलनमिङ्गितम् , नायकजिज्ञासित रात्रिसमागमश्च सङ्केतरूप सूक्ष्मोऽर्थ ।

सङ्केतकालमनस विट ज्ञात्वा विदग्धया ।
हसन्नेत्रार्पिताकूत लीलापद्म निमीलितम् ॥

अत्रापि जिज्ञासित सङ्केतकालः कयाचिदिङ्गितमात्रेण विदितो निशासमयशसिना कमलनिमीलनेन लीलया प्रतिपादितः ॥ २६२ ॥

[आकारलक्ष्यसूक्ष्मोदाहरणम्]

मदर्पितदृशस्तस्या गीतगोष्ठ्यामवर्धत ।
उद्दामरागतरला छाया कापि मुखाम्बुजे ॥ २६३ ॥

आकारलक्ष्य सूक्ष्ममुदाहरति—'मदर्पितदृशः' इति । 'गीतगोष्ठ्याम्'=गानसमाजे 'मदर्पितदृश'=मयि अर्पिते दत्ते दृशौ नयने यया सा तस्या प्रियाया 'मुखाम्बुजे'=मुखमेवाम्बुज तस्मिन् आननकमले इत्यर्थ 'का अपि'=वक्तुमशक्या 'छाया'=कान्तिः 'अवर्धत'=प्रादुरभूत । कीदृशी छाया । 'उद्दामरागतरला'=उद्दाम उत्कटो यो राग गोऽभिलाषस्तेन तरला चपला मनोहारिणी स्फारा वेत्यर्थ । अत्र मुखच्छायया विलक्षण तत्कर्तृकस्या गीतविरामो लक्षितोऽर्थ सूक्ष्म । आकारलक्ष्यसूक्ष्मोदाहरणान्तर यथा—

वक्त्रस्यन्दिस्वेदबिन्दुप्रबन्धैर्दृष्ट्वा भिन्न कुङ्कुम कापि कण्ठे ।
पुंस्त्व तन्व्या व्यञ्जयन्ती वयस्या स्मित्वा पाणौ खड्गलेखां लिलेख ॥

अत्र कृतिम्रवतोऽस्य कयापि विनाकिन पुरुषायितम् असिलतालेखनेन वैदग्ध्यादीग दर्शितम् । पुनामेव कृपाणपाणितायोग्यत्वात् ॥ २६३ ॥

[उक्तलक्ष्ये सूक्ष्मलक्षणायोजनम्]

इत्यनुद्भिन्नरूपत्वात् रत्युत्सवमनोरथ ।
अनुलङ्घ्यैव सूक्ष्मत्वमभूदत्र व्यवस्थित ॥ २६४ ॥

इति सूक्ष्मम्

अयमाशयः—अत्रालौकिकी मुखच्छाया रत्युत्सवमनोरथं व्यक्तीकरोति, सच मनोरथोऽर्थं तादृशनिपुणतरनायकमतिगम्य इत्यपरैरलक्षितत्वात् सूक्ष्म । इतीति—सूक्ष्मालङ्कारप्रकरणं समाप्तमित्यर्थः ॥ २६४ ॥

[अथ लेशलक्षणम्]

[1]लेशो लेशेन निर्भिन्नवस्तुरूपनिगूहनम् ।
उदाहरण एवास्य रूपमाविर्भविष्यति ॥ २६५ ॥

—•—

अकृपालेशमात्रेण मूक [illegible] गुग्गुम्यते ।
जल्पन्तितथा पङ्गुमन्त्य किं वर्णयामहे ॥

—•—

उद्देशक्रमप्राप्तं लवाख्यं लेशं लक्षयति—'लेश' इति । 'लेशेन'=मात्रया अल्पतयेति यावत् 'निर्भिन्नवस्तुरूपनिगूहनम्'=निर्भिन्नं प्रकाशितं यत् वस्तुनः रूपं स्वरूपं तस्य यत् निगूहनं संवरणमाच्छादनं स 'लेश'=लवापरपर्यायो लेशालङ्कार इत्यर्थः । 'अस्य'=लेशस्य 'रूपम्'=स्वरूपम् 'उदाहरणे एव'=उदाहरणनिरूपणेनैवेत्यर्थः 'आविर्भविष्यति'=स्फुटीभविष्यति ।

'रोमोद्भेदादिविकारेण किञ्चित्प्रकाशमानस्य गोप्यविषयस्य यत्केनचिद् व्याजेन गोपनं तल्लेश' इति तु लेशलक्षणनिष्कर्षः । अयमेव लेशः अलङ्कारसर्वस्वकारादिमते व्याजोक्तिः । तथा च—तत्सूत्रम्—'उद्भिन्नवस्तुनिगूहनं व्याजोक्तिः' इति । 'अपह्नुतौ'-रत्ना कैतवापह्नुतिरप्यस्यैव विशेषः । तथाच—

कैतवापह्नुतिरन्यस्य शब्दात्तत्त्वनिह्नवे ।
प्रजल्पन् मत्पदे लग्नः कान्तः किं नहि नूपुरः ॥ इति ॥ २०४ ॥

[अनिष्टसम्भावनायां लेशोदाहरम्]

राजकन्यानुरक्तं मां रोमोद्भेदेन रक्षकाः ।
अवगच्छेयुरा ज्ञातमहो शीतानिलं वनम् ॥ २६६ ॥

निमित्तस्य निगूहने द्वौ प्रकारौ अनिष्टसम्भावना लज्जा चेति तत्राद्यमुदाहरति—'राजकन्यानुरक्तम्' इति । राजकन्यायां राजकुमार्याम् अनुरक्तम् आसक्तं 'माम्' 'रक्षकाः' राजपुरुषाः [illegible] 'अवगच्छेयुः'=जानीयुः । निगूहनोपायं चिन्तयित्वा आह—'आ' इति । 'आ' [illegible] निगूहनहेतुरित्यर्थः । तदेवाह—'अहो' इति । 'अहो' [illegible] [illegible]

[illegible]

कथनेन गुप्तसुरतगोपनं लेशः । परमत्र लज्जायां लेशः ॥ २६६ ॥

[लज्जायां लेशस्योदाहरणम्]

आनन्दाश्रु प्रवृत्तं मे कथं दृष्ट्वैव कन्यकाम् ।

अक्षि मे पुष्परजसा वातोद्धूतेन दूषितम् ॥ २६७ ॥

लज्जानिमित्तं लेशमुदाहरति—'आनन्दाश्रु' इति । 'कन्यकाम्'=कुमारीम् अगात पुरुषसम्बन्धां विवाहाय सभायामानीतामित्यर्थः 'दृष्ट्वा एव'=आलोक्यैव 'मे'=मम 'कथम्'=कुतः 'आनन्दाश्रु'=हर्षजनितनेत्रवारि 'प्रवृत्तम्'=प्रचालितम् । आनन्दाश्रुणा अनुरागस्य प्रकाशो लज्जाहेतुरिति तत्संवरणायाह—'अक्षि' इति । 'वातोद्धूतेन'=अनिलकम्पितेन पवनसञ्चालितेन 'पुष्परजसा'=सुमनःपरागेण 'मे'=मम 'अक्षि'=नेत्रम् 'दूषितम्'=कलुषितम् । अत्राश्रुणो पौष्परजःसम्पर्कव्याजेन अनुरागो निगूहितः इत्यस्य लेशालङ्कारभावः ॥ अन्यदपि यथा—

समये पयोधराणामपतिततया नैव शक्यते स्थातुम् ।
उत्कण्ठितास्मि बाले ! नहि नहि सखि ! पिच्छिल पन्था ॥ २६७ ॥

[लेशस्यालङ्कारत्वसमर्थनम्]

इत्येवमादिस्थानेऽयमलङ्कारोऽतिशोभते ।

[मतान्तरेण लेशस्वरूपम्]

लेशमेके विदुर्निन्दां स्तुतिं वा लेशतः कृताम् ॥ २६८ ॥

लेशस्यालङ्कारभावं समर्थयति—'इत्येवम्' इति । 'इति एवमादिस्थाने'=दर्शितस्थलेषु 'अयम् अलङ्कारः'=लेशः स्वातन्त्र्यगणालङ्कारभावमापन्नः 'अतिशोभते'=अतिशयेन चमत्कारवान् भवति । [illegible] वाचिन्त्या तादृशनिगूहनस्य इति भावः ।

अत्र अन्येषां मतमाह—'लेशम्' इति । 'एके'=अन्ये पुनः कवयः 'लेशम्'=लेशालङ्कारम् 'लेशतः'=व्याजेन कृताम् 'निन्दाम् स्तुतिं वा विदुः'=जानन्ति मन्यन्ते [illegible] व्याजस्तुतिस्वरूपात नान्यः कश्चन स्वतन्त्रो 'लेशालङ्कार' [illegible] । [illegible]—

[उक्तार्थस्योदाहरणेन स्पष्टीकरणम्]

युवैष गुणवान् राजा योग्यस्ते पतिरूर्जित ।
रणोत्सवे मन' सक्तं यस्य कामोत्सवादपि ॥ २६९ ॥

स्तुतिव्याजेन निन्दामुदाहरति—'युवा' इति। 'एष राजा युवा'=तरुण 'गुणवान्'=सौन्दर्यादिगुणोपेत 'ऊर्जित'=पराक्रमशाली सदैव रणानुरागी इत्यर्थ अतो हेतो 'ते'=तव कृते 'योग्य'=वरीतुमर्ह 'पति' अस्ति इति शेष । तस्योर्जितत्वमुपपादयति—'रणोत्सवे' इति । 'कामोत्सवात् अपि'=रमणाभिलाषादपि 'रणोत्सवे'=रण सङ्ग्राम एव उत्सवो मह तत्र सङ्ग्रामोत्सवे 'यस्य मन'=हृदयम् 'सक्तम्'=सदैवानुबद्धमित्यर्थ । अतिचारोऽय वरणयोग्य इत्यापातत' स्तुतिरूपोऽर्थ । 'सर्वदाय रणव्यग्र अनेन साक तव रमणसुखमाशामोदकायितमिति नाय वरणीय' इति निन्दायां पर्यवस्यति । सोऽय स्तुति-मुखो निन्दापर्यवसायी व्याजस्तुतिरलङ्कार । स्वयवरसभायां कस्यचिद्राज्ञ समीपे समागतां राजकन्याम्प्रति तस्या राजतिरस्कारविदा सख्योक्तिरियम् एव स्तुतिमिषेण निन्दाविधानात् दोषाङ्कुरसे 'लेश' एव ॥ २६९ ॥

[स्वोक्तिसमर्थनम्]

वीर्योत्कर्षपरस्तुतिर्निन्दैवास्मिन् भावनिवृत्तये ।
कन्याया कल्पते भोगान्निर्विविक्षोर्निरन्तरम् ॥ २७० ॥

उक्तोदाहरणे दर्शितां व्याजस्तुतिं स्वयमुपपादयति—'वीर्योत्कर्षस्तुति' इति । 'अस्मिन्'=उक्त उदाहरणे 'निरन्तरम्'=अनारतम् 'भोगान्'=रतिविलासान् 'निर्विविक्षो'=भोक्तुमिच्छो 'कन्याया' 'भावनिवृत्तये'=तस्य वरणाभिलाषस्य निवृत्त्यै वारणार्थम् 'वीर्योत्कर्षस्तुति'=राज्ञ पराक्रमाधिक्यस्य गुणत्वेन वर्णनम् 'निन्दा एव'=निन्दारूपेण 'कल्पते'=पर्यवसिता भवति ॥ २७० ॥

[निन्दाव्याजेन व्याजस्तुति]

तपस्वी निर्दयश्चासौ जन किं तेन मे सखि ! ।
आग प्रमार्जनायैव चाटवो येन शिक्षिता ॥ २७१ ॥

निन्दाव्याजेन स्तुतिमुदाहरति—'तपस्वी' इति । 'स्वप्रिये गौरवार्थं मान कुर्वन्ती कांचित् नायिकाम्प्रति तत्सख्या उक्तिरियम् । हे 'सखि' आलि ! 'असौ जन'=नायक 'तपस्वी'—आस्थिरशक्ति नवक स्थिरप्रेमा 'निर्दय'=परपीडानभिज्ञत्वात् दयाहीन 'येन आग प्रमार्जनाय एव'=अपराधशोधनाय एव 'चाटव'=प्रियोक्तय 'शिक्षिता'=अभ्यस्ता ।

[स्वोक्तिसमर्थनम्]

दोषाभासो गुण कोऽपि दर्शितश्चाटुकारिता ।
मानं प्रत्युज्झितोऽपि दर्शं रागादराशया ॥ २७२ ॥

इति लेशः

अत्र यद्वक्तव्यं तत्त्वय घटयति—'दोषाभास' इति 'सखीजनोद्दिष्टम्'=वयस्याजनेन उपदिष्टम् 'मान कर्तुम्'=मान निर्वोढुम् 'अशक्तया'=असमर्थया नायिकया 'चाटुकारिता'=प्रियवादरूप 'क अपि'=अलौकिक 'गुण दोषाभास'=दोष इवाभासत इति दोषाभास दोषरूप 'दर्शित'=उक्त । अत्र निन्दाव्याजरूपेण स्तुतिरेव दर्शिता । चाटुकारितारूपो गुण स्त्रीणामतीवहृदङ्गमो भवतीति भाव ॥ व्याजस्तुतेरुदाहरणान्तरम्—यथा—

त्वदङ्घ्रिमूल भजतां मुकुन्द ! लाभो ऽस्तु दूरे वपुषो निजस्य ।
चिरन्तनस्यापि भवेद्विनाश स्वभाव एवैष तत्र प्रसिद्ध ॥

अत्र निन्दया स्तुति. । मुकुन्दसेवका मायालिङ्गदेहपर्यन्तं मायामल निर्धूय नित्य विशुद्ध तत्पद प्रविशन्तीति स्तुतिर्व्यज्यते ॥

न जगति त्वत्समो नान्य स्पृहाशून्यः समीक्ष्यते ।
कृष्णकीर्तनरत्नानि कण्ठे यत्कुरुषे नहि ॥

अत्र स्तुत्या निन्दा । अत्र त्वमतिपामर कृष्णवैमुख्यान्नरकाणि यास्यसीति निन्दा व्यङ्ग्यो ॥

लेशालङ्कारगण समाप्त ॥

—+—

[अथ क्रमस्य लक्षणम्]

उद्दिष्टानां पदार्थानामनूद्देशो यथाक्रमम् ।
यथासङ्ख्यमिति प्रोक्त संख्यानं क्रम इत्यपि ॥२७३॥

उदाजहार च—

कमलहिमकनककरच सुपर्णवृषहंसवाहना श न ।
जलनिधिगिरिपद्मस्था हरिहरचतुरानना ददतु ॥

अत्र हि हरिप्रभृतीना त्रयाणामुद्दिष्टाना कमलहस्तकसुपर्णवाहनत्वजलनिधिस्थत्वादयो धर्मो क्रमेणानुनिर्दिष्टा । जयदेवोऽप्याह—

यथासख्य द्विधार्थाश्चेत्क्रमादेकैकमन्विता ।
शत्रु मित्र विपत्पक्ष जय रञ्जय भञ्जय ॥ इति

[क्रमस्योदाहरणम्]

ध्रुव ते चोरिता तन्वि ! स्मितेक्षणमुखद्युति ।
स्नातुमम्भ प्रविष्टाया कुमुदोत्पलपङ्कजे ॥ २७४ ॥

—॰—

इति क्रम

——

'क्रम' मुदाहरति—'ध्रुवम्' इति । हे ! 'तन्वि !'=कोमलशरीरे । 'स्नातुम्'=शौचकर्तुम् 'अम्भ'=पानाय 'प्रविष्टाया'=प्राप्ताया 'ते'=तव 'स्मितेक्षणमुखद्युति'=स्मितञ्च ईक्षणञ्च मुखञ्च तानि स्मितेक्षणमुखानि तेषा द्युति शोभा अर्थात् स्मितद्युति ईक्षणद्युति मुखद्युतिश्च [द्वन्द्वान्ते श्रूयमाण पद प्रत्येकमभिसम्बध्यते इति नियमात् द्युतिपदस्य प्रत्येकमन्वय] । सा 'कुमुदोत्पलपङ्कजे' 'ध्रुवम्'=निश्चयेन 'चोरिता'=अपहृता क्रियतारेनेति शेष । सर्वस्या द्युतेरपहरणे नायिकाया सौन्दर्यहानिरेव वर्णिता स्यात् । तत्र स्मितद्युति कुमुदेन, ईक्षणद्युति उत्पलेन, मुखद्युति पङ्कजेन चोरिता इति क्रमिकाणां धर्मिभिरेव पदार्थैरन्वय । प्रकृते चौर्यप्रौढोक्तिश्चास्या अलङ्कारत्वे बीजम् । इति क्रम=क्रमप्रकरण समाप्तमित्यर्थ ॥

द्विधा अर्था=क्रियाकारकरूपा द्विविधा अर्था, तेन कारकाणा क्रियाणां वा क्रमिकाणां क्रमेण कारकेषु क्रियासु वा प्रत्येकमन्वयो यथासख्यालङ्कार ।

। उदाहरणान्तर यथा—

शम्भुर्नतिवाक्यो गौरीमान दधया
चरणकमलगामा चारणा चानेन ।
[illegible] मन्दे
[illegible] विपदि [illegible] तापकरे ॥ [illegible]

अत्र चरणकमलगामा [illegible]

[illegible] । [illegible] ।

[illegible] ।
[illegible] । [illegible]

[illegible] । [illegible] ।

[अथ प्रेयोरसवदूर्जस्विना लक्षणानि]

प्रेय प्रियतराख्यानं, रसवद्रसपेशलम् ।
ऊर्जस्वि रूढाहंकारं, युक्तोत्कर्षञ्च तत्त्रयम् ॥२७५ ॥

अधुना प्रेय प्रभृति अलङ्कारत्रयमाचष्टे—'प्रेय' इति । 'प्रियतराख्यानम्'= प्रियतरस्य अत्यन्त प्रीतिजनकस्य आख्यान कथनम् भावव्यञ्जनेन निरूपण यत् तत् 'प्रेय '=प्रेयोनामालङ्कार । 'रसपेशलम्'=विभावादिर्व्यक्त चित्तवृत्तिविशेषो रत्यादिरूप स्थायिभाव रस तेन पेशलम् सहृदयहृदयाह्लादकत्व यत् तत् 'रसवत्'=रसवत् इति नामालङ्कार । तथा 'रूढाहङ्कारम्'=रूढ अभिव्यक्त अहङ्कारो गर्वो यस्मिन् तत् तादृशमाख्यान यत् तत् 'ऊर्जस्वि'=ऊर्जस्विनामालङ्कार । 'तत्'=एतत् उक्तमलङ्कारत्रयम् 'युक्तोत्कर्षम्'=युक्त. योग्य उत्कर्ष वैचित्रीविशेषो यस्य तादृशम् अर्थात् एतेषां त्रयाणां सहृदयसाक्षिक वैचित्र्यमेवालङ्कारत्वे बीजम् ।

इदमत्रावधानीयम—रतिर्देवादिविषया व्यभिचारी तथाञ्जित ।

भाव प्रोक्तः' इति मम्मटोक्तेरयमर्थ —'रति'रिति पद सकलस्थायिभावोपलक्षणम् । देवादिविषयेत्यपि अप्राप्तरसावस्थोपलक्षणम्, तेन देवादिविषया सर्वप्रकारा, कान्तादिविषयापि अपुष्टा रतिः हासादयश्च अप्राप्तरसावस्था विभावादिभि प्राधान्येन अञ्जितो व्याञ्जितो व्यभिचारी च भाव' प्रोक्त भावपदार्थाभिधेय इति सूत्रार्थ' । ततश्चैवभूतस्य भावस्य यत्र परम्प्रति [वाक्यार्थरूप वाच्यम्प्रति] अङ्गता भवति तत्र '**प्रेयोऽलङ्कार**' इति व्यपदेश । एतेनैवाभिप्रायेण 'भट्टोद्भट' प्रेयोलङ्कारमित्थमलक्षत्—

रत्यादिकानां भावानामनुभावादिसूचनै ।
यत्काव्य वध्यते सद्भिस्तत्प्रेयस्वदुदाहृतम् ॥ इति ।

एतद् व्याचकार च 'श्रीमत्प्रतीहारेन्दुराज ' काव्यालङ्कारसङ्ग्रहस्य [उद्भटभट्टप्रणीतस्य] लघुवृत्तौ । तथाहि—रत्यादयो भावास्त्रिविधा स्थायिनो व्यभिचारिण सात्त्विकाश्च । तत्र—

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भय तथा ।
जुगुप्साविस्मयशमा स्थायिभावा प्रकीर्त्तिता. ॥

अथ व्यभिचारिण

निर्वेदग्लानिशङ्काख्यास्तथासूयामदश्रमा ।
आलस्यञ्चैव दैन्यञ्च चिन्तामोह स्मृतिर्धृति ॥

* पूर्व मनल्लक्ष्यमाणा वस्त्वलङ्कारस्पर्श्यङ्गानां वाच्यार्थशोभाधायकत्वे समासोक्तिरूपकादिनामलङ्कारत्वमभिहितम्, सम्प्रति असलक्ष्यक्रमाणां रसादिव्यङ्ग्यानामपि वाच्यार्थम्प्रति गुणीभूततया अलङ्कारत्व युज्यते इति मन्वान प्रेयोरसवदूर्जस्विनामकान् तान् निरूपयितु प्रवर्त्तते आचार्य ।

व्रीडा चपलता हर्ष आवेगो जडता तथा।
गर्वो विषाद औत्सुक्यं निद्रापस्मार एव च॥
सुप्तं विबोधोऽमर्षश्चाप्यवहित्थमथोग्रता।
मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च॥
त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः।
त्रयस्त्रिंशदमी भावाः समाख्यातास्तु नामतः॥

[अथ सात्त्विकाः]

स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभेदोऽथ वेपथुः।
वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विकाः स्मृताः॥

एतेषां पञ्चाशत्संख्यकानां भावानां सूचकाः चत्वारोऽनुभावादयः। ते च—अनुभावो विभावो व्यभिचारी स्वशब्दश्च।

तत्रानुभावश्चतुर्विधः। आङ्गिको वाचिकः सात्त्विकः आहार्यश्च। आङ्गिकः—हस्ताभिनयादिः। वाचिकः—वाक्यादिप्रयोगः। सात्त्विकः—स्तम्भादिः। आहार्यस्तु—प्रतिशीर्षकञ्चुकादि। एवमयमनुभावः चतुःसंख्यः कार्यत्वात् कारणभूतान् भावान् गमयति॥

'रसनकपेशल'मिति—तत्र रसस्य लक्षणमाह 'काव्यानुशासने' '**श्रीहेमचन्द्रः**' तथाहि—**विभावानुभावव्यभिचारिभिरभिव्यक्तः स्थायी भावो रसः।** व्यक्तिश्च भग्नावरणा चिदेवेति परः सिद्धान्तः। इदञ्च—**भरतमुनिसूत्रानुसारेण**—'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्ति'रिति। एतस्य विवरणे अनेकेषां मतभेदः। सर्वमिह प्रदर्श्यते। तत्र—विभावयति उत्पादयति रत्यादिमिति 'विभावः' निमित्तकारणम्। स च द्विधा—आलम्बनोद्दीपनभेदात्। तदुक्तमग्निपुराणे—

विभाव्यते हि रत्यादिर्यत्र येन विभाव्यते।
विभावो नाम स द्वेधालम्बनोद्दीपनात्मकः॥

आधारोऽपि द्विधा—विषयाश्रयभेदात्। तत्र यमुद्दिश्य रत्यादि प्रवर्त्तते सोऽयं विषयः। आश्रयस्तु तदाधारः। यत्तु—रसमुद्दीपयति चन्द्रचन्दनकोकिलालापभ्रमरझङ्कारादिप्रभृति तदुद्दीपनम्।

अनु पश्चाद् भावो यस्य सोऽनुभावः कार्यम्। तच्च द्वैधा—स्वगतादि लिङ्गपरार्थानीति। तदुक्तम्—

उत्पाद्योत्पादकभावात् गम्यगमकभावात् पोष्यपोषकभावरूपाच्च सम्बन्धात् रसस्य निष्पत्ति [उत्पत्ति] अनुमिति , पुष्टिश्च* भवतीति भट्टलोल्लटशङ्कुकभट्टनायकानां मतानुसार यथाक्रम यथाश्रुतो भरतसूत्रार्थ । अर्थात् लौकिके व्यवहारे यानि कारणान्याश्रित्य रत्यादेरा विर्भावो भवति तानि कान्तकान्तादिरूपाणि आलम्बनपदवाच्यानि भवन्ति जनककार णानि इति यावत् । उद्भूते च रत्यादौ यानि तत्पुष्टिकराणि चन्द्रचन्दनादीनि तानि उद्दीपनानि उच्यन्ते, एतेषां द्विविधानां काव्ये नाटये चोपनिनध्यमानानां विभाव सज्ञा । रत्यादि जन्यानि कटाक्षभुजाक्षेपादीनि शास्त्रे 'अनुभाव सज्ञां भजन्ते । निर्वेदादीनि च पूर्वोक्तानि त्रयस्त्रिंशत् उल्लिखितस्य रत्यादेर्जनने झटिति प्रतीतौ वा समर्थानि 'व्यभिचारिभावा' इत्यु च्यन्ते । एतेषां विभावानुभावव्यचारिभावानां सयोगात्=उत्पाद्योत्पादकभावात् सम्बन्धात् रसस्य निष्पत्ति=उत्पत्तिरिति मीमांसाप्रक्रियामनुसरन्त **भट्टलोल्लट**प्रभृतय । एतेषां मते वास्तविकसम्बन्धेन अनुकार्ये [नाटयेनाभिनेये नायकादौ] स्थितोऽपि तद्रूपतानुसन्धानात् [रामत्वाद्यारोपात्—एवंविधसीताहरणजनितदु खानुसन्धानवान् रामोऽहम् इत्याकाराभि-मानात्] नर्त्तकेऽपि †प्रतीयमान [आरोपरूपेण विषयीक्रियमाण] स्थायी रस । किमुक्तम् ? शृणु यदुक्तम्—विभावैर्जनितोऽनुभावै प्रतीतिपद नीतो व्यभिचारिभिरुपचितो मुख्यवृत्त्यानुकरणीये रामे [नायकादौ] वर्त्तमानोऽपि तद्रूपतानुसन्धानात् अनुकर्त्तरि [नटे] प्रतीयमानो य स्थायी [रत्यादि] स एव 'रस' सज्ञां भजते इति 'भट्टलोल्लटादीनां' मतस्य पर सार ।

परमेवम्—अनुकार्ये रामादावेव रसनिष्पत्ति स्यात सामाजिके [सहृदये नाटयादि-द्रष्टरि] रसनिष्पत्तेरभाव , तेन तेषु चमत्कारानापत्तिरिति दूषण पश्यन्तो न्यायमतानुगा **श्रीशंकुक**प्रभृतयो भरतमुनिसूत्रमन्यथा व्याचक्षते, तथाहि—[कृत्रिमैरप्यकृत्रिमतया गृहीतै] विभावानुभावव्यभिचारिभावै सयोगात्=अनुमानात् रसस्य निष्पत्ति=अनुमितिरिति सूत्रार्थ । अयमत्राशय —एका सम्यक् बुद्धिर्भवति यत्र नियमेन [बाधाद्यभावेन]विषयोऽध्यवसीयते । तत्र द्वौ प्रकारौ, एकोऽयोगव्यवच्छेदविषयक. यथा 'राम एवायम्' इति । अपरोऽन्ययोगव्यवच्छेदविषयक यथा 'अयमेव राम' इति ।

अपरा मिथ्याबुद्धि यत्र रामत्वाभाववति अरामे 'रामोऽय' मिति ज्ञानजायते, यथा शुक्ताविद रजत' मिति अरजते शुक्तौ रजतप्रत्यय., इयञ्च बाध्या बुद्धिरभिधीयते उत्तर-कालमेव 'न रामोऽय'मिति यथार्थप्रत्ययेन, यथा 'नेद रजत' मिति प्रत्ययेन शुक्तौ 'रजत-मिद' मिति प्रत्ययो निवर्त्तते । विरुद्धोभयकोटिका तु तृतीया सशयबुद्धि तथा 'अय रामो न वा' इति । सादृश्यविषयिणी तु चतुर्थी बुद्धिर्भवति यथा 'रामसदृशोऽयम इति ।

---

* 'पुष्टि' रेव 'भुक्ति' रित्युच्यते ।

† प्रतीयमान =व्यञ्जनयाभिव्यक्त इति व्याख्यान कुर्वन्त भट्टलोल्लटादीनां मतस्थितिं न जानन्ति तेषां मते व्यञ्जनास्वीकार । सिद्धान्तेऽलेन भविष्यति ॥

एताभ्यश्चानुविधाभ्योऽपि लोकप्रसिद्धाभ्यो धीभ्यो विलक्षणा या अरामे [नटे] 'रामोऽयम्' इति धीः सा, चित्रे 'तुरगोऽय' मितिवत् लोकोत्तरसहृदयजनानुभवगम्यदिका, तथैव प्रथम पक्षभूतो नटो विषयीक्रियते, तत पक्षताज्ञाने सति अविद्यमानमपि [तत्र नटे] विभावादित्रय लिङ्गरूपेणावगम्यते यतो गुरुशिक्षां प्राप्य कृतदीर्घकालाभ्यासे नटे 'सेयं ममाङ्गेषु' इत्यादिकाव्यानुसन्धानबलात् आलम्बनस्योद्दीपनस्य च विभावस्य प्रकटनं भवति तदनु तदनुगुणस्य रोमाञ्चादेरनुभावस्याविर्भावः, ततो व्यञ्जनीयस्य उत्कण्ठादेर्व्यभिचारिभावस्य च प्रकाशो जायते, एवं कृत्रिमभावेन अतल्लिङ्ग [वस्तुतो नटावृत्तिभि] अपि कृत्रिमभावेन ज्ञानाभावात् स्थायी रत्यादिरनुमीयते। यस्याय प्रकार — रामोऽयं सीताविषयकरतिमान् सीताद्यालम्बनविभाववर्पर्यन्तोद्दीपनविभावरोमाञ्चाद्यनुभावौत्सुक्यादिव्यभिचारिभावसम्बन्धवत्त्वात्। यो यदात्मकविभाववत्त्वे सत्यनुभावव्यभिचारिभाववान् स तदीयरतिमान्' इति यत्तस्या सामान्यतो व्याप्ति । यो नैव स नैव मिति वा व्यतिरेकव्याप्तिरनुसन्धेया। एवञ्च येयमनुमिति सैव चमत्काररूपा चर्वणा, तया चर्वणया विषयीक्रियमाणो रत्यादि स्थायी एव 'रस' इति, सा च चर्वणा सामाजिकानामेवेति तेष्वेव रसव्यवहार ।

परमत्राश्चर्यमस्वरस —नहि क्वचिदनुमितिज्ञाने चमत्कृतिविशेषोऽनुभवसिद्ध , प्रत्यक्षमेव ज्ञान चमत्कारक भवतीति लोकसिद्धमेव । अपि च—नटे 'नाय राम' इति बाधज्ञाने सत्यपि तादृशानुमितेरभावेऽपि सहृदयानामास्वादो दरीदृश्यते । रसानुमितिवादपक्षे 'रस साक्षात्करोमि' इत्यनुव्यवसायस्यानानुपपत्तिरपि सहृदयसम्मत शङ्कुकादीना मतमप्यनादेयमेव । तस्मात—

विभावानुभावव्यभिचारिणा संयोगात्=सम्यक् साधारणात्मतया योगात्=भावकत्वव्यापारेण रसस्य=सत्त्वोद्रेकप्रकाशितस्वात्मानन्दरूपस्य निष्पत्ति =भोगाख्यव्यापारेण भुक्ति [विषयीकरणमिति यावत] इति सूत्रार्थ । इति **भट्टनायक** ।

अस्य मतस्य संक्षिप्तसारोऽयम्—शब्दस्य अभिधाव्यापारवत् काव्यनाट्यादौ [illegible]लक्षण 'भावकत्व-भोजकत्व' नामक व्यापारद्वयमतिरिक्तमप्यस्ति, तत्राद्येन व्यापारेण व्यक्तिविशेषसम्बन्धित्वेन असाधारणस्य विभावादे स्थायिनश्च व्याप्त्यादिदोषपरिहारेण [illegible] साधारणीकरणमभवति अन्येन तु विभावादिसाधारणेन रत्यास्वादने सहृदये । [illegible] अपि च रतेः [illegible] अनुपपन्न , स च रतेरास्वादो **भुक्तिरेव** । तत्र [illegible] [illegible] कान्तात्वादिसामान्याकारसम्बन्धेन विभावादेः [illegible] [illegible] । [illegible] अपि भावकत्वव्यापारः [illegible] परन्तु [illegible] [illegible] [illegible] । [illegible] [illegible]—

[illegible]

भोगात्मकव्यापारभूता [भोजकत्वव्यापारभूता] एतेनैव व्यापारेण सत्त्वोद्रेकस्थाय्युपहित स्वात्मानन्दरूपस्य रसस्य निष्पत्तिर्भुक्तिरास्वाद इति यावत् । स चास्वाद लौकिकसुखानुभवविलक्षण, अन्यथा भयादेः स्थायिनो भयानकत्वादिरसत्वेनानुभवो न स्यात् । ['सम्मतितन्मतो भट्टनायक' साङ्ख्यानुग इति सम्प्रदाय तत्रास्माक महद्वैचित्र्यमाभाति, तदेतद्विषये—'काव्यप्रकाशप्रभायां' समीक्षितम्] ।

अस्य मतस्यास्वारस्य बीजन्तु—अभिधालक्षणाभ्यामतिरिक्तेन तृतीयेन व्यञ्जनात्मकव्यापारेणैव पूर्वोक्तसकलप्रयोजनासिद्धे मन्ये तदतिरिक्तव्यापारद्वयकल्पन निष्प्रमाणकमेव तस्मात्—

स्थायिनां रत्यादीनां विभावादिभिः सह संयोगात्=व्यङ्ग्यव्यञ्जकभावरूपात् सम्बन्धात् [व्यञ्जनाख्यव्यापारात्] रसस्य=चिदानन्दविशिष्टस्य स्थायिनो, रत्यादिस्थाय्युपहितस्य चिदानन्दात्मनो वा निष्पत्ति=अभिव्यक्तिरिति भरतसूत्रार्थ इति *- **सिद्धान्तानुयायिन** । अस्याय पर सार'—मुकुटप्रतिशीर्षकादिना तावद्भटबुद्धिराच्छाद्यते गाढप्राक्तनसंवित्संस्काराच्च काव्यबलेन आनीयमानापि रामधीर्न तत्र विश्राम्यति, अत एवोभयदेशकालपरित्याग, रोमाञ्चादयश्च भूयसा रतिप्रतीतिकारितया दृष्टा । तत्रावलोकिता देशकाला अनियमेन रतिं गमयन्ति, यस्या स्वात्माऽपि तद्वासनावत्त्वादनुप्रविष्ट इव, तस्मात्तटस्थतया तत्र रत्यवगम । एवञ्च [साधारणीभूत] सन्तानवृत्तेरेकस्या एव संविदो गोचरीभूत स्थाय्येवाभिव्यक्तो 'रस' पदव्यवहारभाग् भवति ।

तत्र आस्वादनार्थकाद् 'रस' धातो भावे करणे वा घञि कृते रस्यते आस्वाद्यते ऽसौ, अनेन वेति **रस** । भावार्थकप्रत्यये आस्वादनमेव रस, करणार्थकप्रत्यये तु आस्वादनाभिव्यञ्जको ऽन्त करणस्य व्यापारो वृत्तिविशेषो रस' स्यात् । उक्तञ्च—विभावानुभावव्यभिचारिभिर्व्यञ्जितो रतिहासशोकादिस्थायित्वेन चित्तवृत्तिविशेषो 'रस '। अधिकन्तु मत्प्रणीतकाव्यप्रकाशप्रभायां दशरूपकटीकायां वा द्रष्टव्यम् । एतद्विषये **भट्टतोतेन** यदुक्त तद् **आचार्यहेमचन्द्रै** स्वरचितकाव्यानुशासनस्य स्वोपज्ञा 'ऽलङ्कारचूडामणि' व्याख्यायां स्पष्टीकृत द्रष्टव्यम् । ग्रन्थगौरवभयात् तदिह नालोडितमस्माभि । किन्तु—

शृङ्गारहास्यकरुणारौद्रवीरभयानका ।
बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसा स्मृता ॥

इत्याचार्यैरुक्ता । 'श्रीहेमचन्द्राचार्येण' तु—'शृङ्गारहास्यकरुणा रौद्रवीरभयानका बीभत्साद्भुतशान्ता नव रसा' इति तेषा ममष्टया नव सङ्ख्योक्ता । तेन हेमचन्द्राचार्यमते 'शान्त'रसस्य नाट्येऽपि सत्त्वमायात्येव स्वाकार नतु तद्विषये मतैकदेशित्वमिति ममा भातीति दिक् । आस्ता तावत्—प्रकृतमनुसराम । एवम्भूत शृङ्गारादिभेदभिन्नो रसो यत्र [illegible] भवति तत् 'रसवदलङ्कार' । तदुक्त ध्वनिकारादिभि —

* 'आचार्याभिनवगुप्तपादा ' तदनुयायिनो मम्मटाचार्य'प्रभृतयश्चेत्यर्थ ।

प्रधाने ऽन्यत्र वाक्यार्थे यत्राङ्गन्तु रसादयः ।
काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः ॥

तदयमत्र निष्कर्षः—रसानां परस्याङ्गभावे रसवदलङ्कारः, भावानामङ्गत्वे प्रेयोलङ्कारः रसाभासभावाभासयोरङ्गत्वे ऊर्जस्व्यलङ्कारः, भावशान्तेरङ्गत्वे समाहितालङ्कारः, भावोदय भावसन्धि भावशबलताना-मङ्गत्वे तत्तन्नामकालङ्काराः । आह च 'विश्वनाथः'—

रसभावौ तदाभासौ भावस्य प्रशमस्तथा ।
गुणीभूतत्वमायान्ति यदालङ्कृतयस्तदा ॥
रसवत् प्रेय ऊर्जस्वि समाहितमिति क्रमात् ।
भावस्य चोदये सन्धौ मिश्रत्वे च तदाख्यका ॥ इति ॥

एतच्च प्रायो मूलोदाहरणेष्वपि स्फुटीभविष्यति ॥

परमत्र रसवदलङ्कारस्य यान्युदाहरणानि दण्डिना आचार्येण दत्तानि तत्रास्माकं मतौ कस्यापि रसस्याङ्गभावो न दृश्यते, तेन सम्भावये—यद् रसवदलङ्कारता आचार्यस्य स्वाभाषा नास्तीति कथमन्यथा महाकवी रसवदलङ्कारं प्रतिज्ञाय स्वशैल्या तथाभूतानि दद्युदाहरणानि नावक्ष्यत यथास्य तथाभाष्टमभविष्यत् । केवलं परमतसंरक्षणकामोऽयं प्रधानरसस्थलेऽपि काव्ये औपचारिकं रसवद्व्यवहारं करोतीति प्रतीयते । 'आचार्यमम्मटो' ऽपि 'एते च रसवदाद्यलङ्काराः' इति लिखन् परमताभिप्रायाऽविष्करणमात्रे प्रयत्न एव सन् तेषु गुणीभूतव्यङ्ग्यव्यवहारं सध्रीचीनं मनुते इति तदीयग्रन्थप्रन्थिप्रन्थनसूत्रे-तरनिरीक्षणमेपक्षते । काव्यादर्श'प्रभा'कारोऽपि—'तद्वर्णनपरमेतच्च रसवदलङ्कारा लङ्कृतम' इति लिखन् अस्मत्पक्षवादीव । एवमेतेषां मते रसवदादीनामलङ्कारत्वमनर्थकम् ॥ २४

[प्रेयोलङ्कारस्योदाहरणम्]

अद्य या मम गोविन्द ! जाता त्वयि गृहागते ।
कालेनैषा भवेत् प्रीतिस्तवैवागमनात्पुनः ॥ २७६ ॥†

तत्रादौ प्रेय उदाहरति—'अद्य' इति । 'हे ! गोविन्द !' 'त्वयि गृहागते'=भवत्प्रति 'या मम प्रीतिः'=प्रेमा 'जाता'=उत्पन्ना सा 'एषा कालेन'=वेलान्तरेण 'पुनः आगमनात्'=भूयोऽपि समागमनात् 'तव एव भवेत्'=नेतरस्य भविष्यतीत्यर्थः । त्वयि गते सति इतरस्यागमनागमेन नैवेदृशी प्रीतिर्भविष्यति इति भावः । यद्पुनस्त्वदागमनं न भावि तावत् प्रेमानन्द इत्यादि सापेक्षितं मानं स्वम् ।

भोगात्मकव्यापारभूता [भोगकत्वव्यापारभूता] एतेनैव व्यापारेण सत्त्वोद्रेकस्थाय्युपहित स्वात्मानन्दरूपस्य रसस्य निष्पत्तिर्भुक्तिरास्वाद इति यावत् । स चास्वादः लौकिकसुखानुभवविलक्षण, अन्यथा भयादेः स्थायिनो भयानकत्वादिरसत्वेनानुभवो न स्यात् । ['सम्मतंतन्मतो भट्टनायक' साङ्ख्यानुग इति सम्प्रदाय तत्रास्माकं महद्वैचित्र्यमाभाति, तदेतद्विषये—'काव्यप्रकाशप्रभायां' समीक्षितम्] ।

अस्य मतस्यास्वारस्य बीजन्तु—अभिधालक्षणाभ्यामतिरिक्तेन तृतीयेन व्यञ्जनात्मकव्यापारेणैव पूर्वोक्तसकलप्रयोजनासिद्धे मन्ये तदतिरिक्तव्यापारद्वयकल्पन निष्प्रमाणकमेव तस्मात्—

स्थायिना रत्यादीना विभावादिभि' सह सयोगात्=व्यङ्ग्यव्यञ्जकभावरूपात् सम्बन्धात् [व्यञ्जनाख्यव्यापारात्] रसस्य=चिदानन्दविशिष्टस्य स्थायिनो, रत्यादिस्थाय्युपहितस्य चिदानन्दात्मनो वा निष्पत्ति=अभिव्यक्तिरिति भरतसूत्रार्थ इति **सिद्धान्तानुयायिन** । अस्याय पर सार'—मुकुटप्रतिशीर्षकादिना तावन्नटबुद्धिराच्छाद्यते गाढप्राक्तनसंवित्संस्काराच्च काव्यबलेन आनीयमानापि रामधीर्न तत्र विश्राम्यति, अत एवोभयदेशकालपरित्याग, रोमाञ्चादयश्च भूयसा रतिप्रतीतिकारितया दृष्टा । तत्रावलोकिता देशकाला अनियमेन रतिं गमयन्ति, यस्या स्वात्माऽपि तद्वासनावत्त्वादनुप्रविष्ट इव, तस्मात्तटस्थतया तत्र रत्यनगम । एवञ्च [साधारणीभूत] सन्तानवृत्तेरेकस्या एव संविदो गोचरीभूत स्थाय्येवाभिव्यक्तो 'रस' पदव्यवहारभाग् भवति ।

तत्र आस्वादनार्थकाद् 'रस' धातो भावे करणे वा घञि कृते रस्यते आस्वाद्यतेऽसौ, अनेन वेति **रस** । भावार्थकप्रत्यये आस्वादनमेव रस, करणार्थकप्रत्यये तु आस्वादनाभिव्यञ्जको ऽन्त करणस्य व्यापारो वृत्तिविशेषो रस' स्यात् । उक्तञ्च—विभावानुभावव्यभिचारिभिर्व्यञ्जितो रतिहासशोकादिस्थायित्वेन चित्तवृत्तिविशेषो 'रस'। अधिकन्तु मत्प्रणीतकाव्यप्रकाशप्रभायां दशरूपकटीकायां वा द्रष्टव्यम् । एतद्विषये **भट्टतोतन** गुरु तद् **आचार्यहेमचन्द्रै** स्वरचितकाव्यानुशासनस्य स्वोपज्ञा 'ऽलङ्कारचूडामणि' व्याख्यया स्पष्टीकृत द्रष्टव्यम् । ग्रन्थगौरवभयान् तदिह नालोडितमस्माभि । किन्तु—

शृङ्गारहास्यकरुणारौद्रवीरभयानका ।
बीभत्साद्भुतसञ्ज्ञौ चेत्यष्टौ नाट्ये रसा स्मृता' ॥

इत्याचार्यैरष्टोक्ता । 'आहेमचन्द्राचार्येण' तु—'शृङ्गारहास्यकरुणा रौद्रवीरभयानका बीभत्साद्भुतशान्ता नव रसा' इति तेषां सङ्ख्या नव सङ्ख्योक्ता । तेन हेमचन्द्राचार्यमते 'शान्त'स्य नवमोऽपि स्वीकार नतु तद्विषये मतद्वैविध्यमिति मम प्रतिभाति । अलं तावत्—प्रकृतमनुसराम । एवम्भूत शृङ्गारादिभेदभिन्नो रसो यत्र प्रकर्ष व्रजति तत् 'रसवदलङ्कार' । तदुक्त ध्वनिकारादिभि.—

- अलङ्कारान्तराणां ... मम्मटाचार्यं प्रभृतयश्चैवम् ।

प्रधाने ऽन्यत्र वाक्यार्थे यत्राङ्गन्तु रसादयः ।
काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः ॥

तदयमत्र निष्कर्षः—रसानां परस्याङ्गभावे रसवदलङ्कारः, भावानामङ्गत्वे प्रेयोलङ्कारः रसाभासभावाभासयोरङ्गत्वे ऊर्जस्व्यलङ्कारः, भावशान्तेरङ्गत्वे समाहितालङ्कारः, भावोदय भावसन्धि भावशबलतानां-मङ्गत्वे तत्तन्नामकालङ्काराः । आह च 'विश्वनाथः'—

रसभावौ तदाभासौ भावस्य प्रशमस्तथा ।
गुणीभूतत्वमायान्ति यदालङ्कृतयस्तदा ॥
रसवत् प्रेय ऊर्जस्वि समाहितमिति क्रमात् ।
भावस्य चोदये सन्धौ मिश्रत्वे च तदाख्यकाः ॥ इति ॥

एतच्च प्रायो मूलोदाहरणेष्वपि स्फुटीभविष्यति ॥

परमग्रे रसवदलङ्कारस्य यान्युदाहरणानि दण्डिना आचार्येण उक्तानि तत्रास्माकं मते कस्यापि रसस्याङ्गभावो न दृश्यते, तेन सम्भावये—यद् रसवदलङ्कारता आचार्यस्य स्वाभीष्टा नास्तीति कथमन्यथा महाकवी रसवदलङ्कारं प्रतिज्ञाय स्वशैल्या तथाभूतानि ददुदाहरणानि नावक्ष्यत् यद्यस्य तथाभीष्टमभविष्यत् । केवलं परमतसंरक्षणकामोऽस्य प्रधानरसवत्यपि काव्ये औपचारिकं रसवद्व्यवहारं करोतीति प्रतीयते । 'आचार्यमम्मटो' ऽपि 'एते च रसवदाद्यलङ्काराः' इति लिखन् परमताभिप्रायाऽविष्करणमात्रिकप्रयास एव सन् तेषु गुणीभूतव्यङ्ग्यव्यवहारं सध्रीचीनं मनुते इति तदीयपूर्वोत्तरग्रन्थग्रन्थिग्रन्थनस्थूले-तरनिरीक्षणमपेक्षते । काव्यादर्श'प्रभा'कारोऽपि— 'तद्वर्णनपरमेतद्वचः रसवदलङ्कारा-लङ्कृतम्' इति लिखन् अस्मत्सवाधेष । एवञ्चैतेषां मते रसवदादीनामलङ्कारत्वमनभीष्टम् ॥ २७५

[प्रेयोलङ्कारस्योदाहरणम्]

अद्य या मम गोविन्द ! जाता त्वयि गृहागते ।
कालेनैषा भवेत् प्रीतिस्तवैवागमनात्पुनः ॥ २७६ ॥†

तत्रादौ प्रेय उदाहरति—'अद्य' इति । 'हे ! गोविन्द !' 'त्वयि गृहागते'=भवनं प्राप्ते 'या मम प्रीतिः'=प्रेमा 'जाता'=उत्पन्ना सा 'एषा कालेन'=वेलान्तरेण 'पुनः आगमनात्'=भूयोऽपि समागमनात् 'तव एव भवेत्'=नेतरस्य भविष्यतीत्यर्थः । त्वयि गते सति इतरसाधुसमागमेन नैवेदृशी प्रीतिर्भविष्यति इति भावः । यावत्पुनस्त्वदागमनं न भावि तावत् प्रेम्णैव दिनानि यापयिष्यामीति व्यङ्ग्यम् ।

* तत्पदेन प्रकृतं रसमेव परामृशति ।

† इत्थमेव प्रह्लादोक्तिः 'विष्णुपुराणे'—

या प्रीतिरविवेकानां विषयेष्वनपायिनी ।
त्वामनुस्मरतः सा मे हृदयान्मापसर्पतु ॥

[अंश० १ । अ० २० । श्लो० १७ ।]

अत्र विदुरस्य वाक्यविच्छित्तिविशेषतया अभिव्यज्यमाना भगवद्विषयिणी रति भाव । स च भगवत श्रीकृष्णस्य प्रेमातिशयजनकत्वे वाच्यस्य [वाक्यार्थस्य] एव शोभातिशय पुष्णातीति वाच्याङ्गत्वात्प्रतिभावस्य प्रेयोलङ्कारत्व' मुस्पष्टम् ॥ २७६ ॥

[उक्तार्थस्य स्पष्टीकरणम्]

इत्याह युक्तं विदुरो नान्यतस्तादृशी धृतिः ।
भक्तिमात्रसमाराध्य सुप्रीतश्च ततो हरि' ॥ २७७ ॥

उक्तोदाहरणे प्रेय स्वरूप घटयति—'इति' इति । 'विदुर इति' [उक्तेन] प्रकारेण 'युक्तम्'=उचितम् 'आह'=कथितवान् अस्मिन्नर्थे हेतु दर्शयति—'न' इति । यत 'अन्यत '=अपरस्मात्' कस्माचित 'तादृशी धृति '=धैर्य सन्तोष इति यावत् 'न' अभूत इति शेष । तत हेतोः 'भक्तिमात्रसमाराध्य '=भक्तिमात्रेण समाराध्य सेव्य अर्थात ईश्वरे *परानुरक्तिरूपा या भक्ति केवल तयैव वश्यः हरि श्रीकृष्ण नत्वन्यैर्यज्ञादिभि' † साधन तथाराध्य इति भाव । 'सुप्रीत'=अतिमात्र प्रसन्न आसीत् इति शेष । मर्मार्थस्तु—अग्रस्तादुक्तप्राय ॥ २७७ ॥

[प्रेयस उदाहरणान्तरम्]

सोम सूर्यो मरुद् भूमिर्व्योम होतानलो जलम् ।
इति रूपाण्यतिक्रम्य त्वां द्रष्टुं देव ! के वयम ॥ २७८ ॥

पूर्व वक्तृनोद्धर्यविशिष्टेन प्रीतौ प्रेयोऽलङ्कार उदाहृत सम्प्रति वक्तृमात्रप्रीतौ तद्दर्शयति—'सोम' इत्यादिना । 'हे ! देव '=महादेव ! 'सोम '=चन्द्रमा , 'सूर्य '= रवि , 'मरुत्'=अनिल , 'भूमि '=पृथिवी, 'व्योम'=आकाशम् , 'होता'=यजमान 'अनल '=वन्हि जलम्'=नीरम् इति एतानि रूपाणि तवाष्टौ 'मूर्ती '=तनू 'अतिक्रम्य'= उल्लङ्घ्य अनोन्य वर्तमान 'त्वां' शुद्धस्वरूप परमात्मान 'द्रष्टुम् -साक्षात्कर्तुं 'वय के !' न केऽपि नैव समर्था इत्यर्थ । अर्थात् अदृश्योऽपि त्व यद् दृष्ट स भक्तजनेषु तवानुग्रहेण केवल विश्वासार्हो ।

---

* उक्त—[भक्तिमीमांसायाम्] 'शाण्डिल्येन'—' सा परानुरक्तिरीश्वरे' [॥ १ । २ । ।] । इति ।

† उक्त श्रीमद्भगवद्गीतायाम्—

नाहं वेदैर्न तपसा न दानेन न चेज्यया ।
शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा ॥
भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ।
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप ! ॥
मत्कर्मकृन्मत्परमो मद्भक्त सङ्गवर्जित ।
निर्वैर सर्वभूतेषु य स मामेति पाण्डव ! ॥ अ० ११।५३,५४,५५॥

अत्र महादेवविषयको भक्तस्य रतिभावः। अत्र निष्कलस्य परब्रह्मणो जन्याया प्रीते-रभावात् वक्तु [भक्तस्य] तद्विषयिण्या प्रीत्या एव प्रेयस्त्व ज्ञेयम् ॥ २७८ ॥

[उक्तार्थस्पष्टीकरणम्]

इति साक्षात्कृते देवे राज्ञो यद्राजवर्मणः ।
प्रीतिप्रकाशनं तच्च प्रेय इत्यवगम्यताम् ॥ २७९ ॥

उक्ते काव्ये केवल वक्तु प्रीतौ प्रेयो घटयति—'इति' इति । 'इति'=दर्शितप्रकारेण 'साक्षात्कृते'=तपसा अध्यक्षीकृते 'देवे'=महादेवे 'राजवर्मणः'=राजवर्मनाम्नो 'राज्ञः'=भूपस्य 'यत् प्रीतिप्रकाशनम्'=प्रेम्ण आविष्कार 'तत् च प्रेय'=इत्याख्योऽलङ्कार 'अवगम्यताम्'=ज्ञायताम् अर्थात् अत्रापि महादेवविषयको व्यङ्ग्यो राजनिष्ठो रतिभाव स्वव्यञ्जकस्य प्रियाख्यानरूपस्य वाक्यार्थस्याङ्गत्वात् 'प्रेयोऽलङ्कार'। एवमादिष्व-न्यत्राप्यूह्यम् * ॥ २७९ ॥

[रसवदलङ्कारप्रसङ्गे प्रथम शृङ्गाररसोदाहरणम्]

मृतेति प्रेत्य सङ्गन्तुं यया मे मरणं मतम् ।
सैषा तन्वी मया लब्धा कथमत्रैव जन्मनि ॥ २८० ॥

क्रमप्राप्त रसवदलङ्कारमुदाहर्तुकाम रसेषु प्रथम शृङ्गारस्य प्राधान्यात् तत्स्वरूपमुदाहरणेन स्पष्टीकरोति—'मृता' इति । मृता मदालसां पुनर्नागानां कृपयोज्जीवितां दृष्ट्वा तत्पत्यु कुवलयाश्वस्योक्तिरियम्—'मृता इति । 'इय मृता'=इति निश्चय कृत्वा 'प्रेत्य'=मृत्वा 'यया'=प्रियया सह 'सङ्गन्तुम्'=परलोके सङ्गम कर्तु 'मे'=मम 'मरणम्'=मृति 'मतम्'=निश्चितमासीत् 'सा एषा तन्वी कथम् अत्र एव जन्मनि'=मरण विनेत्यर्थ 'मया लब्धा'=प्राप्ता । 'लब्धा' इत्यत्र कर्मणि 'क्त'। 'सङ्गन्तुम्' इत्यत्र 'तुमुन्ण्वुलौ क्रियाया क्रियार्थायाम् [३ । ३ । १०] इति सूत्रेण सम्पूर्वकाद् 'गम्' धातो 'तुमुन्'। अत्र शृङ्गारो रस, सच सम्भोगात्मक विप्रलम्भपूर्व । उक्तञ्च—

न विना विप्रलम्भेन सम्भोग पुष्टिमश्नुते ।
कषायिते हि वस्त्रादौ भूयान् रागोऽभिवर्धते ॥ इति ॥

आह च विश्वनाथ '—

शृङ्ग हि मन्मथोद्भेदस्तदागमनहेतुक ।
उत्तमप्रकृतिप्रायो रस शृङ्गार इष्यते ॥ इति ॥

---

* तत्र मुनिविषयको रतिभावो यथा—

हरत्यघ सम्प्रति हेतुरेष्यत शुभस्य पूर्वाचरितै कृत शुभै ।
शरीरभाजा भवदीयदर्शन व्यनक्ति कालत्रितयेऽपि योग्यताम् ॥ [माघ]

इद नारदमुनिं प्रति श्रीकृष्णवचनम् । अत्रापि श्रीनारदविषया श्रीकृष्णनिष्ठा अभि-व्यज्यमाना रतिर्भाव , सच वाक्यार्थस्यातिशयचमत्कारकतया गत प्रेयोऽलङ्कार ।

सारस्तु—'रतिस्थायिभावक कान्ताद्यालम्बनक स्रक्चन्दनाद्युद्दीपित कटाक्षाद्यनुभावितो व्रीडादिसञ्चारित **शृङ्गार** [१] सच* विप्रलम्भसम्भोगभेदेन सामान्यतो द्विविध । रतिश्च—कान्ताविषयकोऽनुराग एव । उक्त हि—'रतिर्मनोऽनुकूलेऽर्थे मनस प्रवणायितम्' इति ।

प्रकृतश्लोके निरुक्ता [मदालसा] नायिका आलम्बनविभाव , तदीयस्मेरताद्य अनुभावा , हर्षविस्मयादयश्च व्यभिचारिभावा एतैरभिव्यज्यमाना रति स्थायिभाव सामाजिकहृदये शृङ्गाररसतामापद्यते ।

इदन्तु ध्येयम—रसोद्बोधे मिलितानामेव त्रयाणां विभावादीनां हेतुभाव , यत्र तु एकस्य द्वयोर्वा सद्भाव तत्रान्यस्यौचित्या आक्षेप । आक्षेपोदाहरणन्तु काव्यप्रकाशादौ द्रष्टव्यम् ॥ २८० ॥

[प्रेयोऽलङ्काररसवदलङ्कारयोर्विशेषः]

प्राक् प्रीति दर्शिता सेयं रतिः शृङ्गारतां गता ।
रूपबाहुल्ययोगेन तदिदं रसवद्वच ॥ २८१ ॥

प्रेयोलङ्कारात् विशेषतां दर्शयन् अस्य रसवदलङ्कारत्वं समर्थयते 'प्राक्' इति । 'प्राक्'=पूर्वयोर्द्वयोरुदाहरणयो , 'या प्रीति '=प्रेमा विभावादिभि परिपोषरहितैव रति 'दर्शिता'=भगवद्विषयकत्वेन प्रेयोरूपतया स्फुटीकृता 'सा इयम'=सैव रति प्रीति कान्ताविषयकोऽनुराग इत्यर्थ 'रूपबाहुल्ययोगेन'=रूपाणि विभावानुभावव्यभिचारिण तेषां बाहुल्य प्राचुर्य विस्तार इति यावत् तस्य योगेन=व्यङ्ग्यव्यञ्जकभावसम्बन्धेन [व्यञ्जनाख्येन शब्दव्यापारेणेत्यर्थ] 'शृङ्गारताम'=शृङ्गारभाव 'गता'=प्राप्ता । 'तत्'=तस्मात् 'इदं वच '=सूनेति काव्यरूप वाक्यम् 'रसवत'=रसवदलङ्कारोपेतमित्यर्थ ।

अयमाशय —इष्टपदार्थविषयकोऽन्त करणस्य परिणामविशेष तत्रान्तरे गतिपद [illegible] स एव मृगानुसारी सन् रागः प्रीतिरिति चोच्यते । यदासौ नायिकादिविषयको भवति तदा 'रति ' इत्यभिधीयते । 'रतिर्मनोऽनुकूलेऽर्थे मनस प्रवणायितम' इत्युक्ते । [illegible] सैव [illegible] 'भाव' पदेन भण्यते । प्रकृते तु—कान्ताविषयकानुराग [illegible] रति शृङ्गाररसस्य स्थायिभाव , सैव विभावानुभावव्यभिचारिणा गयागाद्य

---

* 'तत्र तु रति प्रकृष्टा नाभीष्टमुपैति विप्रलम्भोऽसौ' इत्युक्तलक्षणो [illegible] । [illegible]—[illegible] प्रवास-करुणात्मकतया चतुर्विध इत्येके । अभिलाषविरहेर्ष्या प्रवास[illegible] इति [illegible] इत्यन्ये । अत्र महाश्वेतापद्मे करुणात्मको विप्रलम्भ । [illegible]—

[illegible] पुनर्लभ्ये ।
[illegible] भवेत् करुणविप्रलम्भाख्य ॥ इति प्राचामुक्त ।
[illegible] इत्युदाहरणम् ।

शृङ्गारत्वं गता [शृङ्गारो रस] तस्मादिदं वचो 'रसवत्' ।

अत्र मदालसा नायिका विभाव , तदीयवदनस्मेरताद्या अनुभावा , हर्षविषादाद्या व्यभिचारिण एतै पुष्टिं नीतोऽभिव्यक्तो रत्याख्य स्थायिभाव सहृदयहृदयेषु रसभावमापद्यते इत्यधस्तादाम्रेडितप्रायम् ।

इदमत्रावश्यकमवधानीयम्—

यत्र रस परस्याङ्गभावं भजते तत्रैव प्राय. सर्वेषामालङ्कारिकाणां मते रसवदलङ्कारत्वव्यपदेश । यथा—

> मुनिर्जयति योगीन्द्रो महात्मा कुम्भसम्भव ।
> येनैकचुलके दृष्टौ दिव्यौ तौ मत्स्यकच्छपौ ॥

अत्र—एकचुलकेन समुद्रे पीयमाने तदन्तर्गतयोरवतारस्वरूपयोर्मत्स्यकूर्मयोर्दर्शनेन गम्योऽद्भुतरसो मुनिप्रभावातिशयपर्यवसानत्वेन मुनिविषयकरतिपोषकत्वादिति तदङ्गत्वे रसवदलङ्कार । यथा वा—

> अयं स रसनोत्कर्षी पीनस्तनविमर्दन ।
> नाभ्यूरुजघनस्पर्शी नीवीविस्रंसन कर ॥

अत्र 'शृङ्गारावस्थया करुणरसस्य परिपोष इति शृङ्गारस्य पराङ्गत्वेऽस्य रसवदलङ्कारत्वम् । 'ध्वन्यालोककार'मते तु—'मुनिर्जयति' इत्यत्र नैव रसवदलङ्कारत्वेन व्यपदेश । किन्तु—असौ 'तस्मात् स्थितमेतत्—अङ्गिभूतरसाद्याश्रयेण काव्ये क्रियमाणे नवनवार्थलाभो भवति, बन्धच्छाया च महती सम्पद्यते इति । अत एवच रसानुगुणार्थविशेषोपनिबन्धनमलङ्कारान्तरविरहेऽपि छायातिशययोगि लक्ष्ये दृश्यते । यथा'— इत्युक्त्वा अद्भुतरसमेवास्मिन् पद्येऽङ्गित्वेन मन्यमान मुनिर्जयति इति पद्यमुदाजहार । 'अलङ्कारसर्वस्वकार'स्तु—सुगूढ शास्त्रमर्थयन् प्रकृते 'भाविक'नामानमलङ्कार स्वीचकार । 'अप्पय्यदीक्षिता.'—रसवन्तमेव मेनिरे । आस्तां तावदेतत्—सर्वथापि प्राचां मते रसस्य अङ्गित्वे अलङ्कार्यत्वम् तस्य पराङ्गत्वे अलङ्कारत्वम् , मम्मटाचार्यादीनां स्वमते रसस्य पराङ्गतास्थले गुणीभूतव्यङ्ग्यत्वम् , दण्ड्याचार्यमते [काव्यशोभाकरत्वात्मकं सामान्यमुपाधि लक्ष्यीकृत्य] रसवत्त्वेव काव्ये ऐच्छिकं रसवदलङ्कारत्वमिति स्थितो राजमार्ग । अत एव दण्डिवामनमम्मटानामलङ्कारलक्षणेऽपि महान् मतभेद ।

ननु—दण्डिमते रसस्यापराङ्गतायामपि रसवत्त्वमिति कुतस्त्वयाऽवगम्यते इति चेत् ? शृणु—

'काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते इति दण्डी' । 'काव्यशोभाया कर्त्तारो धर्मा गुणा । १ । तदतिशयहेतवस्त्वलङ्कारा ' इति 'वामन ' ।

> उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित् ।
> हारादिवदलङ्कारास्तेऽनुप्रासोपमादय । इति 'मम्मटाचार्य ' ।

मूलग्रन्थे तत्र तत्र [शृङ्गाररसाद्युदाहरणे] न कस्यापि रसस्येतराङ्गत्व कथमप्यवगन्तुम रसवतो वर्णन प्रस्तुत्य तदुदाहरणाप्रदर्शन ग्रन्थकारस्य ग्रन्थनन्यूनता स्फुट प्रतीयमाना कथ नायन । शृङ्गारादीनां स्वरूपमेवात्रावतारित दण्डिना, तदङ्गत्वे [रसवदलङ्कारत्वे] उदाहरणानि ग्रन्थगौरव मत्वा ग्रन्थान्तरतो वा तेषामवसाय हृदि कृत्वा नेह प्रपञ्चितानि इति सम्भाव्येतापि, । मन्नये तु—[कदाचित्] रसवति काव्य एव गौण्या भावनया रसवद लङ्कारव्यवहारो दण्डयाचार्याणामिति, 'इह त्वष्ट रसायत्ता रसवत्ता स्मृता गिराम्' इति वक्ष्यमाणस्पष्टोक्ते, तदत्र विपश्चिद्वर्या युक्तायुक्ते स्वयमप्यामालोचयन्तु । मया तु गुरुभावितान्त.करणेन यथामति विवरीतम् ।

परमिदमन्यदपि विभाव्यम्—किं सर्वत्र सर्वथा सर्वदा प्रतीयमानस्य सर्वस्य [व्य ङ्ग्यमात्रस्य एव अलङ्कार्यत्वम [स्वप्रधानत्वम् ?] अथवा तादृश रसादेरेव ! । तत्र न तावदाद्य' पक्ष क्षोदक्षम —समासोक्त्यप्रस्तुतप्रशसापर्यायोक्तप्रभृतिस्थले मुख्यतयैव प्रतीयमानाना वस्त्वलङ्काराणामपि अलङ्कारतयैव स्वीकारात् । ननु तत्तत्स्थले वाच्यार्थस्यैव प्राधान्य, प्रतीयमानानां वस्त्वलङ्काराणां नैव तत् तस्मादप्रधानभूतानामलङ्कारत्वमेवेति चेत् ? न, व्यङ्ग्यमात्रस्य प्रधानताया अनुभवसिद्धत्वेनापलपितुमशक्यत्वात् । नच पर पक्ष –सामान्यत काव्यात्मत्वेन स्वीकृतानां वस्त्वलङ्काररसादिव्यङ्ग्यानां मध्ये वस्त्वल ङ्काराणामलङ्कारत्वम् रसादीनां नियमेनालङ्कार्यत्वमेवेति विनिगमनाविरहात् । तस्माद् व्यञ्जनयाऽभिहितानां वस्त्वलङ्काराणां रसादीनाञ्च काव्यशोभाजनकत्वेनालङ्कारत्व युक्तम नुभयमिदमिति प्राचां सरणिरेव साधीयसीत्यपि केचित् । अधिकन्तु—'काव्यप्रकाशप्र भाया' मानोऽत्रिमस्माभिरिति तत एव कर्णोहृत्य निरीक्षणीयम् ॥ २८१ ॥

[अथ रौद्रो रस]

निगृह्य केशेष्वाकृष्टा कृष्णा येनाग्रतो मम ।
सोऽयं दु शासन पापो लब्ध किं जीवति क्षणम ॥२८२॥

[illegible] रौद्ररसमुदाहरति—'निगृह्य' इति । 'येन मम अग्रत '=पुरत मम [illegible] । 'कृष्णा'=द्रौपदी 'केशेषु=शिरोरुहेषु 'निगृह्य'=नितरां गृहीत्वा 'आकृष्टा'= [illegible] 'स अयम् पाप '=दुष्ट. 'दु शासन '=दुर्योधनानुज 'मया'=भीमेन 'लब्ध '=[illegible] 'क्षण जीवति'=प्राणिति 'किम्'=नैव जीवति [जीविष्यति] इत्यर्थ ॥ २८२ ॥

[उक्तपद्ये रौद्ररसत्वप्रदर्शनम]

इत्यारुह्य परां कोटिं क्रोधो रौद्रात्मतां गत ।
भीमस्य पश्यत शत्रुमित्येतद्रसवद्वच: ॥ २८३ ॥

[illegible] —'इति' इति । 'शत्रुम्'=[illegible] [illegible] 'भीमस्य =[illegible] 'क्रोध '=[कोप] [illegible]

स्थायिभाव 'पराम्'=प्रकृष्टाम् 'कोटिम्'=सामानम् 'आस्य'=प्राप्य अर्थात् विभावादिभि परित पोष गत्वा 'रौद्रात्मतां गत'=रौद्ररसभाव प्राप्त, रौद्ररसरूपेण परिणत इति निर्गलितोऽर्थ । उक्तञ्च 'प्रतिकूलेषु तैक्ष्ण्यस्यावबोध क्रोध इष्यते' इति । अत्र क्रोध स्थायिभाव, दु शासन सपत्न आलम्बनविभाव, तस्य कृष्णाकेशाद्याकर्षणमुद्दीपनविभाव पाप इति निन्दावचनमनुभाव, प्रतीयमाना गर्वाद्या व्यभिचारिण, एतै पुष्टिं नीत क्रोध स्थायिभाव रौद्ररसभाव प्राप्त 'इति'—एतत् 'रसवत् वच' इत्येवमुक्त वच काव्य रसवदलङ्कारवदित्यर्थ ।

'क्रोधस्थायिभावको द्विषदालम्बनक तदपकाराद्युद्दीपितो विकत्थनाद्यनुभावितो गर्वादिसञ्चारितो रौद्र' इति रौद्ररसस्वरूपम् । तथाच 'वाग्भट —

क्रोधात्मको भवेद्रौद्र क्रोधश्चारिपराभवात् ।
भीष्मवृत्तिर्भवेदुग्र सामर्षस्तत्र नायक ॥
स्वांसाघातस्वशंसास्त्रोत्क्षेपभ्रुकुट्यस्तथा ।
अत्रारातिजनाक्षेपोद्वेलन चोपवर्ण्यते ॥ इति ॥ २८३ ॥

[वीररसोदाहरणम्]

अजित्वा सार्णवामुर्वीमनिष्ट्वा विविधैर्मखै ।
अदत्त्वा चार्थमर्थिभ्यो भवेयं पार्थिव कथम् ॥ १८४ ॥

वीररसमुदाहरति—'अजित्वा' इति । 'सार्णवाम्'=अर्णवेन समुद्रेण सहिताम् 'उर्वीम्'=पृथ्वीम् 'अजित्वा'=न जित्वा जयेनाप्राप्येत्यर्थ, 'विविधै'=नानाप्रकारै 'मखै'=वेदविहितै राजसूयाश्वमेधप्रभृतिभिर्यज्ञै 'अनिष्ट्वा'=देवान् असन्तर्प्य, 'अर्थिभ्य' =याचकेभ्य 'अर्थम्'=वसु 'अदत्त्वा'=असमर्प्य 'कथम्'=केन प्रकारेण [विधिना] 'अहम् पार्थिव'=पृथिवीपति 'भवेयम्'=स्याम् । तत्पृथिव्यादिदानात्मकदर्शितोपायरहितस्य पृथिवीपतित्व मनोरथमात्रमेवेति तात्पर्यम् । अत्र युद्धवीरता धर्मवीरता दानवीरता चेति ध्वनितम् ॥ २८४ ॥

[लक्ष्ये वीररसस्वरूपसङ्गमनम्]

इत्युत्साह प्रकृष्टात्मा तिष्ठन् वीररसात्मना ।
रसवत्त्वं गिरामासां समर्थयितुमीश्वर ॥ २८५ ॥

उक्तोदाहरणे स्वयमेव वीररस घटयति—'इति' इति । 'इति'=उक्तरूपे काव्ये 'प्रकृष्टात्मा'=प्रकृष्ट उत्कृष्ट आत्मा स्वरूप यस्य स तथाविध विभावादिभि परिपोष प्राप्त इत्यर्थ । 'उत्साह'=उत्साह 'कार्यारम्भेषु संरम्भ स्थेयानुत्साह उच्यते' इत्युक्तलक्षण वीररसात्मना तिष्ठन्=वीररसरूपेण परिणत सन् 'आसां गिराम्'=दर्शितवाक्यरूपाणां वाणीनाम् 'रसवत्त्वम्'=रसवदलङ्कारत्वम् 'समर्थयितुम्'=सम्पादयितुम् 'ईश्वर'=क्षम समर्थ इत्यर्थ ।

अत्र संग्रामे जेतव्यो वैरिवर्ग , धर्मे यज्ञा , दाने ऽर्थिनश्च आलम्बनविभावा', प्रतीयमाना तत्तत्सहकारिणोऽनुभावा , हर्षधृतिसंवेगप्रभृतयो व्यभिचारिभावा एतै सर्वैरभिव्यक्त उत्साहरूप स्थायिभाव. सहृदयहृदये वीररसतां भजते । उक्तञ्च—'उत्साहस्थायिभावक द्विपद्विद्वज्जनदीनाद्यालम्बनकोऽपकारगुणाद्युद्दीपित प्रतीकारकरणदानाद्यनुभाविनो हर्षवेगचिन्तादिसञ्चारितो 'वीर' । इति । उक्तञ्च—

उत्साहात्मा भवेद्वीरस्त्रिधा वीराजिदानत ।
नायकोऽत्र भवेत्सर्वं श्लाघ्यैरधिगतो गुणै ॥ २८५ ॥

[करुणरसस्योदाहरणम्]

यस्या कुसुमशय्यापि कोमलाङ्ग्या रुजाकरी ।
साधिशेते कथं तन्वी हुताशनवतीं चिताम ॥ २८६ ॥

करुणरसमुदाहरति—'यस्या' इति । 'यस्या कोमलाङ्ग्या '=मृदुशरीराया नायिकाया 'कुसुमशय्या'=पुष्पास्तरणाम् 'अपि' 'रुजाकरी =पीडाजनिका, 'सा =तन्वी सुकुमाराङ्गी 'कथम्'=केन विधिना 'हुताशनवतीम्'=जाज्वल्यमानानलाम् 'चिताम्'=चित्याम 'अधिशेते'=तत्रास्ते इत्यर्थ । 'चिता चित्या चिति स्त्रियाम्' इत्यमर । 'अधिशीङ् स्थासामाधार [१ । ४ । ४७] इत्यनेन कर्मसंज्ञा ॥ २८६ ॥

[वीररसस्वरूपसङ्क्रमनम्]

इति कारुण्यमुद्रिक्तमलंकारतया स्मृतम् ।
तथापरेऽपि बीभत्सहास्याद्भुतभयानका ॥ २८७ ॥

[illegible] पर्यायेण दर्शयति—'इति' इति । 'इति'=एवम् 'उद्रिक्तम्'=विभावादिभि[illegible] पुष्टिप्रापम 'कारुण्यम्'=करुणस्य [करुणाख्यरसस्य] भाव कारुण्य शोक[illegible] 'इष्टनाशादिभिश्चेतो वैक्लव्य शोकशब्दभाक्' इत्युक्तलक्षण 'अलङ्कारतया'=[illegible]भावेन 'स्मृतम्'=उक्त कविभिरित्यर्थ ।

अत्र मृता तन्वी आलम्बनविभाव , कुसुमशय्यादिस्मृति उद्दीपनविभाव , तथाविध[illegible]वचनमनुभाव , कथमित्यादिना गम्यमानाश्चिन्ताप्रभृतयो व्यभिचारिभावा , [illegible] शोकस्थायिभाव सचेतसां हृदये करुणरसतां भजते ।

उक्तञ्च—शोकस्थायिभावको मृताद्यालम्बनक तद्गुणाद्युद्दीपितो रोदनाद्यनुभाविनो [illegible] 'करुण' इति । 'वाग्भटो'प्याह—

शोकेन [illegible] करुणो [illegible] भूपातरोदने ।
वैवर्ण्य[illegible] कार्त्स्येन ॥ इति ।

'[illegible] बीभत्सहास्याद्भुतभयानका '=[illegible] ज्ञेया इति शेष । [illegible]— [illegible] निष्ठीवनाद्यनुभावितो [illegible] बीभत्स । [illegible]

गल्लफुल्लनाद्यनुभावित श्रमादिसञ्चारितो हास्य । विस्मयस्थायिभावक विस्मयजनककर्म-कर्त्रालम्बनक' विस्मयकर्मोद्दीपित चकितताद्यनुभावितो हर्षादिसञ्चारितोऽद्भुत' । भयस्थायिभावको विकटाद्यालम्बनक तद्विकटकर्मोद्दीपित पलायनाद्यनुभावितो जडतादिसञ्चारितो भयानकः, इत्येवमाद्यममीषां स्वरूपादि ग्रन्थान्तरेषु वैशद्येनावतारितम्, इहतु सङ्क्षिप्योक्तम् ॥ २८७ ॥

[वीभत्सोदाहरणम्]

पायं पायं तवारीणां शोणितं पाणिसम्पुटै ।
कौणपाः सह नृत्यन्ति कवन्धैरन्त्रभूषणाः ॥ २८८ ॥

तत्रादौ वीभत्सरसमुदाहरति—'पायम्' इति । 'अन्त्रभूषणा '=अन्त्र पुरीतत् भूषण मण्डन येषा ते तथाविधा 'कौणपा '=राक्षसा 'पाणिसम्पुटै '=पुटाकार करैरित्यर्थ 'तव अरीणाम्'=शत्रूणाम् 'शोणितम्'=रुधिरम् 'पायम्पायम्'=पुनः पुन' पीत्वा 'कवन्धै '=उत्तमाङ्गरहितै क्रियावद्भि कलेवरै 'सह'=साकम् 'नृत्यन्ति'=नर्त्तना विदधते ।

अत्र 'दोषेक्षणादिभिर्गर्हा जुगुप्सा विषयोद्भवा' इत्युक्तलक्षणा जुगुप्सा स्थायिभाव , शोणितपिबा आन्त्रभूषणा राक्षसा आलम्बनविभावा , एतैरेव नेत्रचेष्टाया हर्षाद्याश्च आक्षिप्ता यथायथमनुभावा व्यभिचारिभावाश्च सन्ति, तैरेतै रभिव्यक्त उक्तलक्षणो जुगुप्सारूप स्थायिभाव सचेतसां हृदि वीभत्सरूपेण परिणमते। एवमेतादृशरसवद्वाक्यत्वाद्रसवदलङ्कारोऽयम् । परमत्र वीभत्सो कविनिष्ठराजविषयकरतिभावस्याङ्गतया गुणीभूत इति प्रेयोऽलङ्कारोऽयम्, अथवा प्रेयोरसवतो सङ्कर स्यादित्यपि केचित् । 'पाय पायम्' इत्यत्र 'आभीक्ष्ण्ये णमुल् च' [३ । ४ । २२] इति 'पा' धातो 'णमुल्' । 'नित्यवीप्सयो ' [८ । १ । ४] इति द्वित्वम् ॥ २८८ ॥

[हास्योदाहरणम्]

इदमम्लानमानाया लग्नं स्तनतटे तव ।
छाद्यतामुत्तरीयेण नवं नखपदं सखि ! ॥ २८९ ॥

हास्यरसमुदाहरति—'इदम्' इति । [सख्या समीपे कृतमानामिवान्ते कान्तेन कृतवासवेलि कांचित् सखीप्रति तद्वयस्याया सोपहास वचन मिदम् ।] हे ! 'सखि' = आलि ! 'अम्लानमानाया '=न म्लान खण्डित मानो गर्व प्रणयकोपो यस्या तथाविधाया अर्थात् अस्माभिर्बहुवार कृतेऽपि प्रणयकोपशमनार्थमाग्रहेऽपरित्यक्तमानाया 'तव स्तनतटे =कुचतटे ='लग्नम्'=सम्बद्धम 'इदम्'=दृश्यमानम् 'नवम्'=सद्यस्क ननु चिरकालीनम् 'नखपदम्'=करजाघातचिह्नम् 'उत्तरीयेण' प्रावरणपटेन 'छाद्यताम्'= आच्छाद्यताम् । अस्म पुरत पुना मानकथा न कार्येति भाव ।

अत्र कान्तभुक्ता तथाविधमानिनी नायिका आलम्बनविभाव , करजक्षत उद्दीपनविभाव , तथा तावकोपादिकमनुभाव तदर्थगोपनेच्छा [आदिष] सञ्चारिभाव व्यभिचा-

रिण तं सर्वैरभिव्यक्त 'वागादिवैकृतैश्चेतोविकाशो हास उच्यते' इत्युक्तलक्षणो हास स्थायिभाव सहृदयहृदयेषु हास्यरसतां प्राप्नोति, तादृशरसोऽनेनेत्चेद काव्यं रसवत् ॥

उदाहरणान्तर यथा 'विश्वनाथस्य'—

गुरोर्गिरः पञ्च दिनान्यधीत्य वेदान्तशास्त्राणि दिनत्रयञ्च ।
अमी समाघ्राय च तर्कवादान् समागता कुक्कुटमिश्रपादा ॥ इति ॥२८६॥

[अद्भुतरसोदाहरणम्]

अंशुकानि प्रवालानि पुष्पं हारादिभूषणम् ।
शाखाश्च मन्दिराण्येषां चित्रं नन्दनशाखिनाम् ॥ २९० ॥

अद्भुतरसमुदाहरति—'अंशुकानि' इति । 'एषाम् नन्दनशाखिनाम्'=सुरारामतरूणाम् 'प्रवालानि'=नवपल्लवा. 'अंशुकानि'=वस्त्राणि सन्ति इति क्रियाशेष । 'पुष्पम्'=कुसुम [जातावेकवचनम्] 'हारादिभूषणम्'=हारादि मण्डनम् 'शाखा'=विटपाश्च 'मन्दिराणि'=गृहा 'चित्रम्'=इद सर्वमत्याश्चर्यमित्यर्थ ।

अत्र नन्दनशाखिन आलम्बनविभावा, तेषां तादृशलोकोत्तरगुणा उद्दीपनविभावा, प्रतीयमाना साश्वस्वेदाद्या विशेषा अनुभावा', हर्षाद्याश्च व्यभिचारिण' एतैरभिव्यक्त: परिपोषितश्च विस्मयाख्य स्थायिभाव सामाजिकहृदये अद्भुतरसरूपेण परिणमते ।

विस्मयस्य लक्षणन्तु—

विविधेषु पदार्थेषु लोकसीमातिवर्तिषु ।
विस्फारश्चेतसो यस्तु स विस्मय उदाहृत ॥ इति ज्ञेयम् ॥ २९० ॥

[भयानकरसस्योदाहरणम्]

इदं मघोन कुलिशं धारासन्निहितानलम् ।
स्मरणं यस्य दैत्यस्त्रीगर्भपाताय कल्पते ॥ २९१ ॥

भयानकरसमुदाहरति—'इदम्' इति । 'मघोन'=इन्द्रस्य 'इद कुलिशम्'=वज्रम् 'धारासन्निहितानलम्'= धारासु सन्निहितो वर्तमान. अनलो हुतभुक् यस्य तत्तथोक्त 'वर्तते' इति शेष । 'यस्य'=कुलिशस्य 'स्मरणम्'=स्मृति [अपि] 'दैत्यस्त्रीगर्भपाताय'=

दैत्यानाम् असुराणा स्त्रिय रमण्य तासां गर्भस्य भ्रूणस्य पाताय विनाशाय 'कल्पते'= समर्था भवति । यस्य स्मृतिरपि गर्भविनाशेन महती भीतिं जनयति तस्य दर्शन किमु वक्तव्यमिति भाव ।

अत्र मघोना आलम्बनविभाव, तस्य तथाविधं कुलिशमुद्दीपनविभाव., गर्भपातोऽनुभाव, एतैर्गम्यमाना मनोव्यापारविशेषा [आवेगसम्मोहादय] व्यभिचारिभावाः तैरभिव्यक्तः 'रौद्रशक्त्या तु जनित चित्त[illegible]कृव्यद भयम्' इतिलक्षणं भय स्थायिभाव सचेतसां वृत्तौ भयानकाख्यरसपदवींम्प्राप्तश्चमत्कारमाधत्ते, तादृशरसवद्वाक्यमिद रसवदलङ्कारोपेत काव्यमिति बोध्यम् ॥ २६१ ॥†

[पूर्वोक्तिविरोधपरिहार]

वाक्यस्याग्राम्यतायोनि माधुर्ये दर्शितो रस ।
इह त्वष्टरसायत्ता रसवत्ता स्मृता गिराम् ॥ २६२ ॥

इति रसवच्चक्रम्

गुणप्रस्तावे 'मधुर रसवद्वच' इति माधुर्यगुणवत्त्वेन रसवत्त्व काव्यस्योक्तम्, इह पुना रसेनैव 'रसवत्त्वस्य' अलङ्कारत्वमुच्यते इति कथं पूर्वापर विरुद्धमभिधानम् ? इत्याशङ्कायां स्वोक्तिविरोधपरिहारार्थमिदमाह—'वाक्यस्य' इति । 'माधुर्ये =माधुर्यप्रस्तावे 'वाक्यस्य'= काव्यगिराम् 'अग्राम्यतायोनि '=ग्राम्यत्वदोषाभाव एव योनि कारण यस्य स तथाविध 'रस '=रसवद्वच 'दर्शित '=निरूपितम् अर्थात् तत्र अग्राम्यताया रसत्वमुपचारत उक्तम् । 'इह तु =अस्मिन्नलङ्कारप्रस्तावे तु 'गिराम्'=वाच्यवाचां रसवत्ता रसवदलङ्कारभाव 'अष्टरसायत्ता'=अष्टसु रसेषु शृङ्गारादिषु आयत्ता शृङ्गाराद्यष्टरसप्रयुक्तेत्यर्थ' ।

इदमुक्तं भवति—रसव्यञ्जकग्राम्यत्वादिदोषाभावसहकृतालङ्कारादिमत्त्व माधुर्यगुणत्वम् रसवदलङ्कारस्तु रस एवेत्युभयोर्विशेषे नैव पूर्वापराविरुद्धाभिधानम् ।

---

† यथा वा—

नष्ट वर्षवरैर्मनुष्यगणनाभावादपास्य त्रपा-
मन्त कञ्चुकिकञ्चुकस्य विशति त्रासादय वामन ।
पर्यन्ताश्रयिभिर्निजस्य सदृश नाम्न किरातै कृत
कुब्जा नीचतयैव यान्ति शनकैरात्मेक्षणाशङ्किन ॥

अत्र अकस्मादुपस्थितो वानर आलम्बनविभाव, तस्य विकटदशनप्रदर्शनादिरुद्दीपनविभाव, वर्षवरादीनां पलायनाद्यनुभाव, शङ्कादयो व्यभिचारिण तैरेतैरभिव्यक्त 'भय' स्थायी सहृदयहृदये भयानकरसरूपतया परिणमते । इत्येवमन्यदपि यत्र तत्र यथायोग्यमूहनीयम् ॥

इदन्तु बोध्यम्—यद्यपि 'अष्टौ नाट्ये रसाः स्मृताः' इति प्रायोवादः तथापि शान्तोऽपि नवमो रसः स्वीकर्त्तव्य एव । तस्य स्वरूपमुक्तं 'काव्यानुशासने' तथाहि—'वैराग्यादिविभावो यमनियमाध्यात्मशास्त्रचिन्तनाद्यनुभावो धृत्यादिव्यभिचारी शमः [शमस्थायिभावकः] शान्तः' । उदाहरणं यथा—

गङ्गातीरे हिमवति शिलाबद्धपद्मासनस्य
ब्रह्मध्यानाभ्यसनविधिना योगनिद्रां गतस्य ।
किं तैर्भाव्यं मम सुदिवसैर्येषु ते निर्विशङ्काः
कण्डूयन्ते जरठहरिणाः शृङ्गकण्डूं विनेतुम् ॥

अत्र शमः स्थायिभावः । वैराग्यं समाधिर्वा आलम्बनविभावः, गङ्गातीराद्युद्दीपनविभावः, समाध्यनुभावः, धृत्यादयो व्यभिचारिणः, तैरेतैः तृष्णाक्षयरूपः शमः पुष्टिं नीतः शान्तरसस्वरूपेण परिणमते इति दिक् ॥ २१२ ॥

[ऊर्जस्विन उदाहरणम्]

अपकर्त्ताऽहमस्मीति हृदि ते मास्म भूत् भयम् ।
विमुखेषु न मे खड्गः प्रहर्त्तुं जातु वाञ्छति ॥ २९३ ॥

'[illegible]' उदाहरति—'अपकर्त्ता' इति । [सङ्ग्रामे पलायमानं शत्रुम्प्रति [illegible]] । 'अहम्' 'ते'=तव 'अपकर्त्ता'=अपकारकारी [illegible] '[illegible]'=भवामि 'इति'=कारणात् 'ते'=तव 'भयम्'=भीतिः 'मा स्म भूत्'=मा भवतु । 'मे'=मम '[illegible]'=असिः 'विमुखेषु'=पृष्ठदायिषु भीतेष्वित्यर्थः 'जातु'=[illegible] 'प्रहर्त्तुम्'=प्रहारं कर्त्तुम् 'न वाञ्छति'=नैव कामयते न प्रहारपरो भवति [illegible] । [illegible] शरणागतानिति भावः । उक्तञ्च मानवे धर्मशास्त्रे [सप्तमाध्याये]

रिच्यते । उदाहरणान्तर यथा—'क्षुद्रा मन्त्रागमेते विजिहित हरय' * इत्यादि प्रका-शकृतां ज्ञेयम् । एतावता—रसपत्येव काव्ये गौणा वृत्तिमाश्रित्य रसवदलङ्कारत्वेन व्यवहारो दण्डिनां ननु यत्र रस परस्याङ्ग स्यात् तत्रेति सूक्ष्मया दृशा पूर्वापरानुसन्धान-पुर नर पूर्वोक्तमिहाप्यूहनीयम् । इत्थम्—'अनौचित्येन प्रवृत्तो रसो भावश्च रसाभासो भावा-भासश्चेत्युच्यते, स यत्रापरस्याङ्ग तदूर्जस्वित् इत्याधुनिकानां मतानुरोधेन ऊर्जस्विन उदाहर-णान्तरन्त्वभ्यत् । यथा—

त्वत्प्रत्यर्थिवसुन्धरेशतरुणी मन्त्रासत सत्वर
यान्तोर्वीर ! विलुण्ठितु सरभस याता. किराता वने ।
तिष्ठन्ति स्तिमिता प्रस्टपुलकास्ते विस्मृतोपक्रमा-
स्तासामुत्तरलै स्तनैरतितरां लोलैरपाङ्गैरपि ॥

अत्र प्रभुविपयरतिभावस्य शृङ्गाररसाभासोऽङ्गम् । शृङ्गारस्य अननुरक्तराजवनिता-विषयत्वादनौचित्येन प्रवृत्तिरिति तस्याभासत्वम् । यथा वा—

त्वयि लोचनगोचरङ्गते सफल जन्म नृसिंह ! भूपते ! ।
अजनिष्ट ममेति सादर युधि विज्ञापयति द्विषां गण ॥

अत्र पद्ये प्रभुविपयस्य रतिभावस्य तद्विषयद्विपद्गणरतिरूपो भावाभासोऽङ्गम् । यत्तु-कश्चित् एवंविधस्थले तादृशाङ्गत्याभावेन नोर्जस्विव्यवहारो युक्त इत्याचष्टे तन्न, अत्राप्याङ्गिनि श्रोद्धत्यप्रदर्शनसम्भवशात् कविप्रवृत्ते' । प्रत्युत इतरानङ्गेऽपि रसे रसवदलङ्कारत्वेन व्यवहारे परेषा साहस एवाभाति । आह च—'काव्यालङ्कारसार' व्याख्याया 'श्रीम-त्प्रतीहारेन्दुराज'—'तत्र हि रागद्वेषमोहकारणका अनौचित्येन रसभावा उपनिबध्यन्ते अत एव तत्र स्ववत्सनापरिवल्पितत्वेन ऊर्जसो बलस्य विद्यमानत्वात् ऊर्जस्वित्व्यपदेश' इति । उदाहार च—

तथाकामोऽस्य ववृधे यथा हिमगिरे सुताम् ।
सग्रहीतु प्रववृते हठेनोपास्य सत्पथम् ॥

[ग्लोऽग्रे यथा]—क्षुद्राः सन्त्रासमेते विजहित हरयः क्षुण्णशक्रेभकुम्भा
युष्मद्देहेषु लज्जां दधति परममी सायका निष्पतन्त ।
सौमित्रे ! तिष्ठ पात्र त्वमसि नहि रुषां नन्वहं मेघनाद
किञ्चिद्भ्रूभङ्गलीलानियमितजलधि राममन्वेषयामि ॥

अत्र राम आलम्बनम । तत्समुद्रबन्धनसहायनम उद्दीपनम् ... राम प्रतिपक्षी अनुभावो, गर्व्वो गर्वः व्यभिचारी, उत्साह स्थायिभाव तदभिः ... ... । अत्र 'गर्वादि व्यभिचारिभावस्य उत्साहरूपस्थायिनिर्वेदिनिर्वहणत्वा- ... किन्तु रसवदलङ्कारत्व नाति दर्शितम् ॥ २६२ ॥

अत्र सकललोकातिशायिनो भगवतोऽकृतविवाहकुमारीविषयतया हठसंग्रहः शास्त्र मविद्विरुद्ध प्रवृद्धरागकारणक उपनिबद्ध । तेन ऊर्जस्विता ।

अपिच—रसाभासादीनां पराङ्गतायामेव ऊर्जस्विव्यवहारो युक्त । तथा चाह—'उद्भटभट्ट'

अनौचित्यप्रवृत्तानां कामक्रोधादिकारणात् ।

भावानाञ्च रसानाञ्च बन्ध ऊर्जस्वि कथ्यते ॥ इति ।

तस्मात्—'तथास्तु रसाभासो भावाभासो वा रसान्तरादेरङ्गत्वमापन्न सन् ऊर्ज-स्वदलङ्कारो भवतीत्याचक्षते तत्र रुचिरमित्यादि वदतां 'प्रभा' कारादीनां प्रमाद एव अतिप्राचीनस्योद्भटभट्टस्यापि नवीनै सह सवादसत्त्वात् ॥ २६३ ॥

[ऊर्जस्विस्वरूपयोजना]

एवमुक्त्का परो युद्धे निरुद्धो दर्पशालिना ।

पुंसा केनापि तज्ज्ञेयमूर्जस्वीत्येवमादिकम् ॥ २६४ ॥

उक्तोदाहरणे ऊर्जस्व्यलङ्कार स्वय स्पष्टयति—'एवम्' इति । 'दर्पशालिना'=साह ङ्कारेण 'केन अपि'=वीरेण 'पुंसा'=पुरुषेण राज्ञेत्यर्थ । 'एवम्'=उक्तरूप वचनम् 'उक्त्का'= [illegible] 'पर'=शत्रु 'युद्धे'=सङ्ग्रामे 'निरुद्ध'=युद्धकरणाय प्रतिहस्तित 'तत्'= [illegible] 'ऊर्जस्वि एवमादिकम्'=उक्तप्रकारप्रभृति रसान्तरेऽपि तथाविधो गर्व 'ऊर्जस्वि [illegible] अलङ्काररूपेण परिगणितो बोद्धव्य । अत्र यत कथनीय तदग्रतोऽनुसन्धेयम् । २६४ ॥

[अथ पर्यायोक्तस्य लक्षणम्]

अर्थमिष्टमनाख्याय साक्षात्तस्यैव सिद्धये ।

यत् प्रकारान्तराख्यानं पर्यायोक्त तदिष्यते ॥ २६५ ॥

—०—

वाच्यवाचकभावभिन्नेन व्यञ्जनव्यापारेणार्थाद् वाच्यस्यैव यदभिधानं तत्पर्यायोक्तमिति लक्षणसार । उक्तञ्च 'उद्भटभट्टेन'—

पर्यायोक्तं यदन्येन प्रकारेणाभिधीयते ।
वाच्यवाचकवृत्तिभ्यां शून्येनावगमात्मना ॥ इति ।

तथाच—'विवक्षितस्य प्रकारातिरिक्तेन चारुतरेण रूपेण व्यङ्ग्यस्याभिधानं पर्यायोक्त'मित्युक्तं भवति । पर्यायेण भङ्ग्यन्तरेणोक्तमभिहितं व्यङ्ग्यं यत्रेति व्युत्पत्तेः । यद्यपि व्यङ्ग्यस्याभिधानं न युज्यते विरोधात्, तथापि प्रकारभेदेनाविरोध एव तदुक्तम्—'यदेवोच्यते तदेव व्यङ्ग्यं यथा तु व्यङ्ग्यं न तथोच्यते' इति । * ॥ २६५ ॥

[पर्यायोक्तस्योदाहरणं]

दशत्यसौ परभृतः सहकारस्य मञ्जरीम् ।
तमहं वारयिष्यामि युवाभ्यां स्वैरमास्यताम् ॥ २६६ ॥

पर्यायोक्तमुदाहरति—'दशति' इति । 'असौ'=सन्निकृष्टवर्त्ती 'परभृतः'=पिकः 'सहकारस्य'=चूतस्य [लताकुञ्जस्य बहिः प्रदेशे वर्त्तमानस्येति शेषः] 'मञ्जरीम्'=वल्लरीं 'दशति'=त्रोटया खण्डयतीत्यर्थः । 'तम्'=पिकम् 'अहम् वारयिष्यामि'=उड्डाययिष्यामि । 'युवाभ्याम् [इह] स्वैरम्'=स्वच्छन्दम् 'आस्यताम्'=उपविश्यताम् ।

अत्र मयि स्थितायां नायकनायिकयो रतिमहो निर्विघ्नो भवितुं नार्हति इत्यालोच्य ममातोऽपसरणमेवोचितम् इति च विभाव्य 'अस्मात्स्थानादहं यास्यामि' इति वाचकशब्दाभ्यामिमर्थं साक्षादनाख्याय पिकवारणव्याजेन स एवार्थो भङ्ग्यन्तरेण प्रत्यायित [व्यञ्जित] इति तदेव पर्यायोक्तम् ॥ २६६ ॥

[लक्ष्ये लक्षणयोजनम्]

सङ्गमय्य सखीं यूना संकेते तद्रतोत्सवम् ।
निर्वर्त्तयितुमिच्छन्त्या कयाप्यपसृतं ततः ॥ २६७ ॥

इति पर्यायोक्तम्

— —

पर्यायोक्तलक्षणसङ्गमनं दिग्दर्शयति—'सङ्गमय्य' इति । 'संकेते'=रतिविलासाय गते सङ्केतस्थाने 'सखीम्'=वयस्याम् 'यूना'=तरुणेन 'सह सङ्गमय्य'=मेलयित्वा 'तद्रतोत्सवम्'=तयोर्यूनोर्भोगविलासं 'निर्वर्त्तयितुम्'=साधयितुम् 'इच्छन्त्या'=अभिलषन्त्या 'कया

* यथा—रविव्यवहारानन्तरं जायमानम् 'गच्छ विचिन्' इत्याकारकं निषेधरूपं सम्बन्धरूपताद्धि निषिद्धमेव ज्ञानम् तदेवोत्तरकाले 'गौरस्य' इत्याकारकं ज्ञातादिसंसर्गतादात्म्यादि सविकल्पकं भवति, परन्तुभयोरपरे प्रकारे च विभेद एव, एवमेव वाच्यस्यापि व्यञ्जनारूपेण ज्ञापनं नाऽऽरम्भ एतदेव 'भङ्ग्यन्तरेणाभिधानं' मुच्यते इति तत्त्वसार ।

अपि'=क्वाचित् चतुरया 'तत'=तस्मात् स्थानात् 'अपहृतम्'=अपगतमित्यन्वितार्थे । एवञ्च 'अहं गच्छामि' इति साक्षादनभिधाय परभृतोड्डायनव्याजेन स्वगमनोत्तरमाभ्यां निर्विशङ्का रति क्रियताम् इति व्यक्तीकरणं स्पष्टं पर्यायोक्तम् । असमद्भावनया तु इदमुदाहरणं जयदेवोक्तद्वितीयपर्यायलक्षणाक्रान्तम् । तथाहि—

'पर्यायोक्तं' तदप्याहुर्यद्व्याजेनेष्टसाधनम् ।
यामि चूतलतां द्रष्टुं युवाभ्यामास्यतामिह ॥

अत्र नायिकां नायकेन सङ्गमय्य चूतलतादर्शनव्याजेन निर्गच्छन्त्या सख्या तत्स्वा[illegible]नादनन्दप्रसाधनं पर्यायोक्तम् । 'गम्यस्यैव भङ्ग्यन्तरेणाभिधानं पर्यायोक्तम्' इत्य[illegible]र 'व्यक्त' प्रभृतिमतेन उदाहरणान्तरगणि सन्ति बहूनि अपराण्यपि तेषु [illegible]—

[illegible]स्ता नन्दने शच्या केशसम्भोगलालिता ।
[illegible] पारिजातस्य मञ्जर्या यस्य सैनिक ॥

अत्र '[illegible] इन्द्रो जित' इति व्यङ्ग्य कार्यमुखेन वर्णितमिति गम्यप्रकारा[illegible] । यथा वा—

न [illegible] पश्यति यस्यांघ्रि न यस्यांघ्रि न पश्यति ।
[illegible]त्यपरि[illegible]शा [illegible] विभुगुरेस्तव ॥

[illegible] [illegible] रूपाधारगाम्भ्यां गम्यौ रूपान्तराभ्यामभिहितौ ।

[illegible]—

अत्र वीणावादकप्रकारेण तं प्रति कुन्तलः कृत इति कार्यरूपोऽर्थोऽभङ्ग्यन्तरेणोक्तः । एवमादि दर्शितरीत्या अन्यत्रापि ऊहनीयम् ॥ २६७ ॥ *

[अथ समाहितलक्षणम्]

किञ्चिदारभमाणस्य कार्यं दैववशात् पुनः ।
तत्साधनसमापत्तिर्या तदाहुः समाहितम् ॥ २६८ ॥

— —

समाहिता हि पश्यन्ति यस्य रूपं निरञ्जनम् ।
धर्ममेघविताताय तस्मै योगात्मने नमः ॥

— —

क्रमप्राप्तं समाहितं लक्षयति—'किञ्चित्' इति । 'किञ्चित् कार्यम्'=कर्त्तव्यम् 'आरभमाणस्य'=अनुष्ठातुमुपक्रमाणस्य 'दैववशात्'=अकारणत एव 'पुनः' या तत्साधनसमापत्तिः'=तस्य साधनं तत्साधनं तत्समाधानं तस्य या समापत्तिः संयोगः साधनसौकर्यमिति यावत् 'तत् समाहितम्'=नामालङ्कारम् 'आहुः'=कथयन्ति प्रारिम्भितकार्यसमाधानरूपत्वात्समाहितमित्यन्वर्थेयं संज्ञा ॥ २६८ ॥

[समाहितस्योदाहरणम्]

मानमस्या निराकर्त्तुं पादयोर्मे पतिष्यतः ।
उपकाराय दिष्ट्यैतदुदीर्णं घनगर्जितम् ॥ २६९ ॥

— —

इति समाहितम्

— —

समाहितमुदाहरति—'मानम्' इति । 'अस्याः'=मानिन्याः 'मानम्'=गर्वं प्रणयकोपं 'निराकर्त्तुम्'=दूरीकर्त्तुम् 'पादयोः'=चरणयोः 'पतिष्यतः'=पतनं करिष्यतः, 'मे'=मम 'उपकाराय'=हिताय 'दिष्ट्या'=दैववशात् 'घनगर्जितम्'=मेघगर्जना 'उदीर्णम्'=उदितम् ।

अत्र मानिन्या मानभङ्गार्थं पादपतनरूपे कार्ये प्रवृत्तस्य दैववशादुदितेन घनगर्जितेन अङ्गेन तत्समाधानं जातमिति समाहितालङ्कारः । 'जयदेव' मते अयमेव 'समाधि' रिति नाम । 'वाग्भट'स्तु समाधिरेव 'समाहित' नामाह—

कारणान्तरसम्पत्तिर्यदारम्भ एव हि ।
सद् कार्यस्य भावेन तज्ज्ञेयं समाहितम् ॥ इति ।

---

* रसगङ्गाधरादिग्रन्थेषु सूक्ष्मो विचारः कृतः । पर्यायोक्तस्य अनिरुद्धिमनरत्नाकरमतस्तु—'इह अर्थान्तरमन्यथा इ यस्मिन्विषये 'एष दर्पोऽस्य दर्शनेन' 'पदेनान्यस्य अभाव ... पर्यायोक्तादिदं ...' इत्येतत्...र्दिन्द ।

उदाहरण तस्यैव यथा—

मनस्विनी वल्लभवेश्म गन्तुमुत्कण्ठिता यावदभूनिशायाम् ।
तावन्नवाम्भोधरधीरनादप्रबोधित सौधशिखी चुकूज ॥

अत्र कान्तगृहे गमनकार्यारम्भ पुनस्तत्प्रेरक शिखिशब्द कारणान्तरसम्पातोरिति समाहितम् ।

[प्राच अलङ्कारिकाणां तत्तल्लक्षणेषु सूक्ष्म सूक्ष्ममन्तरं ममाभाति यदि तत्र समालोचनमिह क्रि पाल्येत तदा ग्रन्थभूयस्त्व स्यादिति मत्वा तद्रूपेण मया लेखिनी धार्यते नैव विता] 'यातु भावस्य प्रशाम्यदवस्था भावशान्ति, तस्या पराङ्गत्वे समाहितम्' इति ये वदन्ति तन्मते समाहितोदाहरणन्तु—

पदाम किमेय प्रयत इति स्थैर्यं मयालम्बितं
किं मां नालपतीत्यय खलु शठ ! कोपस्तयाप्याश्रितः ।
इत्यन्योन्यविलक्षदृष्टिचतुरे तस्मिन्नवस्थान्तरे
सव्याज हसित मया धृतिहरो मुक्तस्तु बाष्पस्तया ॥

अत्र भावस्य कोपशान्तिरङ्गमिति समाहितम् । एतेनैवाभिप्रायेण 'भट्टोद्भटः'
'रसभावतदाभासानां प्रशमबन्धनम् ।

इत्यमर] तस्य, 'वा'=अथवा 'विभूते'=ऐश्वर्यस्य [विभूतिर्भूतिरैश्वर्यम्' इत्यमर] यत् 'अनुत्तमम्'=नास्त्युत्तम यस्मात् तत् लोकोत्तर 'महत्त्वम्'=महिमा आधिक्यमिति यावत् 'निरूप्यते' इति शेष । 'मनीषिण'=अलङ्कारशास्त्रविद पण्डिता तम् अलङ्कारम् उदात्त नाम प्राहु'=उदात्ताख्य वदन्तीत्यर्थ । वर्ण्यस्य [राजादे] महाशयत्ववर्णन, लोकोत्तरसम्पत्तिशालित्ववर्णनञ्चेति द्विविधमुदात्तमित्यर्थ । उत्कर्षेण आदीयते गृह्यते-ऽनेनेति उदात्तम्' । कर्मणि 'निष्ठा [३।२।१०२] इति सूत्रेण 'क्त' प्रत्यय 'अच-उपसर्गात्त' [७ । ४ । ४७] इति सूत्रेण तादेश ।

'लोकोत्तर'मिति कथनेन कविप्रतिभोत्थापितमैश्वर्यलक्षणम्, असम्भाव्यमानविभूति-मतो वस्तुनो वर्णनञ्चेति फलति । तेन स्वभावोक्त्यलङ्कारे भाविकालङ्कारे च यथावस्थित-वस्तुवर्णनात् उदात्तेन सह तयोर्द्वयोर्भेद इति बोध्यम् ॥ ३०० ॥

[उदात्तस्योदाहरणम्]

गुरो शासनमत्येतुं न शशाक स राघवः ।
यो रावणशिरच्छेदकार्यभारे ऽप्यविक्लव ॥ ३०१ ॥

तत्रायम् 'आशयमहत्त्ववर्णनाख्यम्' उदात्तमुदाहरति—'गुरो' इति । 'स' सर्वलोक-[शास्त्र] प्रसिद्ध 'राघव'=श्रीरामचन्द्र 'गुरो'=पितु 'शासनम्'=राज्य परित्यज्य चतुर्दशवर्षपर्यन्त वनवासकरणरूपामाज्ञाम् 'अत्येतुम्'=उल्लङ्घयितुम 'न'=नैव [कदापि] 'शशाक'=शक्तोनाभूदित्यर्थ । स क 'य'='रावणशिरच्छेदकार्यभारे'=रावणस्य दशकन्धरस्य शिरसा दशानामप्युत्तमाङ्गाना छेद कर्तनमेव कार्यम् अनुष्ठेय कृत्य तस्य भारे प्रपञ्चे 'अपि'=अविक्लव'=वैक्लव्यरहित ।

अत्रातिमात्रसगाध्ये रावणवधरूपे कार्येऽपि सर्वथा क्षोभरहितस्य रामस्य यद्राज्यच्यु-तिस्वीकारपितृशासनपरिपालन तद्धर्मपरतन्त्रतया ऽस्य लोकातीतां महाशयतामवगमयतीति 'आशयमहत्त्ववर्णन' नामोदात्तम् ॥ ३०१ ॥

रत्नभित्तिषु संक्रान्तै प्रतिबिम्बशतैर्वृत ।
ज्ञातो लङ्केश्वर कृच्छ्रादाञ्जनेयेन तत्त्वत ॥ ३०२ ॥

'विभूतिमहत्त्ववर्णनम्' उदात्तमुदाहरति—'रत्नभित्तिषु' इति । 'आञ्जनेयेन'=अञ्जना पुत्रेण हनूमता 'रत्नभित्तिषु'=रत्ननिर्मितकुड्येषु 'संक्रान्तै'=प्रतिफलितै 'प्रतिबिम्बशतै' असंख्यातप्रतिरूपै 'वृत'=परितोव्याप्त 'लङ्केश्वर'=लङ्काया अधिपती रावण 'कृच्छ्रात्'=अतिकष्टेन 'तत्त्वत'=यथातथ्येन 'ज्ञात'=निश्चित अयमेव रावण इति । हनूमता रावणस्य तत्त्वतोऽवगति प्रतिबिम्बशतावृतत्वमेव कारणम् ।

अत्र लङ्केश्वरस्य प्रासादभित्तीना प्रतिबिम्बग्राहित्वरत्नमयत्ववर्णनेन महती विभूति प्रतीयतेति विभूतिमहत्त्ववर्णन मुदात्त मिद ध्वितम ।

उपदेशयुक्तमुदात्तालङ्कारमुदाहरति । यथा—

'उदात्तमृद्धिमच्चरितं श्लाघ्यं चान्योपलक्षणम्' ।

सानौ यस्याभवद् युद्धं तद्धूर्जटिकिरीटिनो ॥ इति ॥

अत्रोत्तरार्धभाग उदाहरणम् । धूर्जटिकिरीटिनो श्लाघ्ययुद्धात्मकचरितवर्णनेन उदात्तालङ्कार । ऋद्धयुदाहरणन्तु मूल एवोक्त ज्ञेयम् ॥३०२॥

[द्विविधस्याप्युदात्तस्य सोपसंहार लक्षणसङ्गमनप्रकार]

पूर्वत्राशयमाहात्म्यमत्राभ्युदयगौरवम् ।

सुव्यञ्जितमिति प्रोक्तमुदात्तद्वयमप्यद ॥ ३०३ ॥

इति उदात्तम् ।

द्विविधमप्युदात्तमुपसंहरति—'पूर्वत्र' इति । 'पूर्वत्र'='गुरो' रित्युदाहरणे 'आशय माहात्म्यम्'=अभिप्रायस्य मानसव्यापारस्य गौरवम् । 'अत्र=द्वितीयस्मिन् 'रत्नभित्तिषु सङ्क्रान्ते' रित्युदाहरणे 'अभ्युदयस्य'=समृद्धे [सम्पत्ते] 'गौरवम्'=उत्कर्षः 'सुव्यञ्जितम्'= [illegible] नीतम् 'इति=अस्माद्धेतो 'अद द्वयम् अपि उदात्तम्'=अयं द्विविधो [illegible]लङ्कार 'प्रोक्तम्'=वर्णित इत्यर्थ ।

[illegible] हेतोर्निरूपस्यापि द्वैविध्यम् इति हेतोरुदात्तस्य द्वौ भेदौ युक्तिरायाते- [illegible] ।

[illegible] प्रस्तुतस्याङ्गत्वेन वर्ण्यमानं महतां चरितमप्युदात्तं वदन्ति, यदाहुः '[illegible] प्रस्तुतस्याङ्ग महतां चरितं भवेत्' इति । कथितं महतां चरितं प्रस्तुतस्याङ्गत्वेन [illegible] तत्प्राचीनोद्भटादिग्रन्थादर्शनमूलकमेव । तथा च—

उदाहरणान्तरं यथा वा—

चिन्तामणिश्चरणभूषणमङ्गनानां शृङ्गारपुष्पतरवस्तरवः सुराणाम् ।
वृन्दावने व्रजधनं ननु कामधेनुवृन्दानि चेति सुखसिन्धुरहो विभूतिः ॥

अत्र वृन्दावनविभूतिवर्णनमुदात्तता ।

यत्र प्रधानमप्यङ्गतां गच्छति तदुदाहरणमन्यत् यथा—

सेयं मधुरा नगरी सुरगुरुभिर्याचितो भगवान् ।
यत्रावतार्य शतशः सुरद्विषो हेलया न्यवधीत् ॥

अत्र वीरो नगर्यङ्गम् ॥ २०३ ॥

[अपह्नुतेर्लक्षणम्]

[१] अपह्नुतिरपह्नुत्य किञ्चिदन्यार्थदर्शनम् ।
न पञ्चेषुः स्मरस्तस्य सहस्रं पत्रिणामिति ॥ २०४ ॥

अपह्नुतिर्न यस्यास्ति सर्वानुभवसाक्षिणः ।
तमनन्तमहाशक्तिं कृष्णं वन्दे जगत्प्रियम् ॥ १ ॥

क्रमप्राप्तामपह्नुतिं लक्ष्यलक्षणाभ्यां निरूपयति—'अपह्नुतिः' इति । 'किञ्चित्'=यत् किमपि वर्णनीयस्य गुणक्रियादिरूपं धर्मम् 'अपह्नुत्य'=अपलाप्य असत्यतया प्रतिपाद्येत्यर्थः 'अन्यार्थदर्शनम्'=अन्यस्य अर्थस्य अप्रस्तुतधर्मान्तरस्य दर्शनं सत्यत्वप्रख्यापनम् सत्यत्वेन निश्चयीकरणमिति यावत् [सा] 'अपह्नुतिः'=अपह्नुतिनामालङ्कारः स्यात् । उत्तरार्धेनोदाहरति—'न' इति । 'स्मरः'=कामः 'तस्य'=नायकस्य [कृते] 'पञ्चेषुः'= पञ्च इषवो बाणा यस्य सः तथाभूतो 'न'=नास्ति [किन्तु] 'पत्रिणाम्'=बाणानां 'सहस्रम्'=सहस्रसङ्ख्यत्वम् 'अस्ति' इति शेषः ।

अत्र स्मरस्य पञ्चेषुत्वरूपं धर्मं निषिध्य तस्मिन् सहस्रबाणतारूपस्य अन्यस्यार्थस्य [धर्मस्य] सत्यत्वेनावस्थापनमेव कृतम् इति अपह्नुतिरिति ।

ननु स्यात् भ्रमः—अपह्नुतौ प्रकृतधर्मनिषेधपूर्वको धर्मान्तरारोपः । रूपकालङ्कारे तु नैव प्रकृतधर्मनिषेधः । तस्मादपह्नुतौ रूपके धर्मिणमेव प्रकृतं निषिध्य धर्मान्तरारोप इति रूपकापह्नुत्योर्भेदः [illegible] निषेधो न भवतीति [illegible] । [illegible] अत्र तु [illegible] आरोपे तु केवलं निषेध एव [illegible]—'प्रकृतस्य [illegible] निषेधरूपेति' [illegible] प्रस्तुतनिषेध [illegible] ।

[प्र०] [illegible] [illegible] [द्र०] [illegible] पृ० ८० ८८ ।

[illegible] श्रीविश्वनाथेन [illegible] ।

[विषयापन्हुतेरुदाहरणम्]

चन्दनं चन्द्रिका मन्दो गन्धवाहश्च दक्षिणः ।
सेयमग्निमयी सृष्टि र्मयि शीता परान्प्रति ॥ ३०५ ॥

अपन्हुतेर्भेदान्तराणि दिदर्शयिषुरादौ 'विषयापन्हुति' माह—'चन्दनम्'=मलयजम 'चन्द्रिका=ज्योत्स्ना [तथा] 'मन्द '=मन्दगमन 'दक्षिण '=दक्षिणादिग्वाही गन्धवाह च'=पवनश्च [इति] 'अयम् 'सृष्टि '=विधातृकृत सर्ग 'मयि =विरहिणो विरहिणि वा 'अग्निमयी'=अनलरूपा तद्दाहकत्वात् 'प्रतीयते' इति शेष । 'परान् प्रति = मद्भिन्नान् प्रति 'शीता'=तापनिवर्त्तकत्वेन सुखकरीतिभाव ॥ ३०५ ॥

[विषयापन्हुतिस्वरूपयोजना]

शैशिर्यमभ्युपेत्यैव परेष्वात्मनि कामिना ।
औष्ण्यप्रकाशनात्तस्य सेयं विषयनिन्हुति ॥ ३०६ ॥

उक्तोदाहरणे विषयापन्हुतिस्वरूप स्वय योजयति—'शैशिर्यम्' इति । आ 'कामिना =मदनावेशवता पुसा 'परेषु'=स्वभिन्नेषु 'शैशिर्यम्'=शिशिरस्य भाव' शैशिर्यम् शीतलत्वम् 'अभ्युपेत्य'=आरोप्य 'तस्यैव'=शीतलत्वधर्मस्यैव 'आत्मनि'=स्वस्मिन् [मदीये] 'औष्ण्यप्रकाशनात् अग्निमयत्वधर्मारोपणेन चन्दनादीनां दाहकत्वकार्त्तनात् 'सा इयं विषयनिन्हुति '=एवम्प्रकारा सेय विषयापन्हुतिरित्यर्थ ।

अत्र प्रस्तुतस्य चन्दनचन्द्रिकादेर्निषेध्यो धर्म शैत्यम्, आरोप्यो धर्मस्तापकत्वम् [illegible] विषयप्रतिपादनात् इय विषयापन्हुतिरित्युच्यते । इन्तु

अयि ! विधु परिपृच्छ गुरो कुत स्फुटमशिक्ष्यत दाहवदान्यता ।
ग्लपितशम्भुगलाद्गरलात्त्वया किमुदधौ जड वा वडवानलात् ॥

इत्याकलितवान् ।

'शब्दमात्र व्युत्पत्तिसिद्ध'मित्येक मत तत्र व्युत्पत्तिलभ्योऽर्थो घटेत नवा घटेत इति तु नाग्रह । एवञ्च चन्द्रचन्द्रम प्रभृति सञ्ज्ञाशब्दाना 'चन्दति किरणैराह्लादयति इति चन्द्र , चन्द्र मन मस्यति परिणमते इति चन्द्रमा इत्येवमादि व्युत्पत्तिमात्रमेव नतूक्तेऽर्थे एतेषां पदाना शक्तिरपि यथा गृहाद्यर्थवाचकानां मण्डपादिशब्दानां मण्डपानकर्त्रादिरूपे योगार्थे न शक्ति , किन्तु रूढा अमी शब्दा एवमेव चन्द्राद्या अपि शब्दा इन्द्वादिरूपेऽर्थे रूढा नत्वमीषां कश्चन योगशक्तिलभ्योऽर्थोऽस्ति इति कविगुम्फनाया सार ।

इत्थ चन्द्रस्य अमृतस्यन्दिकिरणैराह्लादकत्व निषिध्यारोप्य च दर्शयति—'अन्य एवायम्' इति । 'अर्थात्मा'=तादृशपदप्रतिपाद्ययोगार्थ. आत्मा स्वरूप यस्य स तादृश 'चन्द्रमा अन्य एव'=प्रसिद्धचन्द्राद् भिन्न एव । 'अयम्'=प्रसिद्ध [तु] 'विषनिष्यन्दिदीधिति '=विषस्य गरलस्य निष्यन्दिन्य प्रस्राविण्यो दीधितय किरणा यस्य स तथाविधोऽस्ति । [कस्यचिद्विरहिण उक्तिरियम्] ।

अत्र चन्द्रे अमृतनिष्यन्दिकिरणत्वधर्मनिषेधपूर्वको विषनिष्यन्दिकिरणत्वधर्मारोप. कृत । एवञ्च 'स्व रूप्यते निरूप्यतेऽनेनेति स्वरूपम् नैसर्गिकगुणक्रियादिरूपो धर्म तन्निषेधपूर्वकत्वादियमन्वर्थसञ्ज्ञा स्वरूपापह्नुतिरिति ॥ २०७ ॥

[स्वरूपापह्नुतिस्वरूपयोजना]

इति चन्द्रत्वमेवेन्दो निवर्त्यार्थान्तरात्मना ।
उक्ता स्मरार्त्तेनेत्येषा स्वरूपापह्नुतिर्मता ॥ २०८ ॥

उक्तोदाहरणे स्वय स्वरूपापह्नुतिस्वरूप योजयति—'इति' इति । 'इति'=उक्तया रीत्या 'स्मरार्त्तेन'=केनापि मदनातुरेण कामिना पुसा 'इन्दो'=चन्द्रमस 'चन्द्रत्वम्'=असाधारणो धर्म 'निवर्त्य एव'=निषिध्यैव [या] 'अर्थान्तरात्मना'=वस्त्वन्तरस्वरूपत्व विषनिष्यन्दिदीधित्वरूपम् 'उक्ता'=कथिता आरोपिता [सा] 'एषा स्वरूपापह्नुति '=तन्नाम्नी अलङ्कृति 'मता'=इष्टा 'कविभि 'रिति शेष । स्वरूपस्य=स्वत सिद्धस्य धर्मस्य अपह्नवपूर्वकत्वादपह्नुतिरियमन्वर्थसञ्ज्ञा नाम ॥ २०८ ॥

[अपह्नुतेरुपसंहार]

उपमापह्नुति पूर्वमुपमास्वेव दर्शिता ।
इत्यपह्नुतिभेदाना लक्ष्यो लक्ष्येषु विस्तर ॥ २०९ ॥

—•—

॥ इत्यपह्नुतिचक्रम् ॥

— —

अपह्नुतिमुपसंहरति—'उपमापह्नुति' रिति। 'उपमापह्नुति'=उपमाया सादृश्यस्य अपह्नुतिः आरोप्यनिषेधपूर्वकतदतिशयस्थापनस्वरूपा अपह्नुतिः 'पूर्वम् उपमासु एव दर्शिता'=पूर्वत्रोपमानिरूपणप्रस्तावे एवोक्ता प्रतिषेधोपमायां कथिता।

न जातु शक्तिरिन्दोस्ते मुखेन प्रतिगर्जितुम्।
कलङ्किनो जडस्येति प्रतिषेधोपमैव सा॥ इतिश्लोकेनोक्तेत्यर्थः।

'इति'=अनया दिशा 'अपह्नुतिभेदानाम्'=अपह्नुतिविशेषाणाम् 'लक्ष्येषु'=उदाहरणेषु [उदाहरणान्तरेषु] 'विस्तरः'=अनेकता 'लक्ष्यः'=अनुसन्धातव्यः। ग्रन्थगुरुताभीतिमता मया न बहु विस्तरः कृत इति भावः।

उदाहरणान्तरं यथा [काव्यालङ्कारसारलघुवृत्तौ]

[illegible] न तप[illegible] सत्यमिदं हालाहलं विषम्।
[illegible] शशिकलाकोमलानां भवादृशाम्॥

अत्र [illegible] तपस[illegible] स्वरूपमपह्नुत्य हालाहलविशेषत्वं व्यवस्थापितम्। [illegible]—'उपमेयमसत्यं कृत्वा उपमानस्य सत्यतया स्थापनमेव' इति। [illegible]—

[illegible]मुखा[illegible]मत्यायतेक्षणमिदं बत नास्यमास्यम्।
[illegible]युगं समागतं स्वयमसौ विधिना चन्द्रः॥

[[illegible] श्रीराधाया वदनस्य सखीकर्त्तृकं वर्णनमिदम्] [illegible] [illegible] अस्यम् आस्यं न भवति किन्तु बन्धूकेत्यादिविशेषणविशिष्ट[illegible] उपमेयभूतं मुखमसत्यं कृत्वा उपमानभूतश्चन्द्र एव सत्यत्वेन स्थापित। [illegible]— [illegible] मुखचन्द्रेण निर्जितो हन्त! लज्जितः।
[illegible]के प्राणहानिच्छया विधुः॥

ग्रीष्मवर्णनमेतत् । अत्र नेयं दवाग्निशिखा अपि तु जिह्वेति छलपदप्रयोगात् प्रतीयत इतीयमपि कैतवापह्नुतिः । अत्र तु आचार्येण—विषयापह्नुतिः, स्वरूपापह्नुतिः, उपमापह्नुतिः, इति अपह्नुतेः प्रकारत्रयं निरूप्य 'इत्यपह्नुतिभेदानां लक्ष्यो लक्ष्येषु विस्तरः' इति आचार्यान्तरोक्तापह्नुतिभेदसङ्ग्रहीकरणायोक्तम् तेन शुद्धापह्नुतिः * हेत्वपह्नुतिः, † पर्यस्तापह्नुतिः, ‡ भ्रान्तापह्नुतिः, ¶ छेकापह्नुतिः इत्याद्या अपि भेदा दण्डिना सम्मता एवाभान्ति किन्तु शुद्धापह्नुतिरेव च स्वरूपापह्नुतिः । यथा—'नायं सुधांशुः किं तर्हि व्योमगङ्गासरोरुहम्' इति । अत्राहुः 'अप्पय्यदीक्षिताः'—वर्णनीये वस्तुनि तत्सदृशधर्मारोपफलकतदीयधर्मनिह्नवः कविमतिविकासोत्प्रेक्षितधर्मान्तरस्यापि निह्नवः शुद्धापह्नुतिः । यथा चन्द्रे वियन्नदीपुण्डरीकत्वारोपफलकस्तदीयधर्मस्य चन्द्रत्वस्यापह्नवः । एवमेव 'अमृतस्यन्दिकिरणः' इति सूत्रकृदुक्तस्वरूपापह्नुत्युदाहरणेऽपि 'इति चन्द्रत्वमेवेन्दौ' इत्यादिना चन्द्रत्वस्वरूपं निषिध्य तत्र धर्मान्तरस्यैवारोपः प्रदर्शितः । परन्तु—आरोपस्य सादृश्यमूलकत्वं प्रकृते वस्तुनि धर्मनिह्नवं चानादृत्य यत्किञ्चिद् धर्मनिह्नवपूर्वकयत्किञ्चिद्धर्मारोपमात्रमपह्नवः मत्वैव दण्डिनो लक्षणप्रणयनप्रयासो नापह्नोतुं शक्यत इति सुधियो विदाङ्कुर्वन्तु, तल्लक्षणयोजनप्रकारस्त्वास्माभिः प्रदर्शित एवेति दिक् ॥ ३०९ ॥

[श्लेषवर्णनम्]

श्लिष्टमिष्टमनेकार्थमेकरूपान्वितं वचः ।
तदभिन्नपदं भिन्नपदप्रायमिति द्विधा ॥ ३१० ॥

---

* 'नेन्दुस्तीव्रो न निश्यर्कः सिन्धोरौर्वोऽयमुत्थितः' इति । अत्र चन्द्रे एव तीव्रत्वदर्शनात्वश्रुतिभ्यां चन्द्रत्वसूर्यत्वापह्नवो वडवानलत्वारोपार्थः ।

† 'नायं सुधांशुः किन्तर्हि सुधांशुः प्रेयसीमुखम्' इति । 'यत्र क्वचित् वस्तुनि तदीयधर्मनिह्नवः [अन्यत्र] वर्णनीये वस्तुनि तस्य धर्मस्यारोपार्थः सा पर्यस्तापह्नुतिः' यथा—[उक्तोदाहरणे] चन्द्रे चन्द्रत्वनिह्नवो वर्णनीये मुखे तदारोपार्थः ।

‡ 'तापं करोति सोत्कम्पं ज्वरः किं? न सखि! स्मरः' इति । अत्र तापं करोतीति [illegible] वर्णिते तस्य ज्वरसाधारण्यात् ऋजुबुद्ध्या सख्या ज्वरः किमिति पृष्टे 'न सखि! स्मरः' इति तत्त्वोक्त्या भ्रान्तिवारणं कृतम् ।

¶ 'प्रेक्षणपर्वणि [illegible] कान्तः किं? नहि नूपुरः' इति कस्याश्चित् कश्चित् प्रति [illegible] तापसान्तरवर्णनेन तन्निह्नवे छेकापह्नुतिः [छेकोक्तिरूपा अपह्नुतिः] यथा—[illegible] प्रति [illegible] इति [illegible] 'किम्' इति [illegible] प्रति 'नूपुर' [illegible] । [illegible] उदाहरणानि [illegible] [illegible] । [illegible] ।

शब्दगतमर्थगतञ्च श्लेषमेकेनैव पद्येन लक्षयति—'श्लिष्टम्' इति । 'अनेकार्थम्'= अभिधाख्यया शब्दवृत्त्या युगपदनेकार्थप्रतिपादकपदोपेतम् तथा 'एकरूपान्वितम्'=एकेन समानेन [अभिन्नेन] रूपेण आकारेण अन्वितम् युक्तम् अर्थात् अर्थभेदेन भिन्नत्वेऽपि युगपदुच्चारणविषयता प्राप्तेन एकेनैव स्वरूपेण युक्तम् 'वचः'=वाक्यं 'श्लिष्टम्'= श्लेषालङ्कारवदिति लक्षणवाक्यार्थः ।'तत्'=वचः 'अभिन्नपदम्'=अभिन्नानि पदानि यत्र अर्थात् शक्यतावच्छेदकस्य धर्मस्य एकत्वे अनेकत्वे वा अभिन्नप्रकृतिप्रत्ययसमासघटितत्वेन अभिन्नपदवत् तथा 'भिन्नपदप्रायम्'=भिन्नानां प्रकृतिप्रत्ययसमासादिघटितत्वेन विभिन्नरूपाणां पदानां प्रायो बाहुल्यं यत्र तत् तथाविधम् 'इति'=इत्येवमुक्तरूपेण 'द्विधा'=द्विप्रकारम् 'अस्ति' इति शेषः ।

संयोगो विप्रयोगश्च साहचर्यं विरोधिता ।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः ॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः ।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥ इति ॥

तत्र—'**संयोगो** [नाम] पदनानार्थशब्दशक्यान्तरवृत्तितया अप्रसिद्धत्वे सति तच्छक्यवृत्तितया प्रसिद्धः सम्बन्धः अर्थात् समभिव्याहृतपदार्थानां प्रायेण संयोगसम्बन्धः। यथा—'सशङ्खचक्रो हरिः' इत्यत्र शङ्खचक्रसंयोगेन अनेकार्थोऽपि 'हरि' शब्दो विष्णुमेवाभिधत्ते [नतु इन्द्रादिरूपमप्यर्थम्] **विप्रयोगो** विश्लेषः, अर्थात् प्रायेण संयोगापन्नानां समभिव्याहृतपदार्थानां कदाचिद्वियोगः । यथा 'अशङ्खचक्रो हरिः' इत्यत्र तद्वियोगेन तमेव । **साहचर्यम्** एकस्मिन् कार्ये परस्परापेक्षित्वम् । यथा 'भीमार्जुनौ' इत्यत्र भीमसाहचर्यात् अर्जुनः पार्थः नतु कार्त्तवीर्यः । एवमेव 'रामलक्ष्मणौ' इत्यादावपि लक्ष्मणसाहचर्येण 'राम' पदात् दाशरथेर्बोधो नतु बलभद्रस्यापि । **विरोधिता** प्रसिद्धवैरम् । यथा—'कर्णार्जुनौ' इत्यत्र 'कर्ण'पदेन राधेयस्यैव बोधो नतु श्रवणेन्द्रियस्य अर्जुनेन सह तस्य प्रसिद्धवैरात् । **अर्थः** प्रयोजनम् [तात्पर्यम्] । यथा—'स्थाणुं भज भवच्छिदे' इत्यत्र भवच्छेदनप्रयोजनात् 'स्थाणु' पदेन शिवस्यैव बोधः नतु शाखादिहीनस्य तर्वादेः । अथवा 'स्थाणुं वन्दे' इत्यत्र 'वन्दे' पदप्रयोगतात्पर्यात् स्थाणुः शिव एव। **प्रकरणं** प्रस्तावः । यथा—'सर्वं जानाति देवः' इत्यत्र राजप्रस्तावे 'देव' पदस्य युष्मदर्थः शक्तिनिर्णीता नतु अमरेषु । **लिङ्गं** सम्भाव्यमानो धर्मविशेषः । यथा—'कुपितो मकरध्वजः' इत्यत्र प्राणिधर्मकोपलिङ्गात् मकरध्वजः कामः एव नतु समुद्रोऽपि । **अन्यशब्दसन्निधिः** अन्यस्य सन्निधापकस्यान्यस्य शब्दस्य समानविभक्त्यन्तपदस्य सन्निधिस्यवधानम् । यथा—'देवः पुरारिः' इत्यत्र पुरारिः शिवः समानविभक्त्यन्तदेवपदसान्निध्यात् नतु तस्य शत्रुपुरनाशकर्त्ता । अथवा—'करेण राजते नागः' इत्यत्र कर पदस्य नागपदसादाय 'नाग' पदस्य च करपदमादाय करनागपदयोः शुण्डायां गजे च [यथाक्रमं] शक्तिः नतु मनुष्यपाण्यादौ सर्पादौ वा । **सामर्थ्यम्** पदार्थशक्तिः । यथा—'मधुना मत्तः पिकः' इत्यत्र मधुर्वसन्तः पिकमात्रे वसन्तकालस्यैव सामर्थ्यात् तेनात्र न मद्यदेशेऽपि ।

हरिरप्याह—[वाक्यपदीये]
वाक्यात् प्रकरणात्पादादौचित्याद्देशकालतः ।
शब्दार्थाः प्रविभज्यन्ते न रूपादेव केवलात् ॥
संयोगो विप्रयोगश्च साहचर्यं विरोधिता ।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः ॥ इति ॥

। टीका—वाक्यतात्पर्यावबोधकसहकारिणः । [illegible]
[illegible] ॥

[लिङ्गवचनभेदस्यादोषत्ववर्णनम्]

स्त्रीव गच्छति षण्डोऽयं वक्त्येषा स्त्री पुमानिति ।
प्राणा इव प्रियोऽयं मे विद्या धनमिवार्जिता ॥ ५२ ॥

लिङ्गवचनभेदस्यादोषत्वं दर्शयति—'स्त्रीव' इति । 'अयम्'=सम्मुखवर्त्ती 'षण्ड'=क्लीव 'स्त्री इव'=योषेव 'गच्छति'=याति 'एषा स्त्री पुमानिव वक्ति' । अत्रोभयत्र यथाक्रम गमनवचनक्रियारूपस्य साधारणधर्मस्यान्वयात् उपमानोपमेययोर्लिङ्गभेद सत्यपि न दोष श्रोतृणामनुद्वेगकरत्वात् । 'अय जन मे [मम] प्राणा इव प्रिय' । 'प्राणा' इति पदञ्चात्र समूहत्वावच्छेदेन वाचकत्वात् नियतबहुवचनान्त, तेन तत्सदृशपर्यन्तगमप्रसिद्धमिति कृत्वा 'प्राणा यथा प्रिया स्तथाऽय प्रिय इति वचनविपरिणामेनान्वये दोषाभाव । 'धन' पदमपि नियतनपुसकलिङ्गमिति लिङ्गविपरिणामेनान्वयो विधेय अर्थात् 'धन यथाऽर्जितम् तथा विद्याऽर्जिता' इत्यन्वये दोषाभाव । अनया रीत्या धीमतामत्रोद्वेगो न भवतीति उपमानोपमेययोर्लिङ्गवचनादिभेदेऽपि दोषाभावोऽवसेय ।

अन्यत्रापि यत्रोभयत्रान्वययोग्या क्रिया वर्त्तते तत्र दोषाभावो यथा—

तद्वेषोऽसदृशोऽन्याभि स्त्रीभिर्मधुरताभृत ।
दधते स्म परा शोभा* तदीया विभ्रमा इव ॥ इति ।

अत्र 'धादध' धातुभ्यामेकवचने बहुवचने च निष्पन्न 'दधते इति पदम तस्यास्य वचनश्लिष्टस्य क्रियापदस्य उभयत्रोपमानोपमेयवाक्येऽन्वययोग्यत्वाद्दोषाभाव । पुन्नपुसकयोरुपमानोपमेययोर्लिङ्गभेदस्तु प्रायेण दृष्ट इति न दोष । उक्तञ्च वामनेन—'दृष्ट पुन्नपुसकयो. प्रायेण [काव्या० सू० अध्या० २ । सू० १३] अत 'चन्द्र इव मुखम्' 'त्रैलोक्यमिव विष्णुना' इत्यादौ न दोष । लौकिक्यामुपमायां समासाभिहितायामप्युपमायाम् उपमाप्रपञ्चे चेष्टो लिङ्गभेद । उदाहृतमिद वामनेनैव—लौकिक्या यथा—'छायेव स तस्या' 'पुरुष इव स्त्री' इति । समासाभिहितायां यथा—'भुजलता नीलोत्पलसदृशी' इति । तत्र लोकत प्रसिद्धा उपमा लौकिकी । समासेनाभिहिता लुप्ता । उपमाप्रपञ्च प्रतिवस्तुप्रभृति । उपमाप्रपञ्चे यथा—

† शुद्धान्तदुर्लभमिद वपुराश्रमवासिनो यदि जनस्य दूरीकृता खलु गुणैरुद्यानलता वनलताभि । इति 'शुद्धान्तदुर्लभ मित्यत्र प्रतिवस्तूपमा । एवमेव 'नेद नभोमण्डलम म्बुराशि इत्याद्यपह्नुत्यादावपि उपमानोपमेययोर्लिङ्गभेदे दोषाभाव । एवमन्यदपि महाकविप्रयोगगत द्रष्टव्यम् । ५२ ॥

---

* 'डुधाञ्' धारण पोषणयो । इति जुहोत्यादिपठितस्य 'धा धातोर्लटि प्रथमपुरुषस्य बहुवचने रूपम् । तथा 'दध' धारणे इति भ्वादिकस्यैकवचनान्तम् । † अत्राश्रमगमिननदनन्यर्योर्लिङ्गभेद वचनभेदश्च न दोषकर ।

अत्रेदं विलोकितम्—नानार्थेषु यत्रानेकत्र वक्तृतात्पर्यग्राहकं प्रकरणादिकं नावतरति युगपद्वाऽवतरति तत्र श्लेष एव । यत्र प्रकरणाद्यवतारेण एकस्मिन्नेवार्थेऽभिधाया नियन्त्रणम्, तत्र द्वितीयार्थस्य भानमभिधामूलकेन व्यञ्जनेन, परन्तु यत्र विशेष्यं नैव श्लिष्टं प्रकरणादेश्च नावतारो विशेषणानि नानार्थानि तत्र समासोक्तिरेव ।

अपि चैवंविधस्यार्थस्यानेकत्वं क्वचिद् वास्तवं । क्वचिच्च एकरूपत्वेऽपि सम्बन्धिभेदसमुत्थम् । आद्ये 'शब्दश्लेषः' द्वितीये तु अर्थश्लेष इति नवीनानां मतम् । तत्रार्थश्लेषो यथा—

स्तोकेनोन्नतिमायाति स्तोकेनायात्यधोगतिम् ।
अहो सुसदृशी वृत्तिस्तुलाकोटेः खलस्य च ॥

अत्र एकापि उन्नतिः, अधोगतिश्च तुलाकोटिखल [रूप] सम्बन्धिभेदाद् भिन्नरूपेणैव प्रतीयते । दर्पणमते तु सम्बन्धिभेदेन तयोरनेकत्वात् तद्वाचकपदयोरपि अनेकत्वमिति लक्षणसङ्गतिः । शब्दश्लेषो यथा—

अयं सर्वाणि शास्त्राणि हृदि ज्ञेषु च वक्ष्यति ।
सामर्थ्यकृदमित्राणां मित्राणाञ्च नृपात्मजः ॥ इति ।

अत्र [हृदि] 'वक्ष्यति' धारयिष्यति [ज्ञेषु] बुधेषु कथयिष्यति च । सामर्थ्यं कृन्तति, करोतीति च 'सामर्थ्यकृत्' सामर्थ्यच्छेत्ता सामर्थ्यकारकश्चेति यथाक्रममर्थः । 'वक्ष्यति' इति वहिवच्योर्लृटि तुल्यं रूपम् । कृदिति कृन्ततिकरोत्योः क्विपि तुल्यं रूपम् । तदत्र प्रकृत्योरेव भिन्नत्वम् न तु प्रत्ययस्यापि । तदयं वर्णपदलिङ्गभाषाप्रकृतिविभक्तिवचनानां भेदादष्टधा भवति । अयन्तु 'प्रकृतिश्लेषो' दर्शितः ।

[अभिन्नपदश्लेषस्योदाहरणम्]

असावुदयमारूढः कान्तिमान् रक्तमण्डलः ।
राजा हरति लोकस्य हृदयं मृदुभिः करैः ३११ ॥

तत्र क्रमप्राप्तमभिन्नपदश्लेषं [अभङ्गश्लेषं] मुदाहरति—'असौ' इति । 'असौ' पुरो दृश्यमानः 'उदयम्'=उन्नतिम् [ऐश्वर्यम्] उदयाचलञ्च 'आरूढः'=प्राप्तः 'कान्तिमान्'=कमनीयाकारः श्वेतरश्मियुतश्च 'रक्तमण्डलः'=रक्तम् अनुरक्तं मण्डलं प्रकृतिवर्गो यस्येति राजपक्षे, आलोहितबिम्बश्च इति चन्द्रपक्षे । 'राजा'=नृप

स्थलार्थः—स्तोकम्=अल्पम् । उन्नतिम्=ऊर्ध्वगमनम् अभ्युदयञ्च । अधोगतिम्=अधोगमनम् दर्पभ्रंशम् । अधोगतिम्=अधःपतनम् पादपतनमित्यपरे । तुलायाः घटस्य कोटिः अग्रम् । खल=दुर्जनः । सुसदृशी=तुल्या । वृत्तिः=वर्तनम् आचरणमिति यावत् । अत्र 'स्तोकेनोन्नतिमायाति' इत्यादिवाक्ये अनयोः [illegible] तथापि न श्लेषः [illegible] ।

(प्र०) [illegible] पद्योदाहरणं लिखित्वा [illegible] । (उ०) [illegible] पृ० ८० [illegible]

चन्द्रश्च 'मृदुभि'=अनुद्वेगकै प्रजाम्प्रति पीडाया अजनकै शीतलैश्च 'करै'=राजो देयैर्भागैः रश्मिभिश्च, दिधितीभिश्च 'लोकस्य'=प्रजाया 'हृदयम्'=मन 'हरति'=एकत्र तु रञ्जकत्वेन अपरत्र आह्लादकत्वेन हृदयहरणं ज्ञेयम् ।

अत्र प्रकरणादिषु मध्ये न किमपि नियामकं पश्याम, अतः नृपचन्द्रौ द्वावप्यर्थौ मुख्यौ । उदयादीनि पदान्यपि अभिन्नप्रकृतिप्रत्ययै साधितत्वात् अभिन्नानीत्ययमभिन्नपदश्लेष एव 'अभङ्गश्लेष' उच्यते ॥ ३११ ॥

[भिन्नपदश्लेषस्योदाहरणम्]

दोषाकरेण सम्बध्नन् नक्षत्रपथवर्त्तिना ।
राज्ञा प्रदोषो मामित्थमप्रियं किन्न बाधते ॥ ३१२ ॥

[श्लेषस्य अलङ्कारान्तराणामङ्गभाव]

उपमारूपकाक्षेपव्यतिरेकादिगोचरा ।
प्रागेव दर्शिता' श्लेषा दर्श्यन्ते केचनापरे ॥ ३१३ ॥

श्लेषस्य स्वप्रधानतयोदाहरण निरूप्य सम्प्रति अलङ्कारान्तराणामङ्गभावेन त निरूपयितुमाह—'उपमा०' इति। उपमारूपकाक्षेपव्यतिरेकादि गोचरो विषयो येषां ते तथाविधा 'श्लेषा ' प्रागेव'=तत्र तत्र 'दर्शिता '=अलङ्कारान्तरनिर्वाहकत्वेन अङ्गभावेन उक्ता इत्यर्थ । 'केचन अपरे'=दर्शितोपमाद्यलङ्कारभिन्नालङ्काराङ्गभूता अन्ये श्लेषा. 'दर्श्यन्ते'=निरूप्यन्ते ।

तत्रोपमा साधारणधर्मप्रयोगवती ज्ञेया । यत्र तु साधारणधर्मोऽभिन्न तत्र 'अम्भोरुहमिवाताम्रम् इत्यादिसमासोपमाश्लेषोपमादौ 'अर्थश्लेष ' । 'बालेवोद्यानमालेय सालकाननशोभिना' इत्यादिसमानोपमायान्तु 'शब्दश्लेष ' । 'रूपक' मपि साधारणधर्मप्रयोगोपेत श्लिष्टरूपकादिकम् ' । 'आक्षेपस्तु —

अमृतात्मनि पद्मानां द्वेष्टरि स्निग्धतारके ।
मुखेन्दौ तव सत्यस्मिन्नपरेण किमिन्दुना ॥

इत्यादौ 'श्लिष्टाक्षेप । 'व्यतिरेको'ऽपि साधारणधर्मप्रयोगवान् । आदिपदेन अर्थान्तरन्यासमासोक्त्याद्यलङ्काराणा ग्रहणम । एवमाद्यूह्यम् ॥ ३१३ ॥

[वक्ष्यमाणश्लेषभेदोद्देश]

अस्त्यभिन्नक्रिय कश्चिदविरुद्धक्रियोऽपर. ।
विरुद्धकर्मा चास्त्यन्य श्लेषोनियमवानपि ॥ ३१४ ॥
नियमाक्षेपरूपोक्तिरविरोधी विरोध्यपि ।
तेषा निदर्शनेष्वेव रूपमाविर्भविष्यति ॥ ३१५ ॥

निरूपयिष्यमाणश्लेषभेदानाचष्टे—'अस्ति' इति । 'कश्चित् श्लेष अभिन्नक्रिय । कश्चित विरुद्धक्रिय । अपर विरुद्धकर्मा अस्ति। अन्य श्लेष अनियमवान् अपि अस्ति। कश्चित नियमाक्षेपरूपोक्ति, अविरोधी, विरोधी अपि च अस्ति । तेषाम् भेदानाम् 'रूपम् '=लक्षणम स्वरूपम 'निदर्शनेषु'=उदाहरणेषु 'एव आविर्भविष्यति अतोऽत्र पृथक् लक्षणोक्ति प्रयासो व्यर्थ एवेति भाव ॥ ३१४ ३१५ ॥

[अभिन्नक्रियस्य श्लेषस्योदाहरणम]

वक्रा स्वभावमधुरा शंसन्त्यो रागमुल्बणम् ।
दृशो दूत्यश्च कर्षन्ति कान्ताभि प्रेषिता प्रियान् ॥ ३१६ ॥

तत्रादौ अभिन्नक्रिय श्लेषमुदाहरति—'वक्रा' इति । 'वक्रा '=[illegible], कुटिलापाङ्गप्रसरा [illegible] 'स्वभावमधुरा '=स्वभावेन प्रकृत्या मधुरा [illegible] [illegible], [illegible] [illegible] [illegible] 'रागम् '=[illegible], [illegible] 'कान्ताभि '=[illegible]

[अवतरन्य] प्रकाशयन्त्यश्च, एवम्भूता 'कान्ताभि'=नायिकाभि प्रेषिता.'=सनालिना आनेतु प्रयुक्ताश्च 'दृश =चक्षुषि 'दूत्य'=सखीप्रभृतयश्च 'प्रियान्'=वल्लभान् 'कर्षन्ति'= आवर्जयन्ति ।

अत्र वक्रादीनि विशेषणानि श्लिष्टानि तद्विशेष्यभूताना दृशां दूतीनां च 'कर्षन्ति' इति कर्मणान्वित्य एकयैव सम्बन्ध इति 'अभिन्नक्रिय' श्लेष । क्रियात्र वक्ष्यमाणलक्षण स्तुल्ययोगितालङ्कारोपीति तन्निर्वाहकत्वात्तस्याङ्गभूतोय श्लेष । परेतु—एकयैव कर्माणकि दृशा वाक्यदर्शनाद दीपकस्यायमङ्गभूत इत्याहुः ॥ ३१६ ॥

[अविरुद्धक्रियस्य श्लेषस्योदाहरणम्]

मधुरा रागवर्धिन्य' कोमलाः कोकिलागिरः ।
आकर्ण्यन्ते मदकला श्लिष्यन्ते चासितेक्षणा ॥ ३१७ ॥

अत्र तिरोभवनजृम्भणक्रिये परस्पर विरुद्धे इति विरुद्धक्रियाश्लेषोऽयमभङ्ग' पूर्ववत् तुल्ययोगितापरिपोषकर' ॥ ३१८ ॥

[नियामकश्लेषस्योदाहरणम्]

निस्त्रिंशत्वमसावेव धनुष्येवास्य वक्रता ।
शरेष्वेव नरेन्द्रस्य मार्गणत्वञ्च वर्त्तते ॥ ३१९ ॥

'मनियम' श्लेषमुदाहरति—'निस्त्रिंशत्वम्' इति । 'अस्य नरेन्द्रस्य'=प्रकृतस्य राज्ञः निस्त्रिंशत्वम् =निर्गत त्रिंशतोऽङ्गुलिभ्य इति निस्त्रिंशः ['निरादय' क्रान्ताद्यर्थे पञ्चम्या' [वा० २।२।१८] इति समास । 'सङ्ख्यायास्ततपुरुषस्य वाच्य' [वा० ५।४।७३] इति समासान्तो डच् । 'निस्त्रिंशो निर्घृणे खड्गे' इति हेम ।] तस्य भाव निस्त्रिंशत्वम् त्रिंशदङ्गुल्यधिकपरिमाणवत्त्व निर्दयत्वञ्च, 'असौ'=खड्गे एव नतु हृदये इतिभाव । 'वक्रता'=वक्रस्य भाव ['वक्र पुरभेदे वक्र कुटिले क्रूरभौमयो' इति हेम] वक्रता कौटिल्य क्रूरत्वञ्च 'धनुषि एव'=नतु लोकव्यवहारे । 'मार्गणत्वम् =मार्गणस्य भाव मार्गणत्व बाणत्व याचकत्वञ्च 'शरेषु एव'=बाणेष्वेव नतु स्वात्मनीति भाव 'वर्त्तते' इति क्रियापद सर्वत्र योज्यम् ['मार्गण याचनेऽन्वेषे मार्गणस्तु शरेऽर्थिनि' इति हेम] ।

अत्र सर्वत्र एवकारेण निस्त्रिंशत्वादिपदाना द्वितीयार्थो व्यवच्छेद्येषु निषिद्धतारूपेण प्रतीयन्ते इति पदानामनेकार्थत्वात् श्लेष । स तु एवकारेण नियमप्रकाशनात् सनियम, परमय परिसङ्ख्यालङ्कारस्याङ्गभूतो नतु स्वप्रधानम् । परिसङ्ख्यालङ्कारलक्षणमुक्तम् 'आचार्य मम्मटेन'—

किञ्चित् पृष्टमपृष्ट वा कथित यत्प्रकल्पते ।
तादृगन्यव्यपोहाय परिसङ्ख्या तु सा स्मृता ॥ इति ।

सा चेय वाच्या प्रतीयमाना चेति द्विधा भवति । यत्रान्यव्यवच्छेद शब्दोपात्त सा वाच्या । यत्र तु एवकाराद्यभावेऽपि अन्यव्यवच्छेदरूपनियम अर्थसामर्थ्यादेव प्रतीयते सा प्रतीयमाना । तत्राद्या यथा—

कि भूषण सुदृढमत्र यशो न रत्न
कि कार्यमार्यचरित सुकृत न दोष ।
किमप्रतिहत धिषणा न नेत्र
जानाति क स्त्वदपर सदसद्विवेकम् ॥

अत्र प्रश्नपूर्वक भूषणत्वादिकमारोपितो रत्नादेर्'न रत्न' मित्यादि निषेध शब्दम् ।

द्वितीया यथा—

किमासेव्य पुसा सविधमनवद्य द्युसरित
किमेकान्ते ध्येय चरणयुगल कौस्तुभभृत ।

[अविरोधिश्लेषस्योदाहरणम्]

महीभृद् भूरिकटकस्तेजस्वी नियतोदय ।
दक्ष प्रजापतिश्चासीत् स्वामी शक्तिधरश्च स ॥ ३२१ ॥

'अविरोधिश्लेषम्' उदाहरति—'महीभृत्' इति । 'स महीभृत्'=राजा 'भूरिकटक'=प्रचुरस्कन्धावार 'तेजस्वी'=प्रतापवान् तथा 'नियतोदय'=सततैश्वर्यवान् 'दक्ष'=निपुण 'प्रजापति'=प्रजापालक 'स्वामी'=प्रभु 'शक्तिधर'=प्रभावोत्साहमन्त्रशक्तिमान् आसीत् इत्येकस्मिन् पक्षेऽर्थ । द्वितीये पक्षे तु—महीभृत्=पर्वत भूरिकटक विशालनितम्ब तेजस्वी=किरणवान् नियतोदय=प्रतिदिवस जायमानोद्गम दक्ष=तदाख्यो राजा मुनिविशेषश्च प्रजापति=सृष्टिकर्त्ता स्वामी=विशाख शक्तिधर=शक्तिनामकास्त्रविशेषधारी आसीदित्यर्थ ।

अत्र महीभृत्तेजस्विदक्षस्वामिशब्दा राजपक्षे विशेषणानि, पक्षान्तरे च विशेष्यभूता सन्तीति कृत्वाऽन्वयो ज्ञेय । एतेषां श्लिष्टानां महीभृदादिपदार्थानां परस्परसम्बन्धे विरोधाभावात् 'अविरोधी श्लेषो' ऽयमलङ्कार । 'स्वामी प्रभुविशाखयो' इति मेदिनी ॥ ३२१ ॥

[विरोधिश्लेषस्योदाहरणम्]

अच्युतोऽप्यवृषच्छेदी राजाप्यविदितक्षय ।
देवोऽप्यविबुधो जज्ञे शङ्करोऽप्यभुजङ्गवान् ॥ ३२२ ॥

— —

इति श्लेषचक्रम्

—॰—

विरोधिश्लेषमुदाहरति—'अच्युत' इति । 'अच्युत'=सन्मार्गादपरिभ्रष्ट विष्णुश्च । 'अवृषच्छेदी'=वृष धर्म वृषाख्य करानुचरश्च तस्य छेदी ध्वंसकृत् यो न भवतीति स तथोक्त 'राजा'=भूप चन्द्रश्च अपि 'अविदितक्षय'=न विदित ज्ञात क्षय सम्पत्तिनाश क्षयाख्यरोगश्च येन स तथाविध 'देव'=राजा अमरश्चापि 'शङ्कर'=शुभकारी हरश्चापि 'अभुजङ्गवान्'=[विट] दुर्जनरहित सर्परहितश्च 'जज्ञे'=स प्रादुरभूत् । अत्र 'स' इति कर्त्तृपदमध्याहार्यम् ।

अत्र अच्युतादिपदानां द्वितीये विष्ण्वादिरूपेऽर्थे वृषच्छेद्यादिपदलभ्यद्वितीयस्यार्थस्य अभावो विरोधाति विरोधमाधाऽयं श्लेषो विरोधाभासस्याङ्गम् ।

[प्र०] 'श्लेषस्य किं लक्षणम् ? के च प्रकारा ? कानि चोदाहरणानि ? कथञ्च तत्र तत्र सामान्यविशेषलक्षणसङ्गति ? श्लेषविषये प्राचामर्वाचां च कोऽपि मतभेद ? इति सर्वं मूलग्रन्थतद्व्याख्यानुसारं विविच्य निरूपणीयम् ' । [उ०] अस्य प्रकरणात्रम ।

'गुणजातिक्रियादीनाम्'=गुणा शुक्लाद्या', जातिर्गोत्वादि, क्रिया पाकादि, आदिना द्रव्यपरिग्रहः, तेषाम् अर्थात् वर्णनीयस्यैव प्रारिप्सितकर्मसाधनाय उपकरणभूतानाम् 'यत् तु'=यदेव 'वैकल्यदर्शनम्'=कार्यसिद्धौ उपयोगित्वाभावप्रतिपादनम् अनपेक्षणीयत्वनिरूपणं वा 'सा'=कविसमाजे प्रसिद्धा 'विशेषोक्ति'=रागातिशयादेर्विशेषस्य उक्ति', विशेषस्य नवीनप्रकारस्य वा उक्ति' कश्चिद् विशेषं प्रतिपादयितुं वोक्तिरित्यन्वर्थसंज्ञाबलात् 'विशेषोक्ति'रिति नामालङ्कार 'इष्यते'=मन्यते सूरिभिरिति शेष ।

[इह [illegible] श्लोकस्य २८० पृष्ठे टिप्पणी [निवृति] द्रष्टव्यम्] यथा वा—
[हरविजये]

अशशा तल्पलोपात्तमनोहरतरश्रियम् ।
मातङ्गपृष्ठवंशोर्वीमिव विस्तृतदीर्घिकाम् ॥

यदा दैत्य स्वाक्रम्य गणाधिपोऽमरावतीं गतवान् तदा तस्या वर्णनमिदम् । कीदृशीं तां देवनगरीम् 'मातङ्गपृष्ठवंशोर्वीम् इव विस्तृतदीर्घिकाम्' विस्तृता विशाला' दीर्घिका पुष्करिण्यो यत्र तादृशीम् । मातङ्गो हस्ती तस्य पृष्ठवंश पृष्ठनाडी तस्या उर्वी स्थलामिव अथवा पृष्ठवंश एव उर्वी पृथिवी तामिव । विशालत्वेन साम्यं ज्ञेयम् । कीदृशी मातङ्गपृष्ठवंशोर्वीम् विस्तृतदीर्घिकाम्=दीर्घेव दीर्घिका विस्तृता चासौ दीर्घिका तां तथाभूताम्। पुनर्नगरीं विशिनष्टि 'अशशा' इत्यादिना । 'अशशा' इति बाहुल्यार्थेऽव्ययम् अशशा बाहुल्येन तल्पानां महावेश्मनां य लोप विनाश स तल्पलोप तल्पलोपस्याभाव 'अतल्पलोपम्' अर्थाभावेऽव्ययीभाव । महावेश्म विनाशाभाव इत्यर्थ तेन आत्ता प्राप्ता मनोहरतरा अत्यन्तहृद्या त्विट् श्री [शोभा] यया ताम् तादृशीमिमिति नगरीपक्षे। [गजपक्षे] तु तल्पस्य पृष्ठवंशस्य पार्श्वभाग तया उपात्ता गृहीता मनोहरतरा त्विट् कान्तिर्यया ताम् मातङ्गपृष्ठवंशोर्वीम् । एवमत्र यथायथ सभङ्गाभङ्गश्लेषो ज्ञेय । यथा वा [नैषधे]

शुभप्रस्तावनाढ्या प्रायातो[illegible]नायकाम् ।
नानार्थप्रकृतिश्लाघ्यां नाटकप्रक्रियामिव ॥

अत्र—शुभस्य [illegible] प्रस्तावना प्रारम्भ तया ढ्यामिति नगरपक्षे । शुभा [illegible] सार्था प्रस्तावना नाटकस्य आमुखम् इति नाटकप्रक्रियापक्षे । प्रख्यात प्रसिद्ध [कलाविज्ञसम्पत्त्या] उदात्त नायक स्वामी । पक्षान्तरे यथापुरुष [अभिनेयकेन] [illegible] ताम् । नानाधा [illegible] प्रकृतोऽमात्यादय [illegible] । पक्षान्तरे—[illegible] [illegible]

यथा वा—[देवस्य [illegible]] [illegible]

[illegible]
[illegible]

लक्षणवाक्ये गुणादीनामिति भेदकथनपरं न तु स्वरूपनिर्वाहकम् । पदार्थमात्रगत वैकल्यवचनस्यैवास्या स्वरूपत्वात् । अतिशयोक्त्यलङ्कारे प्राकरणिकस्य [प्रस्तुतस्य] विशेषदर्शनमस्त्येऽपि गुणादीनां वैकल्यप्रदर्शनं नास्ति, अत्रत्वास्ति इत्यतिशयोक्तिविशेषो ऽस्त्येषोविशेष । 'एकगुणहानिकल्पनायांसाम्यदार्ढ्यं विशेषोक्ति' रिति [काव्या ३।२३] **वामन** । रागातिशयादेर्विशेषस्योक्तिर्यत्र सा विशेषोक्तिरिति **चक्रवर्त्ती** । अन्ये तु आरोपनिर्वाशिष्ट्य 'रूपक मेवैतदिति मन्यन्ते । एतद्विपर्यये तु 'विशेषोक्ति' रिति । अनेन वामनेन 'विशेषोक्तिरखण्डेषु कारणेषु फलावचः' इत्युक्तं **श्रीमम्मटभट्टेन** ।

यत्तु—नव्यास्तु सत्यपि कारणे कार्याभावो विशेषोक्तिरित्याहु तदलङ्कारसञ्ज्ञाया अनर्थकत्वादयुक्तमित्यर्थमिह कश्चित्, तत्तस्याज्ञानविलसितम् । तथात्वेऽपि विशेषत्वात पत्तत्व । नहि सति पुष्कलकारणे कार्यसामान्यानियम इति तदभावेऽपि कार्यदर्शने तत्

अत्र श्री सहित काननं, सश्रीकम् आननं मुखञ्च । [तेन रोचिष्णु भ्राजिष्णु] कान्तारे दुर्गे वर्त्मनि तत निंतं व्याप्तं वैभवं यस्य, कान्तया रचितं वैभवं यस्येति [पक्षान्तरे] । अधिकामारम्=कामारे अधि [विभक्त्यर्थेऽव्ययीभाव] आगारः= परागममरा तेन मारा उत्कृष्टा श्री शोभा यस्य, अधिका आसारा व्यापिनी सारभूता ... वा । [निम्नगा] धुनी नदी तया इतां प्राप्तां श्रियं शोभाम्, पक्षे विधुना चन्द्रेण ... श्रियं लक्ष्मीं शोभाञ्च वहन् धारयन् इति अत्रापि अभङ्ग ... ।

विशेषत्व नास्तीति कोऽप्यननुमत्तो ब्रूयात् । तथा च नवीनमतेऽपि तादृशविशेषस्य शक्तिविशेषोक्तिरित्यन्वर्था संज्ञा न हीयते ॥ ३२३ ॥

[गुणविशेषोक्तेरुदाहरणम्]

[1] न कठोरं न वा तीक्ष्णमायुधं पुष्पधन्वन ।
तथापि जितमेवासीदमुना भुवनत्रयम् ॥ ३२४ ॥

तत्रादौ 'गुणवैकल्यविशेषोक्ति'मुदाहरति—'न' इति । 'पुष्पधन्वन'=पुष्प धनुर्यस्य सः तस्य कामदेवस्य ['धनुषश्च' ५ । ४ । १३२ इति सूत्रेण धनुरन्तस्य बहुव्रीहेरनङादेशः] 'आयुधम्'=अस्त्रम् 'न कठोरम् नवा तीक्ष्णम्'=पाषाणादिवत् कठिन खड्गादिवच्च उग्रमपि नास्ति पुष्पमयत्वात् इति निश्चितमेतत्, 'तथापि'=योग्योपकरणाभावेऽपि 'अमुना'=पुष्पधन्वना 'भुवनत्रयम्=भूर्भुव स्वरात्मक लोकत्रयम् 'जितम् एव'=पराजित वशीकृतमेव 'आसीत'=अभूत ।

अत्र जयसाधनस्यायुधस्य कठोरत्व तीक्ष्णत्वञ्च गुणोऽवश्यमपेक्षणीय अन्यथा जयानुपपत्ते, परमत्र तादृशगुणमनपेक्ष्यैव कामेन भुवनत्रय जितमिति जेतुस्तस्य वायत्कर्ष प्रतीयते, आयुधस्य कठोरत्वतीक्ष्णत्वरूपयोर्गुणयोर्वैकल्यप्रतिपादनाच्च गुणवैकल्यरूपा विशेषोक्तिरियम् ।

*इदन्तु बोध्यम्—प्रसिद्धकारणनिषेधेऽपि तत्कार्यरूपफलस्य व्यक्ति प्रकाशनं [कथन] विभावना, यत्र तु कारणानां सामग्र्येऽपि क्रियाफलस्य किञ्चिद्विशेषमवगमयितुमनुत्पत्तेरभिधानं सा विशेषोक्तिरित्यनयोर्विशेष । अनेनैवाभिप्रायेण 'उद्भटभट्ट' निरवदत्—

'यत्सामग्र्येऽपि शक्तीनां फलानुत्पत्तिबन्धनम् ।
विशेषस्याभिधित्सातस्तद्विशेषोक्तिरुच्यते' ॥ इति ।

[जातिविशेषोक्तेरुदाहरणम्]

न देवकन्यका नापि गन्धर्वकुलसम्भवा ।
तथाप्येषा तपोभङ्गं विधातुं वेधसोऽप्यलम् ॥ ३२५ ॥

'जातिवैकल्यविशेषोक्ति'मुदाहरति—'न' इति । 'एषा'=समापतन्तिनी नायिका 'देवकन्यका न'=अप्सरा नास्ति 'न अपि गन्धर्वकुलसम्भवा'=गन्धर्वा देवयोनिविशेष तत्कुलसम्भूतापि नास्ति, तथापि सौन्दर्यातिशयवशेन तपोभङ्गकरणे सामर्थ्यवत्त्वात् । 'तथापि'—'वेधस'=ब्रह्मणोऽपि 'तपोभङ्गम्'=तप क्षयम् 'विधातुम्'=कर्तुम् 'अलम्'=समर्थास्ति ।

अत्र देवत्व गन्धर्वत्व जातिविशेष [illegible]

---

[1] [illegible]

वर्णनीयाया नायिकाया सौन्दर्याद्यतिशयो निरूपित , तत इय 'जातिवैकल्यविशेषोक्ति'। वर्णनीयगताया जातेर्वैकल्यदर्शनात् । देव्यो गन्धर्व्यश्च तपोभङ्गं कुर्वन्तीति पुराणेतिहास प्रसिद्धमेतत् ॥ ३२५ ॥

[क्रियावैकल्यविशेषोक्तेरुदाहरणम्]

न बद्धा भ्रुकुटिर्नापि स्फुरितो दशनच्छद ।
नच रक्ताऽभवद् दृष्टि र्जितञ्च द्विषतां बलम् ॥ ३२६ ॥

क्रियावैकल्यविशेषोक्तिमुदाहरति—'न बद्धा' इति । [कस्यचित् प्रस्तुतस्य वीरस्य वर्णनमिदम्] 'भ्रुकुटि न बद्धा'=नारोपिता, 'दशनच्छद अपि'=अधरोपि 'न'=नैव 'स्फुरित'=क्रोधवशात् सकम्पनो न जात 'दृष्टि'=चक्षुरित्यर्थ 'रक्ता'=लोहिता 'न च 'अभवत्'=नच आसीत् तथापि 'द्विषताम्'=शत्रूणाम् 'बलम्'=सैन्यम् 'जितम्'=वशी [illegible] ।

अत्र [illegible] स्फुरणादि क्रिया, तयोर्वैकल्यनिरूपणेन वर्णनीयस्य रागादेर्वीरस्य [illegible] , एतत्र क्रियावैकल्यविशेषोक्तिरियम् । वस्तुतस्तु—रक्तत्वमत्र गुण' [illegible] क्रियागुणवैकल्याभ्यां द्वयोर्विशेषोक्त्यो सङ्कर ॥ ३२६ ॥

[द्रव्यवैकल्यविशेषोक्तेरुदाहरणम्]

न रथा नच मातङ्गा न हया नच पत्तय ।
स्त्रीणामपाङ्गदृष्ट्यैव जीयते जगतां त्रयम ॥ ३२७ ॥

[illegible] 'न रथा' इति । स्पष्टम् । स्त्रीणां नयनाम्भोजानि [illegible] 'अपाङ्गदृष्ट्यैव'=केवल कटाक्षपातेनैव भुवनत्रय 'जीयते'= [illegible] द्रव्यवैकल्यविशेषोक्ति'रुच्यते ॥ ३२७ ॥

[विशेषोक्ते प्रकारान्तरम्]

एकचक्रो रथो यन्ता विकलो विषमा हया ।
आक्रामत्येव तेजस्वी तथाप्यर्को नभस्तलम् ॥ ३२८ ॥
सैषा 'हेतुविशेषोक्ति'स्तेजस्वीति विशेषणात् ।
अयमेव क्रमोऽन्येषां भेदानामपि कल्पने ॥ ३२९ ॥

— —

=भानु नभस्तलम्'=गगनमण्डलम् 'आक्रामति एव'=उल्लङ्घयत्येव । अत्रैवार्थे हेतुमाह—यत 'तेजस्वी'=प्रतापी ।

अत्रेतरेषामतिविपुलाध्वक्रमणे बहुचक्रो रथ', अविकलाङ्गो यन्ता, अविषमा [समानगतेरपेक्षणात्] हयाद्यापेक्षणीया भवन्ति, सूर्यस्य तु तदपेक्षां विनापि मार्गगमनरूपप्रारिप्सितकार्यसिद्धिरिति वर्णनीयस्य सूर्यस्य उत्कर्षातिशये तेजस्वित्व हेतुरिति हेतुगर्भितविशेषणोपन्यासमुखेन सूर्यस्य विशेषप्रतिपादनाद् 'हेतुविशेषोक्ति रियम् । अत्र च रथादिनिष्ठबहुचक्रत्वादिधर्माणा वैकल्यमप्यस्ति अतो नात्र सामान्यलक्षणाऽसङ्गतिरिति ध्येयम् ।

स्वय हेतुविशेषोक्तिं स्फुटीकरोति 'सा एषा' इति । 'तेजस्वी इति विशेषणात्=हेतुगर्भात् विशेषणात् 'सा एषा हेतुविशेषोक्ति' ज्ञेया इति शेष । 'अन्येषाम् अपि भेदानाम्=विशेषोक्तेरिहानुक्तानामपि विशेषाणाम् 'कल्पने'=रचनायाम् 'अयम् एव क्रम '=दर्शितो नियम , ईदृश्येव रीतिरित्यर्थ अस्ति इति शेष ।

विशेषोक्तेरुदाहरणान्तराणि यथा—

अद्वैत ! सच्चिदानन्द ! सद्गुरो ! त्वयि सर्वदा ।
हृदि सत्यपि धिक् कान्ता तच्चिन्तयति सन्ततम् ॥ [साहित्यसारे]

तत् हृद् यत सन्ततमपि कान्ता रमणीमेव चिन्तयति अतस्तादृश तत् प्रति धिगस्त्विति अन्वय । अप्यन्त स्पष्टम् । अत्र तादृशे गुरौ हृदि विद्यमानेऽपि विषयवासनाभावात्मककार्यानुत्पत्तिरूपा विशेषोक्ति । यथा वा [काव्यप्रकाशे]—

कर्पूर इव दग्धोऽपि शक्तिमान् यो जने जने ।
नमोऽस्त्ववार्यवीर्याय तस्मै मकरकेतवे ॥

अत्र अवार्यवीर्यत्व शक्तिमत्वे कार्याभावरूपे हेतुरुक्त अत इयम् 'उक्तनिमित्ता' विशेषोक्ति कथ्यते । यथा वा [कुवलयानन्दे]—

अनुरागवती सन्ध्या दिवसस्तत्पुर सर ।
अहो दैवगतिश्चित्रा तथापि न समागम ।

अत्र—अनुरागादिरूपे समागमकारणे सत्यपि समागमाभावरूपकथनं विशेषोक्ति । परिमितमपि दैवगतिरूपस्य वैचित्र्यस्योपादानात् उक्तनिमित्ता । अनुक्तनिमित्तापि [काव्यप्रकाशे] यथा—

निद्रानिवृत्तावुदिते द्युरत्ने सखीजने द्वारपदं पराप्ते ।
श्लथीकृताश्लेषरसे भुजङ्गे चचाल नालिङ्गनतोऽङ्गना सा ॥

अत्र निद्रानिवृत्त्यादिरूपकारणकलापसद्भावेऽपि आलिङ्गनत्यागरूपकार्याभावोक्तेर्विशेषोक्ति [illegible] निमित्तस्य अनुरागातिशयस्यानुक्ते अनुक्तनिमित्तेयम् । [illegible]
[[illegible]]—

उपनिषद परिपीता गीतापि च हन्त मतिपथं नीता ।
तदपि न हा ! विधुवदना मानससदनाद्बहिर्याति ॥

अत्रोपनिषदर्थविमर्शरूपे सकलसंसारानित्यत्वबोधे प्रसिद्धहेतौ सत्यपि विरते-रनुपनिदर्शनात् विशेषोक्तिः । परन्त्वत्रापि निमित्तं [रागान्धं चित्तम्] नोक्तमित्यनुक्तनिमित्तैषा । यथा वा [साहित्यकौमुद्याम्]—

त्वा शालरूपचरिते परमप्रकृष्टसत्त्वेन सात्त्विकतया प्रविलोक्य शास्त्र ।
प्रत्यात्मदेवपरमार्थविदां मतैश्च नैवासुरप्रकृतयः प्रभवन्ति बोद्धुम् ॥

भगवन्तं कृष्णम्प्रति भक्तस्योक्तिरियम् । अत्र शीलादिषु बोधकारणेषु सत्स्वपि तत्कार्यस्य बोधस्यानुदयात् विशेषोक्तिः । परमत्र आसुरीप्रकृतिहेतुरुक्तः । अनयैव दिशा [illegible] ॥ २२८ ॥ ३२६ ॥

'इति' इति । विशेषोक्तिसमुदाय समाप्त इत्यर्थः ।

[तुल्ययोगितायाः लक्षणम्]

विवक्षितगुणोत्कृष्टैर्यत्समीकृत्य कस्यचित् ।
कीर्तनं स्तुतिनिन्दार्थं सा मता तुल्ययोगिता ॥ ३३० ॥

मुपमान प्रस्तुतमुपमेयमिति व्यवस्थित उपमानोपमेयभाव, तत्र [तुल्ययोगितायां] तु विशेषाग्रहणादैच्छिक स इति' इत्याहु ।

प्रकृताप्रकृतयोरपि साधारणधर्मस्य सकृदुपादाने [प्रथम] दीपकम्, प्रकृतानामेव अप्रकृतानामेव वा साधारणधर्मस्य सकृदुपादाने तुल्ययोगितेत्यनयोर्भेद इति सरल पन्था ।

विवक्षितगुणोत्कृष्टैरप्र स्तुतैरेव तुल्ययोगितेति तु न नियमः प्रस्तुतेनापि प्रस्तुतसमीकरणे तुल्ययोगिताङ्गीकारात् । यथा—

कटाक्षा मधुरालापा विलासास्ते च ते शुभे ।
जगज्जये प्रवृत्तस्य कन्दर्पस्य महद्बलम् ॥ इति ।

अत्र सर्वेऽपि कटाक्षाद्या प्रस्तुता ।

ननु—नवीनमतानुसारेण प्रकृतानामप्रकृतानां वा एकधर्मान्वयित्वरूपायास्तुल्ययोगिताया स्वीकारे दीपकस्य निर्विषयत्व स्यात् इति चेन्न दण्डिमते वाक्यान्तरस्थपदानामनुषङ्गादिना वाक्यान्तरार्थोद्दीपनत्वेनैव दीपकव्यवहाराङ्गीकारात् तुल्ययोगितायाश्च तथात्वाभावात । उक्तार्थतत्पूर्वमपि स्पष्टीकरणार्थं पुनरिहोक्तम् ।

[स्तुतौ तुल्ययोगिताया उदाहरणम्]

यम कुवेरो वरुण सहस्राक्षो भवानपि ।
बिभ्रत्यनन्यविषयां लोकपाल इति श्रुतिम ॥ ३३१ ॥

तत्र स्तुतौ तुल्ययोगितामुदाहरति—'यम' इति । 'यम =कृतान्त 'कुवेर '=यक्षराट् 'वरुण '=यादसांपति 'सहस्राक्ष =इन्द्र तथा 'भवान [राजा] अपि 'अनन्यविषयाम्'=न अन्यो यमादिभिन्नो विषय गोचरो यस्या तां तथाभूताम् 'श्रुतिम्'=प्रसिद्धिम् आख्यामित्यर्थ एते सर्वे 'बिभ्रति'=धारयन्ति ।

अत्र लोकपालत्वरूपो गुण वर्णनीयत्वेन प्रकृते राज्ञि विवक्षित तेनैव गुणेनोत्कृष्टैरप्रकृतैर्यमादिभि साक तुल्यगुणत्ववर्णनेन राजा स्तुत इति तुल्यगुणवर्णनेन वस्तुतिरूपा तुल्ययोगिता । इय जयदेवमते तृतीया तुल्ययोगिता, यत उक्त तेन—

गुणोत्कृष्टै समीकृत्य वचोऽन्या तुल्ययोगिता' ।
लोकपालो यम पाशी श्रीद शक्रो भवानपि ॥

अत्र वर्णनीयो राजा शक्रादिभिर्लोकपालत्वेन समीकृत । इद कश्चित् 'त्रिदि ... रत्यते केचित् दीपकभेदमाचक्षते ॥ ३३१ ॥

[निन्दायां तुल्ययोगिताया उदाहरणम्]

सङ्गतानि मृगाक्षीणां तडिद्विलसितानि च ।
क्षणद्वय न तिष्ठन्ति घनारब्धान्यपि स्वयम् ॥ ३३२ ॥

—— · ——

१— तुल्ययोगित

—— ——

अत्र वधूनां वल्लभनाय प्रकृतानामेव धर्मसाधर्म्येणौपम्यावगमात् केवलप्रकृतगोचरा तुल्ययोगिता [न श्लेष] इति 'मल्लिनाथ'। यदाहु —

प्रस्तुतानां तथान्येषां केवलं तुल्यधर्मतः ।
औपम्यं गम्यते यत्र सा मता तुल्ययोगिता ॥

अप्पय्यदीक्षितास्तु—इदं गूढश्लेषोदाहरणं मेनिरे इति कृतमतिविस्तरेण ॥ [illegible] ॥

[अथ विरोधस्य लक्षणम्]

विरुद्धानां पदार्थानां यत्र संसर्गदर्शनम् ।
विशेषदर्शनायैव स विरोधः स्मृतो यथा ॥ ३३३ ॥

यत्स्वरूपमविज्ञाय विरोधो भासते ऽविदाम् ।
नानारूपेषु लोकेऽस्मिंस्तमनन्तमुपास्महे ॥ १ ॥

क्रमप्राप्तं 'विरोध' लक्षयति—'विरुद्धानाम्' इति 'विशेषदर्शनाय एव'=विशेषवर्णनायस्य उत्कर्षं तस्य दर्शनाय निरूपणायैव 'विरुद्धानाम्=अन्योन्यविरोधधर्मवताम् 'पदार्थानाम्'=जातिगुणक्रियाद्रव्याणाम् 'यत्र'=वैचित्र्ये 'संसर्गदर्शनम्'=सम्बन्धवर्णनम् सामानाधिकरण्यप्रतिपादनमिति यावत् 'स विरोधः'=वास्तवविरोधाभावेऽपि विरोधप्रयोजकत्वात् विरोधः [विरोधाभासः] इति नामालङ्कारः 'स्मृतः'=उक्तः कविभिरिति शेषः । 'यथा'—इति अग्रे उदाह्रियत इत्यर्थः । उक्तञ्च 'श्रीमम्मटभट्टेन' प्रकाशे—'विरोधः सोऽविरोधेऽपि विरुद्धत्वेन यद्वचः' इति । सोऽयं जातेर्जात्यादिभिश्चतुर्भिर्विरोधः । गुणस्य गुणादिभिस्त्रिभिः । क्रियायाः क्रियाद्रव्याभ्यां द्वाभ्याम् । द्रव्यस्य द्रव्येणैवेत्येवमस्यैकादशप्रकारः उक्तो ग्रन्थान्तरेषु ज्ञेयः । केचित्—[illegible]धत्वदाम्। 'विरोधाभास पदेनोच्यते । यथापूर्वम् 'अच्युतोऽप्यवृषच्छेदी' इत्यादौ उक्तत्वात् । किञ्च—आपशब्दप्रयोगे वाच्यः तदप्रयोगे तु [illegible] इत्यपि न विस्मरणीयम् ॥ [illegible] ॥

[विरोधस्योदाहरणानि]

कूजितं राजहंसानां वर्धते मदमञ्जुलम् ।
क्षीयते च मयूराणां रुतमुत्क्रान्तसौष्ठवम् ॥ ३३४ ॥

[illegible] क्रियादिरोधमुदाहरति—'कूजितम्' इति । 'राजहंसानाम्=[illegible] पक्षिविशेषाणाम् 'मदमञ्जुलम्'=मदेन मनोहरम् 'कूजितम्=[illegible] 'वर्धते'=[illegible] [illegible]र्धते । 'मयूराणाम्'=बर्हिणाम् 'उत्क्रान्तसौष्ठवम्'=[illegible] [illegible] तत्[illegible] 'रुतम्'=केकाध्वनिः 'क्षीयते'=[illegible] ।

[illegible] । [illegible]

निन्दायां तुल्ययोगितामुदाहरति—'सङ्गतानि' इति । 'मृगाक्षीणाम्'=मृगस्याक्षिणीवाक्षिणी यासा ता मृगाक्ष्य तासा हरिणेक्षणानाम् 'सङ्गतानि'=समागमा 'च'= तथा च 'तडिद्विलसितानि'=तडिता विद्युता विलसितानि उद्योतनानि चमत्कराणि इत्यर्थ 'स्वयम्'=स्वयमेव नतु परप्रेरणया 'घनारब्धानि'=घन सान्द्र गाढ यथा स्यात्तथा आरब्धानि प्रवर्त्तितानि इति मृगाक्षीपक्षे, घन वारिद आरब्धानि चालितानीति तडित्पक्षे, 'क्षणद्वयम्'=द्विक्षणमपि 'न तिष्ठन्ति'=नैव स्थिरता भजन्ते । क्षणमात्रस्थायीनि इति भाव ।

अत्र प्रकृते मृगाक्षीसमागमे क्षणमात्रस्थायित्वरूपो गुणो वर्णनीयत्वेन विवक्षित तेन चाप्रकृतस्य तडिद्विलसितस्य तुल्यतया तद्गुणसम्बन्धवर्णनात् तुल्ययोगिता, मृगाक्षीसमागमस्य व्यक्तीकृताया निन्दाया पर्यवसानमिति सा निन्दाया ज्ञेया । नवीनास्तु—प्रकारान्तरेण लक्षयन्ति—'नियताना सकृद्धर्म. सा पुनस्तुल्ययोगिता इति । प्रकृतानामप्रकृतानामेव वा धर्मश्चेत्प्रकाश्यते तदा तुल्ययोगिता ॥ ३३२ ॥ उदाहरन्ति च—

दृष्टिं निधाय सुरभीनिकुरुम्बवीथ्यां
कृष्णोति वर्णयुगलाभ्यसने रसज्ञाम् ।
शुश्रूषणे सुरलिनिस्वनितस्य कर्णौ
चित्त सुखे तव नयत्यहरय राधा ॥ [साहित्यकौमुद्याम्]

अत्र प्रकरणिकानामेव निधानरूपैकक्रियाभिसम्बन्ध । यथा वा—

त्वदङ्गमार्दवे दृष्टे कस्य चित्ते न भासते ।
मालतीशशभृल्लेखाकदलीना कठोरता ॥

अत्र मालत्यादीनामप्राकरणिकानामेव कठोरतारूपैकगुणसम्बन्ध । अन्यद्वा यथा—

रम्या इति प्राप्तवती पताका
राग विविक्ता इति वर्धयन्ती* ।
यस्यामसेवन्त नमद्वलीका
सम वधूभिर्वलभीर्युवान ॥ [माघे]

* माघे द्वारकावर्णनमेतत्—यस्यां द्वारकाया युवानो वधूभि सम वलभी प्रासादोपरितनगृहाण्यसेवन्त सेवितवन्त । किंभूता । रम्या इति हेतो पताका वैजयन्ती प्राप्तवती । विविक्ता विजना इति हेतो राग रति वर्धयन्ती. । नमन्ति वलीकानि छादनपटप्रान्ता यासा ता । वधूपक्षे—पताका सौभाग्यानि । 'पताका वैजयन्त्यां स्यात्सौभाग्ये नाटकाद्यपि' इति [मेदिनी] । रागम्=अनुरागम् । विविक्ता पवित्रत्वेन [illegible] नमन्त्रिवलीकाश्च ।

अत्र वधूनां वलभीनाञ्च प्रकृतानामेव धर्मसाधर्म्येणौपम्यावगमात् केवलप्रकृतगोचरा तुल्ययोगिता [न श्लेष] इति 'मल्लिनाथ'। यदाहु —

प्रस्तुतानां तथान्येषां केवलं तुल्यधर्मत ।
औपम्यं गम्यते यत्र सा मता तुल्ययोगिता ॥

अप्पय्यदीक्षितास्तु—इह गूढश्लेषोदाहरणं मेनिरे इति कृतमतिविस्तरेण ॥२३२॥

[अथ विरोधस्य लक्षणम्]

विरुद्धानां पदार्थानां यत्र संसर्गदर्शनम् ।
विशेषदर्शनायैव स विरोध. स्मृतो यथा ॥ २३३ ॥

यत्स्वरूपमविज्ञाय विरोधो भासते ऽविदाम् ।
नानारूपेषु लोकेऽस्मिंस्तमनन्तमुपास्महे ॥ १ ॥

क्रमप्राप्तं 'विरोध' लक्षयति—'विरुद्धानाम्' इति 'विशेषदर्शनाय एव'=विशेष. वर्णनायस्य उत्कर्षं तस्य दर्शनाय निरूपणायैव 'विरुद्धानाम्=अन्योन्यविरोधवताम् 'पदार्थानाम्'=जातिगुणक्रियाद्रव्याणाम् 'यत्र'=वैचित्र्ये 'संसर्गदर्शनम्'=सम्बन्धवर्णनम् सामानाधिकरण्यप्रतिपादनमिति यावत 'स विरोध.'=वास्तवविरोधाभावेऽपि विरोधप्रयोजकत्वात विरोध [विरोधाभास] इति नामालङ्कार 'स्मृत'=उक्त कविभिरिति शेष । 'यथा'—इति अग्रे उदाह्रियत इत्यर्थ । उक्तञ्च 'श्रीमम्मटभट्टेन' प्रकाशे—'विरोध सोऽविरोधेऽपि विरुद्धत्वेन यद्वच ' इति । सोऽयं जातेर्जात्यादिभिश्चतुर्भिर्विरोध । गुणस्य गुणादिभिस्त्रिभि । क्रियाया क्रियाद्रव्याभ्यां द्वाभ्याम । द्रव्यस्य द्रव्येणैवेत्येवमन्यत्र दशप्रकार उक्तो ग्रन्थान्तरेषु ज्ञेय । केचित्—[illegible] 'विरोधाभास पदेनोच्यते । यथापूर्वम 'अन्यतोऽप्यशपत्' [illegible] इत्यादौ [illegible] । किन्तु—[illegible] प्रयोगे वाच्य तदप्रयोगेतु [illegible] न [illegible] ॥
॥

[विरोधस्योदाहरणानि]

कूजितं राजहंसानां वर्धते मदमञ्जुलम् ।
क्षीयते च मयूराणां रुतमुत्क्रान्तसौष्ठवम् ॥ २३४ ॥

आदौ क्रियादिविरोधमुदाहरति—'कूजितम्' इति । [illegible] 'मदमञ्जुलम्'=मदेन मनोहरम् [illegible] ।

[illegible]

तत्परिहारस्तु भिन्नसम्बन्धिगतत्वेन ज्ञेय । अत्र च वर्णनीय शरत्काल' तस्मिन् एकजातीययोरपि बलाबलकारित्वेन विशेषप्रतीतिर्वैचित्र्यमावहतीत्यस्यालङ्कारत्वम्बोध्यम । क्रियाविरोधश्चायम् । 'राजहंसास्तु ते चञ्चुचरणैर्लोहितै सिता' इत्यमर । 'राजहंसस्तु कादम्बे कलहंसे नृपोत्तमे' इति [हैम] । हंसाना राजा इति राजहंस । 'राजदन्तादिषु परम्' [पा० २ । २ । ३१] अनेन 'हंस' शब्दस्य परनिपात । 'चीयत इति कर्मकर्तरि' इति वामन [का० २ । सू० ४] ॥ ३३४ ॥

प्रावृषेण्यैर्जलधरैरम्बरं दुर्दिनायते ।
रागेण पुनराक्रान्तं जायते जगतां मन ॥ २३५ ॥

वस्तुगतगुणविरोधमुदाहरति--'प्रावृषेण्यै' इति । [वर्षाकालवर्णनमिदम] । 'प्रावृषेण्य'=प्रावृषि भवै वर्षाकालिकै 'जलधरै'=मेघै. अम्बरम्'=व्योम [गगनम्] 'दुर्दिनायते'=आच्छन्न भवति [मेघच्छन्नेऽह्नि दुर्दिनम्' इत्यमर] श्यामल जायते इत्यत्र तात्पर्यम् । 'जगताम्'=लोकानाम् 'मन.'=हृदयम् 'पुन रागेण'=रागोऽनुराग लौहित्यञ्च तेन 'आक्रान्तम्'=व्याप्त 'जायते इत्यन्वितार्थ.

अत्र अनुरागे लौहित्यस्याऽभेदाध्यवसान कृतम् , तस्मात् श्यामलत्वलौहित्ययोर्गुणयोरेकजलधरजन्यत्वरूपस्य संसर्गस्य कीर्तन विरोध । परिहारस्तु—श्लेषेण कृत अनया रीत्या वर्णनीयस्य वर्षाकालस्य किमप्यौत्कर्ष्यं व्यज्यते ।

'प्रावृषेण्यै रिति । 'प्रावृष एण्य' [पा० ४ । ३ ।] इति सूत्रेण शैषिक 'एण्य' प्रत्यय । 'दुर्दिनायते' इत्यत्र 'सुदिनदुर्दिननीहारेभ्यश्च' [वा० ३ । १ । १७] इत्यनेन 'दुर्दिन' प्रतिपदिकात् करोत्यर्थे क्यङ् । दुर्दिन करोतीति दुर्दिनायते ॥ ३३५ ॥

तनुमध्यं पृथुश्रोणि रक्तोष्ठमसितेक्षणम् ।
नतनाभि वपु स्त्रीणां कं न हन्त्युन्नतस्तनम ॥ ३३६ ॥

अवयवगतगुणविरोधमुदाहरति–तनुमध्यमिति । 'तनुमध्यम्'=तनु सूक्ष्म मध्य कटिभागो यस्य तत् 'पृथुश्रोणि'=पृथु स्थूला विशाला च श्रोणि नितम्बो यस्य तत् , 'रक्तोष्ठम्'=रक्तो लोहित ओष्ठोऽधरो यस्य तत् , 'असितेक्षणम्'=असिते कृष्णे ईक्षणे नयने यस्य तत् , नतनाभि'=नता निम्ना गम्भीरा नाभिर्यस्य तत् , 'उन्नतस्तनम् =उन्नतौ वर्तुलौ कठोरौ च स्तनौ कुचौ यस्य तत् एतादृशविशेषणोपेत 'स्त्रीणाम्' युवतीनाम् 'वपु =शरीरम् 'कम्'=जनम् 'न हन्ति'=नाकुलयति अपि तु सर्वमपि विह्वलीकरोति. तापयतीत्यर्थ ।

अत्र तनुत्वपृथुत्वयो रक्तत्वासितत्वयो नतत्वोन्नतत्वयोर्गुणयो परस्पर विरोध , तेन च वर्णने यत्नेन प्रस्तुताना स्त्रीणा किमपि वैचित्र्य द्योत्यते । परिहारस्तु तनुत्वादीनामाश्रयभूतावयवभेदात् बोध्य । केचित्तु—बहूना गुणयुग्माना विरोधोपन्यासे वैचित्र्यातिशय इति दर्शनार्थमुदाहरणमिति मन्यन्ते इति 'प्रभा' ॥ ३३६ ॥

मृणालबाहु रम्भोरु पद्मोत्पलमुखेक्षणम् ।
अपि ते रूपमस्माकं तन्वि ! तापाय कल्पते ॥ ३३७ ॥

विषमविरोधमुदाहरति—

'मृणालबाहु' इति । हे ! 'तन्वि'=कोमलशरीरे ! 'मृणालबाहु'=मृणालवत् शीतलौ बाहू भुजे यस्मिन् तत्, 'रम्भोरु'=रम्भे कदल्याविव ऊरू यत्र तत्, 'पद्मोत्पलमुखेक्षणम्'=पद्ममिव उत्पले इव च मुखम् आननम् ईक्षणे दृशौ यत्र तत् तथाविधम्, 'अपि ते'=तव 'रूपम्'=आकृति सौन्दर्यं वा 'अस्माकं तापाय'=विरहजनितम्लान्यै 'कल्पते' समर्थं भवति ।

अत्र दर्शितरीत्या उपमागर्भितबहुव्रीहिसमासे शीतलत्वगुणस्य तापक्रियया सह विरोधः। यदा तु मृणाले एव बाहू यत्र, रम्भे एवोरू यत्र, पद्ममेव उत्पले, मुखम् एव च ईक्षणे यत्र इत्यादि रूपकगर्भितो बहुव्रीहिः तदा मृणालत्वरम्भात्वादिभिर्जातिभिः तापक्रियाया विरोधः । परिहारस्तु—यथा विरही वर्षाकाल इति च ज्ञेयः ॥ ३३७ ॥

उद्यानमारुतोद्धूताश्चूतचम्पकरेणव ।
उदश्रयन्ति पान्थानामस्पृशन्तोऽपि लोचने ॥ ३३८ ॥

उक्तेषूदाहरणेषु भावाभिमाने क्रियादिविरोधा उक्ताः सम्प्रति अभावाभिमाने क्रियाविरोधमुदाहरणेन स्पष्टीकरोति—'उद्यान०' इति । विरहिणां वर्णनमिदम् । 'उद्यानमारुतोद्धूता'=उद्यानस्य उपवनस्य मारुतेन पवनेन उद्धूता उत्कम्पिता 'चूतचम्पकरेणवः'=चूतानामाम्राणां चम्पकानां चाम्पेयानां रेणवः परागाः 'पान्थानाम्'=[illegible] 'लोचने'=नयने 'अस्पृशन्तः अपि'=असंलग्नाः सन्तोऽपि 'उदश्रयन्ति'=[illegible] विदधते ।

अत्र 'अस्पृशन्तोऽपि' इति स्पर्शनक्रियाया अभावेन उदश्रयणक्रियायाः [बाष्पोद्गमन क्रियायाः] विरोधः, तत्परिहारस्तु चूतचम्पकरेणूनामुद्दीपकत्वादभावाभिमानेन इदं । क्रियागतश्चायं विरोधः । अयमसङ्गतिविरोध इत्युच्यते तथा च स्पर्शनाभावेऽपि बाष्पोद्गम इति परस्परमसङ्गतेरयमसङ्गतिर्नाम विरोध इति प्रभाकरः ॥ ३३८ ॥

कृष्णार्जुनानुरक्तापि दृष्टिः कर्णावलम्बिनी ।
याति विश्वसनीयत्वं कस्य ते कलभाषिणि ! ॥ ३३९ ॥

श्लेषमूलं विरोधमुदाहरति—'कृष्णार्जुन०' इति । 'हे ! कलभाषिणि'= मधुरवादिनि ! ते=तव 'दृष्टिः' कृष्णार्जुनानुरक्ता अपि=[illegible] [illegible] [illegible] कर्णावलम्बिनी=[illegible] [illegible] । [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] ।

अत्र कृष्णा [द्रौपदी] रूपस्य द्रव्यस्य कर्णा—[राधेया] वलम्बन न सम्भवाति क्रियाया आपातत प्रतीयमानोऽपि विरोध श्लेपसामर्थ्यात् परिहर्तुं शक्य । अयम विरोधः श्लेषमुखप्रेक्षी ॥ ३३६ ॥

इत्यनेकप्रकारोऽयमलङ्कारः प्रतीयते ॥

—*—

इति विरोधचक्रम् ।

विरोधमुपसहरति—'इति'=उक्तप्रकारेण 'अयम्'=विरोध अलङ्कार 'अनेकप्रकार.' नानाविध 'प्रतीयते' । उक्तमस्य वहुविधत्व ३३३ कारिकाया व्याख्याने ।

इतीति—विरोधालङ्कारप्रकरण समाप्तमित्यर्थ । विरोधस्यान्यदुदाहरण यथा—

*तव दक्षिणोऽपि वामो वलभद्रोऽपि प्रलम्व एष भुज ।
दुर्योधनोऽपि राजन् ! युधिष्ठिरोस्तीत्यहो चित्रम् ॥

अत्र दक्षिणस्यापि वामत्वे विरोध परिहरास्तु—भक्तान् प्रति अनुकूलत्वाद् दुष्टान् प्रतिकूलत्वाच्च ज्ञेय । इत्येवमादिरीत्या ज्ञेयम् 'वामन'स्तु—'विरुद्धाभासत्व विरोध' [का० ३ । १२] इति सूत्रयित्वा—

पीत पानमिद त्वयाद्य दयिते ! मत्त ममेद मन
पत्राली तव कुङ्कुमेन रचिता रक्ता वय मानिनि ! ।
त्व तुङ्गस्तनभारमन्थरगतिर्गात्रेपु मे वेपथु-
स्त्वन्मध्ये तनुता ममाधृतिरहो प्रेम्णा विचित्रा गति ॥

इत्युदाजहार । विस्तरस्तु 'सरस्वतीकण्ठाभरणे' द्रष्टव्य ।

[अप्रस्तुतप्रशमाया लक्षणम्]

¶ अप्रस्तुतप्रशंसा स्यादप्रक्रान्तेषु या स्तुति ॥ ३४० ॥

क्रमप्राप्तामप्रस्तुप्रशमा लक्षयति—'अप्रस्तुतप्रशसा' इति । 'अप्रक्रान्तेषु'=अप्रस्तुतेषु 'या स्तुति'=अर्थात् प्रस्तुतस्य निन्दार्थं गुणकीर्त्तनम् सा 'अप्रस्तुतप्रशमा' एतन्नामालङ्कृति स्यात् भवतीत्यर्थ । अप्रस्तुतस्तुत्या प्रस्तुतनिन्दावोधनमप्रस्तुतप्रशमा

[प्र०] ¶ अप्रस्तुतप्रशमाया लक्षणोदाहरणे निरूप्य तत्र नवीनमताद् दण्डिमतस्य विशेषो वक्तव्य ? [उ०] अस्य पृ० प० २०

* हे राजन्, तव वाहुर्भक्तान्प्रत्यनुकूलत्वाद्दक्षिणोऽपि शत्रून्प्रति प्रतिकूलतया वाम इत्यविरुद्धमर्थद्वयम । तथा स एव वलेन भद्रोऽपि श्रेष्ठोऽपि प्रलम्बो दीर्घ । तथा दु मेन योधनं इति दुर्योधनोऽपि युधि समरे स्थिरोऽचञ्चल इत्यविरोध । विरोधप्रतिभासस्य दक्षिणवामयो सव्येतरयोर्भिन्नत्वात्, तथा वलभद्रप्रलम्बयोर्हन्तघातासुरयोरन्यत्वात्, तथा दुर्योधनयुधिष्ठिरयोर्भिन्नव्यक्त्योर्भिन्नत्वाल्लक्ष्यते ।

इति फलित लक्षणम् । अपक्रान्तेषु इति बहुवचनमविवक्षितम् । सप्तमी च षष्ठ्यर्थे बोध्या, तेन द्वयोरेकस्य अप्रस्तुतत्वेनापि इयं सम्भवति ।

ये तु—'अपक्रान्तेप्सितस्तुति रिति पाठं कल्पयित्वा अपक्रान्तेन=अप्रस्तुतवर्णनेन ईप्सितस्य=प्रस्तुतस्य स्तुतिर्वर्णनम् 'अप्रस्तुतप्रशंसा' इति नव्यमतानुरोधेन दण्डिसूत्रं व्याख्यानयन्ति ते दण्ड्याचार्याशयानभिज्ञा इति प्रतीमः, यतो दण्डिमते—अप्रस्तुतेन प्रस्तुतं गम्यते यत्र स समासोक्तिविषयः यथा 'वस्तु किञ्चिदभिप्रेत्य' इत्यादि समासोक्तिलक्षणे १८२ पृष्ठे द्रष्टव्यम् । तल्लक्षणे यत् 'अन्यस्य=अप्रस्तुतस्य उक्तिः=कथनम्' इत्युक्तं तेन स्पष्टमेव समासोक्तौ अप्रस्तुताभिधानेन प्रस्तुतस्यैव गम्यता बोध्यते, एवञ्च पूर्वोक्तयोर्द्वयोरलङ्कारयोः दण्डिकृतलक्षणानुसरणमुख्यतया 'अप्रस्तुताभिधानेन प्रस्तुतवर्णनं समासोक्तिः', प्रस्तुतस्य गर्हणेच्छया अप्रस्तुतस्य प्रशंसनम् अप्रस्तुतप्रशंसा इति स्थितौ द्वयोरलङ्कारयोर्विविक्तो विषयः । भोजराजोऽप्यत्र दण्डिपथानुयायी । तथाहि—

अप्रस्तुतप्रशंसा स्यादस्तोतव्यस्य या स्तुतिः ।
फलोऽपि हेतोर्वाच्या च प्रत्येतव्या च सोच्यते ॥ इति–

अप्रस्तुतप्रशंसनमेवाप्रस्तुतप्रशंसाविषयमाह ।

नव्यानां मते तु प्रस्तुतेन अप्रस्तुतस्य गम्यत्वं समासोक्तौ, अप्रस्तुतेन प्रस्तुतस्य गम्यत्वम् अप्रस्तुतप्रशंसायां स्यादिति विवेच्यते । अत एव—'अप्रस्तुतप्रशंसा स्यात् सा यत्र प्रस्तुताश्रया' इति चन्द्रालोककारकृताप्रस्तुतप्रशंसालक्षणं व्याचक्षाणा दीक्षिता अपि 'यत्राप्रस्तुतवृत्तान्तवर्णनं प्रस्तुतवृत्तान्तावगतिपर्यवसायि तत्राप्रस्तुतप्रशंसालङ्कारः' इत्याहुः । तस्माद् 'अपक्रान्तेप्सितस्तुति'रिति पाठेऽपि अपक्रान्तस्य=अप्रस्तुतस्य ईप्सिता स्तुतिः अर्थात् प्रस्तुतगर्हणफलकं प्रशंसनमप्रस्तुतप्रशंसेति व्याख्यानेऽपि दण्डिसम्मतं मतं न हीयत इति कृतमतिपल्लवितेन विस्तरेण ॥ २४० ॥

[अप्रस्तुतप्रशंसाया उदाहरणम्]

सुखं जीवन्ति हरिणा वनेष्वपरसेविनः ।
अर्थैरयत्नसुलभैस्तृणदर्भाङ्कुरादिभिः ॥ २४१ ॥

अप्रस्तुतप्रशंसामुदाहरति—'सुखम्' इति । [स्वामिनिर्वासितस्याननस्य इदमिदम् ।] 'अपरसेविनः'=ये परान् न सेवन्ते स्वच्छन्दचारिण इत्यर्थः । 'हरिणाः'=मृगाः 'वनेषु'=अरण्येषु 'अयत्नसुलभैः'=अनायासप्राप्यैः यत्न विनापि सुखेन प्राप्यैरित्यर्थः । 'तृणदर्भाङ्कुरादिभिः'=घासकुशाङ्कुरप्रभृतिभिः 'अर्थैः'=भक्ष्यद्रव्यैः प्रसन्नाः 'सुखम्' यथा स्यात् तथा सानन्दं 'जीवन्ति'=प्राणन्ति ॥ २४१ ॥

[अत्र लक्षणयोजनम्]

सेयमप्रस्तुतैवात्र मृगवृत्तिः प्रशस्यते ।
राजानुवर्तनक्लेशनिर्विण्णेन मनस्विना ॥ २४२ ॥

इति अप्रस्तुतप्रशंसा

—०—

उक्तोदाहरणे स्वयमेवाप्रस्तुतप्रशंसालक्षणं योजयति—'सेयम्' इति । 'राजानुवर्त्तनक्लेशनिर्विण्णेन'=राज्ञां भूपस्य अनुवर्त्तनेन सेवया य क्लेशः गमनपतनोत्थानादिरूपं दुःखम् तेन निर्विण्णं निर्वेदं प्राप्त तेन तादृशेन 'मनस्विना'=सन्तुष्टहृदयेन मुनिना केनचित् 'मृगवृत्ति'=हरिणव्यवहारं प्राणयात्रानिर्वाहात्मकं प्रशंसने' स्तूयते । अत्र अप्रस्तुतस्य मृगस्य स्तवनेन प्रस्तुतं स्वात्मा निन्द्यत इत्यप्रस्तुतप्रशंसा । इतीति—अप्रस्तुतप्रशंसाप्रकरणं समाप्तमित्यर्थः ।

[व्याजस्तुतेर्लक्षणम्]

[१] यदि निन्दन्निव स्तौति व्याजस्तुतिरसौ स्मृता ।
दोषाभासा गुणा एव लभन्ते यत्र सन्निधिम् ॥ ३४३ ॥

—:—

व्याजेनापि स्तुवन् य ना नां भजते निरयात्मताम् ।
तमशेषपुमर्थेशं नौमि विष्णुं चतुर्भुजम् ॥ १ ॥

—:—

क्रमप्राप्तां व्याजस्तुतिं लक्षणादिना निरूपयति- यदि' इति । 'यत्' इत्यस्यार्थे क्रियाविशेषणम् 'निन्दन् इव'=निन्दां कुर्वन् इव 'यत् स्तौति'=असौ व्याजेन'=छलेन निन्दास्तुतिव्यञ्जनरूपत्वाद् 'व्याजस्तुतिः स्मृता' । 'अत्र'=व्याजस्तुतौ 'दोषाभासाः'=दोषा इव आभासन्ते आपाततः प्रतीयन्ते दोषाभासा गुणा एव वस्तुतो गुणरूपा धर्मा एव 'हि'=निश्चयेन 'सन्निधिम्'=सामीप्यं 'लभन्ते'=भजन्ते' अर्थात् वस्तुतः गुणा आपाततो दोषरूपेण प्रतीता उत्तरकाले गुणत्वेनैव स्वरूपेण प्रत्ययपथमवतरन्ति ।

अत्र [लक्षणवाक्ये] निन्दन्निव स्तौतीति कथनात् प्रत्ययादिव्यत्ययेन स्तुवन्निन्दतीति' इत्यप्ययं बोध्यः तेन स्तुतिच्छलेन निन्दोक्तिरपि व्याजस्तुतिः । आह च 'मम्मटाचार्य' व्याजस्तुतिर्मुखे निन्दा स्तुतिर्वा रूढिरन्यथा' इति ॥ ३४३ ॥

[व्याजस्तुतेरुदाहरणम्]

तापसेनापि रामेण जितेयं भूतधारिणी ।
त्वया राज्ञापि सैवेयं जितामाभून्मदस्तव ॥ ३४४ ॥

निन्दामुखीं स्तुतिपर्यवसायिनीं 'व्याजस्तुतिमुदाहरति—'तापसेन' इति । तापसेन अपि'=तपस्विनापि सता करितुरगादिनानाविधजयोपकरणविरहितेनापीत्यर्थः 'रामेण'=परशुरामेण 'इयम् भूतधारिणी'=भूः धात्री पृथिवी 'जिता'=वशीकृता । त्वया 'राज्ञा अपि'=सदा सर्वैः करितुरगादिविविधसकलोपकरणैर्नापि 'सा एव इयम्'=तापसजिता नत्वन्या भूतधात्री 'जिता' अतो हेतो 'तव मद'=गर्वः 'माभूत्'=नैव स्यादित्यर्थः ।

अत्र प्रकरणिकोः [वर्णनीय] राज्ञा तस्य तापसजिताया एव पृथ्व्या जयनमात्रतो

[प्र०] सकुसुमनिन्दा व्याजस्तुतिः स्पष्टीकरणस्या । [उ०]अम्य० पृ० १० ८

निन्दारूपेण प्रतीयते पर्यवसाने तु साक्षाद्भगवदवतारभूतेन त्रिपुरारिसकाशाल्लब्धपरशुना परशुरामेण यावती धरित्री जिता सैव मनुष्येणापि सता त्वया वशीकृतेयमित्यतिमात्रं राज्ञः स्तुतिः प्रतीयत इति निन्दामुखी व्याजस्तुतिः ।

अप्रस्तुतप्रशंसायामप्रस्तुतस्य प्रशंसनं प्रस्तुतस्य च निन्दनं व्यवस्थितम्, इह तु प्रस्तुतस्यापाततो निन्दा पर्यवसाने तु स्तुतिरित्यनयोर्विवेकः । अपि च तत्र प्रस्तुतं गम्यमिह तु वाच्यमिति विशेषः ॥ ३४४ ॥

[उदाहरणान्तराणि]

पुंसः पुराणादाच्छिद्य श्रीस्त्वया परिभुज्यते ।
राजन्निक्ष्वाकुवंशस्य किमिदं तव युज्यते ॥ ३४५ ॥

अलङ्कारान्तरसम्बन्धेनापायमतिचमत्कारिणीत्यतस्तादृशीं व्याजस्तुतिमुदाहरति–'पुंस' इति । [इक्ष्वाकुवंश्यं राजानं प्रति कस्यचिद्वन्दिन उक्तिरियम्] । 'हे ! राजन् !'=नरपते ! 'पुराणात्'=सनातनात् आद्यात्, पक्षे वृद्धात् च 'पुंसः'=मनुष्यात्, पक्षे विष्णोः सकाशात् 'त्वया आच्छिद्य'=आहृत्य 'श्रीः'=लक्ष्मीः, पक्षे सम्पत्तिश्च 'परिभुज्यते'=सम्भुज्यते ।

अत्र सनातनात्पुराणपुरुषादाहृताया लक्ष्म्या भोग इक्ष्वाकुकुलजातस्य तव नितरां अयोग्य इत्यापाततः प्रतीता निन्दा श्लेषमाहात्म्येन 'प्रभूततरास्ते सम्पदः' इति स्तुतौ परिणता भवति, तदेव स्तुतिगम्या । अत्र 'पुराण' पदे 'श्री' पदे च श्लेषः । आद्यन्तरूपयोः लक्ष्मीसम्पत्तिरूपयोरर्थयोरेकवृन्तगतफलद्वयन्यायेनाश्रितः । एवंश्लेषसमानश्लेषानुप्राणिता सर्वापि वैचित्र्यमावहतीति सहृदया सन्ति साक्षिणः । अत्र विशेषा काव्यप्रकाशे पारिभाषिकसाम्यात् 'समासोक्ति'रपीति न विस्मरणीयम् ॥ ३४५ ॥

भुजङ्गभोगसंसक्ता कलत्रं तव मेदिनी ।
अहङ्कारः परां कोटिमारोहति कुतस्तव ॥ ३४६ ॥

[व्याजस्तुतेरुपसंहार]

इति श्लेषानुविद्धानामन्येषाञ्चोपलक्ष्यताम् ।
व्याजस्तुतिप्रकाराणामपर्यन्तस्तु विस्तरः ॥ ३४७ ॥

—:—

इति व्याजस्तुति ।

———

व्याजस्तुतिमुपसंहरति—'इति' इति । 'इति'=उक्तप्रकारेण 'श्लेषानुविद्धानाम्'= श्लेषमूलकानाम् तथा 'अन्येषाम्'=इतरालङ्कारमूलकानाञ्च 'व्याजस्तुतिप्रकाराणाम्'= व्याजस्तुतिभेदानाम् 'अपर्यन्त तु'=निस्सीम एव 'विस्तर'=बाहुल्यम् 'उपलक्ष्यताम्'= स्वमत्याऽवबुध्यतामित्यर्थ । श्लेषसङ्कीर्णत्ववत् अलङ्कारान्तरसङ्कीर्णत्वेनापि अनेके भेदा सन्तीति ग्रन्थगौरवभयाद् दिङ्मात्रमुक्तमिति भाव ।

इति व्याजस्तुतिप्रकरणम् ।

अस्या उदाहरणान्तर यथा वा—

काकतीयविभो कीर्त्या किं नाम धवलीकृतम् ।
यत्तदीयारिवक्त्रेषु दृश्यते कालिमा महान् ॥

अत्र—'विशेषनिषेधे शेषाभ्यनुज्ञानम्' इति न्यायेन अरिवक्त्रव्यतिरिक्त विश्व कीर्त्या धवलीकृतमिति निन्दया स्तुतिर्गम्यते । यथा वा—

प्रतापरुद्रनृपतेरहो साहसिका द्विष ।
यद्विशन्त्युदधीन् शैलानारोहन्ति समन्तत ॥

अत्र—शत्रूणां साहसप्रशंसया स्तुत्या निन्दा व्यज्यते ॥ यथा वा मम—

विश्वम्भर इति यस्त्व ख्यातिं लोके गतो हरे ।
का ते प्रशसा दैत्यानां सूदने तत्परस्य हि ॥

अत्र नियतिमनुल्लङ्घयतो दैत्यसूदनेऽपि प्रवृत्तस्य भगवतो निन्दामुखी स्तुति-र्व्याजस्तुति । इत्यनया दिशाऽन्यदप्यूह्यम् ॥

[निदर्शनस्य=निदर्शनाया लक्षणम्]

अर्थान्तरप्रवृत्तेन किञ्चित् तत्सदृशं फलम् ।
सदसद्वा निदर्श्येत यदि तत्स्यान्निदर्शनम् ॥ ३४८ ॥

—:—

यन्निदर्शनमात्रेण पापपुञ्जात्प्रमुच्यते ।
तां कृष्णमूर्तिमालोक्य जना । तृप्यन्त सादरम् ॥१॥

सम्प्रति निदर्शन नामालङ्कार लक्षयति—'अर्थान्तरप्रवृत्तेन' इति । 'अर्थान्तरे'= निदर्शनाद् अर्थाद् फलाद् अन्यस्मिन् फले कार्ये प्रवृत्तेन'=उद्यतेन 'केनचित्'

यदि'=चेत् 'तन्मदशाम्'=तत्तुल्यम् 'सत्'=उत्कृष्टम् 'वा'=अथवा 'असत्' अपकृष्टम् 'किञ्चिन् फलम्'=कार्यम् 'निदिश्येत' निरूप्येत 'तत् निदर्शनम्'=नाम अलङ्कारः 'स्यात्'=भवतीत्यर्थः । 'निदर्शना' इत्यपि पाठान्तरम् । 'प्रस्तुतार्थप्रवृत्तस्य तत्सदृशाप्रस्तुतार्थान्तरज्ञापनं निदर्शना' इत्युक्तं भवति । 'नवीनानां मते तु सम्भवद्वस्तुसम्बन्धो निदर्शना तथा असम्भवद्वस्तुसम्बन्धोऽपि यत्र सादृश्यं निदर्शयति सापि निदर्शना' इति केषाञ्चिदुक्तिः प्राचीनग्रन्थादर्शनमूला । लक्षयति च भामहोत्तरवर्त्ती अतिप्राचीन 'उद्भटः'—

अभवन्वस्तुसम्बन्धो भवन्वा यत्र कल्पयेत् ।

उपमानोपमेयत्वं कथ्यते सा [वि]निदर्शना ॥ इति उदाहरति च 'प्रतीहारेन्दु'—

विनोचितेन पत्या च रूपवत्यपि कामिनी ।

विधुनन्ध्यविभावार्या' प्रविभत्ति विशोभताम् ॥

अत्रान्यस्यान्यकर्तृकविशोभताधारणसम्बन्धोऽनुपपद्यमानः कामिनीविभावर्योरुपमानोपमेयभावे पर्यवस्यतीत्याद्या निदर्शना ।

द्वितीया तु भामहोदिता—

अयं मन्दद्युतिर्भास्वानस्तम्प्रति यियासति ।

उदयः पतनायेति श्रीमतो बोधयन्नरान् ॥

अत्र भास्वत उदयः पातावसान इति सम्बन्धः सम्भवति उदयप्राप्त्यास्तम्प्रति यातवता तेन [निमित्तेन] तथा सर्वस्योदयः पातावसान इति श्रीमन्तो बुध्यन्ते तस्मात्तथाविधसूर्यश्रीमज्जनयोरुपमानोपमेयभावः पर्यवसितो वाक्यार्थैर्नेयमपि निदर्शना । इमामेवार्थान्तरन्यासमाहुः ॥ ४८ ॥

[निदर्शनस्योदाहरणम्]

उदयन्नेष सविता पद्मेष्वर्पयति श्रियम् ।

विभावयितुमृद्धीनां फलं सुहृदनुग्रहम् ॥ २५९ ॥

तत्राद्यां सम्भवन्निदर्शनमुदाहरति—'उदयन्' इति । 'एष'=पुरोदृश्यः 'सविता'=सूर्यः 'उदयन्'=उत्सर्पन् उन्नतिं प्राप्नुवन् 'ऋद्धीनाम्'=सम्पत्तीनाम् 'फलम्'=प्रयोजनम् 'सुहृदनुग्रहम्'=सुहृदाम् बन्धूनाम् अनुग्रहं 'विभावयितुम्'=प्रकटीकर्तुम् ऋद्धौ विद्यमानायाः सम्पदो मित्रानुकूल्यमवश्यं कर्त्तव्यमिति बोधयितुम् 'पद्मेषु'=कमलेषु 'श्रियम्'=विकासरूपां शोभाम् 'अर्पयति'=आरोपयति ।

अत्र पद्मेषु श्रीवितरणपरेण उदयभाजा सवित्रा सुहृदनुग्रहरूपस्य ऋद्धिफलस्य प्रकटने [illegible] ॥ ४९ ॥

याति चन्द्रांशुभिः स्पृष्टा ध्वान्तराजी पराभवम् ।

सद्यो राजविरुद्धानां सूचयन्ती दुरन्तताम् ॥ २६० ॥

इति निदर्शना

—:—

असत्फलनिदर्शनमुदाहरति—'याति' इति । 'चन्द्रांशुभिः'=शशिकिरणैः 'स्पृष्टा'= ससर्गवती 'ध्वान्तराजी=तमस्ततिः 'राजविरुद्धानाम्'=नृपतिविरुद्धानाम् चन्द्रप्रतिकूलानाम् 'सद्यः'=शीघ्रमेव 'दुरन्तताम्'=दुःखान्तताम् दुःखप्रद परिणामम् 'सूचयन्ती'=प्रकटयन्ती सती 'पराभवम्'=विध्वंस 'याति'=प्राप्नोति ।

अत्र चन्द्रकिरणैः पराभव प्राप्ता ध्वान्तराजी राजविरोधिनां परिणामे दुःखरूप फलं निदर्शयतीति असदर्थप्रत्यायनात् असत्फलनिदर्शनमिदम् । यथा वा—

महामहानीलशिलारुचः पुरो निषेदिवान्कंसकृष स विष्टरे ।
श्रितोदयाद्रेरभिसायमुच्चकैरचूचुरच्चन्द्रमसोऽभिरामताम् ॥ [माघे]

अत्रान्यस्यान्यधर्मसम्बन्धासम्भवात 'चन्द्रमसोऽभिरामतामिवाभिरामताम्, इत्युपमायां पर्यवसानम् अतोऽसम्भवद्वस्तुसम्बन्धरूपेयं निदर्शना । इत्यादि ॥ ३५० ॥

[सहोक्तेर्लक्षणम्]

सहोक्तिः सहभावेन कथनं गुणकर्मणाम् ।

सहैव सज्जनैः सज्जैर्हरिध्याने निरन्तरम् ।
मङ्क्षु कुरुत वाञ्छा चेद् विष्णुलोकस्य दर्शने ॥ १ ॥

सहोक्तिं लक्षयति—'सहोक्तिः' इति । 'गुणकर्मणाम्'=गुणानां क्रियाणाम् 'सहभावेन'=साहित्येन यत् 'कथनम्'=आख्यानम् सहार्थवाचपदैरेव, सा 'सहोक्तिः'= इति नामालङ्कारः । उभयनिष्ठधर्मस्य सहैवोक्तिर्यत्रेत्यन्वर्था सञ्ज्ञा । अत्र 'कर्म' शब्द क्रियावाची । बहुवचनेन द्रव्यादेरपि ग्रहः । वाग्भटोऽप्याह—

सहोक्तिः सा भवेद्यत्र कार्यकारणयोः सह ।
समुत्पत्तिकथाहेतोर्वक्तुं तज्जन्मशक्तताम् ।। उदाहरति च—
आदत्ते सह यशसा नमयति सार्धं मदेन सङ्ग्रामे ।
सह विद्विषां श्रियाऽसौ कोदण्डं कर्षति श्रीमान् ॥

योऽयं स्पष्टम् ।

[परिवृत्तेर्लक्षणम्]

अर्थानां यो विनिमयः परिवृत्तिस्तु सा स्मृता ॥ ३५१ ॥

पद्यस्यार्धेन सहोक्तिं लक्षयित्वा पद्यस्य शेषार्धपूरणार्थमादौ परिवृत्तिं लक्षयति— 'अर्थानाम्' इति । 'अर्थानाम्'=प्रतिपाद्यानां वस्तूनाम् 'यः विनिमयः'=प्रतिदानम् अर्थात् गोधूमं दत्त्वा चणकानामादानम् 'सा तु परिवृत्तिः'=परिवर्तनं [विनिमयकरणं] परिवृत्तिरित्यन्वर्थभवनात्तन्नामालङ्कारः ।

उक्तं च मम्मटेन—'परिवृत्तिर्विनिमयो योऽर्थानां स्यात्समासमैः'रिति । त्रिविधा चेयम्— समेन समस्य, अधिकेन न्यूनस्य, न्यूनेनाधिकस्य इति । आद्यद्वितीये यथा—

लतानामेतासामुदितकुसुमानां मरुदयं
मत लास्यं दत्त्वा श्रयति भृशमामोदमसमम् ।
लतास्त्वध्वन्यानामहह ! दृशमादाय सहसा
ददत्याधिव्याधिभ्रमिरुदितमोहव्यतिकरम् ॥

अत्र प्रथमेऽर्धे समेन समस्य, द्वितीये उत्तमेन न्यूनस्य । तृतीया यथा—

नानाविधप्रहरणैर्नृप ! सम्प्रहारे स्वीकृत्य दारुणनिनानदवतः प्रहारान् ।
दृप्तारिवीरविसरेण वसुन्धरेयं निर्विप्रलम्भपरिरम्भविधिर्वितीर्णा ॥

अत्र न्यूनेनोत्तमस्य । अर्थात् प्रहारा अनुपादेयत्वेन न्यूना ॥ ३५१ ॥

[सहोक्तेरुदाहरणम्]

सह दीर्घा मम श्वासैरिमाः सम्प्रति रात्रयः ।
पाण्डुराश्च ममैवाङ्गैः सह ताश्चन्द्रभूषणाः ॥ ३५२ ॥

सहोक्तिमुदाहरति–'सह' इति । [कस्याश्चन वियोगिन्या उक्तिरियम्] । 'सम्प्रति'= वल्लभविरहवेलायाम् [नतु पूर्वमपि] 'इमा रात्रयः'=निशाः 'मम श्वासैः सह दीर्घाः'= विशालाः 'सञ्जाताः' इति शेषः । अर्थात् प्रियवियोगकालीना रात्रयः प्रचुरदुःखतया दुःखेन यापनाया सञ्जाताः । वस्तुतस्तु तासां दैर्घ्यं नास्ति । 'चन्द्रभूषणाः'=चन्द्रो भूषणं मण्डनं यासां ताश्च ताः शुक्लपक्षीया रात्रयः 'मम'=विरहिण्याः 'एव अङ्गैः'=अवयवैः 'सह'=सम 'पाण्डुराः'=धूसरवर्णाः सञ्जाताः । अत्र दीर्घत्वपाण्डुरत्वे गुणौ वस्तुनो भिन्नादपि सामे-दमात् एवकालिकावुक्ताविति 'गुणसहोक्तिः' रिय ज्ञेया ॥ ३५२ ॥

वर्द्धते सह पान्थानां मूर्च्छया चूतमञ्जरी ।
पतन्ति च समं तेषामसुभिर्मलयानिलाः ॥ ३५३ ॥

वियोगिनां सहोक्तिमुदाहरति— 'वर्द्धते' इति । 'पान्थानाम्'=पथिकानां विरहिणाम् 'मूर्च्छया'=विरहजनिततदवस्थाविशेषेण 'सह'=साकम् 'चूतमञ्जरी'=आम्रमञ्जरी 'वर्धते'=वृद्धिं याति । 'मलयानिलाः'=दक्षिणाः समीरणाः 'तेषाम्'=पान्थानाम् 'असुभिः च'=प्राणैः 'समम्'=सार्धमेव 'पतन्ति'=वान्ति । अत्र विरहिपान्थमूर्च्छने वर्ध-नपतनाभ्याम् [illegible] सहभावेनाह [illegible] पुरणात् इति क्रियासहोक्तिः । ॥ ३५३ ॥

कोकिलालापसुभगाः सुगन्धिवनवायवः ।
यान्ति सार्धं जनानन्दैर्वृद्धिं सुरभिवासराः ॥ ३५४ ॥

अन्यादृशीं सहोक्तिमुदाहरति— 'कोकिल' इति । 'कोकिलालापसुभगाः'=कोकिला-नाम् [illegible] 'सुगन्धिवनवायवः' = [illegible] 'सुरभिवासराः' = [illegible] 'जनानन्दैः'=[illegible] 'सार्धं'=सह [illegible]

एधन्ते । अत्र सुरभिवातानां सुरभिदिनानाञ्च जनानन्दे सहैव वर्धनमुक्तमिति सहोक्ति ।
अन्यद् यथा—

पुरोपनीत नृप ! रामणीयकं द्विजातिशेषेण यदेतदन्धसा ।
तदद्य ते वन्यफलाशिनः परं परैति कार्श्यं यशसा समं वपुः ॥ [भारवि]

अत्र—यशसा सहैव शरीरकार्श्यमिति सहोक्ति । यथा वा—

अनेन सार्धं विहराम्बुराशेस्तीरेषु तालीवनमर्मरेषु ।
द्वीपान्तरानीतलवङ्गपुष्पैरपाकृतस्वेदलवा मरुद्भिः ॥ [रघुवंशे]

यथा वा—

रजनी निष्फलमधुना त्वदधरमधुना समं याति ।
अयि ! मानिनि ! मयि मानं परमनिदानं मृषा वहसि ॥ इत्यादि ज्ञेयम् ।

इत्युदाहृतयो दत्ता सहोक्तेरत्र काश्चन ।

—*—

इति सहोक्ति ।

—*—

सहोक्तिमुपसंहरति—'इति' इति । 'इति'=उक्तप्रकारेण 'अत्र काश्चन सहोक्ते उदाहृतयः'=उदाहरणानि 'दत्ता'=निरूपिता अनयैव रीत्या अन्यविषयाऽपि सहोक्ति-रूह्येत्यर्थः । इतीति—समाप्ता सहोक्तिरित्यर्थः ।

क्रियते परिवृत्तेश्च किञ्चिद्रूपनिदर्शनम् ॥ ३५५ ॥

'क्रियते' इति । सम्प्रति 'परिवृत्ते च'=परिवृत्त्याख्यालङ्कारस्यापि 'किञ्चित् रूप-निदर्शनम्'=दिङ्मात्रं स्वरूपप्रकाशनं 'क्रियते' येन ग्रन्थबाहुल्यं न स्यादिति भाव ।

[परिवृत्तेरुदाहरणम्]

शस्त्रप्रहारं ददता भुजेन तव भूभुजाम् ।
चिरार्जितं हृतं तेषां यशः कुमुदपाण्डुरम् ॥ ३५६ ॥

—*—

इति परिवृत्ति ।

—*—

परिवृत्तिमुदाहरति—'शस्त्रप्रहारम्' इति । [कश्चन राजानं स्तौति] । 'हे राजन् !' 'शस्त्रप्रहारम्'=शस्त्राघातम् 'ददता'=अर्पयता 'तव भुजेन'=बाहुना 'भूभुजाम्'=राज्ञाम् [illegible]=[illegible] 'चिरार्जितम्'=बहुकालसञ्चितम् 'यशः'=कीर्तिः 'हृतम्' [illegible] । अत्र शस्त्रप्रहार[illegible] दत्त्वा यशस आदानं न्यूनेन अधिकस्य ग्रहणात् [illegible] इति परिवृत्तिरलङ्कारः ॥ [illegible] ॥

[आशीरलङ्कारस्य लक्ष्यलक्षणे]

आशीर्नामाभिलषिते वस्तुन्याशंसनं यथा ।
पातु व परमं ज्योतिरवाङ्मनसगोचरम् ॥ ३५७ ॥

— —

इत्याशी ।

— —

आशीरलङ्कार लक्ष्यलक्षणाभ्यां निर्दिशति—'आशी' इति । 'अभिलषिते'=इष्टे वस्तुनि 'आशंसनम्'=प्राप्तीच्छाप्रकटनम् अथवा 'इष्टे'=प्रिये 'वस्तुनि'=सुहृज्जनादौ 'आशंसनम्'=शुभाभ्यर्थनम् 'आशीर्नाम'=आशीरलङ्कार इत्यर्थ । 'यथा' उदाहियते—'अवाङ्मनसगोचरम्'=वागतीतम् मनोऽतीतञ्च 'परम ज्योति'=परब्रह्म 'व'=युष्मान् 'पातु'=रक्षतु । अत्र शिष्यादीनां शुभाभ्यर्थनमाशीरलङ्कार ।

'अवाङ्मनसगोचरम्' इति पाठश्चिन्त्य । 'गोचर' शब्दस्य अजहल्लिङ्गत्वात् प्रकृते स्वार्थापरित्यागाच्च ॥ वाक् च मनश्च वाङ्मनसे तयोर्गोचरो न इत्यवाङ्मनसगोचर इति स्यात् । तथा च श्रुति—'नैव वाचा न मनसा प्राप्तु शक्यो न चक्षुषा' इति । यदि तु—वाङ्मनसे गोचरौ प्रतिपादकौ यस्य तद् वाङ्मनसगोचरम् तन्न भवतीति अवाङ्मनसगोचरम्' इति विग्रहेन तदा क्लिष्टया युक्ति स्याद्वा । उदाहरणान्तर यथा—

ययातेरिव शर्मिष्ठा प युर्बहुमता भव ।
पुत्र त्वमपि सम्राज सेव पूरुमवाप्नुहि ॥ [शाकुन्तले]

परपाक्षिमते तु—प्रेयोऽलङ्कारस्यैवाय विषय । अपरे तु नाट्यालङ्कारभिन्नेवाशिष मन्यन्ते ॥ ५७ ॥

इत्याशी प्रकरणम

— —

[मतान्तरोक्तानामलङ्काराणा स्वमतेऽन्तर्भावनाद]

अनन्वयससन्देहाद्युपमास्वेव दर्शितौ ।
उपमारूपकञ्चापि रूपकेष्वेव दर्शितम ॥ ३५८ ।

उत्प्रेक्षाभेद एवासामुत्प्रेक्षावयवोऽपि च ।

[सङ्कीर्णोदाहरणम्]

नानालङ्कारसंसृष्टि सङ्कीर्णन्तु निगद्यते ॥ ३५९ ॥

उत्प्रेक्षाभेद इति। 'असौ'=अन्यैरभिहित 'उत्प्रेक्षावयव'=एतन्नामालङ्कारभेद 'अपि' 'उत्प्रेक्षाभेद एव'=उत्प्रेक्षाविशेष एव ज्ञेयः इति शेष । तथाचोक्तम्—

श्लिष्टेनार्थेन संस्पृष्ट' किञ्चिचोपमयान्वित ।
रूपकार्थेन वा युक्त उत्प्रेक्षावयवो यथा ॥ इति ॥

तत्र श्लिष्टार्थसंस्पृष्टो यथा—

मुक्तोत्कर सङ्कटशुक्तिमध्याद् विनिर्गत सारसलोचनायाः ।
जानीमहेऽस्या कमनीयकम्बु ग्रीवाधिवासाद् गुणवत्त्वमाप ॥

अत्र गुणवत्त्वे श्लेषः। तथाचाय श्लेषादिसङ्कीर्णोत्प्रेक्षामात्रम्, अत पृथक् निरूपणायासो व्यर्थ इति भाव ।

एवम्—दृष्टान्तस्योपमायाम्, परिणामोल्लेखयो. रूपके, कारणमालाया हेतावन्तर्भावो ज्ञेय । तथैव नव्यै स्वीकृतानामन्येषामपि केषाञ्चिदलङ्काराणामनयैव रीत्या यथायथमन्तर्भाव ऊहनीय । दिङ्मात्रन्तु प्रादर्शि ।

सङ्कीर्ण लक्षयति—'नानालङ्कारसंसृष्टि'=एकत्र नानालङ्कारसमावेश' 'सङ्कीर्णम्'=सङ्कीर्णनामालङ्कार 'निगद्यते'=अभिधीयते 'तु'ना संसृष्टेरपृथग्भाव उक्त ।

अयमाशय —यथा लौकिकाना हारकटककुण्डलादीनां परस्पर संसर्गविशेषेण सौन्दर्यातिशयजनकता दृश्यते तेषाञ्च गोस्तनहारयष्ट्यादिसंज्ञाभेदोऽपि जायते एवमेव काव्यालङ्काराणामाङ्ग्यादिना विलक्षणचमत्कृतिजनकत्वेन सङ्कीर्णादिव्यवहारोऽपि ज्ञेय ।

[संकीर्णभेदकथनम्]

अङ्गाङ्गिभावावस्थानं सर्वेषां समकक्षता ।
इत्यलङ्कारसंसृष्टेर्लक्षणीया द्वयी गति ॥ ३६० ॥

सङ्कीर्णस्य भेदमाचष्टे—'अङ्गाङ्गि०' इति । 'अङ्गाङ्गिभावावस्थानम्'=कुत्रचित् [illegible] अवस्थानम् गुणप्रधानभावेनावस्थितिरित्यर्थ । अथवा क्वचित् 'सर्वेषाम्'=अलङ्काराणाम् समकक्षता=समानबलवत्त्वम् 'इति'=अनया दिशा 'अलङ्कारसंसृष्टे'=सङ्कीर्णालङ्कारस्य 'द्वयी गति'=द्वौ प्रकारौ 'लक्षणीया' बोध्या इत्यर्थ । नव्यास्तु—अङ्गाङ्गित्वे 'सङ्कर' समकक्षत्वे तु 'संसृष्टि' स्वतन्त्रैव कृता नत्वेकं सङ्कीर्णं मत्वा तस्य द्वौ भेदावुक्तौ । उक्तञ्च—

सेयं संसृष्टिरेतेषां भेदेन यदिह स्थितिः ।
अविश्रान्तिजुषामात्मन्यङ्गाङ्गित्वन्तु सङ्कर ॥ इति ॥ ३६० ॥

[सङ्कीर्णोदाहरणम्]

आक्षिपन्त्यरविन्दानि मुग्धे ! तव मुखश्रियम् ।
कोपदण्डसमग्राणां किमेषामस्ति दुष्करम् ॥ ३९१ ॥

तत्रादावङ्गाङ्गिभावसङ्कीर्णमुदाहरति—'आक्षिपन्ति' इति । 'हे मुग्धे !='अरविन्दानि' = कमलानि 'तव मुखश्रियम्'=आननशोभाम् 'आक्षिपन्ति'=न्यक्कारयन्ति जेतुमिच्छन्ति ममीकुर्वन्तीत्यर्थ । तथाहि—'कोपदण्डसमग्राणाम्'=कोष धनसञ्चयः कुड्मलश्च दण्ड चतुर्थोपाय नालश्च, ताभ्यामुभाभ्यां समग्राणाम् परिपूर्णानां सोपकरणानाम् 'एषाम् किम् दुष्करम् अस्ति'=किमसाध्यमस्ति न किमपीत्यर्थः ।

अत्र श्लेषोऽर्थान्तरन्यासस्याङ्गम् अर्थान्तरन्यासोपि आक्षिपन्तीत्यत्र प्रथमार्धे विद्यमानाया उपमाया अङ्गमिति परस्पराङ्गाङ्गिभावरूप सङ्कीर्णम् । केचित्तु कोपदण्डसमग्राणामिति हेत्वलङ्कारोऽत्राङ्गमित्याहु. ॥ ३७१ ॥

लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभ ।
असत्पुरुषसेवेव दृष्टिर्विफलतां गता ॥ ३९२ ॥

—*—

इति सङ्कीर्णम् ।

—*—

समकक्षतायां सङ्कीर्णमुदाहरति—लिम्पति इति । व्याख्यातमिदं प्राक् । अत्र पूर्वार्धे उत्प्रेक्षा उत्तरार्धे चोपमा इत्यनयो परस्पर निरपेक्षतयैवावस्थितिरिति समकक्षता [समानबलत्वम्] इति द्वितीय सङ्कीर्णस्य प्रकार ।

इदन्त्ववधेयम्—सामान्यतो मिश्रालङ्कारस्य द्वैविध्यम् मिश्रितेऽप्यलङ्काराणां परस्परसम्बन्धोऽवश्यमपेक्षित । स च संयोग समवायरूपश्च भवति । संयोगे मिश्रणं तिलतण्डुलन्याय । समवाये मिश्रणं क्षीरनीरन्याय । तिलतण्डुलन्यायेन सम्बन्धे संसृष्टि । क्षीरनीरन्यायेन सम्बन्धे सङ्कर । अनयो पृथक् चारुत्वानिश्चयात्तुल्यालङ्कारधुरन्धरत्वम् ननु पूर्वोक्तालङ्कारैकरूपता । तत्र संसृष्टिर्यथा—[प्रतापरुद्रे]

तिलतण्डुलसंश्लेषन्यायादत्र परस्परम् ।
यदि स्युरलङ्कारा सा संसृष्टिर्निगद्यते ॥ *

[श्लेषस्य बहुषु सङ्कीर्णत्वमाह]

श्लेष सर्वासु पुष्णाति प्रायो वक्रोक्तिषु श्रियम् ।
भिन्नं द्विधा स्वभावोक्तिर्वक्रोक्तिश्चेति वाङ्मयम् । ३९३ ॥

श्लेषस्यान्येष्वलङ्कारेषु तत्र ' सर्वासु ' इत्यादि—श्लेष इति । श्लेष '=श्लेष

* विद्यानाथ प्रतापरुद्रीयेषु स्मृतः ।

निरूपित श्लेषालङ्कार 'प्राय'=प्राचुर्येण बाहुल्येनेत्यर्थ 'सर्वासु वक्रोक्तिषु=भणितिषु [वचन] भङ्गिरूपासु अलङ्कृतिषु 'श्रियम्'=द्युतिम् विच्छित्तिमिति यावत् 'पुष्णाति'= समर्थयति । किञ्च—'वाङ्मयम्'=काव्यम् 'स्वभावोक्ति'=जात्यादीनां यथावत्स्वभाव वर्णना 'वक्रोक्ति च इति=विच्छित्तिविशेषशालित्वेन रूपेण उपमाद्यलङ्कारोक्तिश्च इत्येव रूपेण द्विधा भिन्नम् अर्थात् सङ्कीर्णात् पृथगप्यस्ति ॥ ३६३ ॥

[भाविकवर्णनम्]

तद् भाविकमिति प्राहु' प्रबन्धविषयं गुणम् ।
भाव. कवेरभिप्राय काव्येष्वासिद्धि संस्थितः ॥ ३६४ ॥

—※—

भवे भवन्तु भाविका भवार्चनारता सदा । सदाभवाधिवर्जिता स्वरूपवित्तिसम्पदा ॥१॥

—※—

भाविकालङ्कारो ऽलङ्कारमात्रं गर्भीकरोतीत्याह—'तद्' इति । 'प्रबन्धविषयम्'= प्रबन्धा महाकविप्रणीता' महाकाव्यनाटकनाटिकाख्यायिकाख्यानकादय तद्विषय तन्निष्ठम् 'गुणम्'=विच्छित्तिविशेषजनक धर्मम् 'भाविकम्' इत्याख्यमलङ्कारम् 'प्राहुः'= कथयन्ति । रसिका इति शेष । स्वयमेव भाविक निर्ब्रूते 'भाव इति । 'कवे अभिप्राय= भाव'=मत्र काव्येषु=कविप्रणीतेषु निबन्धेषु 'आसिद्धि=समाप्तिपर्यन्त 'संस्थित' ।

अयमर्थ —चमत्कारविशेषजनका केचन धर्मा स्वभावाख्यानादिनाम्ना अलङ्कार- त्वेन तद्वद्विनिश्चयम्पागयनन्तान्यलङ्करणानि सन्ति येषामाहृत्य नामानि वक्तुमशक्यानि, परन्तु प्रबन्धगत यद्वैचित्र्य तदेव 'भाविक'नाम्ना व्यवह्रियते सचार्यामतरालङ्कारवत् न केवल पदगतो वाक्यगतो वा किन्तु महावाक्यघटितप्रबन्धगतोऽप्यस्ति कवेरभिप्रायस्य व्यापकत्वात् तस्माद् भाविकस्य सर्वत्र सङ्कीर्णता ज्ञेया । अत एव 'शान्तो रसो महाभारत स्याङ्गित्वेन विवक्षित' इत्याद्युक्ति 'अभिनवगुप्तपादाचार्याणां' सङ्गच्छते ॥ ३६४ ॥

[भाविकस्वरूपे उपपत्तिप्रदर्शनम्]

परस्परोपकारित्वं सर्वेषां वस्तुपर्वणाम् ।
विशेषणानां व्यर्थानामक्रिया स्थानवर्णना ॥ ३६५ ॥
उक्तिक्रमबलाद् व्यक्तिर्गम्भीरस्यापि वस्तुन ।
भावायत्तमिदं सर्वमिति तद् भाविकं विदु ॥ ३६६ ॥

रितन्तु प्रासङ्गिकम्, तयोरङ्गाङ्गिभावेन परस्परोपयोगिना वर्त्तन एव। वस्तुविषये 'नलकुलेना'ऽप्युक्तम्—

इह पुनर्वस्तु बुधैः द्विविधं परिकल्प्यते ।
आधिकारिकमेकं स्यात्प्रासङ्गिकमथापरम् ॥ इति

यथा वा—महाभारते वनपर्वणि युधिष्ठिरदुःखादिचरितमाधिकारिकेतिवृत्तम्, नलचरितन्तु प्रासङ्गिकम् । इत्थं महाकाव्यादौ नगनगरकरितुरगादिवर्णनमपि क्वचित्साक्षात् क्वचित् परम्परया वा प्रधानस्यैवोपकारे पर्यवसानमासादयते इत्यपि न विस्मरणीयम् ।

'विशेषणानाम्' इति । तथा 'व्यर्थानाम्'=प्रकृतोपयोगरहितानाम् 'विशेषणानाम्'=धर्माणाम् 'अक्रिया'=अनुपन्यसनं कवेरभिप्रेतं स्यादिति अर्थवशात् सर्वत्र योज्यम् । अर्थात् काव्येऽभिप्रेतार्थबोधकविशेषणोपन्यासः काव्यमहिमानमुत्कर्षयति न त्वनभिप्रेतार्थविशेषणवर्णनम् । अयमेव नव्यानां मते 'परिकरालङ्कार' उक्तः । यदाह 'मम्मट'—'विशेषणैर्यत्साकूतैरुक्तिः परिकरस्तु सः' इति । अन्ये तु—अपुष्टत्वदोषाभावमाहुः । तथा 'स्थानवर्णना'=स्थानानां प्रकृतरसभावाद्युपयोगिविषयविशेषाणां वर्णना उपन्यासः कवेरभिप्रायगोचरो भवेत् । किञ्च—'उक्तिक्रमबलात्'=उक्तिक्रमः पदविन्यासपरिपाटी तस्य बलात् प्रतिपादकतासामर्थ्यात् 'गम्भीरस्य अपि वस्तुनः'=अतिगूढस्याप्यर्थस्य 'व्यक्तिः'=प्रकटना 'इदं सर्वम्'=तदिदं सर्वमेव 'भावायत्तम्'=कवेरभिप्रायतन्त्रम् 'इति'=अस्मात् हेतोः 'भाविकम्' एतन्नामालङ्कार विद् आलङ्कारिका इति शेषः ।

परे तु 'अतीतानागतयोः प्रत्यक्षायमाणत्वं भाविकम्' इति वर्णयन्ति । वदन्तो भावः आशयः कवेरतीव प्रतिबिम्बत्वेनास्तीति । भावो भावना या पुनः पुनर्ध्यानं निवेशनं सैवास्तीति । यथा—

मुनिर्जयति योगीन्द्रो महात्मा कुम्भसम्भवः ।
येनैकचुलुके दृष्टौ दिव्यौ तौ मत्स्यकच्छपौ ॥

अत्र वर्णनीयस्य मुनेरगस्त्यस्य वर्णनवशादिदं प्रत्यक्षायमाणत्वमिति भाविकालङ्कारः । तत्र सन्देहोऽस्ति भूतपूर्वानुद्देश्यानाम् ... मुनिमहत्त्वद्योतकत्व ... सम्बन्धात् ॥ ९ ॥

यत्र स्वरूपमुद्दिष्टस्य लक्षणाद्यागमान्तरे ।
स्यादाशीरभिधं ... ॥ ११ ॥

छष्टिमित्यादीनि ।२ **वृत्तय** कैशिकीसात्त्वत्यारभटीभारत्य चतस्र तासाम् अङ्गानि नर्मनर्मस्फूर्जादीनि षोडश । **लक्षणानि** भूषणाक्षरसंघातादीनि षट्त्रिंशत् । आदिपदेन नाट्यालङ्कारवीथ्यङ्गलास्याङ्गानां ग्रहणम्, ते च आशीरादयः त्रयस्त्रिंशत् वीथ्यङ्गानि उद्घात्यकादीनि त्रयोदश लास्याङ्गानि गेयप्रभृतीनि दश । एतत्सर्वम् 'आगमान्तरे'= ग्रन्थान्तरे भरतादिरचिते 'व्यावर्णितम्'=नाट्यशोभाकरत्वेन सम्यग्व्याख्यातम् ।तत् च इदम् 'न'=अस्माकम् 'अलङ्कारतया एव'=अलङ्कारत्वेनैव रूपेण 'इष्टम्'=वाञ्छितम् अर्थात् उक्तेष्वस्मदलङ्कारेषु तेषां यथायथमन्तर्भाव तत्र कानिचित् स्वभावाख्यानप्रभृतिष्वन्तर्भवन्ति, कानिचिच्च भाविकेऽस्मिन्, तच्च दशरूपकादिदत्तोदाहरणेषु स्वबुद्ध्योहनीयम् । एते च ग्रन्थबाहुल्यभिया मयात्र न प्रपञ्चिता । एतेषां प्रपञ्चो दशरूपकादौ द्रष्टव्य, । मयापि च तद्व्याख्यायां सर्वमिद स्फुटीकृतम् ॥ ३६७ ॥

[परिच्छेदार्थोपसंहार]

पन्था स एष विवृत परिमाणवृत्त्या
संहृत्य विस्तरमनन्तमलङ्क्रियाणाम् ।
वाचामतीत्य विषयं परिवर्त्तमानान्—
अभ्यास एव विवरीतुमलं विशेषान् ॥ ३६८ ॥

इत्याचार्यदण्डिन कृतौ काव्यादर्शे
अर्थालङ्कारविभागो नाम
द्वितीय परिच्छेद ।

परिच्छेदार्थमुपसंहरति—'पन्था' इति । 'अलङ्क्रियाणाम्'=पूर्वोक्तस्वभावोक्त्यादलङ्काराणाम् 'अनन्तम्'=सीमारहितम् 'विस्तरम्'=प्रपञ्चम् 'परिमाणवृत्त्या'= परिमितत्वेन 'संहृत्य'=संक्षिप्य मयैति यावत 'एष'=प्रख्यात कविसमाजे 'पन्था'= मार्ग अलङ्कारसरणिः, 'विवृत'=स्फुटीकृत । नह्यनन्तानां विशेषाणां प्रजापतिनापि स्फुटीकर्तुं शक्यत इति भाव । ननु तर्हि तेषां विशेषज्ञानाभावे वैयर्थ्यमेव शास्त्रस्य, इत्याशङ्क्याह—'वाचाम्' इति । 'वाचाम्'=वाणीनाम् 'विषयम्'=गोचरत्वम् 'अतीत्य'=अतिक्रम्य 'परिवर्त्तमानान्'=स्थितिभाजः 'विशेषान्'=

भेदान् 'विवरीतुम्'=व्याख्यातुम् पृथक् पृथग्वाधिगन्तुम् 'अभ्यास एव'=पुन पुनरावृत्ति एव अलम =समर्थ । यद्यपि सङ्क्षिप्तोऽस्य मार्ग. प्रदर्शित तथापि पुन पुन परिशीलनेन अनुक्ता अपि भेदा ज्ञातु विवरीतुञ्च शक्या इति भाव । अत एव पूर्वमुक्तम्—'ते चाद्यापि विकल्प्यन्ते कस्तान् कार्त्स्न्येन वक्ष्यति' इति । एवमोपक्रान्त एवार्थ उपसहृतो दण्डिना आचार्येण इति शिवम ॥

इति श्रीपण्डितदेवीदासतनुजनुषा सारस्वतवशावतसेन सतीविष्णुदेवीगर्भजेन स्यालकोटवास्तव्य-दर्शनन्यायविशारद-कवितार्किक-(तन्त्रचक्रवर्ति ' दर्शनाचार्य-नृसिंहदेवशास्त्रिविरचितायां स्वोपज्ञ-
' सौभाग्यवती ' विवृति सहिताया
' कुसुमप्रतिमा ' व्याख्या
काव्यादर्शव्याख्याया
द्वितीयः परिच्छेद



तृतीयः परिच्छेदः ।

अव्यपेतव्यपेतात्मा व्यावृत्तिर्वर्णसंहतेः ।
यमकं तच्च पादानामादिमध्यान्तगोचरम् ॥ १ ॥

अपारशास्त्राम्बुनिधिप्रभूतप्रभावितानेकसुरत्नहारा ।
प्रसादवैशद्यविशालदृष्टिः श्रीशारदा मे वरदा सदास्तु ॥ १ ॥

द्वितीये परिच्छेदे 'काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते' इति सामान्यतः शब्दार्थालङ्कारलक्षणमभिधाय तदनुसारं पूर्वं शब्दालङ्कारेषु निरूपयितव्येष्वपि अर्थालङ्कारापेक्षया तेषां चमत्कारातिशयाभावात् तानुपेक्ष्य प्रथमं चमत्कारातिरेकभूमित्वादर्थालङ्कारानेव निरूपयामासाचार्यः । सम्प्रति तु प्रथमपरिच्छेदे सामान्यतो दर्शितेष्वपि शब्दालङ्कारेषु अस्मिन् तृतीये परिच्छेदे [illegible] अनुप्रासेतरान् तद्विशेषान् दर्शयिष्यन् दोषाणां सामान्यविशेषलक्षणमभिधास्यन् रीतिप्रसङ्गप्राप्ततया कथितलक्षणमपि यमकालङ्कारमादावेव [illegible]—'अव्यपेतव्यपेतात्मा' इति । न व्यपेतोऽव्यपेतोऽव्यवहितः । अव्यपेतः व्यपेतश्च तौ अव्यपेतव्यपेतौ, व्यवधानसहितव्यवधानरहितावित्यर्थः । तौ [अव्यपेतव्यपेतौ] आत्मानौ स्वरूपे यस्याः सा तथाभूता । [इदं 'व्यावृत्ति'रित्यस्य विशेषणम्] 'वर्णसंहतेः'=वर्णानां स्वरव्यञ्जनानां संहतिः [illegible] तस्याः, स्वरव्यञ्जनवर्णसङ्घातस्य या 'व्यावृत्तिः'=विशेषेण आवृत्तिः पुनः पुनरुच्चारणम् सा 'यमकम्'=यमकालङ्कार इत्यर्थः । अस्य विशेषाः पूर्वमेवोक्ताः ते सम्प्रति नोच्यन्ते । 'अव्यपेते'त्यादिकथनेन क्वचित् पूर्वाभिहितवर्णानामव्यवधानेन पुनरुच्चारणम्, क्वचित् तद्व्यवधानेनेति तावत् भेदद्वयं प्राप्तम् । [illegible] इति स्पष्टं यमकलक्षणम् ।

[illegible]पदवर्णानामावृत्तिः [illegible] युता ।
[illegible]पादानामादिमध्यान्तगोचरम् ॥ इति ।

उक्तलक्षणान्वितस्य यमकस्य स्थानं निदिशति—'तच्च' इति । 'तच्च'=यमकम् 'पादानाम्'=एकद्वित्रिचतुरात्मकानां श्लोकचरणानाम् 'आदिमध्यान्तगोचरम्'=आदिश्च मध्यश्च अन्तश्च ते 'आदिमध्यान्ताः' ते गोचरः विषयो यस्य तत् 'आदिमध्यान्तगोचरम्' । एवमत्राय विभागप्रकारो ज्ञेयः । तथाहि—प्रथमपादस्य आदिभागगतम्, मध्यभागगतम्, अन्तभागगतञ्चेत्येको विभागप्रकारः । एवं द्वितीयपादस्य आदिगतम्, मध्यगतम्, अन्तगतञ्च । एवं तृतीय चतुर्थयोरपि । उक्तञ्चाग्निपुराणे—

अनेकवर्णा वृत्तिर्या भिन्नार्थप्रतिपादिका ।
यमकं साऽव्यपेतञ्च व्यपेतञ्चेति तद् द्विधा ॥

अयुताग्नीलन्यथा व्याख्या—आदिमध्यगोचरम्, मध्यान्तगोचरम् । काकाक्षिगोलकन्यायेन मध्यशब्द उभयत्रापि सम्बध्यते । तथा मध्यस्यान्तोऽथात् पर्यान्त एवोच्यते । तेनाद्यन्तगोचरं यमकं स्यादिति सिद्धम् । आवृत्तिर्यथाशक्ति क्रियते, तेन श्लोकान्तगामिन्यप्यावृत्तिः सम्भवति । निरोधाभावेनैकाकारं चतुष्पदं 'महायमकं' मुच्यते इत्यपि सिद्धम् । इति 'विवेकगणि' ।

आनन्तर्यादव्यपेतं व्यपेतं व्यवधानतः ।
द्विविधेनानयोः स्थान-पादभेदाच्चतुर्विधम् ॥
आदिपादादिमध्यान्तेष्वेकद्वित्रिनियोगतः ।
सप्तधा सप्तपूर्वेण चेत्पादेनोत्तरोत्तरः ॥
एकद्वित्रिपदारम्भस्तुल्यः षोढा तदा परम् ।
तृतीयं त्रिविधं पादस्यादिमध्यान्तगोचरम् ॥
पादान्तयमकं चैव काञ्चीयमकमेव च ।
समुद्गयमकं चैव विक्रान्तयमकं तथा ॥
पादादियमकं चैव तथाम्रेडितमेव च ॥
चतुर्व्यवसितं चैव मालायमकमेव च ॥
[illegible] यमक [illegible] ॥ इत्यादि ।

एतेषामुदाहरणानि 'स्तुतिप्रकाशि'कादि महाकाव्येषु [illegible] किन्तु [illegible] ॥ १ ॥

यमकभेदलक्षणम्

'एकद्वित्रिचतुष्पाद—यमकानां विकल्पना ।
आदिमध्यान्त मध्यान्त-मध्याद्या-द्यन्त सर्वतः' ॥ २ ॥
अत्यन्तबहवस्तेषां भेदाः सम्भेदयोनयः ।
सुकरा दुष्कराश्चैव दृश्यन्ते तत्र केचन ॥ ३ ॥

[१] प्र० [illegible]

उक्त स्थानभेदेन यमकभेद, सम्प्रति पादगत भेद दिदर्शयिषु क्रमश तत्तद्भेदान् निर्दिशति एक०' इत्यादि । 'एकद्वित्रिचतुष्पादयमकानाम्'=एकादिपादगतानाम् अविमिश्राणामित्यर्थ । 'विकल्पना'=विविधा कल्पना विकल्पना अर्थात् 'पादानामादिमध्यान्तगोचरम्' इत्यनन्तरमेव सामान्यत उक्ता भेदा 'विज्ञेया' इति शेष । पादचतुष्टयात्मक पद्य भवति, तस्य प्रतिपादम् आदिमध्यान्तगतत्वेन पूर्व त्रिधाभिन्नस्य यमकस्य पुन द्वादशप्रकारा जायन्ते। एते च भेदा अविमिश्रयमकस्यैव। तथाहि—अविमिश्रित प्रथमपादादिगतम् द्वितीयपादादिगतम्, तृतीयपादादिगतम्, चतुर्थपाददिगतामिति चत्वारा प्रकारा आदिभागगतयमकस्य । एवमेव प्रथमादिपादमध्यान्तभागगतमपि, ततो मेलनेन द्वादशभेदा अविमिश्रितयमकस्येत्यभिप्राय ।

[प्रथमपादगतस्य अव्यपेताविमिश्राऽऽदिभागगतयमकस्योदाहरणम्]

मानेन मानेन सखि ! प्रणयोऽभूत् प्रिये जने ।
खण्डिता कण्ठमाश्लिष्य तमेव कुरु सत्रपम् ॥ ४ ॥

तत्रादौ प्रथमपादगतम् अव्यपेत-[अव्यवहित]-मविमिश्रम् आदिभागगतं यमक-मुदाहरति—'मानेन' इति । [अत्यन्तमानवतीं खण्डितांप्रति तस्याः सखीनां वचन-मिदम्] हे ! 'सखि'=! आलि ! 'प्रिये जने'=वल्लभे जने प्रणयिनि जनम्प्रतीत्यर्थः 'अनेन'=एतादृशेन गाढतरत्वादस्माकमपि क्लेशवहेन 'मानेन'=ईर्ष्याजनितेन कोपेन 'मानः कोपः स तु द्वेधा प्रणयेर्ष्यासमुद्भवः' इति ज्ञेयम् मानस्य लक्षणम् । 'प्रणयः'= प्रेमा 'तव' इति शेषः 'मा भूत्'=प्रियम्प्रत्येतादृशः कोपः माकार्षीरित्यर्थः । ननु— सापराधे तत्रागते मानः समाश्रयणीय इत्याशङ्क्याह-'खण्डिता' इति । त्वं 'खण्डिता'=ईर्ष्याकालुष्यं गताऽपि 'कण्ठम् आश्लिष्य'=स्वयमेवालिङ्गनं दत्त्वा 'तम् एव'= प्रियं जनम् 'सत्रपम्'=सव्रीडम् 'कुरु'=विधेहि । कृतापराधेऽपि तस्मिन् कण्ठाश्लेषद्वारा प्रीतिप्रदर्शनेन लज्जितावरणान्नान्याधिकं शासनमिति भावः ।

अत्र 'मानेन मानेन' इति अव्यपेतम् [व्यवधानं विना] आदिपादगतमादिभाग-यमकम् । इत्थमेव ययुनाधर्मा पादयमकमित्युदाहृतं वाग्भटेन—'**दयां चक्रे दयाश्रके । सता तस्माद् भवान्वित्तम्**' इति । अन्वयार्थः —हे राजन् ! यस्मात् भवान् दयाम् [illegible] 'चक्रे' चकार तस्मात् कारणात् भवान् 'सताम्' [illegible] 'वित्तम्' [illegible] 'दयाश्रये' स्तवान् । अत्र 'क्रीडा'ख्यं छन्दः । अत्रादिपादगता यमता [[illegible]] आद्यभिरिति तादृशं पादयमकम् । खण्डितायाः लक्षणमुक्तं [illegible]— [illegible] ऽन्यासङ्गादरते [illegible]र्ष्याकषायिता इति ॥ ४ ॥

[तस्यैव द्वितीयपादगतस्योदाहरणम्]

मेघनादेन हंसानां मदनो मदनोदिना ।
नुन्नमानं मनः स्त्रीणां सह रत्या विगाहते ॥ ५ ॥

तथा च शाकटायनसूत्रम्—'ग्रहादिभ्यो णिन्' [४ । ३ । ८७] एतद्व्याख्यायाम्—'ग्रहादिराकृतिगणः तेन विसारीत्यादि सिद्धम्' इत्युक्तम् ।

'नुन्न' इति 'नुद' धातोः 'क्त' प्रत्यये रूपम् । 'नुदविदोन्दत्राघ्राह्रीभ्यो ऽन्यतरस्याम्' [८ । २ । ५६] इति सूत्रेण निष्ठातस्य नो वा । पक्षे 'नुत्त' इत्यपि भवति ॥ ५ ॥

[तस्यैव तृतीयपादगतस्योदाहरणम्]

राजन्वत्यः प्रजा जाता भवन्तं प्राप्य सत्पतिम् ।
चतुरं चतुरम्भोधिरसनोर्वीकरग्रहे ॥ ६ ॥

अत्र—'तृतीयपादगतमव्यपेतमविमिश्रमादिभागगतं यमकमुदाहरति—'राजन्वत्य' इति । [हे ! राजन् !] 'चतुरम्भोधिरसनोर्वीकरग्रहे'=चत्वारः अम्भोधयः समुद्रा एव रसना काञ्ची कटिभूषणं यस्याः सा तथाविधा उर्वी पृथिवी चतुःसमुद्रपर्यन्ता इत्यर्थः तस्याः करः राजदेयांशः अथ च करः पाणिः तस्य ग्रहे ग्रहणे 'चतुरम्'=दक्षम् 'भवन्तम्'=त्वाम् 'सत्पतिम्'=सन् साधुहितकारी चासौ पतिः पालकः ईशः सुभर्ता च तम् 'प्राप्य'=लब्ध्वा 'प्रजाः'=विशः 'राजन्वत्यः'=प्रशस्तराजोपेताः 'जाताः'=सम्पन्नाः [illegible] ।

'केचित्'=कतिपये शवरैरिव 'अरण्यम्'=जङ्गलम् 'आक्रान्तम्'=आश्रितम् जीवन्त एवके वनम्प्रति पलायिता इत्यर्थः । 'केचित्'=अपरे सङ्ग्रामाङ्गणे पञ्चत्वम्प्राप्ताः अहितैः 'दिवौकसाम्'=देवानाम् 'सद्म'=स्थानं सुरलोक इत्यर्थः आक्रान्त' मिति एवमेव सम्बन्धः । अर्थात् तव रणे निर्भीका केचिन्मृता स्वर्गं जग्मुः । उक्तञ्च—

द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ ।
परिव्राड् योगयुक्तश्च रणे चाभिमुखो हतः ॥ इति ॥

अत्र 'रहितैरहितैः' इति चतुर्थपादगतमव्यपेतमविमिश्रमादिभागगतं यमकम् । एव-मव्यपेतानविमिश्रयमकस्यादिभागगता चत्वारो भेदा दर्शिताः । द्वितीयभागादिविषया अपि एवभेदा बोद्धव्याः ['स्थौ स्यन्दनवानारौ' इत्यत्र] एकस्मिन्नेव श्लोके चतुर्षु पादेषु आदिभागगतं यमकं यथा—[ईश्वरशतके]

† **सज्जात सज्जात**तल्लोचनाग्रे ! **सन्ध्यात ! सन्ध्यात**पत्रा सुराद्ये ।
माधीनमाधीनपरिग्रहेण **कालेन कालेन** हत कृथा माम् ॥

अत्र 'सज्जात सज्जात' 'सन्ध्यात सन्ध्यात' 'माधीन माधीन' 'कालेन कालेन' इत्येव-माकारेण चतुर्षु पादेषु आदिभागगतं यमकमिदम् ॥ ७ ॥

[प्रथमद्वितीय-(आदि मध्य)-पादगतयमकस्योदाहरणम्]

मधुरं मधुरम्भोजवदने ! वदनत्रयोः ।
विभ्रमं भ्रमरभ्रान्त्या विडम्बयति किं नु ते ॥ ८ ॥

सम्भेदयोर्नान् अव्यपेतयमकभेदान् निरूपयन् आदौ 'आदिमध्यान्ते'त्यनेन [illegible] सन्त्रयम् [प्रथमद्वितीय-प्रथमतृतीय-प्रथमचतुर्थपादगतभेदत्रयम्] क्रमेणोदाहरति— मधुरम्' इति । 'ते'=भो 'अम्भोजवदने'=अम्भोजमिव वदनं यस्याः तत्सम्बुद्धौ वदने [illegible] 'ते'=तव 'नेत्रयोः'=नयनयोः [विषये सप्तमी] 'मधु'=वसन्ते [illegible] [illegible] भ्रमरभ्रान्त्या भ्रमेण मधुरम्'=मनोहरम् 'विभ्रमम्'=विलासं शोभाम् [illegible] [illegible] विरोधेन प्रकटति समर्पयति वा इति [illegible] =वाच्य । किं नु [illegible] [illegible] [illegible] तु [illegible] यथा [illegible] । [illegible] नु [illegible] [illegible] [illegible]

नेत्रयोर्विभ्रमः भ्रमरसम्भ्रमेण मधुना [वसन्तेन] एव सन्तानित इत्यहं सम्भावये मन्ये अन्यथा अन्यस्मिन् काले तादृशभ्रमरविलासस्य असम्भवात् तथा तर्कना युज्यत इति भाव ।

अत्र 'मधुर मधुरम्' इति तथा 'वदने वदने' इति च प्रथमद्वितीयपादगतम् आदियमकम् पादद्वयमिश्रणाच्च मिश्रसञ्ज्ञम्, पादानां व्यवधानाभावेन च अव्यपेतम्, एवमिदम् 'प्रथमद्वितीयपादगमिश्राव्यपेतादिभागतयमक' मुच्यते । 'मधु' क्षौद्रे जले क्षीरे मद्ये पुष्परसे मधु । दैत्ये चैत्रे वसन्ते च जीवशोके मधुद्रुमे' इति [विश्व'] ॥ ८ ॥

वारणो वारणोद्दामो हयो वा स्मर ! दुर्धर ।
न यतो नयतोन्तं नस्तदहो विक्रमस्तव ॥ ९ ॥

प्रथम तृतीयपादगत तदेवोदाहरति—'वारण.' इति । हे 'स्मर !'=कामदेव! यतः= यस्मात् कारणात् 'तव' रणोद्दाम '=रणे सङ्ग्रामे उद्दाम दुर्मद सङ्ग्रामघस्मर इत्यर्थ 'वारण वा'=गजश्च तथा 'दुर्धर '=पराप्रधृष्य सङ्ग्रामदुर्धर्षः 'हय वा'=वाजी [घोटक] च 'न'=नैव 'अस्ति' इति शेष 'तत्'=तस्मात् हेतो अर्थात् युद्ध [illegible] कारणात् [वस्तुतस्तु 'तव' तथापि इति व्याख्येयम्] न = [illegible] 'अन्तम्'=नाश मृति 'नयत '=प्रापयत तव 'विक्रम '=बलम् [illegible] इत्यर्थ । अत्र वारणो वारणो 'नयतो नयतो' इति प्रथमतृतीय [illegible] इदमपि मिश्रमव्यपेतञ्च पूर्ववत् । किञ्च—अत्र—विनाश [illegible] 'विभावना' अलङ्कारो बोध्य ॥ ९ ॥

[प्रथमचतुर्थपादगताव्यपेतमिश्रयमकस्योदाहरणम्]

राजितै राजितैक्ष्ण्येन जीयते त्वादृशैर्नृपैः ।
नीयते च पुनस्तृप्तिं वसुधा वसुधारया ॥ १० ॥

एवम् आदिमध्यान्तभेदो निरूपित , मध्यान्तेत्यनेन प्रतिपादित मध्यमध्यम , मध्यान्तश्चेति भेदत्रय क्रमेण निरूपयितुकाम आदौ द्वितीयतृतीयपादगत [मध्यमध्यम] अव्यपेतम् आदिभागगत यमकमुदाहरति—'करोति' इति । [प्रियाविप्रयुक्तस्य कस्यचिदुक्तिरियम्] 'सहकारस्य'=रसालस्य [आम्रस्य] 'कलिका=कोरक मुकुलमिति यावत् 'मन्मन '=मदाय मानसम् उत्कलिकोत्तरम्'=उत्कलिका रुहरुहिका उत्कण्ठाविशेष इति यावत् तया उत् उद्गत तर प्राबल्य यस्य, अथवा उत्कलिकया उत्तर प्रधानम् 'करोति'=विधत्ते वसन्तसमयसूचकतया कामोद्दीपनादिति भाव । किञ्च—'एष '=श्रूयमाण 'मत्तकोकिलनिस्वन =मत्त वसन्तकालत्वाद् उन्माद गत [च असौ] कोकिल पिक तस्य निस्वन रव पञ्चमस्वर इत्यर्थ [सोऽपि] 'मन्मन =दम्पत्यो रहस्यालाप [एव इत्यध्याहार्यम] 'मन्मन '=मदायमानस उत्कलिकोत्तर करोति' इति पूर्ववदर्थ ।

मन्मन — सुरते कर्णमूले तु निजदेशीयभाषया ।
दम्पत्यो कथन यत्तु मन्मन त प्रचक्षते ॥

इत्युक्तलक्षणको भवति । केचित्तु—मनसि मनुते प्रभुष्यतीति 'मन्मन काम पृषोदरादित्वात साधु इत्याचक्षते । साधु चैतत् एव 'मन्मन कोकिलालापश्चेति [द्वौ अपि] मन्मन उत्कलिकोत्तर करोतीत्यन्वय । अत्र 'कलिको कलिको 'मन्मनो मन्मनो इति द्वितीयतृतीयपादयोरादिगतत्वात तयोश्च [द्वितीयतृतीयपदयो] मध्यस्थत्वात् द्वितीयतृतीयमध्यमध्यपादगतम् अव्यपेतम आदिभागगत यमकमिदम ॥ ११ ॥

[द्वितीयचतुर्थपादगतस्य मध्यान्तयमकस्य उदाहरणम्]

कथं त्वदुपलम्भाशा विहताविहतादृशी ।
अवस्था नालमारोढुमङ्गनामङ्गनाशिनी ॥ १२ ॥

[illegible]त्वात् चतुर्थपादस्य च अन्तत्वात् 'द्वितीयचतुर्थपादगतं मध्यान्तं मिश्रमव्यवहितम् [illegible]भागगतं यमकम्' इति ॥ १२ ॥

[उक्तस्यैव तृतीयचतुर्थपादगतस्योदाहरणम्]

निगृह्य नेत्रे कर्षन्ति बालपल्लवशोभिना ।
तरुणा तरुणान् कृष्टानलिनो नलिनोन्मुखाः ॥ १३ ॥

तृतीयचतुर्थपादगतं [मध्यान्तगं] यमकमुदाहरति—'निगृह्य' इति । 'नलिनोन्मुखाः'=नलिनेषु कमलेषु उन्मुखाः कमलमकरन्दलोलुपतया तेषु पिपतिषवः इत्यर्थः '[illegible]'=भ्रमराः 'बालपल्लवशोभिना'=बाल[illegible] सद्योनिर्गतैः पल्लवैरिति यावत् [illegible] शोभिना [illegible] 'तरुणा'=वृक्षेण 'कृष्टान्'=हत[illegible]यान् 'तरुणान्'=यूनो जनान् 'नेत्रे'=चक्षुषी 'निगृह्य'=बलात् गृहीत्वा 'कर्षन्ति'=आकर्षयन्ति अर्थात् स्वकीयशो[illegible] कुर्वन्ति । अत्र 'तरुणा तरुणा नलिनो नलिनो' इति तृतीयचतुर्थपाद[illegible]न [illegible] मध्यत्वेन, चतुर्थपादस्यान्तत्वेन च, द्वयोः पादयोर्मिश्रणात् [illegible]—अव्यवहितं मिश्ररूपमादियमकं बोध्यम् ॥ १३ ॥

[[illegible] प्रथमद्वितीयतृतीयपादगतस्योदाहरणम्]

विशदा विशदामत्त-सारसे सारसे जले ।
कुरुते कुरुतेनेयं हंसी मामन्तकामिषम् ॥ १४ ॥

अत्र प्रथमद्वितीयतृतीय मध्याद्यपादगत अव्यवहित मिश्रम् आदिपादगत यमकम् ।
छन्दु—एकविधमेवेति पूर्वमप्युक्तम् ॥ १४ ॥

विषमं विषमन्वेति मदनं मदनन्दन ।
सहेन्दु-कलयापोढ-मलया मलयानिल ॥ १५ ॥

आद्यन्तेत्यनेनोक्त भेदत्रय क्रमेण निरूपयन् पूर्वं प्रथमद्वितीयचतुर्थपादगत तदुदाहरति—'विषमम्' इति । 'अपोढमलया'=अपोढ परित्यक्त मलम मालिन्य यया तया 'इन्दुकलया'=इन्दुकलया सह विद्यमान 'मदनन्दन'=मम कान्ताविरहिण अनन्दन अप्रीत्युत्पादक 'मलयानिल'=दक्षिणपवन 'विषमम'=विकट प्रतीकारानर्हम् 'विषम्'=गरलम तथा तथाविधम [विषरूप] 'मदनम=कामम 'अन्वेति'=अनुसरति तमुद्दीपयती यथ इन्दुकलामलयानिलौ द्वावपि कामोद्दीपकौ । अत्र 'विषम विषम 'मदन मदन' 'मलया मलया' इति प्रथम–द्वितीय–चतुर्थपादगतानि पदानि । तेषां प्रथमद्वितीययोरादावन्तात चतुर्थपादस्य चान्तत्वात् प्रथमद्वितीयचतुर्थपादगतम [आद्यन्त पादगतम] मिश्रम अव्यवहितम आदिभागगत यमकमिद । यत्तु–'विषम विषमन्वेति' इत्यत्र यम्यमानपदयोरेकस्य सानुस्वारत्वे न सन्तोषश्चेत तदा 'विषम विषम–' इत्यानि इति प्रथमपाद पठनीय द्वितीय'विषम मित्यस्य 'विषेण सा उपमा यस्य इति व्युत्पत्त्या विषसदृशमित्यर्थ इत्याह यश्चित तत्तस्य साहित्यशास्त्रबोधाल्पत्वमावेदयति अनुस्वाराणां यमकत्वानिरसनीकारात् । उक्त हि–[अग्निपुराणे]—

रलयोर्डलयोस्तद्वज्जययोर्बवयोरपि ।
शसयोर्मनयोश्चान्ते सविसर्गाऽविसर्गयो ।
सानुस्वारानुस्वारया स्यादभेदेन कल्पनम् ॥ इति

यदि तु तत्पाठान्तर तदा तथाऽर्थयोजना साध्या स्यात् । पर न तद्दृष्टमिति दिक् ।
॥ १५ ॥

[तारय प्रथमतृतीयचतुर्थपादगतस्योदाहरणम्]

मानिनी मानिनी पुरेत निपङ्गत्व मनङ्ग ! मे ।
दारिणा दारिणा शर्म तनुता तनुता पल ॥ १६ ॥

अत्र 'मानिनी मानिनी' 'हारिणी हारिणी' 'तनुतां तनुतां' इति प्रथम-तृतीय-चतुर्थपाद गतत्वेन तृतीयपादस्य आदित्वेन, चतुर्थपादस्य अन्तत्वेन च प्रथम-तृतीय-चतुर्थपादगतम् आद्यन्तगम् मिश्रम् अव्यवाहितम् आदिभागग यमकम् ॥ १६ ॥

[तस्यैव द्वितीय-तृतीय-चतुर्थपादगतस्योदाहरणम्]

जयता त्वन्मुखेनास्मा नकथं नकथं जितम ।
कमलं कमलं कुर्वदलिमद्दलिमत्प्रिये ! ॥ १७ ॥

द्वितीय तृतीय चतुर्थपादगत [आद्यन्तम्] यमकमुदाहरति—'जयता' इति । हे ! 'मत्प्रिये !'=मदीयप्राणवल्लभे ! अस्मान् जयता'=वश नयता 'त्वन्मुखेन'=त्वदास्येन 'अकथम्=नास्ति कथा विवादो यस्यां क्रियायां तद् यथा स्यात् तथा 'कमलम्'=सरोजम् 'कथं न जितम्'=अपि तु जितमेव । कथम्भूत कमलम् । 'कम् अलकुर्वत'=जल भूषयत् तथा 'अलिमद्दलि=अलिमन्ति सभ्रमराणि दलानि पत्राणि सन्ति अस्य इति अलिमद्दलि । यत्र अस्मादृशा चेतना अपि जिता तत्र जडानां तेषां कमलानां जये का कथेति भाव ।

अत्र—'नकथ नकथ' 'कमल कमल' 'दलिमत् दलिमत्' इत्येव द्वितीय तृतीय चतुर्थपादगतम् [द्वितीयतृतीययोरादित्वात् चतुर्थस्य च अन्तत्वात्] आद्यन्तग मिश्र मव्यवाहितमादिभागगत यमकम् । एवञ्च आद्यन्तेत्यनेनोक्ता त्रयो भेदा निरूपिता ॥१७॥

[तस्यैव चतुर्ष्वपि पादेषु वर्त्तमानस्य उदाहरणम्]

रमणी रमणीया मे पाटलापाटलांशुका ।
वारुणी वारुणीभूत सौरभासौरभास्पदम् ॥ १८ ॥

'रमणी' इत्यनेनोक्त पादचतुष्टयगतम् अव्यपेतमादिभागगत यमकमुदाहरति—'रमणी' इति । 'रमणी'=एतादृशी सुन्दरी स्त्री 'मे'=मम 'रमणीया'=रतिस्थान भवतु' इति शेष । कीदृशी इत्याकाङ्क्षाया विशिनष्टि पाटलेति । पाटलापाटलांशुका'=पाटला वृक्षविशेष तत्पुष्पमपि पाटला । पाटला [पुष्प] वत् पाटल श्वेतरक्तम् अंशुक वस्त्र यस्या सा तादृशी । पुन कीदृशी । 'सौरभास्पदम्'=सौरभस्य सौगन्ध्यस्य आस्पद प्रतिष्ठा स्थान [illegible] । [पर्यन्ता लक्षणमुक्त प्राक प्रथमपरिच्छेदस्य टीकाया विषये

३७ प्रष्ठे] तामुपमिनोति—'वारुणी' इति । यत एवभूता अत एव 'अरुणीभूतगौरभा वारुणी इव'=अरुणीभूता रक्तीभूता चार्मा सौरी सूर्यसम्बन्धिनी भा दीप्ति यत्र सा तथा-विधा वारुणी पश्चिमा दिग् इव । अत्र 'रमणी रमणी' 'पाटला पाटला' 'वारुणी वारुणी'। 'गौरभा गौरभा' इत्येव पदानां पादचतुष्टयगतत्वात् सर्वपादगतमव्यवहित मिश्रमा-दिभागगत यमकम् इति आदिमध्यान्तेति कारिकोक्तस्य अव्यपेतादिभागयमकस्यैकादश प्रकारा उदाहरणे स्पष्टीकृता ।

गौरी चार्मी भा' इति 'गौरभा' इत्यत्र समानाधिकरणसमासे 'स्त्रियाः पुंवद्भाषित पुंस्कात्' [६ । ३ । ३४] इति पाणिनिसूत्रेण पुंवद्भाव । सूरस्य इयम 'सौरी' 'तस्येदम्' [४ । ३ । १२०] इतीदमर्थेऽण । तत ङीप् ॥ १८ ॥'

[अवान्तरभेदोपसंहारपूर्वकप्रकरणान्तरारम्भप्रतिज्ञा]

इति पादादियमकमव्यपेतं विकल्पितम् ।
व्यपेतस्यापि वर्ण्यन्ते विकल्पास्तस्य केचन ॥ १९ ॥

यमकस्यावान्तरभेदप्रकरणमुपसंहरति—'इति' इति । 'इति'=दर्शितदिशा 'अव्य-पेतम्'=व्यवधानरहितम् अव्यवहितम् 'पादादियमकम्'=पादानामादिभागगत यमकम् 'विकल्पितम्'=सप्रभेद निरूपितम् उदाहरणैरित्यर्थ । अधुना 'व्यपेतस्य अपि'=व्यव-धानसहितस्यापि 'तस्य'=यमकस्य 'केचन'=कतिपये न तु सर्वे 'विकल्पाः'=भेदा 'वर्ण्यन्ते'=निरूप्यन्ते अग्रिमग्रन्थेनेति शेष ॥ १९ ॥

[प्रथमद्वितीयपादगतस्य मिश्रस्य व्यपेतस्य आदिभागगतस्य यमकस्योदाहरणम्]

मधुरेण दृशां मानं मधुरेण सुगन्धिना ।
सहकारोद्गमेनैव शब्दशेषं करिष्यति ॥ २० ॥

निरूपिता आदिभागगता अव्यपेता यमकप्रकारा, साम्प्रति व्यपेतादिभागगतस्य यमकस्य [illegible] पादे असम्भव इति मत्वा प्रथम प्रथमद्वितीयपादगत [illegible] —'मधुरेण' इति । 'मधु'=वसन्त 'दृशाम' [illegible] 'मानं'= [illegible] । 'सहकारोद्गमेन' [illegible] [illegible] [illegible] । [illegible] —

'मधुरेण'=मधुमाद्दितेन मकरन्दबिन्दून् श्च्योततेत्यर्थ । तथा 'सुगन्धिना'=शोभनगन्धवता तीव्रगन्धिनेत्यर्थ । तादृशस्यैव तस्योद्दीपकतया मानिनीमानहानिकरत्वादिति भाव । अत्र—'मधुरेण मधुरेण' इति द्वे पदे प्रथमद्वितीयपादयो आदिगते यमकघटके [मध्ये] 'दृशां मानम्' इति पदद्वयेन व्यवधानसत्त्वात् । एवञ्चैतत् प्रथमद्वितीयपादगत व्यवहित मिश्रम् आदिभागगत यमक ज्ञेयम् ॥ २० ॥

[तस्यैव प्रथमतृतीयपादगतस्योदाहरणम्]

करोऽतिताम्रो रामाणां तन्त्रीताडनविभ्रमम् ।
करोति सेर्ष्यं कान्ते च श्रवणोत्पलताडनम् ॥ २१ ॥

प्रथमतृतीयपादगत तदेवोदाहरति—'कर इति । 'रामाणाम्'=सुन्दरीणां नारीणाम् 'अतिताम्र'=अत्यन्त लोहित 'कर'=शय [पाणि] 'तन्त्रीताडनविभ्रमम्'=तन्त्र्या वीणाया ताडन वादनम् तद्रूप विभ्रम विलासम् [कर्मपदमिदम्]। तथा 'कान्ते'=वल्लभे अपराधकारिणि प्रिये इत्यर्थ सेर्ष्यम्'=ईर्ष्याजनितकोपसहित यथा स्यात् तथा [इति क्रियाविशेषणम्] 'श्रवणोत्पलताडन च'=श्रवणोत्पलाभ्यां [कर्ण] भूषणीकृताभ्या कमलाभ्यां ताडनम् आहननञ्च करोति इत्यर्थ [illegible] ।

अत्र 'करोऽति करोति' इति पदयो प्रथमतृतीयपादयोरादिगतत्वात् व्यवहितमिति [illegible] सामान्यविशेषलक्षणगततति रपि ध्येया । एवञ्च—'प्रथमतृतीयपाद [illegible] [व्यवधानसहित] मिश्रम् आदिपादगत यमकम् इत्यस्य सञ्ज्ञा ॥ २१ ॥

[तस्यैव प्रथमचतुर्थपादगतस्योदाहरणम्]

सकलापोल्लसनया कलापिन्याऽनुनृत्यते ।
मेघाली नर्तिता वातै सकलापो विमुञ्चति ॥ २२ ॥

द्वितीयतृतीयपादगत तदेवोदाहरति—'स्वयम्' इति । हे ! कामिनि !'=भूयान् कामोऽस्यामिति तत्सम्बुद्धौ हे कान्ते ! इत्यर्थ । 'स्वयम् एव =कान्तकृतानुनयनमन्तरेणैव 'गलन्मानकलि'=गलन् दूरीभवन् मानस्य प्रणयकोपस्य कलि कलहो यस्मात तत् अथवा मान एव कलिर्यस्य एवभूत 'ते'=तव 'मन =हृदयम [कर्तृ] 'इह = प्रावृष प्रथमागमे 'नीपस्य =कदम्बस्य कलिकाम् =कोरकम् 'दृष्ट्वा =आलोक्य 'कां दशाम् न स्पृशेत्=अपि तु सर्वामपि कामदशा स्प्रक्ष्यति । वर्षाकाले अतिमृदुत्वात् धैर्यच्युत ते मन कथ त्वया विरहे सान्त्वनीयमिति भाव. । अत्र—'कलिकामि कलियामि' इति पदे [उभयत्रापि निरर्थके] द्वितीयतृतीयपादगते व्यवहिते च स्त तेन द्वितीयतृतीयपादगत मिश्र व्यवहितमादिभागगत यमकमिदम् ॥ २३ ॥

[तस्यैव द्वितीयचतुर्थपादगतस्योदाहरणम्]

आरुह्याक्रीडशैलस्य चन्द्रकान्तस्थलीमिमाम् ।

नृत्यत्येष लसच्चारुचन्द्रकान्त शिखावल ॥ २४ ॥

द्वितीयचतुर्थपादगत तदेवोदाहरति—'आरुह्य' इति । आक्रीडे [उद्याने] शैल [पर्वत] इति आक्रीडशैल क्रीडापर्वत तस्य 'इमाम् चन्द्रकान्तस्थलीम्'=चन्द्रकान्तमणिभुवम 'आरुह्य'=तदुपरितनभागमाश्रित्य 'एष '=पुरोवर्ती 'शिखावल '=केकी [मयूर] 'नृत्यति' [illegible] शिखावल । 'लसच्चारुचन्द्रकान्त '=लसन् शोभमान चारु मनोहर चन्द्रकाणां मेचकानाम् अन्त प्रान्तभागो यस्य स । '[illegible]' इति पाठे तु चलन दोलायमान चारु चन्द्रकान्तो यस्येत्यर्थ ।

अत्र 'चन्द्रकान्त चन्द्रकान्त' इति द्वयो पदयो द्वितीयचतुर्थपादगतत्वात् [illegible] दिभागगतत्वात् व्यवहितत्वाच्च द्वितीयचतुर्थपादगत व्यवहित मिश्रम् [illegible] मिदम्। यत्तु—'[illegible] चन्द्रकान्तमणिविशेषनिर्मितां स्थलीम्' इति [illegible] '[illegible] [४ । १ । ४] इत्यादि [illegible] । '[illegible] [illegible] चेत' [illegible] एव [illegible] [illegible] । अत [illegible] उदाहरणे '[illegible]' [illegible] । [illegible] । [illegible] '[illegible]' [illegible]

[तस्यैव तृतीयचतुर्थपादगतस्योदाहरणम्]

उद्धृता राजकादुर्वी ध्रियतेऽद्य भुजेन ते ।
वराहेणोद्धृता यासौ वराहेरुपरिस्थिता ॥ २५ ॥

तृतीयचतुर्थपादगत तदेवोदाहरति—'उद्धृता' इति । [हे ! राजन् !] 'या असौ वराहेण'=वराहावतारेण भगवता विष्णुना 'उद्धृता'=रसातलात् ऊर्ध्वमानीता 'उर्वी'=भूमि 'सा अद्य' 'ते'=[तव] 'भुजेन'=बाहुना 'राजकात्'=राजसमूहात् उद्धृत्य=आच्छिद्य 'ध्रियते'=स्वायत्तीक्रियते स्ववशे स्थाप्यते इत्यर्थ कथम्भूता उर्वी–'वराहे = श्रेष्ठस्य शेषनागस्य उपरि स्थिता । वरश्चासौ अहिश्चेति कर्मधारय ।

अथ राजकम् । 'राजन्यकं च नृपतिक्षत्रियाणां गणे क्रमात्' इत्यमर । राज्ञां समूहो 'राजकम्' । 'गोत्रोक्षोष्ट्रोरभ्रराजराजन्यराजपुत्रवत्समनुष्याजाद् वुञ्' [४ । २ । ३६] इति सूत्रेण 'राजन्' शब्दात् 'वुञ्' प्रत्यय । अत्र—'वराहे वराहे' इति तृतीयचतुर्थपादयोरादिभागगत व्यवहित मिश्र यमकम् ॥ २५ ॥

[तस्यैव प्रथमद्वितीयतृतीयपादगतस्योदाहरणम्]

करेण ते रणेष्वन्तकरेण द्विषतां हताः ।
करेणवः क्षरद्रक्ता भान्ति सन्ध्याघना इव ॥ २६ ॥

प्रथमद्वितीयतृतीयपादगत तदेवोदाहरति—'करेण' इति । [हे राजन !] [illegible] 'द्विषताम्'=शत्रूणाम 'अन्तकरेण'=मृत्युप्रदेन [illegible] 'ते=तव [illegible]' 'हता'=[illegible] 'करेणव'=गजा अर्थात शत्रूणामेव 'क्षरद्रक्ता'=[illegible] शोणिता येषां ते रुधिरप्लाविता सन्त 'सन्ध्याघना इव'=[illegible] 'भान्ति'=[illegible] । अत्र—'करेण' इत्येकमेवरूप त्रिवार प्रथमद्वितीय[illegible] मिश्र अव्यवहितमादिभागगत यमकमेतत । '[illegible] [illegible] ॥ २६ ॥

[प्रथमतृतीयचतुर्थपादगतस्य तस्यैवोदाहरणम्]

परागतरुराजीव वातैर्ध्वस्ता भटैश्चमूः ॥
परागतमिव क्वापि परागततमम्बरम् ॥ २७ ॥

अस्माकं मते तु अकर्मका अपि विवक्षावशात् सकर्मका भवन्ति । यथा—भट्टिकाव्यस्य नवमसर्गे—'अक्षारिषु शराम्भांसि तस्मिन् रक्षःपयोधराः' इत्यत्र 'अक्षारिषु क्षरितवन्त' । अत्र 'शराम्भांसि' इत्येतत् 'अक्षारिषु' इति क्रियापदस्य कर्म । अत एवोक्तं मल्लिनाथेन 'क्षरतिरकर्मकः क्षरेत्वतजशक्ति' रित्यादि प्रयोगेषु दृश्यते । इह तु सकर्मको विवक्षित इति । अत्र 'परागत' इत्याकारकं पदं त्रिवारमागतम् प्रथमद्वितीयचतुर्थपादस्यादिभागे, तेन प्रथमद्वितीयचतुर्थपादगमादिभागगतमव्यवहितं मिश्रं यमकमेतत् ॥ २७

[तस्यैव द्वितीयतृतीयचतुर्थपादगतस्योदाहरणम्]

पातु वो भगवान् विष्णुः सदा नवघनद्युतिः ।
स दानवकुलध्वंसी सदानवरदन्तिहा ॥ २८ ॥

द्वितीयतृतीयचतुर्थपादगतं तदेवोदाहरति—'नवघनद्युतिः'=नवघनस्य नूतनजलधरस्य द्युतिरिव द्युतिर्यस्य सः, 'सः'=लोकवेदप्रसिद्धः नूतनजलधरकान्तिः [श्यामः] 'विष्णुः'=हरिः 'वः'=युष्मान् 'सदा पातु'=रक्षतु । कथम्भूतः—'दानवकुलध्वंसी'=असुरकुलघातकः । पुनः कीदृशः—'सदानवरदन्तिहा'=दानेन मदेन सह वर्तते इति सदानः समदः चासौ वरः महान् दन्ती गजः कुवलयापीडनामा तं [दन्तिनम्] हन्ति यः सः सदानवरदन्तिहा । अत्र—'सदानव' इत्येतदेव द्वितीयतृतीयचतुर्थपादानामादिभागगतत्वेन व्यपेत [व्यवहित] मिश्रम् आदिभागगतं यमकम् ॥ २८ ॥

[सर्वपादगतस्य तस्यैवोदाहरणम्]

कमले समकक्षं ते कमलेर्ष्याकरं मुखम् ।
कमलेख्यं करोषि त्वं कमलेवोन्मदिष्णुषु ॥ २९ ॥

सर्वपादगत यथा वा मम—

* **लोकनाथरस** एव पीयतां लोकनाथरस एव दीयताम् ।
लोकनाथरस एव लीयतां लोकनाथरस एव चीयताम् ॥

परमिद चतुर्ष्वपि पादेषु आदिभागगत व्यवहितम् अमिश्र यमकम ॥ २६ ॥

[प्रथमद्वितीयतृतीयचतुर्थपादगतस्य तस्यैव विजातीयस्योदाहरणम]

मुदारमणमन्वीत मुदारमणिभूषणा ।
मदभ्रमदृदृश कर्त्तुमदभ्रजघना क्षमा ॥ ३० ॥

[illegible]व्यपेतयोरुदाहरणान्युक्तानि इदानीं तस्यैव व्यपेतस्य सजातीयविजातीयघटि[illegible] [illegible] दिदर्शयिषु प्रथमद्वितीयतृतीयपादगत विजातीयम् [प्रथमद्वितीय[illegible] तृतीयचतुर्थयोरन्यविधम्] यमकमुदाहरति—'मुदा' इति । 'उदारमणि-भूषणा'=उदाराणि [illegible] बहुमूल्याणि मणिभूषणानि रत्नजटिता अलङ्कारा यस्या[illegible] 'मदभ्रमद्दृशा'=मद मद्यपानजनित तारुण्यसौन्दर्यादिजनित गर्वगमुत्थो[illegible] [illegible] वा तेन भ्रमन्त्य प्रचलायमाना आघूर्णिता इति यावत दृश चक्षूंषि [illegible], तथा 'अदभ्रजघना'=अदभ्रम अनल्प [पृथु] जघनं कटि-[illegible] 'रमणी' इति शेष, 'रमणम'=प्रिय रतिक्षमम 'मुदा'=[illegible] 'अन्वीयम्'=[illegible] 'कर्त्तुम'=[illegible] 'क्षमा'=शक्ता । अथवा 'रमणम [illegible] क्षमा' इति योज्यम । 'ई' गतौ इत्यस्य 'लि' [illegible] ।

[illegible] पादयोरादिभागे 'मुदारम' 'मुदारम' इति, तृतीयचतु[illegible] 'मदभ्र मदभ्र' इति च यमकस्यावयवपदानि विजातीयानि व्यवहितानि [illegible] । [illegible] प्रथमद्वितीयगत तृतीयचतुर्थगत विजातीय मिश्र व्यवहित यमकमिदम [illegible]

[तस्यैव च प्रथमतृतीयपादगतस्य द्वितीयचतुर्थपादगतस्य विजातीयस्योदाहरणम्]

उदितैरन्यपुष्टानामारुतैर्मे हतं मनः ।
उदितैरपि ते दूति ! मारुतैरपि दक्षिणैः ॥ ३१ ॥

प्रथमतृतीययो द्वितीयचतुर्थयोश्च तदेवोदाहरति—'उदितै' इति । 'आ' इति खेदेऽव्ययम् 'हे ! दूति !'='अन्यपुष्टानाम्'=परभृतानां कोकिलानामित्यर्थः 'उदितैः'= उद्भूतैः 'रुतैः'=कूजितैः 'कुहू कुहू'रवैरित्यर्थः न केवलमेतैरेव 'अपि'=किन्तु 'ते'=तव 'उदितैः'=वचनैरपि अर्थात् कान्ताया विरहदुःखसूचकैर्वाक्यैरपि तथा 'दक्षिणैः'= दक्षिणदिग्भागगतैः 'मारुतैः अपि'=पवनैरपि मलयानिलैरित्यर्थः 'मे'=मम 'मनः'=चित्तम् 'हतम्'=पीडितम् । एवम् 'उदितैः' इति पदम् उत्पूर्वकात् 'इण गतौ' इत्यस्मात् धातो 'गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च' [३ । ४ । ७२] इति सूत्रेण कर्त्तरि 'क्त' । द्वितीयम् 'उदितैः' इति तु 'वद' धातोः 'नपुंसके भावे क्तः' [३ । ३ । ११४] इति भावे 'क्त' । 'वचिस्वपियजादीनां किति' [६ । १ । १५ ।] इति सम्प्रसारणम् ।

अत्र—प्रथमतृतीयपादयोरादिभागे 'उदितैः उदितैः' इत्याकारके द्वितीयचतुर्थपादयो-रादिभागे तु 'मारुतैः मरुतैः' इत्याकारके यमकपदे पदे स्त । तेच विजातीये पादयो-रादिभागगते च । एवं 'प्रथमतृतीयपादगतं द्वितीयचतुर्थपादगतञ्च विजातीयं यदन्ति मिश्र मादिभागगतं यमकं सिद्धम् ॥ ३१ ॥

[प्रथमचतुर्थगतस्य द्वितीयतृतीयगतस्य तस्योदाहरणम्]

सुराजित ह्रियो यूना तनुमध्यासरेत स्त्रियः ।
तनुमध्या क्षरत्स्वेदसुराजितमुखेन्दव ॥ ३२ ॥

प्रथमचतुर्थगतमेवविध द्वितीयतृतीयगतमन्यादृशं तदेवोदाहरति—सुरा इति ।

[यमकान्तरनिरूपणप्रतिज्ञा]

इति व्यपेत यमकप्रभेदोऽप्येष दर्शित ।
अव्यपेतव्यपेतात्मा विकल्पोऽप्यस्ति तद्यथा ॥ ३३ ॥

अव्यपेतं व्यपेतं च यमकं निरूप्य सम्प्रति तयोर्द्वयोरेकत्र मिश्रीकरणात् जायमानान् अन्यान् दर्शयितुं प्रतिजानीते— इति' इति । इति'=उक्तया दिशा 'एष'=पूर्वोक्त 'व्यपेतयमकप्रभेद'=व्यपेतानि व्यवहितानि [यानि] यमकानि तेषां प्रभेद प्रकार 'अपि'=अव्यपेत यमकप्रभेदश्च 'दर्शित'=उदाहरणलक्षणाभ्यां निरूपित [सम्प्रति] 'अव्यपेतव्यपेतात्मा'=अव्यपेतो=अव्यवहित व्यपेतो व्यवहित तौ आत्मा स्वरूप यस्य स तादृश अव्यपेतव्यपेतमिश्रणस्वरूप उभयमिश्र इति यावत् 'अपि' विकल्प.'=भेद 'अस्ति' 'तद्यथा'=अस्य उदाहरणं स्पष्टीक्रियत इत्यर्थ ॥ ३३ ॥

[प्रथमद्वितीयगतस्य तृतीयचतुर्थगतस्य अव्यपेतव्यपेतस्य मिश्रस्यादिभागगतस्य यमकस्योदाहरणम्]

सालं सालम्बकलिका सालं सालं न वीक्षितुम् ।
नाली नालीनवकुला नाली नाली किनीरपि ॥ ३४ ॥

च 'नाली' इत्याकारक चतुर्वार यमकसाधक पदमुपात्तम तच्च प्रथमे पादे अव्यपेत[व्यवधानरहितम्]द्वितीये च 'चकलिका' इत्यनेन व्यवहितत्वात् व्यपेतम्, एवमेव तृतीये 'नाली नाली इत्यव्यपेतं चतुर्थे च 'नवकुना' इत्यनेन व्यवहितत्वच्च तदेव व्यपेतम् । एवमुभयात्मकमादिभागगत पूर्वार्धात् परार्धस्य विभिन्नतया विजातीय मिश्र यमकमिदमुच्यते ॥ ३४ ॥

[तस्यैव प्रथमचतुर्थगस्य द्वितीयतृतीयगस्य चोदाहरणम्]

कालं कालमनालक्ष्यतारतारकमीक्षितुम ।
तार तारस्य रसितं कालंकालमहाघनम ॥ ३५ ॥

प्रथमचतुर्थपादयोरेकप्रकार द्वितीयतृतीयपादयोरन्यप्रकार तदेवोदाहरति—'कालम्' इति । 'का'=[illegible] 'कालम्'=ईदृश वर्षागमयम् 'ईक्षितुम'=द्रष्टुम् 'घनम्'= समर्था, न कापि [illegible] । कीदृश कालम्—'अनालक्ष्यतारतारकम्'=न आ समन्तात [illegible] घनावृतत्वाद् द्रष्टुमशक्या. तारा' [illegible] तारका नक्षत्राणि यस्मिन् तमिति । पुन कीदृशम् 'तारतारस्यरसितम्=तारस्य [illegible] भाव' तारता तया [illegible] [illegible] रसितम अर्थात् मेघानां गर्जित यत्र त ताद्दशम् । तथा 'कालम'=वियोगिनां कृते [illegible] यमसद्दशमित्यर्थ । पुन — कालमहाघनम'=[illegible] श्यामवर्णा महान्त [illegible] घना मेघा यस्मिन ताद्दशमिति ।

अत्र प्रथमचतुर्थपादयो 'काल' इति [illegible] द्वितीयतृतीयपादयो 'तार तार इति [illegible] पठित [illegible] पूर्ववत [illegible] उभयात्मक [illegible] मिश्रमादिभागग यमकम ॥ ३५ ॥

[तस्यैव पादचतुष्टयगतस्योदाहरणम]

याम यामत्रयाधीनायामया मरणं निशा ।
यामयाम धियास्वर्त्याया मया मथितेव सा ॥ ३६ ॥

पादचतुष्टयगतं तदेवोदाहरति—'याम' इति । [illegible] वियोगिनो विलापावस्थावर्णनम । 'यामत्रय[illegible]'= यामानां [illegible] यामत्रयम तस्य यामत्रयस्य [illegible] यस्या सा [illegible] तथा दीर्घतर[illegible] 'निशा'=[illegible] 'मरणम'—[illegible] याम=' [illegible] । [illegible] । [illegible] [illegible] भाव ।

[illegible]

[illegible]

[मां विना] आयाति इति 'अन्वत्यीया'। आङ्पूर्वकात् 'या' धातो 'क्विप्' प्रत्यय। मद्विरहेण प्राणपीडावर्तीत्यर्थ । एवम्भूता सा 'मया'-विदेशागमनेन तद्विरहकारिणा 'मलिना एव =अस्ता एव मारितेत्यर्थ । अर्थात् मद्विरहेण तस्यास्त्वन्या प्राणा अवश्य निर्गमिष्यन्ति तथा चेदमेव मे महद्दुःखमुपस्थितमिति भाव ।

'अयाम' इति 'या' धातोर्लिटि उत्तमपुरुषस्य बहुवचने रूपम् । अत्र— 'याम याम' इति यमकस्य चतुर्णां पादानामादिभागे स्थितमिति अव्यवहिताव्यवहिततया सर्वपादगतम् [illegible] यमकमिदम् ॥ ३६ ॥

[पादादिभागगतस्य यमकस्योपसंहार]

इति पादादियमकविकल्पस्येदृशी गति ।
एवमेव विकल्प्यानि यमकानीतराण्यपि ॥ ३७ ॥

तन्मन्मुखो हे स्थिरायते ! 'भवान्' 'यते'=यमन यति समाधिरित्यर्थः, ततः चित्तवृत्तिनिरोधात् 'न हीयते'=नैव प्रच्युतो भवति । कीदृशो भवान्—'यतेन्द्रिय'=यतानि यतानि शब्दस्पर्शादिविषयेभ्यः प्रत्याहृतानि इन्द्रियाणि चक्षुरादीनि येन स तादृशः इन्द्रियसंयमं विना समाधेरनुपपत्तेः । उक्तञ्च श्रीकृष्णेन भगवता [श्रीमद्भगवद्गीता० अ० ५ । २७, २८]

स्पर्शान् कृत्वा बहिर्बाह्यांश्चक्षुश्चैवान्तरे भ्रुवोः ।
प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ ॥
यतेन्द्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः ।
विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः ॥ इति ॥

तद्विपरीत्ये तु—[तत्रैव उक्तं यथा—

इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते ।
तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि ॥ इति ॥ श्री० गी० २ । ६७ ॥

तस्मात्समाध्यर्थमिन्द्रियसंयमः अत्यावश्यक इति भावः ।

तथा 'ते'=तव 'अमायतः अपि,=मायाया दम्भस्य भावो मायता न मायता अमायता दम्भाभावोऽपि 'इयते'=एतावत्परिमाणाय मानुमनर्हायेत्यर्थः तथा 'उत्तम'=नामम् 'अयते'=आगच्छते अथवा क्षयरहिताय 'मयाय'=घनानन्दाय 'अमृत'=अजायत ।

अत्र—चतुर्ष्वपि पादेषु 'यत यते' इत्याद्येव यमकघटक पद पादम [illegible] नातम् [illegible]मपि पाद तस्य पुनरावर्त्तनात् तद् अव्यपेतम् अन्त्यपादापत्त्या च [illegible]मिति अव्यपेत यमकं [illegible] सवर्णारम्भ स [illegible] [नागगत] यमकमुच्यते । [illegible] व्याख्यात इत्यभरः । 'यत' इति 'यम' धातोः '[illegible]' [illegible] । [illegible] 'अयत' इति इण् धातोः शतरि रूपम् । ततो [illegible] । [illegible] । '[illegible]' इति वा [illegible] रूपम् । प्रमाणिकावृत्तम् 'प्रमाणिका [illegible]' इत्युक्तलक्षणात् ।

[[illegible] यमकस्योदाहरणम्]

सभासु राजन्नसुराहतैर्मुखै-
र्महीसुराणां वसुराजितैः स्तुताः ।
न भासुरा यान्ति सुरान्न ते गुणाः
प्रजासु रागात्मसु राशितां गताः । ४० ।

अभ्रूविलासमस्पृष्टमदरागं मृगेक्षणम् ।
इदन्तु नयनद्वन्द्वं तव तद्गुणभूषितम ॥ १९१ ॥

अन्यदुदाहरति—'अभ्रूविलासम्' इति। 'मृगेक्षणम्'=हरिणनयनम् 'अभ्रूविलासम्'= नास्ति भ्रुवोविलास कटाक्षपातो यस्य तत् तथाविधम्, तथा 'अस्पृष्टमदरागम्'=न स्पृष्ट प्राप्त मदरागः मदपानजनित लौहित्य येन तत् तथाविधम् 'अस्ति' इति शेष । नयनद्वन्द्वम्'=अक्षियुगलम् तद्गुणभूषितम्'=भ्रूविलासि स्पृष्टमदरागञ्च वर्त्तत इत्यर्थः ।

अत्र मृगेक्षणमुपमानम्, [कान्ता] नयनद्वन्द्वमुपमेयम् । तयो परस्पर विरुद्ध एव धर्मो दर्शित । तेन सादृश्य व्यङ्ग्यमीति अयमपि 'प्रतीयमानव्यतिरेक.' ॥ १९१ ॥

पूर्वस्मिन् भेदमात्रोक्तिरस्मिन्नाधिक्यदर्शनम ।
सदृशव्यतिरेकश्च पुनरन्य. प्रदर्श्यते ॥ १९२ ॥

उक्तयोरुदाहरणयो प्रयोजन दर्शयन् 'सदृशव्यतिरेक' प्रतिजानीते—'पूर्वस्मिन्' इति । 'पूर्वस्मिन् =त्वन्मुखामित्याद्युदाहरणे ‘भेदमात्रोक्ति '=उपमानोपमेययोर्द्वयो भेदको यो धर्म आश्रयभेदरूप' केवल तस्यैव कथन नतु सौरभवत्त्वादिसादृश्योक्ति [नतु प्रस्तुतस्योत्कर्षोक्तिरित्यर्थ] तत् गम्यमेव । 'अस्मिन्'=अभ्रूविलासमित्यादिद्वितीयोदाहरणे आधिक्यदर्शनम्'=उपमानोपमेययोरुत्कर्षापकर्षप्रतिपादकविशेषणै उपमेयभूतनयनसम्बन्धिन उत्कर्षमात्रस्य व्यञ्जयतेति द्वयोर्व्यतिरेकयोर्विशेष । 'पुन अन्य '=आभ्या विलक्षणप्रकार 'सदृशव्यतिरेक '=सादृश्यनिमित्तको व्यतिरेक सदृशधर्ममात्रप्रयोगेण व्यतिरेक 'सदृशव्यतिरेक ' प्रदर्श्यते ॥ १९२ ॥

[शाब्दसादृश्यस्य सदृशव्यतिरेकस्योदाहरणम्]

त्वन्मुखं पुण्डरीकञ्च फुल्ले सुरभिगन्धिनी ।
भ्रमद्भ्रमरमम्भोजं लोलनेत्रं मुखन्तु ते ॥ १९३ ॥

सदृशव्यतिरेकमुदाहरति—' त्वन्मुखम् ' इति । 'त्वन्मुखम् '=तवास्यम् 'पुण्डरीकम्'=कमलञ्च इति द्वे अपि 'फुल्ले'=विकसिते [तत्र कमले पत्रविश्लेषात्मको विकास मुखे न स्मितमय स इति विशेष] तथा 'सुरभिगन्धिनी'=सौरभगन्धोपेते अत्रास्य मधुगन्ध प्रकृतिसिद्ध मुखस्यापि स पद्मिनीनायिकासम्बन्धित्वात्स्वभावसिद्ध । अथ व्यतिरेक दर्शयति—'अम्भोजम् =कमलम 'भ्रमद्भ्रमरम्'=भ्रमन्त मधुलोभितेन सञ्चरन्त भ्रमरा द्विरेफा यत्र तत्तादृशम 'ते [तव] मुखम् तु' 'लोलनेत्रम'= लोले चञ्चले नेत्रे नयने यस्मिन तत् तथाविधम 'अस्ति' इति शेष ।

अत्र फुल्लत्व सुरभिगन्धित्वयोरिति द्वयो साधारणयोत साद्दृश्य शब्दोपात्तम् । 'भ्रमद्भ्रमरत्व लोलनेत्रत्व इति यद्यपि द्वयोरसाधारणो धर्म तथापि तद्द्वय विम्वप्रतिविम्व-

भावापन्न कारणमेवरूप । उक्तञ्च—'अयमेव भेदो भेदहेतुर्यद्विरुद्धधर्माध्यास कारणभेदश्च' इति । भेदश्चात्र द्वयोर्विम्बप्रतिविम्बभावेन प्रतीयते ननु स्फुटशब्देनाभिधीयते ।

'मत्त्या' इति यमकघटकपद चतुर्ष्वपि पादेषु अन्तभागगतम् अतो व्यवहित व्यपेत मिश्र तद्यमकमुच्यते । 'धार्यम्' इति 'धृ' धातो 'ऋहलोर्ण्यत्' [३ । १ । १२४] इति सूत्रेण 'ण्यति' रूपम् । अत्र 'गूढविप्रियकृच्छठ' इति 'दशरूपको'क्तलक्षण शठो नायक । वशस्थवृत्तम् ॥ ४१ ॥

[तस्यैव व्यपेतान्तभागगतयमकस्य उदाहरणम्]

भवादृशा नाथ ! न जानते नते
रसं विरुद्धे खलु सन्नतेनते ।
य एव दीना शिरसा नतेनते
चरन्त्यलं दैन्यरसेन तेनते ॥ ४२ ॥

पादचतुष्टयगतमव्यपेतव्यपेतमन्तभागगत यमकमुदाहरति—'भवादृशा' इति । हे ! 'नाथ !' स्वामिन । [राजन !] 'भवादृशा'=त्वादृशो राजान 'नते'=नमनस्य 'रसम्'=आस्वादम 'न जानते'=नैव विदन्ति । यत 'सन्नतेनते'=सन्नतेन च इनेन च सन्नतेनते, तत्र सन्नत सम्यक् नमनम् इनस्य [स्वामिन] भाव इनता प्रभुता, ते द्वे अपि 'खलु'=निश्चयेन 'विरुद्धे'=एकाधिकरणावर्तिन्यौ न स्त इत्यर्थ । ननु—के नते रस जानन्ति ? इत्याह—'ये' इति । 'ये'=जना 'दीना'=दारिद्र्योपेता सन्ति इति शेष 'ते एव'=केवलम तेन 'दैन्यरसेन'=दारिद्र्यात्मकेन रसेन विषेण आस्वादेन वा हेतुना 'ते'=तव 'अलम्'=अत्यर्थम 'चरन्ति'=त्वामनुसरन्ति अतिमात्र भजन्ते इत्यर्थ । [illegible] जले घाय शृङ्गारादा च विषे द्रवे । [illegible] ॥ [illegible]
[हम]

अत्र—चतुर्ष्वपि पादेषु अन्तभाग नतेनते इति [illegible] पादान्तर व्यवहितत्वात व्यवहित [व्यपेत] मिश्रमुभयात्मक अन्तभागगत यमकम् । [illegible] वृत्तम् ॥ ४२ ॥

[अथ प्रत्येकपादगतस्य मिश्रस्य व्यपेतस्य मध्यान्तगतस्य यमकस्योदाहरणम्]

लीलास्मितेन शुचिना मृदुनोदितेन
व्यालोकितेन लघुना गुरुणा गतेन ।
व्याजृम्भितेन जघनेन च दर्शितेन
सा हन्ति तेन गलित मम जीवितेन ॥ ४३ ॥

मत'=अभिवाद्यत । 'वयम् पापप्रशमनार्थम्' इति शेष । कथम्भूतम् आत्मानम्—'अमरवर्त्मसमानमानम्'=अमराणा [देवानाम्] वर्त्म [मार्ग] इत्यमरवर्त्म आकाशम् [अनन्त सुरवर्त्म ख्यम इत्यमर.] तेन समान तुल्य मानं परिमाण यस्य स तथाभूत तम् । 'आकाशवत् सर्वगतश्च नित्य' इति श्रुते । पुन कीदृशम्—'आनतजगत्प्रथमानमानम्'=आ समन्तात् कायेन मनसा वाचा च नत प्रह्वीभूत यत् जगत् [उपासकवर्ग इत्यर्थ] तत्र प्रथमान विस्तार प्राप्त ख्याति गत इति यावत् मान' पूजा अर्चन यस्य स नम. सर्वजगदर्च्यमानमित्यर्थ । तथा 'भूमानम्'=महान्त सुखरूपमित्यर्थ । 'यो वै भूमा तत् सुख नाल्पे सुखमस्ति भूमैव सुखम्' [छा० स० ?] इति श्रुते । किंवा—भुव पृथिव्या मान सत्कारो यस्य स तम्, वराहावतारे रसातलनिमग्नाया पृथिव्या उद्धरणकरणादिति । अथवा—'भू' पद सर्व कार्य जगत उपलक्षयति तेन 'भुव' पृथिव्यादिकार्यरूपेण मायते अनुमीयते इति 'भूमान नम् । तथा च—तार्किकाणा प्रयोग—'क्षित्यङ्कुरादि सकर्तृक कार्यत्वात् घटवत' इति । अथवा—'भू' पदेन सर्व क्षेत्रमुच्यते । भवति अस्यां सर्वम् [कर्मदीर्णादिकम्] इति 'भू' शरीरम् । धातुमात्रात् बहुल क्विप्' । तस्या भुव =समष्टिव्यष्टात्मकस्य क्षेत्रस्य मानम्=अधिष्ठानम् कल्पनाया आश्रय । पुन. कीदृशम्—'असमाननामानम्'=असमानानि परिमितिरहितानि असङ्ख्यातानि नामानि यस्य स तम् । अनन्त गुणाख्य भगवतो नामामप्यन्तो न विद्यत इति भाव । पुन कीदृशम्—'आन-मानम्'=अनन्ति प्राणन्ति इति आना =प्राणायामपरायणा योगिन । यद्यपि [illegible] अननक्रियासम्बन्धात 'आना' इत्युच्यन्ते तथाप्यत्र [illegible] भगवता योगिनामेव उक्तपदेन ग्रहणम् । तं [illegible] योगिभिर्मनम् योगसारणा [illegible] । ततात न पश्यति निष्कल ध्यायमान' इति श्रुते । पुन कीदृशम्—'[illegible] मानम्'=प्रतिमीयते अनेन इति प्रतिमानम् प्रमाणम् । करणे ल्युट् । [illegible] मान मानम् [illegible] परिच्छेदो यस्य तत् प्रतिमानमानम् [illegible] प्रमाणानामि [illegible] । [illegible] इति [illegible] ननु—नाहि वै । [illegible] । [illegible]

चित्री पुनः कीदृशी—'सारसानुकूलनासमकाञ्ची'=सारसैः पक्षिविशेषैः अनुकूला अनुसृता सारसा सशब्दा काञ्ची रशना यस्याः सा सारसकूजितसवादिरशनामतीत्यर्थः । अत्र—सर्वेषां पादानामादौ मध्ये च 'सार सार' इति यस्यमानपदस्य व्यवहितत्वेन पुनः पुनरावृत्तिदर्शनात् मिश्रं व्यपेतमादिमध्यभागगतं यमकम् । 'उरसारं सुवर्णं स्यात्' इति [त्यादि] । 'सारयन्तम्' इति चौरादिकस्य 'सृ आस्तरणे' इत्यस्य शतरि रूपम् । 'सारसानुकूले'त्यत्र—'जातिकालसुखादिभ्यः परा निष्ठा वाच्या' [२ । २ । ३६] इति वार्तिकेन निष्ठान्तस्य परनिपातः । परमिदं प्रायिकम्—'कृतकट' 'पीतोदक' इत्यादेरपि दर्शनात् । 'स्वागता' वृत्तम्—'स्वागतेति रनभाद्गुरुयुग्मम्' इति लक्षणात् ॥ ४५ ॥

नयानयालोचनयाऽनया नया-
नयानयान्धान् विनयानयायते ।
नयानयासीर्जिनयानयानया-
नयानयान्तान् जनयानयाश्रितान् ॥ ४६ ॥

अधुना पर्यायमवेन पद्ये प्रथमतृतीयपादगतं मध्यपेतमाद्यन्तयमकं द्वितीयचतुर्थपादगतं [illegible] नैरन्तर्यमाद्ययमकमुदाहरति—'नया०' इति । तत्रादौ सुखेनार्थबोधाय पदविभाग—नयानयालोचनया । अनया । अनयान् । अयानयान्धान् । विनय । अनयायते । न । यान् । अयासीः । जिनयानयान् । अनयानयान् । अयान् । [illegible] । जनय । अनयाश्रितान् । 'हे' 'अनयायते' =अयते यानीति अयाः न अयाः [illegible] । [illegible] [अपायशून्या] [illegible] स्यायति उत्तरावालो [illegible] 'अप्रतिहतशासन' राजन् इत्यर्थः ।

चित्री पुनः कीदृशी—'सारसानुकृतसारसकाञ्ची'=सारसैः पक्षिविशेषैः अनुकृता अनुसृता सारसा सशब्दा काञ्ची रशना यस्याः सा सारसकूजितसवादिरशनामतीत्यर्थः । अत्र—सर्वेषां पादानामादौ मध्ये च 'सार सार' इति यम्यमानपदस्य व्यवहितत्वेन पुनः पुनरावृत्तिदर्शनात् मिश्र व्यपेतमादिमध्यभागगत यमकम् । 'उरस्सार सुवर्णे स्यात्' इति [स्यादि] । 'सारयन्तम्' इति चौरादिकस्य 'सृ आन्तरणे' इत्यस्य शतरि रूपम् । 'सारसानुकृते'त्यत्र—'जातिकालसुखादिभ्यः परा निष्ठा वाच्या' [२ । २ । ३६] इति वार्त्तिकेन निष्ठान्तस्य परनिपातः । परमिदं प्रायिकम्—'कृतकट' 'पीतोदक' इत्यादेरपि दर्शनात् । 'स्वागता' वृत्तम्—स्वागतेति रनभाद्गुरुयुग्मम्' इति तल्लक्षणात् ॥ ४५ ॥

नयानया लोचनयाऽनया नया-
नयानयान्धान् विनयानयायते ।
नयानयास्मीर्जिनयानयानया-
नयानयाग्नान् जनयानयाश्रितान् ॥ ४६ ॥

अधुना एवमिमेव पद्ये प्रथमतृतीयपादगत मध्यपेतमाद्यन्तयमकं द्वितीयचतुर्थपादगत तेष्वादिमध्ययमकमुदाहरति—'नया०' इति । तत्रादौ [illegible] भाग —नयानयालोचनया । अनया । अनयान् । अयानयान्धान् । विनय । [illegible] यते । न । यान् । अयानी । जिनयानयान । [illegible]नयान । [illegible] । [illegible] । [illegible]नय । अनयाश्रितान । 'हे ! अनयायते' –अयते यानि [illegible] अया न [illegible] [अपायशून्या], एवम्भूता [illegible] [illegible] [illegible] अयत ! अप्रतिहतशासन ! राजन् इत्यर्थः । 'अनया=प्रत्यक्षमनुभूयमानया [illegible] नयालोचनया=नय नीति, अनय अनीति, नयश्च अनयश्च [illegible] [illegible] नयानयौ आलोचना समीक्षणा तया [illegible] [illegible] सर्वथा पारत्यागस्य [illegible] [illegible] [illegible] [illegible] [illegible] तस्य आनये प्रापणे [illegible] [illegible] [illegible] [illegible] [illegible] ।

घटादिवत् किन्तु स्वयम्प्रकाश इत्यर्थ । तस्मान्मध्यन्दिनप्रचण्डभास्करे भासमानेऽपि घूकादीनां यथा 'नास्ति सूर्यो न भाति' इति प्रत्ययो जायते तथैव नास्तिकादीनामपि, नैतावता वस्तुस्वभावोपन्होतुं शक्यते इति । [श्रीर्वेपरचना शोभा भारती सरळद्रुमे । लक्ष्म्यां त्रिवर्गसम्पत्तौ वेषोपकरणे मतौ' इति विश्वमेदिन्यौ] यद्वा—श्रीयते सेव्यते अज्ञानिभिरिति 'श्री' माया । 'क्विब्वचिप्रच्छिश्रिस्रुद्रुप्रुज्वां दीर्घोऽसम्प्रसारणञ्च' [उ० २ । ५७] इति सूत्रेण 'क्विप्' । श्री माया विद्यतेऽस्मिन् इति 'श्रीमान्' मायावी मायानियन्ता इत्यर्थ । 'तस्मान्मायी सृजते विश्वमेतत्' इति श्रुते । 'मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम्' इति श्रुतेश्च । ततश्च नह्यचेतन चेतनाधिष्ठानमन्तरा नियत स्वातु पारयत इति तादृशेश्वरानङ्गीकारो नास्तिकाना भ्रान्तिविलसितमात्रमेव वेदितव्यम् । ननु—एव सति रागादिमत्त्वादीश्वरस्याप्यनीश्वरताप्रसङ्ग इत्याशङ्कयाह—य 'स्थितिमान्'=[नित्य] कूटस्थ मायां द्वारीकृत्य तादृशाधिष्ठेयप्रपञ्चनियमनसत्त्वेऽपि स्वतो गगनादिवत् निर्विकार । नहि वात्यादिभिर्व्योम्न किञ्चित् छिद्यते नवा बालकल्पिततलमलिनतादिभिस्तस्य लेशोऽपि दृश्यते तद्वदसङ्गस्वभावस्यात्मनो न किञ्चिद् हीयते इति भाव ।

अत्र—सर्वेष्वेव पादेषु मध्ये अन्ते च 'मानमान' इत्याकारकपदस्य व्यवधानशून्यतया पुन पुनरावर्त्तनम् । तेन 'अभ्यपेतम्' 'मखवर्त्म' इत्यादीनामक्षराणा व्यवधानकारितया 'व्यपेतम्' मध्यान्तयमकमिदम् । ननु—एकवर्णोत्तर 'मान' इत्यस्यावर्त्तनात् कथमस्य 'मध्ययमकत्वम्' इति चेत् ? शृणु—प्रकृते आद्यन्तयोरक्षरयो अन्तरालतैव मध्यत्वेन विवक्षिता ततो दोषाभाव । वसन्ततिलकावृत्तम् ॥ ४४ ॥

[प्रतिपाद मिश्रस्य व्यपेतस्यादिमध्ययमकस्योदाहरणम्]

सारयन्तमुरसारमयन्ती
सारभूतमुरुसारधरा तम ।
सारसानुकृतसारसकाञ्ची
सा रसायनमसारमवैति ॥ ४५ ॥

चतुर्ष्वपि पादेषु वर्त्तमान व्यपेतमादिमध्ययमकमुदाहरति—'सारयन्तम्' इति । 'सा'=काचित् [प्रसिद्धा] योषा 'रसायनम्'=वैद्यकशास्त्रप्रसिद्ध जराकार्श्यादिहरमौषधविशेषम् [अपि] 'असारम्'=न सार स्थिर अंशो यत्र तम् असारम् तुच्छम् 'अवैति'=जानाति अर्थात् प्रियस्पर्शजनितसुखापेक्षया अमृतमपि तुच्छ भावयते । कीदृशी सा—'सारयन्तम् तम् उरसा रमयन्ती'=आलिङ्गयन्तम् अथवा आत्मानमभिसारयन्त [सङ्केतस्थाने प्रापयन्त उरसा=वक्षसा रमयन्ती=प्रत्यालिङ्गनेन तम् आनन्दयन्ती कीदृशम—'सारभूतम' अयमेव मदर्थ जगति एक सारभूतो रमणानन्ददातृत्वादिति श्रेष्ठतरम् । कीदृशी सा—'उरुसारधरा'=उरुसाराणि सुवर्णभूषणानि तेषां धरा धार-

* सविस्तरमेतमर्थं प्रकाशितो ज्योतिर्ब्राह्मणे बृहदारण्यके ।

चित्री पुन काद्दशी—'मारमानुकूलनारमकाञ्चीं'=मारैः पक्षिविशेषैः अनुकूला अनुगता मारमा नशब्दा काञ्ची रशना यस्याः सा मारमकाञ्जितमवादिरशनामतीत्यर्थः । अत्र—सर्वपां पादानामादौ मध्ये च 'मार मार' इति यम्यमानपदस्य व्यवहितत्वेन पुन पुनरावृत्तिदर्शनात् मिश्र व्यपेतमादिमध्यभागगत यमकम । 'उरस्मार सुवर्णे स्यात्' इति [म्याादि] । 'मारयन्तम्' इति चौरादिकस्य 'सृ आस्तरणे' इत्यस्य शतरि रूपम् । 'मारमानुकूले'त्यत्र—'जातिकालसुखादिभ्य परा निष्ठा वाच्या [२ । २ । ३६] इति वार्त्तिकेन निष्ठान्तस्य परनिपात । परमिद प्रायिकम्—कृतकट' 'पीतोदक' इत्यादेरपि दर्शनात । 'स्वागना' इत्यम्—स्वागतेति रनभाद्गुरुयुग्मम' इति लक्षणात् ॥ ४५ ॥

नयानया लोचनयाऽनया नया-
नयानयान्धान् विनयानयायते ।
नयानयासीर्जिनयानयानया-
नयानयान्तान् जनयानयाश्रितान् ॥ ४६ ॥

अधुना एकादिमेदेन पद्ये प्रथमतृतीयपादगत मध्यपेतमाद्यन्तयमक द्वितीयचतुर्थपादगत [illegible] मध्ययमकमुदाहरति—'नया०' इति । तत्रादौ [illegible] पदविभाग —नयानयालोचनया । अनया । अनयान । अयानयान्धान । विनय । [illegible] [illegible] । न । यान । अयानी । जिनयानयान । अनयानयान । अयान । [illegible] । नय । अनयाश्रितान । हे 'अनयायते' =अयते [illegible] अया न अया [illegible] [illegible] अपायशून्या [illegible] एवम्भूता आयति [illegible] [illegible] राजन् इत्यर्थ । 'अनया=[illegible] [illegible] नयानयालोचनया=नय नीति, अनय अनीति, नयश्च अनयश्च [illegible] [illegible] नयानययो आलोचना समीक्षणा तया [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] ।

णनय'=अ विष्णु यान्तीति अया तथाभूतान् 'जनय'=सम्पादय वैदिकधर्मावलम्बिनः कुर्वित्यर्थ ।

अत्र—प्रथमे द्वितीये च पादे 'नयानया' इति आदावन्ते च व्यवधानरहिता आवृत्ति, तृतीये चतुर्थे च आदिमध्ययोरपि अव्यवधानेन सा इति यथाक्रममव्यपेत-माद्यन्तयमकम्, आदिमध्ययमकञ्च एकस्मिन्नेव पद्ये निरूपितम् । 'अ' शब्द स्याद-भावेऽपि स्वल्पार्थप्रतिषेधयो । अनुकम्पायाञ्च तथा वासुदेवेऽन्वनव्ययः' इति मेदिनी ।

वशस्थवृत्तम् । लक्षणमुक्त प्राक् ॥ ४६ ॥

[पादचतुष्टयगतस्य मिश्रव्यपेतस्य आद्यन्तयमकस्योदाहरणम्]

रवेण भौमो ध्वजवर्त्तिवीरवे
रवेजि संयत्यतुलास्त्र गौरवे ।
रवे रिवोग्रस्य पुरो हरेरवे
रवेत तुल्यं रिपुमस्य भैरवे ॥ ४७ ॥

पादचतुष्टयगत व्यपेतमाद्यन्तयमकमुदाहरति रवेण' इति । श्रीकृष्णस्य भगवतो नरकासुरेण साक सङ्ग्रामवर्णनमिदम् । 'भौम'=भूमेरपत्य भौम 'तस्यापत्यम्' [४ । १ । ९२] इत्यण् । नरकासुर 'ध्वजवर्त्तिवीरवे'=ध्वजवर्त्तिन श्रीकृष्णस्य भगवतो ध्वजे [पताकायाम्] वर्त्तमानस्य वीरस्य महाप्राणस्य वे पतत्रिणो गरुडस्य 'रवेण'=ध्वानेन [कर्त्रा शब्देन] 'संयति'=सङ्ग्रामे 'अवेजि'=उद्वेग नीत इत्यर्थ । कथम्भूते संयति—'अतुलास्त्रगौरवे'=अतुलम् अपारम् अस्त्राणाम् शक्त्यादीनां गौरव वाहुल्य यत्र तस्मिन् । पुन कीदृशे—'भैरवे'=भीतिजनके । 'अस्य हरेः'=श्रीकृष्णस्य पक्षे सिंहस्य च 'पुरः'=अग्रे 'रिपुम्'=नरकाख्यम् 'अवे'=मेषस्य 'तुल्यम्'=समम् अवेत=यूय जानीत । यस्य वाहनस्यैव वलमसह्य तस्य स्ववलस्य का कथा । किञ्च—यथा सिंहस्य पुरतो मेष तद्वत् कृष्णस्याप्यग्रे नरक इति भाव ।

अत्र—चतुर्ष्वपि पादेषु आदावन्तेऽपि 'रवे इति यम्यमान पद व्यवधानरहित पुन पुनरावर्त्तितम् तत मिश्र व्यवहितमाद्यन्तयमकमिदम् ।

'अवेजि' इति । 'ओविजी 'भयचलनयो रिति तौदादिक रौधादिको वा । कर्मणि तङ् । अवोपसृष्ट । तस्य लुङि 'चिण् भावकर्मणो' [३ । १ । ६६] इति चिण् । 'अवेत' इति अवोपसृष्टत् 'इण गतौ' इत्यस्माद्धातो. लोटि मध्यमपुरुषस्य बहु-वचने रूपम् ॥ ४७ ॥

मयामया लम्भ्यकला मयामया-
मयामयातथ्य विरामयामया ।
मयामयार्त्ति निशयामयामया-
मयामयामूं करुणा मयामया ॥ ४८ ॥

पादचतुष्टयगतमध्यपेनमाद्यन्तयमकमुदाहरति—'मया०' इति । श्लिष्टत्वात् पद-विभागस्तु—मयामयालम्भ्यकलामयामयाम । अयाम । अयातथ्यविरामयामया । मया । अमयार्त्तिम् । निशया । अमया । अमया । अमय । । आमय । अमूम् । करुणा-मय । । आमया । इति बोध्य । अथार्थ —[मित्रम्प्रति कस्यचिद्वियोगिन उक्तिरियम् ।] हे ! 'अमय '=मिनोति क्षिपतीति 'मय ' क्षेपक स्त्यागकारीत्यर्थ ['डुमिञ् प्रक्षेपणे' इत्यस्माद्धातो 'अन्येष्वपि दृश्यते' [३ । २ । १०१] इति पाणिनिसूत्रेण कर्त्तरि 'ड' प्रत्यय] न मय अमय अत्यागकारी पार्श्ववर्त्तीत्यर्थं तत्सम्बुद्धौ हे अमय ! सर्वथा ममान्तिके वर्त्तमान ! तथा 'करुणामय' !=दयाशालिन् ! मित्र ! 'मया'=मद् 'अमूम्'=नायिकाम् 'आमय'=गमय ['अम गतौ' इत्यस्मात् णिचि लोटि प्रथमपुरुषै-कवचने रूपम् । तथभूतेन मया—'आमया'=आमो रोग ['अम रोगे' इत्यस्य चौरा-दिकस्य वर्त्तरि अचि प्रत्यये रूपम् आमयति रोगयतीति आम] तद्रूपे [illegible] रूप [illegible] आम याति प्राप्नोतीति आमया [illegible] [रोगमपतित आदाय [illegible]] [illegible] आमया । कामजनितपाण्डाद्यतेत्यर्थं । 'आतो धातो ' [६ । ४ । १४०] इति [illegible] सूत्रेण आत्याद्यस्य [आकारस्य] लोप । ननु तस्या [illegible] इति [illegible] इति बोधनाय नायिका विशेषयति—[illegible] अमूं नायिकाम्—'[illegible] मयामयाम्'='मय ' गमन विनाश ['मय गतौ' इत्यस्य अचि रूपम्] [illegible] [illegible] अमय [illegible] मयश्च [illegible] 'मयामय' [illegible] [illegible] 'आलम्भ्य ' [illegible] [illegible] 'आमय ' [illegible] [illegible] ।

ऽति दीर्घया इत्यर्थ । तथा—'अमया'=न मा लक्ष्मी. शोभा यस्या सा तया तस्या समागमाभावेन निरुत्सवयेत्यर्थ ।

अत्र सर्वेषु पादेषु आदा मन्ते च 'मया मया' इति यम्यमानपदस्य व्यवधानाभावेन पुन पुनरावृत्तिदर्शनात् अव्यवहितम् 'लभ्यकला' इत्याद्यर्धयोर्मध्ये व्यवधानदर्शनात् व्यवहितञ्च मिश्रमाद्यन्तयमकम् । वंशस्थवृत्तम् ॥ ४८ ॥

[पाद चतुष्टयगतस्य व्यपेतादिमध्यान्तयमकस्य उदाहरणम्]

मतान्धुनाना रमतामकामता-
मतापलब्धाग्रिमतानुलोमता ।
मतावयत्युत्तमताविलोमता-
मताम्यतस्ते समता न वामता ॥ ४९ ॥

सर्वपादगत व्यपेतादिमध्यान्तयमकमुदाहरति—'मताम्' इति । कस्यचिन्महानुभावस्य स्तवनामिदम् । अथ पदविभाग । मतां । धुनाना । आरमताम् । अकामताम् अतापलब्धा । अग्रिमतानुलोमता । मतौ । अयती । उत्तमताविलोमताम् । अताम्यत । ते । समता । न । वामता ॥ अथार्थ —'अताम्यत'=न ताम्यतीति अताम्यन् तस्य कदाचिदपि चेतोग्लानिं न गच्छत 'ते'=तव 'मतौ'=धिषणायाम् 'समता'=समस्य भाव समता शत्रुमित्रादिषु समा वृत्ति 'अस्ति इति शेष । 'न वामता'=प्रतिकूलता तु नैव विद्यते इत्यर्थ कथम्भूता ममता—'आरमताम्'=स्वात्मनि रममाणाना* शब्दादिविषयेभ्य प्रत्याहृतमनसां योगिनाम 'मताम्'=आदृताम् 'अकामताम्'=नि सकल्पतां निरभिलापतामिति यावत् [अपि] 'धुनाना'=कम्पयन्ती न्यक्कारयन्ती अर्थात् योगिजनसमताया अपि श्रेष्ठतरा भवदीया ममता । पुन कीदृशी—'अतापलब्धा'=न तापोऽताप क्लेशाभाव तेन लब्धा अनायाससिद्धेत्यर्थ । पुन किम्भूता—'अग्रिमतानुलोमता'=अग्रिमस्य भाव अग्रिमता श्रेष्ठता तस्या अनुलोमता अनुकूलभावो यया सा श्रेष्ठतासम्पादयित्रीत्यर्थ । उत्तमताविलोमताम्'=उत्तमताया श्रेष्ठताया अर्थात् गुणिताया विलोमताम् वैपरीत्य प्रातिकूल्यमिति यावत् 'अयती =अप्राप्नुवती अर्थात गुणै सहैव विद्यमाना ।

अत्र नवपा पादानाम आदिमध्यान्तेषु 'मता' इति यम्यमान पद सव्यवधान पुन पुनरावृत्ति नीतम, तेन व्यवहितमादिमध्यान्तयमकमेतत । वंशस्थ वृत्तम् ॥ ४९ ॥

शब्दादि विषयेभ्यो मनस प्रत्याहाराभावे दोष उक्त —[श्रीमद्भगवद्गीतायाम]

ध्यायतो विषयान् पुंस सङ्गस्तेषूपजायते ।
सङ्गात्सञ्जायते काम कामात् क्रोधोऽभिजायते ॥
क्रोधाद्भवति सम्मोह सम्मोहात्स्मृति विभ्रम ।
स्मृतिभ्रंशाद बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥ इति ॥ [२ । ६२, ६३]

कालकालगल कालकाल मुखकालकाल !
कालकाल घनकालकाल पनकाल ! काल !
कालकाल सितकालका ललनिकालकाल
कालकालगतु कालकाल ! कलिकालकाल ! ॥ ५० ॥

इदानीमव्यपेतव्यपेतमादिमध्यान्तयमकमुदाहरति । अस्य पदविभागस्तु—प्रथमपादे एकम्पदम् । द्वितीयपादे—उपरि पृथक् निर्दिष्टे द्वे पदे । अग्रे तु—कालकालसितकालका इत्येकम् । अपरञ्च—ललनिका—इत्यपरम् । अन्ये कालकालका । आलगतु । कालकाल ! कलिकालकाल ! । इत्येव बोध्यम् । अथ [श्रीकृष्णं भगवन्तम्प्रति गणिकायाः कस्याश्चित् वचनमिदम्] हे ! काल ! " = कालयति नयमिति कालः कर्मणि घञ् [३ । ३ । १९] अथवा कलयति आयुरिति 'ज्वल पचादिभ्यः' [३ । १ । १३४] अच् । तत 'प्रज्ञादिभ्यश्च [५ । ४ । ३८] इति 'अण्' । कल एव कालः तत्सम्बुद्धौ हे ! काल ! [उक्तं—'कालोऽस्मि लोकक्षयकृत् प्रवृद्धः' इति ।] 'ललनिका'=अनुकम्पनीया [दयनीया] ललना इति ललनिका । अनुकम्पायाम्' [५ । ३ । ७६] इति सूत्रेण अनुकम्पार्थे 'कन्' । टापि—'प्रत्ययस्थात् कात्पूर्वस्यात इदाप्यसुपः [७ । ३ । ४४] इति सूत्रेण अत इत् । एवम्भूता श्रीराधा 'आलगतु'=त्वयि सम्यक् [illegible] इति [illegible] । कथम्भूत ! हे ! कृष्ण ! '[illegible]' कालकाल !=[illegible] [illegible] [illegible]

[illegible]

[illegible]

[illegible]

[illegible]

मृत्यु 'स कालकालो गुणी सर्वविद्यः' इति श्रुतेः । अथवा—हे ! कालकाल !=कालेन समयेन कालयति प्रेरयतीति कालकाल सर्वप्रेरकोऽन्तर्यामी । तथा च श्रुति—'य सर्वेषु भूतेषु तिष्ठन्' इत्यादि बृहदारण्यके अन्तर्यामिब्राह्मणे । विष्णुपुराणेऽपि श्रीकृष्णस्य कालस्वरूपत्वमुक्तम्—कालस्वरूपं रूप तद् विष्णोर्मैत्रेय ! वर्त्तते' इति । तथाच—हे ! 'कलिकालकाल' !=कलिकालस्य कलियुगस्यापिकालः मृत्यु' कल्किरूपेण तस्यान्तकरत्वात् तत्सम्बोधनम् । एवम्भूत ! हे काल ! कृष्ण' इति पूर्व विशेष्यपदमुक्तम् । 'कालो मृत्यौ महाकाले समये यमकृष्णयो' इति [मेदिनी] ।

सा ललनिका कीदृशी इति तां विशिनष्टि— कालकालसितकालका'=कालकेन कार्ष्ण्येन आलसित शोभमान क शिर यैं तथाभूता ये अलका चूर्णकुन्तला यस्या सा । अथवा क जलम् आलातीति 'कालम्' सर तत्र कायन्तीति कालका हसा कालकानामिव आलसित लीलागतिर्ययो तौ कालकौ पादौ यस्या' सा तादृशी ।

अत्र चतुर्णामपि पादानामादौ मध्ये अन्ते च 'कालकाल' इति पद व्यवधानरहित पुनः पुनरावृत्तञ्च अतोऽव्यवहित तथा 'गलमुख' इत्यादिना व्यवहितञ्च आदिमध्यान्त यमकम् ॥ ५० ॥

[अथ सन्दष्टयमकस्य लक्षणम्]

सन्दष्टयमकस्थान मन्तादी पादयोर्द्वयोः ।
उक्तान्तर्गतमप्येतत् स्वातन्त्र्येणात्र कीर्त्यते ॥ ५१ ॥

अथ पराभितस्य स्वोक्तयमकान्तर्भूतस्यापि सन्दष्टयमकस्य स्थान दर्शयति—'सन्दष्ट०' इति । 'द्वयो पादयो '=समीपवर्त्तिनो उपर्यधोभावेन स्थितयो चरणयो 'अन्तादी'=प्रथमपादस्य अन्तोभाग द्वितीयपादस्य आदिर्भाग', एवमेव द्वितीयपादस्य अन्त तृतीयपादस्य आदिश्च, तथा तृतीयपादस्य अन्त चतुर्थपादस्य आदिश्च अनया रीत्या अन्तादी भागौ 'सन्दष्टयमकस्थानम् '='सन्दष्ट नामकयमकस्य स्थान विषय इत्यर्थ सन्दशाकृति यमक 'सन्दष्टयमकम् ' । यथा—सन्दशो हि उभयपार्श्वेवलम्बन कार्यं भवति तथैदमपीति भाव । 'उक्तान्तर्गतम अपि एतत्'=यद्यपि एतत 'रवेण भौम' इत्याद्यन्यपेनान्तादियमकमध्यपात्येव तथापि 'अत्र'=यमकभेदमध्ये स्वातन्त्र्येण अपि=पृथग्भावेनापि कीर्त्यते=प्राचां मतानुरोधेन निरूप्यते इत्यर्थ ॥ ५१ ॥

[सन्दष्ट यमकस्योदाहरणम्]

उपोढ रागाप्ययला मदेन सा
मदेनसा मन्युरसेन योजिता ।
नयोजिता त्मानमनङ्गतापिता
ङ्गतापि तापाय ममास नेयते ॥ ५२ ॥

सन्दष्टयमकमुदाहरति—'उपोढरागा' इति । [कश्चित् प्रियाविमुक्तः स्वमस्त्राय प्रति मानिन्या कृता स्वावस्थामावेदयति] 'सा'=या तत्रापि प्रसिद्धा 'अबला'=सुकुमारी 'मदेन'= तारुण्यजनितेन विकारविशेषेण सीधुपानजनितेन वा 'उपोढरागा अपि'=उपोढ समुन्निद्रः रागः प्रेमा यस्याः सा सम्मात्रानुरागवतीत्यर्थः । एवम्भूता अपि 'योजितात्मानम्'=योजितः निहितः आत्मा मनो यत्र तथाभूताम् 'अनङ्गतापिताम्'=अनङ्गं मदनं तापयितुं शीलमस्या इति इत्यनङ्गतापिनी तस्या भावः अनङ्गतापिता ताम् 'गता'=प्राप्ता 'अपि' अथात् मय्यनुरागरहिता कामरहिता सत्यपि 'मदेनसा'=ममापराधेन [कर्त्रा] 'मन्युरयेण'=क्रोधावेशेन [समम] 'योजिता'=सम्मेलिता सती 'मम' 'इयते'=एतावत्परिमाणाय 'तापाय'=व्यथायै 'न आप'=न प्राप अपि तु प्रापैव अथात् एतदवस्था सा ममातिमात्रसन्तापहेतुता भेजे । 'आप' इति 'आप्ल व्याप्तौ' इत्यादानेषु इति धातोर्लिटि-प्रथमपुरुषैकवचने रूपम् अथ प्रथमपादस्यान्ते द्वितीयपादस्यादौ च 'मदेन सा मदेनसा' इत्यावृत्तिः । एवं द्वितीयपादस्यान्ते तृतीयपादस्यादौ च 'न योजिता न योजिता' इति, तथा तृतीयपादस्यान्ते चतुर्थपादस्यादौ च 'तापिता तापिता' इत्यावृत्तिः [illegible] नास्ति अत सन्दष्टयमकमिदम् ॥ ५२ ॥

द्वितीयचतुर्थपादगतं सन्दष्टयमकं यथा—[काव्यादर्शे [illegible]]

स्मर येन स्वयमात्मभोग्यतां
समरकामविमर्दितारतम् ।
नितम्बिनि वधमत्तु नो रुषा
स मत्तवाणी [illegible] ॥ इति ॥

[समुद्गयमकस्य लक्षणम्]

अर्धाभ्यासः समुद्गः स्यादस्य भेदास्त्रयो मताः ।

[पादाभ्यासयमकस्य लक्षणम्]

पादाभ्यासोऽप्यनेकात्मा व्यज्यते स निदर्शने ॥ ५३ ॥

इत्यनर्थान्तरम् । असौ यथा भागद्वयस्वरूपो भवति तथैव [समुद्रसंज्ञ] यमकमपि पाद-द्वयात्मकत्वात् * 'समुद्र' इत्युच्यते । 'अस्य त्रयः भेदा मता ' इत्यन्वय' । तथाहि—प्रथमतृतीययो द्वितीयचतुर्थयोश्च पादयो तुल्यतायामेक प्रकार । प्रथमद्वितीययो तृतीय-चतुर्थयोश्च तुल्यतायां द्वितीय प्रकार । एव प्रथमचतुर्थयो द्वितीयतृतीययोश्च तुल्यतायां तृतीय प्रकार इति भेदत्रयम् ।

तत्र समस्तपादयमकेषु पादाभ्यासयमकस्वरूप दर्शयति—'पादाभ्यास' इति । 'पादाभ्यास '=एकैकपादाभ्यास 'अपि अनेकात्मा'=अनेकप्रकारो भवति अर्थात् पादस्य एकद्वित्रिरभ्यासद्वारा एकादशप्रकारो ज्ञेय । उक्त स्यात्प्रकारश्चायम्—प्रथमस्य द्वितीय-तृतीय चतुर्थगतत्वात् त्रयो [३] भेदा । एव द्वितीयस्य तृतीय-चतुर्थगतत्वात् द्वौ [२] भेदौ । तृतीयस्य चतुर्थगतत्वे तु एक [१] एव । पुनश्च—प्रथम द्वितीये तृतीये च, प्रथम —द्वितीये चतुर्थे च, प्रथम —तृतीये चतुर्थे च, द्वितीय —तृतीये चतुर्थ च इति [४] चत्वारो भेदा । अथ च—प्रथमो द्वितीये तृतीये चतुर्थे च स्यात् इति [१] एक प्रकार एव सङ्कलनया एकादशविध [११] सम्पद्यते । 'स'=अयं पादाभ्यास निदर्शने '=उदाहरणे 'व्यक्ष्यते'=समुद्रोदाहरणोत्तरमेव वक्ष्यमाणेषूदाहरणे व्यक्ती-करिष्यते इत्यर्थ ॥ ५३ ॥

[प्रथमतृतीयद्वितीयचतुर्थपादगतस्य समुद्रस्योदाहरणम्]

नास्थेय [.] सत्त्वयावर्ज्य परमायतमानया ।
नास्थेय' स त्वया वर्ज्य परमायतमानया ॥ ५४ ॥

समुद्रस्य भेदत्रय निरूपयन् आदौ प्रथम तृतीय-द्वितीयचतुर्थपादगत तदुदाहरति—'नास्थेय ' इति । [काचित् मानवतीं प्रति तद्धितकारिण्या कस्याश्चिद्वचनमिदम्] 'परमायतमानया'=परम अत्यन्त आयत दीर्घ अतिदीर्घ इत्यर्थ मान प्रणयकोपो यस्या सा तया तथाविधया [अपि] तथा—'अस्थेय सत्त्वया'=[अस्थेय सत्वया] अस्थेयम् आभ्यतर सत्त्व स्वभावो यस्या सा अस्थेयसत्त्वा तया 'त्वया' 'स ना'=पुरुष 'न वर्ज्य '=नैव त्याज्य तदनुरोधेनैव वर्त्तितव्यमित्यर्थ । किन्तु—'आयतमा-नया सम्यक् यत्नमाचरन्त्या [भवत्या] 'आस्थेय '=आदरणीय' तथा 'आवर्ज्य = प्रेमादिव्यवहारैरेव स्ववशता नेय । अय भाव —यस्मात् तव स्वभावो नैव स्थिर ततो वल्लभस्यापि पश्चात्ताप विना नान्यत् किञ्चित् भेत्स्यति अतस्तथा यतस्व यथाऽसौ सर्वदा अनुकूलो वर्त्तेत इति । अत्र—प्रथमतृतीयौ पादौ द्वितीयचतुर्थपादौ च समानार्थाविति

---

* रुद्रटलक्षणमाह—'रुद्रट ' [काव्यालङ्कारे] 'अर्धं पुनरावृत्त जनयति यमक समुद्र नाम इति ।

'समुद्गभेद' आह ॥ ५४ ॥ [illegible]

[प्रथमद्वितीयतृतीयचतुर्थपादगतस्य तस्योदाहरणम्]

नरा जिता माननया समेत्य
न राजिता माननयासमेत्य ।
विनाशिता वै भवताऽयनेन
विनाऽशिता वैभवतायनेन ॥ ५५ ॥

प्रथमे द्वितीये पादे, तृतीये चतुर्थे च पादे तुल्यस्वरूपत्वरूपं समुद्गयमकमुदाहरति—'नरा' इति । [युद्धे प्राप्तविजयस्य राज्ञः स्तुतिरियम् 'माननया'=सत्कार[illegible] [illegible] क्रियमाणया साधुवादपूजयेत्यर्थः । [[illegible] 'मान पूजायाम्' इति धातो 'ण्यासश्रन्थो युच्' [[illegible] । १०७] स्त्रियां 'युच् प्रत्ययः ।] 'समेत्य'= [illegible] [illegible] अथवा [illegible] त्वया 'अयनेन'=[illegible] कृतेन प्रयोगेण 'जिता'= पराभवं [illegible] 'नरा'=शत्रव 'माननयासमम्'=मानश्च नयश्च माननयौ [illegible] [illegible] [illegible] तम् 'एत्य'=प्राप्य 'न राजिता'=नैव शोभमाना [illegible] । [illegible] त्वया पराजिता पलायिताश्च शत्रव पत्रपलाशादिभि [illegible] [illegible] [illegible] [illegible] [illegible] तेषां [illegible] । पलायमानशत्रूणामभिधाय [illegible]— 'विनाशिता' इति । भवता=महापराक्रमशालिना त्वया 'विनाशिता'=[illegible] [illegible] 'वै'=तु 'विना'=[illegible] [illegible] 'अशिता'=[illegible] [illegible] भवता— 'वैभवतायनेन'=वैभवम् [illegible] [illegible] [illegible] वैभवतायनेन [illegible] [illegible] । 'ताय' [illegible] [illegible] । [illegible] [illegible] प्रत्ययः । 'यद्यपि [illegible] तथापि [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] ॥ [illegible] [illegible] [illegible] [illegible] पादौ [illegible] समुद्गयमकम् । ५६ ।

[प्रथमचतुर्थद्वितीयतृतीयपादगतस्य तस्योदाहरणम्]

कलापिना चारुतयोपयान्ति
वृन्दानि लापोढघनागमानाम् ।
वृन्दानिलापोढघनागमाना
कलापिना चारुतयोऽपयान्ति । ५८ ।

[illegible]

प्रथमे चतुर्थ च पादे, द्वितीये तृतीये च पादे समतालक्षण समुद्गभेदमाचष्टे—'कलापिनाम्' इति । [प्रावृट्कालवर्णनमिदम्] । लापोढघनागमानाम्' लाप लपन केकाध्वनिरित्यर्थ । स लाप ऊढ प्राप्तो यस्मात् तथाभूतो यो घनानां वारिदानाम् आगम सम्प्राप्ति' मेघसमयो येषाम् ते तादृशा' तेषाम् [मेघकालेन हृष्टचित्तानामित्यर्थ] 'कलापिनाम्'=मयूराणाम् वृन्दानि'=सघा 'चारुतया' सौन्दर्येण वर्षाकालीनशोभाविशेषण ' उपयान्ति '=सङ्गतानि भवन्ति अर्थात् अनेका मयूराणां राजय इतस्तत सङ्घीभूय सञ्चरन्ति केकारव च कुर्वते । परे तु—'लापेन ऊढ व्यञ्जितो घनानामागमो ये'रिति व्याख्यान्ति । 'वाहिताग्न्यादिषु' [२ । २ । ३७] इति सूत्रेण 'लापोढ' इत्यत्र निष्ठाया परनिपात । [आहिताग्न्यादि आकृतिगण]

तथा कलापिनाम् =क न मधुरमस्फुटञ्च ध्वनिम् आप्नुवन्तीति कलापिन' । ग्रहादित्वात् णिनि ' । अथवा 'क शिरोजलमाख्यातम्' इति कोषात् के जले लपन्तीति कलापिन हसा तेषाम् 'च 'आरुतय '=मनोहरा रावा 'अपयान्ति =दूरीभवन्ति । वर्षाकाले हसाना मदो न भवतीति वस्तुस्वभाव. । कथम्भूताना हसानाम्—'वृन्दानिलापोढघनागमानाम्'=वृन्दानिलेन वृन्द वृन्दीभूतोऽनिल' वृन्दानिल वार्षिकेण सघीभूतेन वातेन अपोढ अपगत घनस्य=नृत्यविशेषस्य आगम उल्लासो येषां ते तेषाम् । 'घन स्यात् कास्यतालादिवाद्यमध्यमनृत्ययो'रिति [मेदिनी] । अत्र—प्रथमचतुर्थयो द्वितीयतृतीययोः समानता इत्येव निरूपिता त्रय समुद्गभेदा । उपेन्द्रवज्रा छन्द 'उपेन्द्रवज्रा जतजस्ततो गौ' इति तल्लक्षणात् ॥ ५६ ॥

[अथ—प्रथमद्वितीयपादगतस्य पादाभ्यासस्योदाहरणम्]

न मन्दयावर्जितमान सात्मया
नमन् दयावर्जितमानसात्मया ।
उरस्युपास्तीर्णपयोधरद्वयं
मया समालिङ्ग्यत जीवितेश्वर ॥ ५७ ॥

प्रतिज्ञानुसार नानाप्रकाकार पादाभ्यासमुदाहरति—'न' इति । [नायकोपेक्षाकारणेन स्वखण्डितमानाया कस्याश्चिदनुशयोक्ति] । 'मन्दया'=मूर्खया नायकप्रमादनास्वादभङ्गिमविदुष्या 'नमन्'=प्रह्वीभवन अपि 'जीवितेश्वर '=प्राणनाथ 'उरसि'=क्रोडे [तदीयवक्षसि] 'उपास्तीर्णपयोधरद्वयम् =उपास्तीर्णम निरन्तरार्पित स्तनद्वयम् वक्षोजयुगल यत्र तत् यथा स्यात् तथा [क्रियाविशेषणमेतत्] 'न समालिङ्ग्यत =नैव सम्यक आश्लिष्यत । कथम्भूतया मया—'आवर्जितमानसात्मया'=आवर्जिते अपरित्यक्ते माने प्रणयकलहसे सात्मया प्रवृत्तया [आत्मना यत्नेन सह वर्त्तते इति सात्मा 'शायुगाम्या-मन्यतरस्याम्' (८ । १ । १८) इति टाप ।] पुन कथम्भूतया—'दयावर्जितमानसात्मया'=दयया करुणया वर्जितौ रहितौ मानसात्मानौ यस्या सा तथाभूता

तथा। मानमद आत्मा च तौ मानात्मानौ । 'आत्मा पुंसि स्वभावे च प्रयत्नमनसोरपि' इति [मेदिनी] । अत्र प्रथमद्वितीयपादगतोऽभ्यासः ॥ ५७ ॥

[प्रथमतृतीयपादगतस्याभ्यासस्योदाहरणम्]

सभा सुराणामबला विभूषिता
गुणैस्तवारोहि मृणालनिर्मलैः ।
स भासुराणामबला विभूषिता
विहारयन्निर्विश सम्पदः पुराम् ॥ ५८ ॥

प्रथमतृतीयपादगतमभ्यासमुदाहरति—'सभा' इति । [भूपप्रति कश्चिद्वन्दी=चाटुकार आह] हे ! भूमिपते ! 'मृणालनिर्मलैः'=मृणालवत् कमलनालदण्डवत् शुभ्रैः 'तव' 'गुणैः'=त्वदीयैः सौजन्यगाम्भीर्यशौर्यौदार्यादिभिर्गुणैः 'सुराणाम्'=अमराणाम् 'सभा'=सामिति गोष्ठी 'आरोहि'=सम्यगारूढा अर्थात् देवसभायामपि तव गुणानां चर्चा विद्यते। कीदृशी सभा-'अबला'=न बलः नामासुरो दैत्यो यत्र सा तथाभूता बलासुरविरहिता, इन्द्रेण नाशितत्वात् भयरहिता सती भवद्गुणान् गायतीति भावः । पुनः किम्भूता—विभूषिता विभुः प्रभुः हरिः तेन उषितः वासो यत्र सा । तत एवम्भूतगुणोपेतः सन् 'अबला'=प्रबलः 'विहारयन्'=क्रीडयन् रममाणः 'भासुराणाम्'=भ्राजमानानां 'पुराम्'= नगरीणां 'सम्पदः'=सम्पत्तीः 'निर्विश'=उपभुङ्क्ष्व । 'निर्वेशो भोगभोगयोः' इत्यमरः । अत्र—प्रथमतृतीययोः पादयोरभ्यासः ॥ ५८ ॥

[तत्रैव प्रथमचतुर्थपादगताभ्यासोदाहरणम्]

कलङ्कमुक्तं तनुमध्यनामिका
स्तनद्वयी च त्वदृते न हन्यते ।
न याति भूतं गणने भवन्मुखे
कलङ्कमुक्तं तनुमध्यनामिका ॥ ५९ ॥

इति निश्चितोऽयमर्थ' । यदा वशीकृतेन्द्रियगणाना प्रस्तूयते तदा त्वां विहाय अनामिका ऽन्यस्मिन् जन्तौ न पततीति भाव । 'भूत क्ष्मादौ पिशाचादौ जन्तौ क्लीबम्' इति मेदिनी। अत्र प्रथमचतुर्थयोरभ्यास ॥ ५९ ॥

[द्वितीयतृतीयपादगतस्याभ्यासस्योदाहरणम]

यशश्च ते दिक्षु रजश्च सैनिका
वितन्वतेऽजोपम ! दंशिता युधा ।
वितन्वतेजोपमदं शितायुधा
द्विषाञ्च कुर्वन्ति कुलं तरस्विन ॥ ६० ॥

द्वितीयतृतीयपादगमभ्यासमुदाहरति—'यश' इति । [कस्यचिज्जयेच्छो राज्ञो गुणकीर्त्तनामिदम्] हे ! 'अजोपम' !=अजस्य विष्णोरुपमा सादृश्य यस्य तत्सम्बुद्धौ विष्णुसम! राजन् ! अथवा 'हरसम' ! [अजा विष्णुहरच्छागा' इत्यमरात्] किं वा—'अज' रघो पुत्र तत्सदृश ! 'ते'=तव 'सैनिका'=योद्धार 'युधा'=सङ्ग्रामेण [कृत्वा] 'दिक्षु'=प्राच्यादिषु दशस्वपि दिशासु 'यश, च'=कीर्त्तिम् 'रज च'=स्वपादोत्थित धूलिञ्च 'वितन्वते'=विस्फारयन्ति । कथम्भूता सैनिका —'दंशिता'=कवचिन तथा- 'शितायुधा'=शितानि [प्रत्यह मृगयाकरणात्] तीव्राणि आयुधानि शस्त्राणि येषां ते तादृशा । तथा—'तरस्विन'=वेगवन्त पराधृष्या इत्यर्थ । किञ्च—एवम्भूता ते 'द्विषाम्'=शत्रूणाम् 'कुलञ्च'=सङ्घमपि 'वितनु'=शरीरहीनम् 'अतेज'=हतप्रभम् 'अमदम्'=गर्वशून्यञ्च 'कुर्वन्ति'=विदधते । अत्र—द्वितीये तृतीये च पादे अभ्यास ॥ ६० ॥

[तस्यैव द्वितीयचतुर्थपादगतस्योदाहरणम्]

बिभर्त्ति भूमेर्वलयं भुजेन ते
भुजङ्गमोऽमा स्मरतो मदञ्चितम् ।
शृणूक्तमेकं स्वमवेत्य भूधरं
भुजङ्गमो मा स्म रतो मदाञ्चितम् ॥ ६१ ॥

तस्यैव द्वितीयचतुर्थपादगतमुदाहरति—'बिभर्त्ति' इति । [कस्यचिन्नृपते स्तवनमिदम्] हे राजन् ! 'ते'=तव 'भुजेन'=बाहुना 'अमा'=समम् 'भुजङ्गम'=अनन्त शेषो भगवान् 'भूमे वलयम्'-पृथिव्या चक्र [मण्डलम्] 'बिभर्त्ति'=धारयति । अनन्तवत् त्वं भुजेनापि भूभारम्भारयसीति गर्वो न विधेय इत्याह—'स्मरत'=उभयोर्वृत्तान्त विदितवतो 'मम'= मम 'अञ्चितम्'=युक्तियुक्तमित्यर्थ 'एकम् उक्तम्'=वचनम् 'शृणु'=निशामय । किन्तत् इत्याह—'स्वम्' इति [त्वम्] 'स्वम्'=स्वकीयम् 'भुजम्'=बाहुम् 'भूधरम्'=पृथिव्या धारकम् [अन्य न मत्सदृश महीधारक इत्येवम्] 'अवेत्य'=अवगत्य 'रत'=प्रसन्नमना सन् 'मदाञ्चितम्'=गर्वयुक्तम् [यथा] 'मदम्'=अहङ्कार 'मा स्म गम'=मा वहेत्यर्थ । अत्र—द्वितीये चतुर्थे च पादेऽभ्यास ॥ ६१ ॥

[तस्यैव तृतीयचतुर्थपादगतस्योदाहरणम्]

स्मरानलो मानविवर्धितो य
स निर्वृतिं ते किमपाकरोति ।
समन्ततस्तामरसेक्षणे ! न
समन्ततस्तामरसे ! क्षणेन ॥ ६२ ॥

तदेव तृतीयचतुर्थपादगतमुदाहरति—'स्मरानल' इति । [मानवतीं प्रति तद्वयस्या वक्ति] हे ! 'तामरसेक्षणे !'=कमलनयने ! तथा 'अरसे !'=रसानभिज्ञे ! अचतुरे ! 'ते'=तव 'स्मरानल'=स्मर एव अनल मदनहुतभुक् [कर्तृ] 'मानविवर्धित'=मानेन प्रणयकोपजनितेन गर्वाख्येन चित्तवृत्तिविशेषेण विस्तृत सन् वृद्धि नीत जाज्वल्यमान इत्यर्थ 'य' अस्ति इति शेष । 'स' 'क्षणेन'=उत्सवेन 'समम'=सार्धम् 'किम्' 'समन्तत'=सामस्त्येन 'निर्वृतिम्'=सुखविशेष रतिविलासजम् 'न अपाकरोति'=न दूरीकरोति अपि तु निराकरोत्येव । अथान तावन्मानकरणेनैव वृथा त्वनार्यया मदनानलज्वाला समुत्थापिता येन सर्व मम भस्मसात्कृतम् इत्यर्थोऽपमस्मिन् [illegible] । अत्र— तृतीयचतुर्थयो पादयोरभ्यास ॥ ६२ ॥

[प्रथम-द्वितीय-तृतीयपादगतस्य तस्योदाहरणम्]

प्रभावतो नामन ! वासवस्य
प्रभावतो नाम न वासवस्य ।
प्रभावतोऽनाम न वा सवस्य
विच्छित्तिरासीत् त्वयि विष्टपस्य ॥ ६३ ॥

पादत्रयाभ्यास निरूपयितुकाम आदौ प्रथम द्वितीय तृतीयपादगत [illegible] प्रभावत इति । [illegible] पदपदच्छेद [illegible] । प्रभावत । [illegible] । वासवस्य । [इति प्रथम पाद] । प्रभावत । नाम । नवासवस्य । [illegible] पर्यौ । भावत । [illegible] । न । वा । सवस्य ।

कर्मणः नवासवस्य'=नवश्चासौ आसवो मद्यविशेषः [आसूयते असौ । 'ऋदोरप्' ३ । ३ । ३८ । इति सूत्रेण 'षुञ्' अभिषवे । स्वादि । अस्मात् धातो 'अप्'प्रत्यय] तस्य नवासवस्य अभिनवमैरेयस्य 'वा'=अथवा 'सवस्य यज्ञस्य च 'विच्छित्ति'=विच्छेद विनाश 'न आसीत्'=नैवाभवत् अर्थात् त्वयि सर्वथा कामो धर्मश्च प्रावर्त्तत । तत्र भोगिनां सुरादिकाम धार्मिकानान्तु यज्ञादिधर्म इति विवेकः ।

अत्र—प्रथमद्वितीयतृतीयपादानामभ्यास । 'मैरेयमासवः शीधु, इत्यमर । **माधवस्तु**—'शीधुरिक्षुरसैः पक्वैरपक्वैरासवो भवेत् । मैरेयं धातकी पुष्पगुडधानाम्बुसाहितम्' इत्याह ॥ ६३ ॥

[प्रथमद्वितीयचतुर्थपादगतस्य तस्योदाहरणम्]

परम्पराया बलवारणानां
परम्पराया बलवारणानाम् ।
धूली स्थलीर्व्योम विधाय रुन्धन्
परम्परायाबलवारणानाम् ॥ ६४ ॥

प्रथमद्वितीयचतुर्थपादगत तदेवोदाहरति—'परम्' इति । [कस्यचिद् भूमिपते स्तुतिरियम्] पद विभागस्तु—परम् , पराया । बलवाः । रणानाम् । १ म । परम्पराया । बलवारणानाम् । २ य । परम् । पराय । अबलवारणानाम् । ४ र्थ । ३ य स्पष्ट ॥ व्याख्या—हे ! 'पराय' =पर उत्तम अय शुभावहो विधिर्यस्य तत्सम्बोधने पराय ! इति । 'त्वम्' 'रणानाम्'=संग्रामाणाम् 'परम्परायाः'=समुदायस्य 'स्थली'= अकृत्रिमा भूमिः 'धूली'=रेणून् 'विधाय'=सम्पाद्य 'व्योम'=गगनम् 'रुन्धन्'=प्रभूततरसैन्यरथाश्वनागपदातिपदसङ्घर्षसमुत्थितधूलिभिरेव प्राच्छादयन् सन् 'परम्'=उत्कृष्ट बलेन इति शेष अथवा 'परम्'=प्रयत्नम् 'परम्'=शत्रुम् 'पराया'=परागतवान् जितवानसीत्यर्थ । [परापूर्वकात् 'या' धातो लङि मध्यमपुरुषैकवचने रूपम्] कीदृश त्वम्—'बलवा'= बलेन स्वसामर्थ्येन स्वकीयसैन्याद्युपकरणेन वा वारयति परबलानि इति 'बलवा'। वारयते क्विपि रूपम् । कथम्भूतानाम् रणानाम्—'बलवारणानाम्'=बलमेषामस्तीति 'बला' अर्शआदित्वात् अच् । बला बलवन्तो वारणा गजा यत्र तेषाम् । पुन कीदृशानाम्—'अबलवारणानाम्' =न बलं येषां ते अबलाः दुर्बला तान् वारयन्तीति तेषाम् । अत्र प्रथमद्वितीयचतुर्थपादानामभ्यास ॥ ६४ ॥

[द्वितीयचतुर्थपादगतस्य तस्योदाहरणम्]

न श्रद्दधे वाचमलज्ज ! मिथ्या
भवद्विधानामसमाहितानाम् ।
भवद्विधानामसमाहितानां
भवद्विधाना मसमाहितानाम् ॥ ६५ ॥

तदेवान्यप्रकारमुदाहरति—'न' इति । [कश्चन शठम्प्रति कस्याश्चन नायिकाया वचनमिदम्] हे ! 'अलज्ज' =व्रीडाशून्य ! 'भवद्विधानाम्'=त्वादृशानाम् परवञ्चनैक मात्रव्रतानाम् [अयमर्थ तुरीयपादगतस्य 'भवद्विधानाम्' इत्यस्य] 'मिथ्या वाचम्'= मृषा वाक्यं 'न'=नैव 'श्रद्दधे'=विश्वसिमि । कथम्भूतानां भवद्विधानाम् 'असमाहितानाम्' = अव्यवस्थितचित्तवृत्तीनाम् ['अनवस्थितचित्तस्य प्रमादोऽपि भयङ्कर' इत्युक्तेः] तथा— 'असमाहितानाम्'=असमा न समा किन्तु विषमा अधिका इत्यर्थः अहिता शत्रवो येषाम् अत्यन्तशात्रवाणाम् । एतेन नायकस्य शौर्य्यमपि व्यक्तीकृतम् । कीदृशीं वाचम्— 'असमाहितानाम्'=न समम असमम असरल' कुटिलीभूतो य अहि भुजङ्ग तस्य इव तान विस्तारो यस्या ताम् वक्रामित्यर्थ । तथा—'भवद्विधानाम्'=भवे उत्पत्तिकाले- अर्थात मुखनिर्गमनोत्तर श्रवणकाल एव द्विधाना द्वे धाने अर्थज्ञाने यस्या तां तथाभूताम् । तथा—'भवद्विधानाम्'=भवे द्विधानाम् द्विध. अन प्राणभृतोऽशो यस्या ताम् उत्पन्न प्रभृत्यन्त पर्यन्तं द्वैधिकामित्यर्थ । अत्र—द्वितीय तृतीय-चतुर्थपादेऽन्याम ॥ ६४ ॥

[सर्वपादगतस्याव्यपेतस्योदाहरणम्]

सदाहितो मानस राजसेन ।
सदाहितोऽमानस ! राजसेन ।
सदाहितोमानस राजसेन !
सदाहितोऽमानसराजसेन ॥ ६५ ॥

सन्कार मा लक्ष्मी ते मानमे [द्वन्द्व] । न [विद्येते] मानमे यस्या सा अमानमा सम्मानमम्पद्विहीना राजसेना प्रतिपक्षसैन्य यस्य स तत्सम्बोधनम् । एवम्भूत ! हे ! राजन् ! त्वम् 'सन्नाहित '=कृतसग्रामोद्योग सन् 'न राजसे'=न शोभसे । यत त्वम्—'मन्नाहित '=सन्ना अवसाद विनष्टिं गता अहिता' शत्रवो यस्य स । तथा—'सन्ना'= सश्वासौ ना पुरुष. सत्पुरुष इत्यर्थ । अत एव 'हित '=सर्वेषां हितकृत् एतादृशगुणोपेतस्य तव सम्प्रति युद्धोद्योगो वृथैवेति भाव । अत्र—सर्वेषु पादेषु समोऽभ्यास ॥६६॥

[अथ-श्लोकाभ्यासस्य लक्षणम्]

सकृत् द्विस्त्रिश्च योऽभ्यास पादस्यैवं प्रदर्शितः ।
श्लोकद्वयन्तु युक्तार्थं श्लोकाभ्यास स्मृतो यथा ॥ ६७ ॥

पादाभ्यासमुपसहरन् श्लोकाभ्यास लक्षयति—'सकृत्' इति । 'एवम्'=दर्शितप्रकारेण 'मकृन् द्वि त्रि च'=एकवार द्विवार त्रिवारश्च 'य अभ्यास '=पुनरावर्त्तनम स 'पादस्य =श्लोकचरणस्य 'प्रदर्शित '=निरूपित । तत्र—सकृदभ्यास पादद्वयविषय, द्विरभ्यास पादत्रयविषय , त्रिरभ्यास पादचतुष्टयविषय इति विवेक ।

'युक्तार्थम्'=युक्त सम्बद्ध अर्थ. अभिधेय यस्य तम् सङ्गतार्थम् एकवाक्यत्वसम्बन्धेन एकविशेष्यान्वयबोधकमित्यर्थ तादृश 'श्लोकद्वयम्'=समानवर्णानुपूर्वीघटितपदघटितपादात्मक पद्यद्वितय 'श्लोकाभ्यास '=श्लोकाभ्याससज्ञक यमकम् 'स्मृत '=उक्त कविभिरिति शेष । 'यथा =इति अनुपदमुदाहराम इत्यर्थ ॥ ६७ ॥

[श्लोकाभ्यासस्योदाहरणम्]

विनायकेन भवता वृत्तोपचितबाहुना ।
स्वमित्रोद्धारिणाऽभीता पृथ्वीयमतुलाश्रिता ॥ ६८ ॥
विनायकेन भवता वृत्तोपचितबाहुना ।
स्वमित्रोद्धाऽरिणाऽभीता पृथ्वी यमतुलाश्रिता ॥ ६९ ॥

स्मात् धातो 'क्विप्' । तत्र तृतीयाया एकवचने रूपम् । तुदार्थे त्वाम्प्रति आगच्छेत्यर्थः । 'अरिणा' 'विनायकेन=विगतो नायको यस्य स तेन नायकरहितेन मृतस्वामिना इत्यर्थः । 'भवता=सता [विद्यमानेन [इयम्] 'पृथ्वी=भूमिः' 'यमतुला'= यमस्य कृतान्तस्य तुला मानयन्त्रम् 'आश्रिता=अधिगता अर्थात् मृतापि इति । यथा मान-यन्त्रे न्यूनाधिकभावनिर्णयः क्रियते एवं यमस्य विचारस्थल्यामपि पापपुण्ययोर्विवेकः इति भावः । कथम्भूतेन अरिणा—'उपचितवाहुना=उपगतौ चितामिति उपचितौ तादृशौ बाहू भुजौ यस्य तथाभूतेन । 'उपचितौ' इत्यत्र 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' [वा०] इति वार्तिकेन उपसर्गे सति समासः । पुनः कीदृशेन—'स्वमित्रौदा=स्वानि [धनानि] मित्राणि, [बन्धून्] च उज्झति परित्यजति इति 'स्वमित्रौदाः' तेन 'स्वमित्रौदा' तेन परित्यक्तधनबन्धुवर्गेण इत्यर्थः । 'स्वमित्र' पूर्वकात् उत्पूर्वात् 'ओहाक्' त्यागे इत्यस्मात् धातो 'क्विप्' । तस्य सर्वापहारी लोपः । 'स्वमित्रौदा' इत्या-कारान्तः 'सोमपा' शब्दवत् तस्य तृतीयैकवचने 'आतो धातोः' [६ । ४ । १४०] इति सूत्रेण आकारलोपे रूपम् । अत्र—समानानुपूर्वीकवर्णघटितपदादित्वात् [illegible]-नानाश्च श्लोकाभ्यासात्य यमकमिदम् ॥ [illegible] ॥

[अथ महायमकस्य उदाहरणम्]

पद्माकरश्चतुष्पादं तन्महायमकाद्द्वयम् ।
तत्रापि दृश्यतेऽभ्यासः स्वरः परो यमकाश्रितः ॥ [illegible] ॥

सम्प्रति महायमकं लक्षयति—'पद्माकर०' इति । 'तत्र [illegible] समानाकाराणाम् अक्षराणि यथा न पद्माकरा नाम्ना भासितः [illegible] तत्र तथापि [illegible] तत्र महायमकस्य यमकं भवतीत्यर्थः ।'

समानया [३] । समान ! । या । समानया [४] । अथ व्याख्या—हे ! 'समानयाम !' =समान तुल्यरूप याम प्रयत्न यस्य त सम्बोधनम् अर्थात् सर्वेष्वपि कर्त्तव्येषु समान प्रयामकारिन् ! तथा हे ! 'समान !'=सम तुल्य आन प्राणो यस्य स तत्सम्बुद्धौ मित्रत्वात् 'अभिन्नप्राण' इत्यर्थ । 'मा'=माम् 'अनया'=[प्रकरणगतया] नायिकया साकम् 'समानय'=सम्मेलय तथा यतस्व यथा तया सह मम शीघ्र समागमो भवेदिति किम्भूतया तया—'असमानया'=न समाना तुल्या [अन्या नायिका] यस्या सा तया निरुपमया लोकातिशायिसौन्दर्यवत्येत्यर्थ । तथा—'समानया'=मानेन प्रणयकोपेन सह वर्त्तत इति समाना तया मानिन्या [यद्यप्येव तथापि 'समानया'=मान सत्कार तत्स-हितया सत्कारार्हयेत्यर्थ । सा का नायिका 'या' 'समानया'=मा श्री सम्पत्ति नय नीति मा च नयश्च 'मानयौ' ताभ्यां सह वर्त्तत इति 'सामानया' सम्पत्तिमती नीति मती येत्यर्थ. । एतादृशनायिकया पुण्यलभ्यया सह समागमाय सत्वरो भव । अत्र चतु र्णामपि पादानामभ्यास तत्रापि पादखण्डस्य स इति महायमकमिदम् । 'प्रमाणिका' वृत्तम् ॥ ७१ ॥

[विजातीयमिश्रयमकस्योदाहरणम्]

धराधराकारधरा धराभुजां
भुजा महीं पातुमहीनविक्रमा ।
क्रमात् सहन्ते सहसा हतारयो
रयोद्धुरा मानधुरावलम्बिन ॥ ७२ ॥

अनेकानसजातीयसमभिश्रणभेदानुदाहृत्य सम्प्रति विजातीयसमभिश्रणभेदानपि कांश्चित् दिङ्मात्र दर्शयति—'धरा०' इति । 'धराधराकारधरा'=धरतीति 'धर' ['धृञ् धारणे' इत्यस्मात् पचादित्वात् अच्] धराया पृथिव्या धरा इति 'धराधर'=भूमि-धर शेषो भगवान् । धरां धरतीति तु कुव्याख्यानम् तथासति 'धराधर' 'धरात्र' इति वा स्यात् । धराधरस्य आकार आकृति इति धराधराकार तस्य धरा तत्सदृशा इत्यर्थ । एवमेव धराधराकार धरन्तीति व्युत्पत्तिरपि दृश्य ।

तथ—'अहीनविक्रमा'=न हीन अहीन समधिकोऽनल्प इति यावत् विक्रम पराक्रम सामर्थ्य येषां ते तादृशा । किंवा—अहय सर्पा तेषाम् इन स्वामी अहीन तस्य अनन्तस्य शेषनागस्य अनन्तस्य विक्रम इव विक्रमो येषां ते तथाविधा । तथा—'रयोद्धुरा'=रयेण वेगेन उद्धुरा उत्कटा वेगशालिन । तथा—'मानधुरावलम्बिन'=मानस्य धुर भारम् अवलम्बन्ते इति मानधुरावलम्बिन सम्मानपालका इत्यर्थ । एवंविधैर्गुणैर्विशिष्टा 'धराभुजाम्'=भूपालानां 'भुजा'=बाहा 'क्रमात्'=[illegible] 'महीम्'=पृथिवीम् 'पातुम्'=रक्षितुम् [पालयितुम्] [illegible] =वहन्ते ।

अत्र—प्रथमपादे अव्यपेतम् [अव्यवहितम्] आदिमध्यवयमकम्, पादानां सन्धिषु च अव्यवहितम् अन्तादियमकम् तदेव सन्दष्टयमकम्, द्वितीयपादे तु वर्णद्वयव्यवधानं 'मही मही' इति कृत्वा व्यपेतं मध्ययमकम् तृतीयपादे एकाक्षरव्यवधानेन 'सह सह' इति, चतुर्थपादे तु वर्णद्वयव्यपेत 'धुरा धुरा' इति मध्ययमकम् । एवमनेकेषां विजातीयानां सम्मिश्रणमप्यत्र ज्ञेयम् ॥ ७२ ॥

[अथ—प्रतिलोमयमकस्य लक्षणम्]

आवृत्तिः प्रातिलोम्येन पादार्धश्लोकगोचरा ।
यमकं प्रतिलोमत्वात् प्रतिलोममिति स्मृतम् ॥ ७३ ॥

अनुलोमयमकभेदा प्रदर्शिताः सम्प्रति प्रतिलोमयमकभेदान् प्रदिदर्शयिषुः आदौ तल्लक्षणमाचष्टे—'आवृत्तिः' इति । 'पादार्धश्लोकगोचरा'=पादश्च अर्धञ्च श्लोकश्च ते पादार्धश्लोकाः ते गोचराः विषया यस्याः सा तथाभूता 'प्रातिलोम्येन'=विपरीतभावेन [या] आवृत्तिः'=अभ्यासः अर्थात् पादगोचरा, अर्धगोचरा, श्लोकगोचरा वा आवृत्तिः सा 'प्रतिलोमत्वात् प्रतिलोम-[विपरीत]-भावेन आवृत्तित्वात् 'प्रतिलोमम् इति स्मृतम्'=प्रतिलोमनामकं यमकमुक्तमित्यर्थः ।

इदमत्राकूतम्—यत्र पदपादस्य प्रतिलोमेन आवृत्त्या उत्तरपादो भवेत्, [illegible] स्यापि तद्वदावृत्त्या पदपादो भवेत्, तत्र तत् 'पादगोचरं यमकम्' उच्यते । [illegible] पाद्य प्रतिलोमावृत्त्या उत्तरार्ध, उत्तरार्धस्य विलोमावृत्त्या पूर्वार्धे सति '[illegible] यमकम्' भवति । तथा [illegible] प्रतिलोमेनाप्रथा [illegible] तस्यापि आवृत्त्या पूर्वश्लोकोत तत्र तत् 'श्लोकगोचरयमकम्' इत्युच्यते [illegible] ।

[पादप्रतिलोमयमकोदाहरणम्]

या मताश ! कृतायासा सा याता कृशता मया
रमणारकता तेऽस्तु स्तुतेताकरणामर ! ॥ ७४ ॥

कर्त्तुमशक्ये कार्ये अमर ! देव ! देववत् शक्यमसाध्यमपि साधयितुं क्षम ! तथा हे ! 'रमण !'=कान्त ! 'ते'=तव 'आरकता'=आरयति गच्छतीति 'आर' गन्ता 'ऋ गतौ' इत्यस्मात् स्वार्थण्यन्तात् 'अच्' । अथवा—'अकर्त्तरि च कारके सञ्ज्ञायाम्' [३ । १ । १३४] इति सूत्रेण 'घञ्' । अर्यते परजनोऽनेनेति 'आर' । स एव आरक स्वार्थे कन् । तस्य भावः 'आरकता' इतस्ततो गमनम् 'अस्तु'=भवतु अर्थात् भवान् परनारीजनमेवाभिसरतु । अत्र—प्रथमपादस्य प्रतिलोमेनावृत्तिरिति तथा द्वितीयः पादः, द्वितीयपादस्य च तथैवावृत्त्या प्रथमः पादः, एवं तृतीयचतुर्थावपि, तस्मादत्र पादगोचरं प्रतिलोमयमकम् ॥ ७४ ॥

[श्लोकार्धविषयस्य प्रतिलोमयमकस्योदाहरणम्]

नादिनो मदनाधी स्वा न मे काचन कामिता ।
तामिका न च कामेन स्वाधीनादम नोदिना ॥ ७५ ॥

श्लोकार्धविषयं प्रतिलोमयमकमुदाहरति—'नादिन' इति । [कस्यचित् योगिनो वचनमिदम्] 'नादिन'=नादः नादाख्यं ब्रह्म अस्यास्तीति नादी तस्य 'नादिनः' नादनामकब्रह्मध्यानपरायणस्य 'मे'=मम 'मदनाधी'=मदनश्च आधिश्च मदनाधी मदनः कामः आधिर्मानसी व्यथा । तथा 'स्वा'=स्वीया 'काचन'=काचित् 'कामिता'=शब्दस्पर्शादिविषयगर्धा 'न'=नास्त्येव सर्वं वाक्यं सावधारणमिति न्यायात् । नादानन्दानुभवाप्यायितमानसस्य मम कामसम्बन्धेन मानसी व्यथा विषयाणाञ्च कापि कामना न वर्त्तते इति भावः । एवम् 'दमनोदिना'=चक्षुरादीनामिन्द्रियाणां संयमनं दमः तं नोदितुं निरसितुं शीलमस्येति 'दमनोदी' [[illegible]] तेन तथाभूतेन 'कामेन'=मदनेन हेतुभूतेन 'स्वाधीना'=स्वः आत्मा अधीनः आयत्तः यस्याः सा स्वाधीना अवशीकृतेन्द्रियाणाम् आत्मानमाकुलयन्ती 'तामिका'=ग्लानिः 'च'=अपि 'न'=नास्ति 'मे' इति सम्बन्धः । अत्राह 'सुरेश्वराचार्याः'—

[illegible] कर्म सर्वासु नाडीषु विशोधिताम् ।
अनाहत[illegible] स्वाभावगम्य स्वयमेव नादः । इति । [illegible]

[illegible] । अत्र—श्लोकस्य पूर्वार्धस्य प्रतिलोमपठनात् श्लोकोत्तरार्धम्, तथा श्लोकोत्तरार्धस्य प्रतिलोमावृत्त्या च पूर्वार्धमिति कृत्वा 'प्रतिलोमयमकं श्लोकार्धविषयम्' ॥ ७५ ॥

[श्लोकप्रतिलोमयमकस्योदाहरणम्]

[illegible]मानय माया[illegible]नाननतामना ।
[illegible] मायामायमनादि सा ॥ ७६ ॥

सा दिनामयमायामा नाधीना शरदामुया ।
नासनाजनना शोकविरामायनमानया ॥ ७७ ॥

इति यमकचक्रम् ॥

समप्रश्नोत्तरं प्रतिलोमयमकमुदाहरति—'यानम्' इति । [वारनारीपरायणस्य कस्यचित् स्ववयस्यम्प्रति वाक्यमेतत्] हे ! वयस्य ! त्वम् 'यानम्'=गजाद्यन्यतमं वाहनम् 'आनय'=प्रापय । किमर्थमित्यत आह—'उदारशतार्थीनाम्'=उदाराणाम् धनव्ययकरणेऽसङ्कुचितचित्तानामाढ्यानां [श्रेष्ठिनामित्यर्थः] शतम् अर्थीनम् [illegible] या नाम याम=वेश्याम् अहम् 'आयाम्'=अगमम् । 'सा' मया 'आयम्'=आगमनम् 'अनादि'=अगादि कथितेत्यर्थः ' अथास्य तदानीं बेभ्यामीति । 'गद' व्यक्ते शब्दे इत्यस्य कर्मणि लुङि एकवचने रूपम् । कथनार्थत्वविवक्षया अस्य सकर्मकत्वम्, तेन द्विकर्मकत्वात् 'सा' इत्यस्य गौणकर्मणा [illegible]] एव गमनमात्रस्यर्थीमिति [illegible] मानत्वं [illegible] । कथम्भूता सा—'मार्गानिरता'-मार्गे [illegible] वर्णा [illegible] अर्थात् [illegible] । तथा—'ऊनानजनागना'=[illegible] पिदना [अपि गता] अनान्त प्राणान्नानि ऊनाना' [illegible] इत्यर्थः [illegible] अर्थात् पारङ्गात इति 'ऊनानजनागा निरन्तरमन्यागतारिणीत्यर्थः ॥ ७८ ॥

प्रतिलोमयमकम् । इति यमकालङ्काराणां समुदाय समास इत्यर्थ ॥ ७७ ॥ *

[गोमूत्रिकाबन्धस्य लक्षणम्]

वर्णानामेकरूपत्वं यत्त्वेकान्तरमर्धयो. ।
गोमूत्रिकेति तत् प्राहुर्दुष्करं तद्विदो विदुः ॥ ७८ ॥

कठिनतरयमकनिरूपणप्रस्तावेन तद्वत् कठिनतरान् कांश्चित् †चित्रालङ्कारान् दिद र्शयिषु आदौ गोमूत्रिकां लक्षयति—'वर्णानाम्' इति । 'अर्धयो'=ऊर्ध्वाध पर्यायेण द्वाभ्या पङ्क्तिभ्यां लिखितयो' श्लोकस्य पूर्वार्धोत्तरार्धयो वर्णानाम् =अक्षराणाम् 'एका न्तरम'=एकवर्णव्यवधानसहितम् 'यत् एकरूपत्वम्'=अभिन्नस्वरूपत्वम् 'तद्विद '=चित्रा लङ्कारपण्डिता कवय 'तत् दुष्करम'=सहसा येन केनापि कविना कर्तुमशक्य 'गोमू त्रिका' 'इति' 'प्राहु '=कथयन्तीत्यर्थ । 'यथा' इति वक्ष्यमाणोदाहरणाभिप्रायेणोक्तम । यथा चलतो गोर्मूत्र धाराविशेषाकारेण परिणमते तद्वत् श्लोकविशेषस्यापि लिपिगु णस्थानात् गोमूत्रिका' इति सादृश्यनिबन्धना सञ्ज्ञा ज्ञेया ॥ ७८ ॥

[श्लोकार्धगोमूत्रिकाया उदाहरणम्]

म द नो म दि रा क्षी णा म पा ङ्गा स्त्रो ज ये द यम ।

× × × × × × × × × ×

म दे नो य दि तत् क्षी ण म न ङ्गा याञ् ज लि द दे

॥ ७९ ॥

अत्र—विषमवर्णानां समानरूपत्वम् एतादृशस्थले यत्रलिखितश्लोकोत्तरार्धस्य प्रथमाक्षरमारभ्य पूर्वार्धं पठनीयम् । यत्र तु समानां वर्णानामेकरूपत्वं तत्र पूर्वार्धप्रथमाक्षरमारभ्यैव पूर्वार्धम्, उत्तरार्धप्रथमाक्षरमारभ्यैव च उत्तरार्धं पठनीयं भवति ।

स वाजिसिन्धुरग्रामान् सम्भ्रमादभिधाव[वि]तः ।
जवादसिस्फुरद्धामा विभ्रमादमधात्ततः ॥

गोमूत्रिकाबन्धस्य अन्यदुदाहरणं यथा—

स वा जि सि धु र ग्रा मा न्सं भ्र मा द भि धा वि ता

X X Y Y X Y X X X X X

ज वा द सि स्फु र द्धा मा वि भ्र द्धा द म धा त्त त

[धर्मशर्माभ्युदये]

व्याख्या—स = [illegible] वाजिसिन्धुरग्रामान्=अश्वगजयूथान् [illegible] अभिधावत = [illegible] पलायमानान् निरीक्ष्य [illegible] स्फुरद्धामा=स्फुरत् [illegible] धाम तेजः प्रतापो यस्य स तादृशः [illegible] अपि [illegible] विभ्रत्=[illegible] = [illegible] धाम=[illegible] अधात्=[illegible] । [illegible] यथा—

[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ।

मुरजबन्धो यथा—

सरलाबहलारम्भतरलालिबलारवा ।
वारलाबहलामन्दकरला बहुलामला ॥ [काव्यालङ्कारे]

मुरजबन्धचित्रम् ।

स	र	ला	ब	ह	ला	र	म्भ
त	र	ला	लि	ब	ला	र	वा
वा	र	ला	ब	ह	ला	म	न्द
क	र	ला	ब	ह	ला	म	ला

[शरद्वर्णनमिदम्] कीदृशी शरत् वर्ण्यते—इत्याह—सरलेति । सरल दीर्घ [illegible] बहुलेन प्रभूतेन आरम्भेण तरलानां चञ्चलानाम् अलिबलानां भ्रमरसमूहानां [illegible] या तादृशी । तथा—वारलाभिर्हंसीभिर्बहुला [illegible] । [illegible]—वारेण परिपाट्या लातो लवणं कर्पणं येषां तानि [illegible] तथाभूता 'वारलाबहुला' । तथा—'अमन्दकरला' अमन्दा [illegible] राजानो [illegible] । [illegible] अत्यर्थम् अमला निर्मला इति 'बहुलामला' ।

[अर्धभ्रमसर्वतोभद्रयोश्चित्रयोर्लक्षणम्]

आहुरर्धभ्रमं नाम श्लोकार्धभ्रमणं यदि ।
तदिष्टं सर्वतोभद्रं भ्रमणं यदि सर्वतः ॥ ८० ॥

प्रथमं चतुःषष्टिसंख्यानि कोष्ठानि अष्टपङ्क्तियोग्यानि लेख्यानि । पश्चात् प्रथमपङ्क्तिचतुष्टये क्रमेण, चतुर्णामपि पादानां वर्णा विनिवेश्याः, तत उत्तरमधोलिखितपङ्क्तिचतुष्टये चतुर्थतृतीयद्वितीयप्रथमपादा विपरीतक्रमेण लेख्याः । एवं स्थितौ अर्धभ्रमे अधःपङ्क्तिचतुष्टये पराकृत्या, सर्वतोभद्रे च पराकृत्या समाकृत्या वा चतुर्थादिपादविन्यास इति विशेषः । उद्धारक्रमस्तु [आवृत्तिक्रम] अर्धभ्रमे चतुष्पादात्मिकायां ऊर्ध्वपङ्क्तौ वामात् दक्षिणान्तं, तथा पादचतुष्टयात्मिकायामधःपङ्क्तौ दक्षिणतो वा वामान्तं, एवं वामस्य ऊर्ध्वकोष्ठादधः क्रमेण दक्षिणस्य अधःकोष्ठात् ऊर्ध्वक्रमेण च अनुलोमोच्चारणेन प्रथमादिपादोत्थानं ज्ञेयम् । सर्वतोभद्रे तु वामात् दक्षिणान्तो दक्षिणात् वामान्तं ऊर्ध्वात् अधोऽन्तं, अधस्तात् ऊर्ध्वान्तश्च अनुलोमविलोमाभ्यां सर्वत्र आवृत्त्या पादोत्थितिः द्रष्टव्या इति ॥ ८० ॥

[अर्धभ्रमस्योदाहरणम्]

म	नो	भ	व	त	वा	नी	कं
नो	द	या	य	न	मा	नि	नी
भ	या	द	मे	या	मा	मा	वा
व	य	मे	नो	न	त	ना	त
त	ना	त	न	नो	मे	य	व
वा	मा	मा	या	मे	द	या	भ
नी	नि	मा	न	य	या	द	नो
कं	नी	वा	त	व	भ	नो	म

मुरजबन्धो यथा—

सारलावहलारम्भतरलालिवनारवा ।
वारलावहलामन्दकरला वहलासला ॥ [काव्यालङ्कारे]

मुरजबन्धचित्रम् ।

स	र	ला	व	ह	ला	र	म्भ
त	र	ला	लि	व	ना	र	वा
वा	र	ला	व	ह	ला	म	न्द
क	र	ला	व	ह	ला	स	ला

[illegible] | [illegible] शब्द [illegible]—इत्याह—सारलेति । सारला दीर्घ [illegible] प्रभूत । आरम्भेण तरलानां चञ्चलानाम् अलिवृन्दानां प्रसर्प [illegible] सा नारवा । तथा—वारलाभिरङ्गनाभिर्वहला [illegible]
[illegible]—[illegible] लाघा लतया कर्पण येषां तानि [illegible] [illegible] 'वारलावहला' । तथा—'अमन्दकरला' आनन्द [illegible] [illegible] वलि [illegible] राजाना [illegible] [illegible]—[illegible] [illegible] निर्मिता इति [illegible]' ।

[[illegible]]

अर्धभ्रम नाम श्लोकार्धभ्रमणं यदि ।
तदिष्टं सर्वतोभद्रं भ्रमणं यदि सर्वतः ॥ ८० ॥

प्रथम चतु पष्टिमत्यानि कोष्ठानि अष्टपङ्क्तियोग्यानि लेख्यानि । पश्चात् प्रथमपङ्क्ति चतुष्टये क्रमेण चतुर्णामपि पादानां वर्णा विनिवेश्या, तत उत्तरमधोलिखितपङ्क्ति चतुष्टये चतुर्थतृतीयद्वितीयपादा विपरीतक्रमेण लेख्या । एव स्थितौ अर्धभ्रमे अध पङ्क्तिचतुष्टये परावृत्त्या, सर्वतोभद्रे च परावृत्त्या समावृत्त्या वा चतुर्थादिपादविन्यास इति विशेष । उद्धारक्रमस्तु [आवृत्तिक्रम] अर्धभ्रमे चतुष्पादात्मिकायां ऊर्ध्वपङ्क्तौ वामात दक्षिणत, तथा पादचतुष्टयात्मिकायामध पङ्क्तौ दक्षिणतो वा वामात्, एव वामस्य ऊर्ध्वकोष्ठादध क्रमेण दक्षिणस्य अध कोष्ठात् ऊर्ध्वक्रमेण च अनुलोमोच्चारणेन प्रथमादिपादोत्थान ज्ञेयम् । सर्वतोभद्रे तु वामात् दक्षिणतो दक्षिणात वामत ऊर्ध्वात् अधस्त, अधस्तात ऊर्ध्वतश्च अनुलोमविलोमाभ्या सर्वत आवर्त्तनेन पादोपस्थिति-विज्ञेया इति ॥ ८० ॥

[अर्धभ्रमस्योदाहरणम्]

मं	नो	भ	व	त	वा	नी	कं
नो	द	या	य	न	मा	नि	नी
भ	या	द	मे	या	मा	मा	वा
व	य	मे	नो	म	या	न	त
त	न	या	म	नो	मे	य	व
वा	मा	मा	या	मे	द	या	भ
नी	नि	मा	न	य	या	द	नो
कं	नी	या	त	व	भ	नो	म

[अर्धभ्रम]

व्याख्या—मनोभव इति । हे ! नत !=कामपरवशंनमस्कारार्ह ! 'मनोभव !'= काम ! 'नय' 'अर्नोनम =नेत्रात्मिका 'मानिना =इत्य प्रणयकोपवती कामिनी 'नव 'उदयाय =क्षयाय 'न न'अपि तु अस्त्येव । ननु—विजिगादौ मन्य नापराध दण्डयति तदा-पराधाभावात चिन्तैव नास्तीत्याह—'वयम' 'मनोमया '=अनपकारिण 'मा वा'=नवा भवाम किन्तु 'भयात् =नाने अमेयामा =अमेय अपरिमित आमो रोगो येषा ते तादृशा स्म । यद्यप्यस्माकमपराधो नास्ति तथापि ज्ञानात नश्यन्तो स्म इति भाव । ८१ ॥

इत्यर्धभ्रमप्रकरण समाप्तम् ।

[अथ सर्वतोभद्रस्योदाहरणम्]

सा	मा	या	मा	मा	या	मा	सा
मा	रा	ना	या	या	ना	रा	मा
या	ना	वा	रा	रा	वा	ना	या
मा	या	रा	मा	मा	रा	या	मा
मा	या	रा	मा	मा	रा	या	मा
या	ना	वा	रा	रा	वा	ना	या
मा	रा	ना	या	या	ना	रा	मा
सा	मा	या	मा	मा	या	सा	सा

[सर्वतोभद्रम्]

पुन कीदृशी—'माया'=मां श्रिय [सौन्दर्य] याति प्राप्नोतीति माया=अतिसुन्दरी दर्शनमात्रेणैव कामिजनमनोहारिणीत्यर्थ । अनया रीत्या दुष्करा सुकराश्च चित्रबन्धा वस्तुतो रसपरिपन्थिन एवाभान्ति तथापि कविबुद्धिविलासप्रभवा यथायथ ग्रन्थान्तरेषु चित्राकुलचित्त द्रष्टव्या ॥ ८२ ॥

[चित्रे स्वरस्थानवर्णनियमकथनम्]

य स्वरस्थानवर्णानां नियमो दुष्करेष्वसौ ।
इष्टश्चतु प्रभृत्येष दर्श्यते सुकर पर ॥ ८३ ॥

प्राचीना काव्यशोभाजनकत्वेन स्वरादिनियममपि अलङ्कारतया स्वीकुर्वन्ति यस्यानेके भेदा सन्ति, परमिह तेषु दुष्कर भेदचतुष्टय दर्शयितुमाह—'य' इति । 'स्वरस्थानवर्णानाम्'=स्वरा स्वय राजन्ते ये अकारादय , [यद्यपि] स्थानानि कण्ठताल्वादीनि [तथापि] एतेषा काव्ये निवेशासम्भवात् तत्रोच्चार्यमाणा वर्णा गृह्यन्ते, एवम्भूता वर्णा कण्ठादिस्थानविशेषेषूच्चार्यमाणा व्यञ्जनरूपा कण्ठ्यताल्व्यादिरूपा तेषाम् 'नियम '=अन्यव्यावृत्त्या उपादानम् अर्थात् चतुर्भिरेव स्वरै स्थानैर्वर्णैर्वा यन्निबन्धनम् तद्रूपावच्छिन्नो यो ऽलङ्कार 'प्राचीनै स्वीकृत ' इति शेष 'असौ' 'चतु प्रभृति'=चतुरादि यथा स्यात् तथा 'दुष्करेषु'=आयाससाध्येषु मध्ये 'इष्ट'=अर्थात् दुष्करत्वेनाभिमत स 'एष ' 'दर्श्यते=निरूप्यते उदाहरणद्वारा। 'पर.'=एतदन्य 'सुकर'= सुगमस्तु पञ्चादि ग्रन्थबाहुल्यभिया न दर्श्यत इति अर्थवलल्लभ्यम् ।

इदन्तु बोध्यम—'चतु प्रभृति' इत्युक्तम् तत्र, प्रभृतिपदेन त्रयाणा, द्वयो एकस्य वा ग्रहणम् तेन स्वरस्थानवर्णानां प्रत्येक चतुस्त्रिद्व्येकनियमरूपाश्चत्वारो भेदा इहोक्ता नेतरे इति ॥ ८३ ॥

[अथ—चतु स्वरनियमस्योदाहरणम्]

आम्नायानामाहान्त्या वाग्गीती रीति प्रीतीर्भीती ।
भोगो रोगो मोदो मोहो ध्येये धेच्छे देशे क्षेमे ॥ ८४ ॥

तत्रादौ दीर्घचतु स्वरनियममुदाहरति—'आम्नायानाम्' इति । * 'आम्नायानाम्'= श्रुतिवाक्यानाम् 'वाक्'=अन्त्या वाक् उपनिषद् [ब्रह्मविद्या] वेदान्तशास्त्रम् 'गीती '= गानानि । 'ईती '=अतिवृष्ट्याद्युपद्रवान् तथा 'प्रीती =पुत्रकलत्रप्रभृतिषु बन्धुषु स्नेहान् 'भीती '=भयोत्पादकान् 'आह'=आचष्टे । तत्र गीतयो विषयासक्तिहेतुत्वेन ईतय मनोव्यामोहकतया, पुत्राद्या वियोगादिदु खप्रदत्वेन भय जनयन्तीति वेदान्तवचसा‡ परामर्श

---

* 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्' [पू० मी० १।२।१।] इत्यादिषु 'आम्नायशब्द वेदवाचकत्वेन प्रसिद्ध इति वह समाधिनमस्माभि **'निरूक्तमार'** ।

† 'ईतिर्डिम्बे प्रवासेऽतिवृष्ट्यादिपदवम् च स्त्रियाम् इति मेदिनी] ।

‡ भोगादय रोगादि भयसन्धान तेषा परित्याग एव सुखकर इति एव तत्परामर्शसार शाङ्कर भाष्यपठित [गौडपादाचार्याणा श्रुतिसन्दर्भाध्ययेन] इतु सूत्रा इति मन्ये ।

[अथ सर्वतोभद्रस्योदाहरणम्]

सा	मा	या	मा	मा	या	मा	सा
मा	रा	ना	या	या	ना	रा	मा
या	ना	वा	रा	रा	वा	ना	या
मा	या	रा	मा	मा	रा	या	मा
मा	या	रा	मा	मा	रा	या	मा
या	ना	वा	रा	रा	वा	ना	या
मा	रा	ना	या	या	ना	रा	मा
सा	मा	या	मा	मा	या	सा	सा

[सर्वतोभद्रम्]

सर्वतोभद्रमुदाहरति—'सा' इति । अस्याय पदच्छेद —सा । अमायामामाया । मासा । [१] । मारानायायानारामा । [२] । यानावारारावा । अनाया । [३] । माया । रामा । माराय । अमा । [४] । [कश्चित परदेशस्थ [परदेशी] विरही विलपति] 'सा'=स्मृतिपथ प्राप्ता 'रामा'=रमणी सुन्दरी 'मासा'=चन्द्रमसा ['छाया-मृगधरो राका मा' इति चन्द्रनामसु त्रिकाण्डशेष] 'अमा'=सह 'माराय'=मम विनाशाय 'अस्ति' इति शेष अर्थात् स्मृतिविषय प्राप्ता आलम्बनविभावरूपा रमणी दृश्यमानश्चाय चन्द्र उद्दीपनविभावरूप एतौ द्वावपि मम वियोगिनो नाशाय स्त । किम्भूता सा—'अमायामामाया'=मायाया अभाव इति 'अमायम्' अकपटम तस्य अमायस्य अव्याजस्येत्यर्थ, न मा परिमितिर्यस्य तत् 'अमम्' तस्य परिमाण रहितस्य आमस्य रोगस्य अर्थात् मदनजनितपीडाया आया आगमन प्राप्तिर्यया सा तादृशा निर्व्याजकामव्यथाजनिकेत्यर्थ. । पुन कीदृशी— मारानायायानारामा'=मारो मदन, स एव आनाय जालम् जालवद् बन्धनकारणत्वात् तस्य आयासेन प्राप्त्या आराम क्रीडा [अर्थात् कामस्यैव केलिर्यस्या सा तथाभूता, निरन्तर [मादक] मदन व्यापारवतीत्यर्थ । पुन किम्भूता— यानावारारावा =यान गमनम् आ समन्तात् वारय नाति यानवार प्रदेशयात्रानिषेधक तादृश आराव शब्दो [वचन] यस्या सा, स्वम-धुरवचनै विशेषेण मदीयविदेशगमनवारणकर्त्रीत्यर्थ । तथा— अनाया'=नय [illegible] नय, न नये नीतिर्यस्या सा अनाया नानिष्टनिर्दयना कातरहृदयेति यावत् ।

पुन कीदृशी—'माया'=मां श्रिय [सौन्दर्यं] याति प्राप्नोतीति माया=अतिसुन्दरी दर्शनमात्रेणैव कामिजनमनोहारिणीत्यर्थ । अनया रीत्या दुष्करा मुकराश्च चित्रबन्धा वस्तुतो रसपरिपन्थिन एवाभान्ति तथापि कविबुद्धिविलासप्रभवा यथायथ ग्रन्थान्तरेषु चित्राकुलचित्ते द्रष्टव्या ॥ ८२ ॥

[चित्रे स्वरस्थानवर्णनियमकथनम्]

य स्वरस्थानवर्णानां नियमो दुष्करेष्वसौ ।
इष्टश्चतु प्रभृत्येष दर्श्यते सुकर पर ॥ ८३ ॥

प्राचीना काव्यशोभाजनकत्वेन स्वरादिनियममपि अलङ्कारतया स्वीकुर्वन्ति यस्यानेके भेदा सन्ति, परमिह तेषु दुष्कर भेदचतुष्टय दर्शयितुमाह—'य' इति । 'स्वरस्थानवर्णानाम्'=स्वरा स्वय राजन्ते ये अकारादय , [यद्यपि] स्थानानि कण्ठताल्वादीनि [तथापि] एतेषा काव्ये निवेशासम्भवात् तत्रोच्चार्यमाणा वर्णा गृह्यन्ते, एवम्भूता वर्णा कण्ठादिस्थानविशेषेषूच्चार्यमाणा व्यञ्जनरूपा कण्ठयतालव्यादिरूपा तेषाम् 'नियम.'=अन्यव्यावृत्त्या उपादानम् अर्थात् चतुभिरेव स्वरै स्थानैर्वर्णैर्वा यन्निबन्धनम् तद्रूपावच्छिन्नो यो ऽलङ्कार 'प्राचीनै स्वीकृत' इति शेष 'असौ' 'चतु प्रभृति'=चतुरादि यथा स्यात् तथा 'दुष्करेषु'=आयाससाध्येषु मध्ये 'इष्ट'=अर्थात् दुष्करत्वेनाभिमत स 'एष' 'दर्श्यते'=निरूप्यते उदाहरणद्वारा। 'पर'=एतदन्य 'सुकर'= सुगमस्तु पद्यानि ग्रन्थबाहुल्यभिया न दर्श्यत इति अर्थबललभ्यम् ।

इदन्तु बोध्यम्—'चतु प्रभृति' इत्युक्तम् तत्र, प्रभृतिपदेन त्रयाणा, द्वयो एकस्य वा ग्रहणम् तेन स्वरस्थानवर्णानां प्रत्येक चतुस्त्रिद्व्येकनियमरूपाश्चत्वारो भेदा इहोक्ता नेतरे इति ॥ ८३ ॥

[अथ—चतु स्वरनियमस्योदाहरणम्]

आम्नायानामाहान्त्या वाग्गीती रीति प्रीतीर्भीती ।
भोगो रोगो मोदो मोहो ध्येये धेच्छे देशे क्षेमे ॥ ८४ ॥

तत्रादौ दीर्घचतु स्वरनियममुदाहरति—'आम्नायानाम्' इति । * 'आम्नायानाम्'= श्रुतिवाक्यानाम् 'वाक्'=अन्त्या वाक् उपनिषद् [ब्रह्मविद्या] वेदान्तशास्त्रम् 'गीती '= गानानि । 'रीती '=अतिश्लाघ्यगुणवान् तथा 'प्रीती '=पुत्रकलत्रप्रभृतिषु बन्धुषु स्नेहान् 'भीती '=भयोत्पादकान् 'आह'=आचष्टे । तत्र गीतयो विषयासक्तिहेतुत्वेन, ईतय मनोव्यामोहकतया, पुत्राद्या वियोगादिदु खप्रदत्वेन भय जनयन्तीति वेदान्तवचसा† परामर्श

---

* 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्' [पू० मी० १।२।१] इत्यादिषु आम्नायशब्द वेदवाचकत्वेन प्रसिद्ध इति बहु समर्थितमस्माभि 'निष्कर्षे' ।

† 'ईतिडिम्बे प्रवासेऽतिवृष्ट्यादिप्रपटस्य च स्त्रियाम्' इति मेदिनी] ।

भोगादिषु रोगादि भयसम्बन्धात् तेषा परित्याग एव मुखकर इति पर तत्परामर्शनार भवादृश भार्गवोपाठेन [गडराचार्याणा कृतिनिवासायेन] इति मुखा इति मन्दे ।

इति भाव । तस्माद्धेतो —'भोगः'=गानादिविषयः 'रोग'=व्याधिरेव, 'मोद'= विषयानन्द मोह एव अतस्मिंस्तद्बुद्धित्वात् ।

यद्येव तर्हि किमनुष्ठातव्य भद्रलिप्सुनेत्याह—'क्षेमे'=विविक्ते देशे पुण्ये भागीरथीतीरादौ बदरिकाद्याश्रमेषु वा सकलोपद्रवविकले स्थाने 'ध्येये'=ध्यानयोग्ये ब्रह्मणि 'धेच्छे'= धाश्च इच्छा च धेच्छे, तत्र धानम् मनस एकाग्रीकरण, 'धा' [क्विबन्तोऽय शब्द.] इच्छा ध्यानस्यैव निरन्तर लिप्सा, एते द्वे अनुष्ठातव्ये । 'ध्येच्छे' इति पाठेऽपि 'ध्या' ध्यान मिति स एवार्थं फलति । अत्र—'आ' 'ई' 'ओ' 'ए' इत्येव चतुर्भिरेव दीर्घे स्वरं काव्यबन्ध । 'विद्युन्माला' वृत्तम् । मोमोगोगो विद्युन्माला इति तल्लक्षणात् ॥८४॥

[ह्रस्वत्रिस्वरस्योदाहरणम्]

क्षितिविजिति स्थितिविहितिव्रतरतय परगतयः ।
उरु रुरुधुर्गुरु दुधुवुर्युधि कुरव स्वमरिकुलम ॥ ८५ ॥

त्रिस्वरनियममुदाहरति— क्षिति०' इति । क्षिति =पृथिवी तस्या विजिति विजय स्वायत्तीकरणम्, स्थिति =मर्यादा वर्णाश्रमादिविभागलक्षणा तस्या विहिति विधानम् क्षितिविजितिश्च स्थितिविहितिश्च ते 'क्षितिविजितिस्थितिविहिती' ते एव व्रतम् नियम तत्र रति =प्रीति अनुरागो येषा ते तथाभूता, तथा—'परगतय'=परा स्वक्षात् त्कर्षकरणात् श्रेष्ठा गति ज्ञानम् अवस्था वा येषा ते तादृशा, [एवम्भूता] 'कुरव' कुरुदेशजाता राजान 'युधि'=रणे स्वम्'=स्वीयम् 'अरिकुलम्'=शत्रुवृन्द 'उरु'=अधि यथा स्यात् तथा [क्रियाविशेषणमिदम्] 'रुरुधु'=प्रावव्रिरे किञ्च—'गुरु'=अतिशय यथा तथा 'दुधुवु'=ईरयाञ्चक्रिरे कम्पयामासुरित्यर्थ । अत्र— ई' अ' 'उ एते त्रय स्वर ह्रस्वा एव काव्यबन्धकरा । 'रुरुधु' इति 'रुधिर्' आवरणे इत्यस्य लिटि प्रथमपुरुषबहु वचने रूपम् । 'दुधुवु' इति 'धू' विधूनने इत्यस्य तथैव लिटि रूपम् । 'गति ज्ञाने मार्गदशयोर्ज्ञाने यात्राभ्युपाययो' रिति [मेदिनी]। त्वरितगतिर्वृत्तम् । त्वरितगतिः नज्नगैरितितल्लक्षणात् ॥ ८५ ॥

[द्विस्वरस्योदाहरणम्]

श्रीदीप्ती ह्रीकीर्त्ती धीनीती गीःप्रीती ।
एधेते द्वे द्वे ते ये नेमे देवेशे ॥ ८६ ॥

द्विस्वरमुदाहरति—'श्रीदीप्ती' इति । श्री =लक्ष्मी दीप्ति. शोभा तयोर्द्वन्द्वे ते, एवम्—ह्री व्रीडा [लज्जा] कीर्त्ति =यशश्च ते, धी =मेधा बुद्धि नीति =नयश्च ते, गी =वाणी प्रीति =प्रसन्नता च ते, एते 'द्वे द्वे' 'ते'=तव 'एधेते'=वर्धेते 'ये इमे द्वे द्वे देवेशे इन्द्रे [अपि] 'न'=विद्येते इति शेष । अत्र—'ई' 'ए' इति द्वावेव स्वरौ काव्यबन्धकरौ । [illegible]' वृत्तम् । [illegible] चेद्दीर्घा गौ [illegible] प्रोक्ता सा' इति तल्लक्षणात्॥८६

[एकस्वरस्योदाहरणम्]

सामायामामाया मासा मारानायायानारामा ।
यानावारारावानाया माया रामा मारायामा ॥ ८७ ॥

[इति स्वरनियमः]

एकस्वरमुदाहरति—'सा०' इति । अयं श्लोकः पूर्वं सर्वतोभद्रोदाहरणे व्याख्यातः । अत्र—आकार एवैकः स्वरः बन्धालङ्कारकारी ॥ ८७ ॥

[स्थाननियमे—चतुःस्थानस्योदाहरणम्]

नयनानन्दजनने नक्षत्रगणशालिनी ।
अघने गगने दृष्टिरङ्गने ! दीयतां सकृत् ॥ ८८ ॥

अधुना स्थाननियमं निरूपयन् आदौ चतुःस्थानमुदाहरति—'नयना०' इति । [मानवतीं प्रति कस्यचित् कामुकस्योक्तिरियम्] हे ! 'नयनानन्दजनने !'=नयनयोः नेत्रयोः आनन्दस्य दायिनि ! नेत्रमहोत्सवप्रदे ! 'अङ्गने !'=प्रशस्ताङ्गवति ! सुन्दरि ! 'अघने'=न घना मेघा यत्र तस्मिन् नीरदनिर्हीने 'गगने'=व्योमनि 'सकृत्'=एकवारम् 'दृष्टिः दीयताम्'=दृक्पातो विधीयताम् । तादृशशारदगगनदर्शनस्य कामोद्दीपकत्वात् अस्या मानो नङ्क्ष्यतीति नायकहृदयम् । अथवा—'नयना०' इति गगनस्य विशेषणम् । कथम्भूते गगने—'नयनानन्दजनने'=निर्मलत्वात् दृष्टिरोधाभावात् हर्षप्रकारिणि । अत्र दन्त्य—कण्ठ्य—तालव्य—मूर्धन्य—वर्णा बन्धनविरूपाधायका इति तेषां चत्वार्येव स्थानानि ॥ ८८ ॥

[त्रिस्थानस्योदाहरणम्]

अलिनीलालकलतं कं न हन्ति घनस्तनि !
आननं नलिनच्छायनयनं शशिकान्ति ते ॥ ८९ ॥

त्रिस्थाननियममुदाहरति—'अलि०' इति । हे ! 'घनस्तनि !'=घनौ निबिडौ [कठोरौ] स्तनौ कुचौ यस्याः सा तत्सम्बोधने पीवरवक्षोजे ! इत्यर्थः । 'ते'=तव 'आननम्'=मुखम् [इष्टमित्यर्थः] 'कम्'=जनं [युवकमेव, जरठानां क्षीणकामत्वात्] 'न हन्ति'=नैवाकुलीकरोति, अपितु दर्शनमात्रेणैव कामोत्थानकरत्वात् सर्वमपि विह्वलयति । कीदृशं तत्—'अलिनीलालकलतम्'=अलिनः षट्पदाः [भ्रमराः] तद्वत् नीलाः श्यामवर्णाः अलकाः लताकाराः चूर्णकुन्तला यत्र तत् तादृशम् । पुनः किम्भूतम्—'नलिनच्छायनयनम्'=नलिनच्छाये उत्पलतुलिते नयने नेत्रे यस्मिन् तत् तथाभूतम् । तथा—'शशिकान्ति'=शशी चन्द्रः तद्वत् कान्तिः शोभा यस्य तदेतच्छशिनिभम् । अत्र—कण्ठ्यदन्त्यतालव्यवर्णानामेव निबन्धनमिति त्रीण्येव स्थानानि ॥ ८९ ॥

[द्विस्थानस्योदाहरणम्]

अनङ्गलङ्घनालग्ननानातङ्का सदङ्गना ।

सदानघ ! सदानन्दनताङ्गासङ्गसङ्गत ॥ ९० ॥

दन्त्यकण्ठ्यवर्णो द्विस्थानमुदाहरति 'अनङ्ग०' इति । [कश्चित् भार्यया अनादर कृत्वा गानवाद्यादिभिर्मनोविनोदयत् काल यापयति, तम्प्रति तस्य सुहृद उक्तिरियम्] हे ! 'सदानघ !' सर्वावस्थास्वेव चिन्ताशून्य ! तथा हे ! 'सदानन्दनताङ्ग !'=सदानन्दम् सर्वदा आनन्दजनक गानवादनादिक तत् कर्म तत्र नतानि व्यापृतानि अङ्गानि गात्राणि यस्य तत्सम्बोधनम् । असङ्गसङ्गत =न सङ्ग सत्सङ्गो येषां ते असङ्गा दुर्जना. तेषा सङ्गत तै सह गोष्ठीकरणादित्यर्थ । 'सदङ्गना'=सती पतिव्रता [निर्दोषा] चासावङ्गना इति सदङ्गना धर्मनिष्ठा साध्वी महिला 'अनङ्गलङ्घनालग्ननानातङ्का'=अनङ्ग काम तस्य लङ्घनया आक्रान्त्या अर्थात् त्वद्विरहे समुज्ज्वालितकामस्य निरोधेन लग्ना सम्भाव्यमाना नाना अनेके आतङ्का सन्तापा अथवा परासक्तिदोषशङ्का यस्या सा तादृशी 'भवेत्' इति शेष । साध्व्या अपि स्त्रिया परित्यागेन निरुद्धकामाया कदाचित् अरक्षणात् दोषा प्रादुष्युरिति गानवादनादिजनित मुधा प्रमोद परिहृत्य निर्दोषायां तस्यामनुराग विधेहीति भाव । अत्र—कण्ठ्यदन्त्यवर्णानामेव बन्धनकरत्वमिति द्विस्थानत्वमस्य व्याख्येय । जीवादिग्रन्थे कृताऽपि पाठान्तरयोजना न बहूपादेया इत्युपेक्ष्यतेऽस्माभि ॥९०॥

[एकस्थानस्योदाहरणम्]

अगा गाङ्गाङ्गकाकाकगाहकाघककाकहा ।

अहाहाङ्ग खगाङ्कागकङ्कागखगकाकक ॥ ९१ ॥

कण्ठ्यैरक्षरै एकस्थान चित्रमुदाहरति—'अगा' इति । तत्रादौ बालानां सुख-बोधाय पदानि विभजामहे—अगा । गाम् । गाङ्गकाकाकगाहक । अघककाकहा । अहाहाङ्ग । खगाङ्कागकङ्क । अगखगकाकक ॥ अथ व्याख्या—[हे !] गाङ्गकाकाकगाहक !'= गङ्गाया इद 'गाङ्गम्' 'तस्येदम्' [४।३।१२०] इति 'अण्' । गाङ्गञ्च तत् 'कम्' जलम् इति 'गाङ्गकम्' । आ समन्तात् कानम् शब्द इति 'आका' । आङ्' पूर्वात् 'कै' शब्दे इत्यस्मात् धातो 'अन्येभ्योऽपि दृश्यते [३।२।१७८] इति सूत्रेण भावे 'क्विप' 'सोमपा'वत् प्रक्रिया । एवम्—'अक' कुटिलया गतौ इति धातो 'उणादयो बहुलम्' [३।३।१] औणादिको भावे 'अच्' । अकनम 'अक'=इति तु प्राचामनुरोधेन, तेषाम-शुद्धत्वनिराकरणाय प्रयोगसाधुतामात्रप्रदर्शनार्थम [प्रकृतार्थमसङ्गतये] । वयन्तु— तस्मात् धातो कर्त्तर्येव पचाद्यच् [३।१।१३४] अकति कुटिल गच्छतीति 'अक' तरङ्ग । आका [सह] अका इति 'आकाक'=सशब्दवक्रगतिमांस्तरङ्ग इत्यर्थ । गङ्गकस्य [गङ्गाजलस्य] आकाक इति 'गाङ्गकाकाक' गङ्गाजलसम्बन्धिसशब्दतरङ्ग, तम गाहते

[म०] एकस्थान चित्रमुदाहर ? तदुदाहरणं व्याख्याहि च ? ।

विलोडते इति 'गाङ्गकाकाकगाह' । 'कर्मण्यण्' [३।२।१] । स एव 'गाङ्गकाकाकगाहक' स्वार्थे कन् । अथवा गाहते इति 'गाहक' कर्तरि ण्वुल्, तस्य षष्ठीतत्पुरुष समास । तत्सम्बुद्धौ हे ! गाङ्गकाकाकगाहक !=गङ्गाजलतरङ्गावगाहिन् ! इति समुदित-पदार्थ । तथा—हे 'अहाहाङ्ग' !='हाहा' इति दीनध्वनेरनुकार' त दीनध्वनिम् अङ्गति गच्छन्तीति 'हाहाङ्ग' 'अगि' गतौ इत्यस्मात् कर्मण्यण् । न हाहाङ्ग इति 'अहाहाङ्ग' तत्सम्बोधन हे ! अहाहाङ्ग ! सदानन्दमग्नेत्यर्थ । तथा—हे ! 'खगाङ्कागकङ्क' ! खे आकाशे गच्छन्तीति 'खगा' सूर्याद्या ग्रहा । ['खग सूर्ये ग्रहे देवे मार्गणे च विहङ्गमे' इति मेदिनी] । 'अन्येष्वपि दृश्यते' [३ । २ । १०१] इति सूत्रेण सप्तम्यन्त'ख'कारकोप पदात् 'गम' धातो 'ड' प्रत्यय । अङ्कयते ऽनेन इति *'अङ्क' चिन्हम् । 'अकि' लक्षणे इत्यस्मात् हलश्च' [३।३।१२१] इति सूत्रेण करणे 'घञ्' । खगा सूर्याद्या अङ्का चिन्हानि यस्य स 'खगाङ्क' स चासौ 'अग पर्वत इति 'खगाङ्काग' सुमेरु पर्वत इत्यर्थ, त खगाङ्काग [सुमेरु] कङ्कते गच्छतीति 'खगाङ्कागकङ्क' तत्सम्बोधन तथा । 'ककि' गतौ इत्यस्मात् कर्मण्यण् । अर्थात् सुकृतसामर्थ्यातिशयेन सुमेरु[स्वर्ग]सुख-भोगाधिकारिन् ! तथा—हे ! 'अगखगकाकक !'=अगन्ति शब्दस्पर्शादिविषयेषु धावन्तीति 'अगानि तानि च 'खानि'=चक्षुरादीन्द्रियाणि इति अगखानि' । तानि गच्छति व्याप्नोति 'भूम' रूपचात् 'अगखगम्' कारणाभावात् सकलेन्द्रिय [तज्जन्यसुख] व्यापि इत्यर्थ, तच्च तत् 'कम्'=सुख ब्रह्मेत्यर्थ 'क ख ब्रह्मे'ति श्रुते । तस्मै 'अगखगकाय 'विषयानन्दायेत्यर्थ [तस्मै] न ककते नैव चपलीभवतीति अगखगकाकक तत्सम्बोधन तथा, निरतिशयब्रह्मानन्दाभिलाषिन् ! इत्यर्थ । 'कक' लौल्ये धातु. । लौल्य गर्वश्चापल्य-श्चेति । एवम्भूत ! हे तादृश ! त्वम् 'अघककाकहा'=कुत्सितानि अघानि इति 'अघकानि' 'कुत्सिते' [५।३।७४] इति सूत्रेण कुत्सितार्थे 'कन्' । निन्दितानि पापानि अतिपापानी-त्यर्थ. 'अघकानि' एव 'काका' वायसा उपद्रवकारित्वात् इति 'अघककाका.' तान् हन्तीति 'अघककाकहा' क्विपि रूपम् । गर्हिततरपापवायसहन्ता इत्यर्थ । एतादृशस्त्वम् 'गाम्'=भूमिम् 'अगा'=अया गतवानसि इत्यर्थ । यद्यपि सर्वोऽपि प्राणी भूमिं गत तथापि सुकृतिन एव सफल जन्मेति बोधयितु तथोक्ति । अथवा—'गाम्' स्वर्गम् 'अगा' याया । 'आशसायां भूतवच्च' [३।३।१३२] इति सूत्रेण भविष्यति काले वर्तमानवत् भूतवच्च प्रत्यय । अत्र—कगडा एव सर्वे वर्णा तैरेव च पद्यरचनात् स्वरस्थानचित्रमिदम् ॥ ६१ ॥

[इति] कण्ठ्यादिस्थानोच्चार्यमाणवर्णनियम समाप्त इत्यर्थ ।

---

* 'अङ्को' भूषारूपकलक्ष्मसु । चित्राजौ नाटकाद्यंशे स्थाने क्रोडेऽन्तिकागसो ' इति मेदिन्याम् ।

[वर्णनियमे चतुर्वर्णचित्रस्योदाहरणम्]

रे रे रोरूरुरूरोरुगागोगोऽगाङ्गगोऽगगु ।
किं केकाकाकुकः काको मामा मामम मामम ! ९२ ॥

वर्णनियमेषु आदौ चतुर्वर्णमुदाहरति—'रे रे' इति । [काचित् वहुपण्या वाराङ्गना स्वाभिलाषिणम [अल्पधनम्] भिल्ल प्रति वक्ति] 'रे रे' । इति सम्बोधन नीचार्थकम् । रे । रे । मामम !'=मायां श्रियां मम ममत्व यस्य तत्सम्बोधनम् 'मम' इति विभक्तिप्रतिरूपकमव्ययम् । भावप्रधानो निर्देश इति । दरिद्रत्वात धनस्य व्ययकरणे कृपण ! । अथवा—'मामम !'=मायां लक्ष्म्याम् अममत्व यस्य तत्सम्बोधनम् श्रीविहीनेत्यर्थ । एतादृशो दरिद्रतरस्त्वम् 'मा मा'=न न । न कदापीत्यर्थ । 'माम् अम'= उपसर्प । 'अम' गत्यर्थ । 'मामा' इति निषेधार्थे सम्भ्रमे द्विर्वचनम् अव्ययञ्च तत् । अयमर्थ• चतुर्थपादस्य । यत —'काकः'=करट 'किम् केकाकाकुक '=*केका मयूरवाणी ['केका वाणी मयूरस्य' इत्यमर] तस्या काकु मदजनितो विकारविशेष [काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वने इत्यमर] तां [केकाकाकु] कायति शब्दायते शब्देन प्रकटीकरोति इति 'केकाकाकुक ' मयूरवाणीसदृशवाणीकथनकाम । 'कै' शब्दे अस्माद्धातो 'ड ' प्रत्यय । अर्थात यथा वायसो मयूरकेकोच्चारणे साभिलाषोऽपि व्यर्थमनोरथो जायते तथैव त्वमपि मयि व्यर्थसकल्प इति ज्ञेयम् । इति तृतीयपादार्थ । अपि चाधमकार्यकारित्वादपि त्व सर्वथा ममानर्ह इत्याह—'रोरूरुरूरोरुगागोगः '=' रोरूयते'=त्रासेन पुन पुन अतिशयेन वा रौतीति रोरू ' यङ्लुगन्तात् 'रु' शब्दे इत्यस्मात् धातुम त्रात् क्विब्विधानात् 'क्विप्' । 'यस्य हलः' [६ । ४ । ४९] इति यलोपे रूपम् । रोरूश्चासौ रुरु मृग इति 'रोरूरु ' तस्य 'उरस ' वक्ष स्थलस्य या 'रुक्' प्रक्षिप्तशरफलवेधोत्पन्ना पीडा तद्रूपम् यत् 'आग•' अपराध [आगोऽपराधो मन्तुश्चेत्यमर] पाप विशेष । तत् [आगसम्] गच्छति प्राप्नोति इति 'रोरूरूरोरुगागोग•' पूर्ववत् गमेर्ड । 'सारस्वतास्तु'—एतस्मिन्विषये **'नाम्नि च'** इति सूत्र पठन्ति । कर्मादिनियमरहितनाममात्रोपपदाद् धातो कर्त्तरि भावे च 'ड 'प्रत्ययो भवतीत्यर्थः] निरपराधप्राणिहिंसाकरत्वात् पापाचारीत्यर्थ । एवम्भूतस्त्व नीचकर्मकृत् ततोऽपि न मम योग्य इति भाव इति प्रथम पादार्थ । किञ्च—त्वम् 'अगाङ्गग '=अग पर्वत तस्य अङ्गम् एकदेश त गच्छतीति 'अगाङ्गग ' पर्वतीय अतो नैव नागर इत्यतोऽपि ममानर्ह 'असि' इति शेष । अपि च—'अगगु '=असि । न गच्छति प्राप्नोति प्राकरणिक विषय पूर्वोत्तरसम्बन्ध वेति 'अगा' असम्बद्धा । 'गौ ' वाक् । अगा गौ यस्य सा अगगु 'गोस्त्रियोरुपसर्जनस्य'

* के मूर्धनि कायति । कै शब्दे । 'अन्येभ्योऽपि दृश्यते [वा० ३ । २ । १०१] इति 'ड ' । 'हलदन्तात् सप्तम्या ' [६ । ३ । ९] इत्यलुक् ।

[१ । २ । ४८] इति ह्रस्वः । 'चित्रगु'वत् । असम्बद्धभाषणस्वभावत्वादपि सर्वथा ममायोग्यो मीति मदर्थं काममन्यत्र पूरयेति सर्वमारः ।

अत्र—'र' 'ग' 'क' 'म' इत्याकारैश्चतुर्भिरेव वर्णैर्बन्धः ममापि नीत इति चतुर्वर्णं चित्रमिदम् । नचात्र 'अग' इतीकारसद्भावेऽपि कथं चतुर्वर्णता इति शङ्कनीयम्, वर्णपदस्य वृत्तपूरकवर्णपरत्वात्, इस्य वृत्तपूरकत्वाभावात् । यदि च सर्वथा शुद्धमेवोदाहरणं दिदृक्षित स्यात् तदा 'शिशुपालवधस्य' एकोनविंशे सर्गे तृतीयं पद्यं पठनीयम्—यथा—

जर्जा जोजाजिजिज्जाजी तं ततोऽतितताततितुत् ।

भाभोऽभीभाभिभूभाभूरारारिररिरीररः ॥ इत्यादि ।

अस्येयं व्याख्या—जजाविति ॥ ततोऽवलोकनानन्तरं जजन्तीति जजा योधाः । 'जज युद्धे' पचाद्यच् । जजानामोजस्सा जाता जजौजोजाः तान् आजि जयतीति जजौजोजाजिजित् । जयतेः क्विप् । जजतीति जाजी योधी । तांच्छील्ये णिनिः । अतिततानत्युद्धतानतितुदति अतिव्यथयतीत्यातितुत् । तुदतेः क्विप् । भस्यमिवाभा यस्य स भाभो नक्षत्रकान्तिः 'नक्षत्रमृक्षं भं तारा' इत्यमरः । नास्ति भीयेषां तेऽभियो निर्भीकाः तानिभानाजानभिभवतीति अभीभाभिभूः । क्विप् । तस्या भासस्तेजसो भूः स्थानम् अभीभाभिभूभाभूः । अरा सन्त्येषामित्यरीणि चक्राणि तैः रीणन्ति अरिरियो रथाः । 'री गतिरेषणयोः' इति धातोः क्विप् । तेषां इरः प्रेरणं राति अरिरीररो रथिकः । 'आतोऽनुपसर्गे कः' । अरिः शत्रुर्बलभद्रः तं वेगादारिणं आर । योद्धुमागमारेत्यर्थः । 'ऋ गतौ' इति धातोर्लिट् द्विर्भावे कृते णलि वृद्धिः अभ्यासस्योरदत्वे 'अत आदेः' इति दीर्घे पुनः सवर्णदीर्घः । भिन्नकाक्षरपादाख्योऽनुप्रासभेदः । भाभः इत्युपमानुप्रासयोरेकवाचकानुप्रवेशलक्षणसङ्करः ॥ 'धर्मशर्माभ्युदये' ऽपि—

रराऽरागेररररत्वाथुत्व वेविवाद्दिव ।

चक्षच्चक्षुषात्रिषोचे नननानीनि त नन ॥

अस्यायमर्थः—राय धनं राति ददातीति रैर । अरान् ईरयन्तीति अरीरा सुभटाः, तेषाम् उरः महान्

वेविना वर्द्दते इत्येवंशीलः वेविवर्द्दी कान्तिकेय तस्य यः ... वामो यस्य स वेविवर्द्दिव । चक्षन्ती चक्षुर्दक्षा उष्मा मरुती चिटः बुद्धिर्यस्य सः । तना प्रचुरा ता लक्ष्मीम् अतति गच्छति इत्येवंशीलः नननाती इति पृथक् पदम् । काकुवम्—मर्मध्वपदगन्धम् । 'ऊचे' इति क्रियापदम्, तमः इति कर्म । तत अनन्तरम् ॥

[अथ त्रिव्यञ्जनस्योदाहरणम्]

देवानां नन्दनो देवो नोदनो वेदनिन्दिनाम् ।

दिवं दुदाव नादेन दाने दानवनन्दिनः ॥ ६३ ॥

वर्णचित्रे त्रिवर्णचित्रमुदाहरति—'देवानाम्' इति । 'देवानाम्'=देवा इन्द्राद्या तेषाम् 'नन्दन '=दैत्यदमनात् हितकर प्रीणयिता, तथा—'वेदनिन्दिनः'=वेदान् श्रुती निन्दितु शीलमस्यास्तीति, तस्य वेदनिन्दकनास्तिकलोकस्य 'नोदन '=नोदयतीति नोदन निरासकर्त्ता [* नन्द्यादित्वात् 'ल्यु '] 'देव '=दीव्यतीति नृसिंहावतारधारी विष्णुर्भगवान् 'दानवनन्दिन '=दानवान् दैत्यान् नन्दयितु शीलमस्य तस्य हिरण्यकशिपो 'दाने'=खण्डने [नाशने] 'दो' अवखण्डने इत्यस्य ल्युटि रूपम् । हिरण्यकशिपोर्वक्ष स्थलविदाहरणवेलायां नादेन'=गर्जनेन 'दिवम्'=अन्तरिक्षम् 'दुदाव'=उदताप्सीत् । अर्थात् अन्तरिक्षचारिणो देवादीन् विस्मापयामास । अत्र 'द' 'व' 'न' इत्येव त्रिभिरेव वर्णैर्बन्धो विहित इति 'त्रिवर्ण चित्र' मिदम् ॥ ९३ ॥

[अथ—द्विवर्णचित्रस्योदाहरणम्]

सूरिः सुरासुरासारिसार सारससारसा ।
ससार सरसी· सीरी ससूरु· स सुरारसी ॥ ९४ ॥

द्विव्यञ्जनवर्णचित्रमुदाहरति—[वलभद्रस्य जलक्रीडावर्णने पद्यमिदम्] † 'सूरि '=कवि ['कवि । धीमान् सूरि· कृती' इत्यमर] तथा—'सुरासुरासारिसार'=सुराश्च असुराश्चेति सुरासुरा· तान् आसर्तु शीलमस्य इति सुरासुरासारी । शीलार्थे णिनि । तादृश सार सामर्थ्य [वल] यस्य स तथाविध· । 'ससूरु '=सु सुष्ठु ऊरू इति 'सूरु'। सूरुभ्यां सह वर्त्तते इति ससूरु । तथा—'सुरारसा'=सुराया मधुनो· रस सुरारस । स अस्यास्तीति तादृश 'अत इनिठनौ' [५ । २ । ११५] इति मत्वर्थीय इनि । मधुपानानुरक्त । एवम्भूत· 'स '=पुराणादिप्रसिद्ध· 'सीरी'=हली बलभद्र 'सरसी '=कासारान् कृत्रिमपद्माकरान् इत्यर्थ ['कासार सरसी सर ' इत्यमर] 'ससार'=विहाराय [जलक्रीडाय] उपगतवान् । 'सृ' धातोर्लिटि प्रथमपुरुषैकवचने रूपम् । अत्र—'स' 'र' इति द्वाभ्यामेव व्यञ्जनाभ्यां पद्यबन्ध इति द्विव्यञ्जनवर्णचित्रमिदम् । यथा वा 'धर्मशर्माभ्युदये'—

‡ कानना कानने नुन्ना नाकेऽनीकाङ्क्षकानिन ।
के के नानीकनानेन नाकानेकाकिना ननु ॥ ९४ ॥

---

* व्याकरणान्तरे कृन्मात्रस्य वहुलत्वात् । तथा च—'शाकटायन ' **कृद् वहुलम्'** [४ । ३ । ५८] इति पपाठ । अथवा नोदनमस्यास्तीति नोदन अर्शआदित्वादच् किंवा 'कृत्यल्युटो वहुलम्' [३ । ४ । ११२] इति ज्ञेयम् ।

† सूयते विचित्राणि वाक्यानि यथाप्रकरण प्रयुङ्क्ते इति 'सूरि ' । 'सूङ क्रि' [उ० ४ । ६४] इति सूत्रेण 'पूङ' प्राणिगर्भविमोचने इत्यस्मात् औणादिक 'क्रि' प्रत्यय । धातूनामनेकार्थत्वादर्थभेद· । वाहुलकाद्वा ।

‡कानना'=कुत्सितमुखा । अनीकाङ्क्षे सङ्ग्रामोत्सङ्गे कनन्तीत्येवशीला । नानीकिनीनेन= सेनापतिना । नाकीन !, एकाकिना इति पृथक्पदे । हे ! नाकीन ! देवेश ! शिष्टं स्पष्टम्।

[अथैकव्यञ्जनवर्णचित्रस्योदाहरणम्]

नूनं नुन्नानि नानेन नाननेनाननानि न ।
नाऽनेना ननु नाऽनूनेनैनेनानानिनो निनी ॥ ६४ ॥

[इति वर्णनियम]

एकव्यञ्जनवर्णचित्रमुदाहरति—'नूनम्' इति । [बलवच्छत्रुपराजितस्य राज्ञ सैनिकाना दैन्योपेत वचनमिदम्] पदविभागस्तु—नूनम् । नुन्नानि । न । अनेन । (१) न । आननेन । अननानि । न. । (२) । न । अनेना । ननु । ना । अनूनेन । (३) एनेन । अनान् । इन । निनी (४) । इति ज्ञेय । अथ व्याख्या—'अनेन'—विजयवता पुरतोदृश्यमानेन शत्रुणा [कर्तृपदमिदम्] 'आननेन'=भ्रूभङ्गवता मुखेन [एव] करणभूतेन 'न'=अस्माकम् 'अननानि'=असव प्राणा 'नूनम्'=निश्चयेन 'न न नुन्नानि'= न पराकृतानि इति न अपितु अपनीतान्येव, अस्याननमेवालोक्य अस्माक प्राणा निर्गतप्राया सम्प्रहारस्य तु कैव कथा । [पूर्वार्धस्यार्थोऽयम्] । 'ननु'=भो ! बान्धवा ! 'अनूनेन'=न ऊनेन ओजस्विना प्रतापिना 'एनेन'=एतेन शत्रुणा राज्ञा 'इन'=स्वामी 'ना'=पुरुष अस्माक 'प्रभु रित्यर्थ 'अनान्'=प्राणान् 'निनी'=निनीषु मुखे घास दत्वा रक्षितुमिच्छु सन् 'अनेना '=न एन पाप यस्य स अनेना निष्पाप 'न' नास्ति अपितु सपाप एव । यस्मा त्वात्र धर्ममुल्लङ्घ्य युद्धे प्राणान न हारयति तदासौ पाप एव । युद्धे मरणस्यैव धर्महेतुत्वादिति भाव । तस्मान् यथाशक्ति सङ्ग्रामेऽभिमुख स्थेयमिति हृदयम । अत्र—केवल 'न'वर्णेनव बन्धसमाप्ति कृता इति एकवर्णव्यञ्जनचित्रमिदम । 'निनी' इति सन्नन्तात 'णीञ्'धातो क्विपि प्रथमाया एकवचने रूपम् । अन्यदुदाहरण यथा—'धर्मशर्माभ्युदये'

¹देवा कि कोऽकवेवावा कि वाक केकिकेऽक्वकम ।
कोव वुववव वंव व वेकावाकुकाइवम ॥ ६५ ॥ इत्येवाक्षरचित्रम् ॥

इति वर्णनियमचित्रकाव्य समासमित्यर्थ ॥

[प्रहेलिका]

इति दुष्करमार्गेऽपि कश्चिदादर्शित क्रम ।
प्रहेलिकाप्रकाराणा पुनरद्दिश्यते गति ॥ ६६ ॥

चित्रोपसंहारपूर्वक प्रहेलिकामुपक्रमते— इति इति । 'इति'=दर्शितप्रकारेण दुष्करमार्ग 'अपि'=चतुरादिवर्णग्रन्थनरूपत्वात् काठिन्येन बद्धनाध्येऽपि नियमे 'कश्चित'=अन्यतर क्रम =नियम प्रकारो वा 'आदर्शित =उदाहरणनिरूपित किन्तु—इतोऽनन्तरं प

---

¹ सैनिकाना स्वदन्धुजनान् प्रति उक्तिरियम् ।

¹देवा =दव । कोऽकवेवावा=चक्रवाकहंसगामी । वाक =ध्वाङ्क्ष । केकिक =मयूरवत् क आत्मा शरीर यस्य स । कुवेवक =स्वर्गपुष्पानलंकृतिस्त्र ।

दुष्करतरा पद्मबन्धमुरजबन्धक्रियाकारकगुप्तिप्रभृतयः पूर्वैरुक्ता इहानुक्ता क्रमाः सन्ति नैवेत एव, किन्तु ग्रन्थबाहुल्यभिया इह नावतारिता' ते ग्रन्थान्तरतोऽवसेया इत्यभिप्रायः । 'पुनः'=सम्प्रति 'प्रहेलिकाप्रकाराणाम्'=प्रहेलिकाया भेदानाम् प्रहेलिकाख्यकाव्यविशेषाणां गति'=रीतिः 'उद्दिश्यते'=वर्ण्यते । यद्यपि 'रसस्य परिपन्थित्वान्नालङ्कारः प्रहेलिका' इति प्रहेलिकानामलङ्कारत्वं केषाञ्चिदसम्मतम् स्वस्यापि च तत्तथा भाति, तथापि कथञ्चित् तासामुपयोगं मत्वा निरूपणमावश्यकमिति ज्ञातव्यम् । प्रहेलिकाया सामान्यलक्षणन्तु— 'श्रीधर्मदास'-सूरिणा 'विदग्धमुखमण्डने' कृतम्—

व्यक्तीकृत्य कमप्यर्थं स्वरूपार्थस्य गोपनात् ।
यत्रावाह्यान्तरावर्थौ कथ्यन्ते ता प्रहेलिका ॥ इति ॥ ९६ ॥

[प्रहेलिकाया उपयोगित्वनिरूपणम्]

क्रीडा गोष्ठीविनोदेषु तज्ज्ञैराकीर्णमन्त्रणे ।
परव्यामोहने चापि सोपयोगा प्रहेलिका ॥ ९७ ॥

प्रहेलिकोपयोगं दर्शयति—'क्रीडा०' इति । 'क्रीडागोष्ठीविनोदेषु'=क्रीडाप्रयोजना गोष्ठी क्रीडागोष्ठी तत्र ये विनोदा विविधभङ्ग्या प्रमोदवचांसि तेषु । किंवा-अन्योन्यं चातुर्यां वाक् प्रयोगः 'क्रीडा'। विदग्धानामासनबन्धो 'गोष्ठी । काव्यालापेन कालयापनं विनोदः' । क्रीडा च गोष्ठी च विनोदश्च ते तेषु 'तज्ज्ञैः'=प्रहेलिकापण्डितैः सह 'आकीर्णमन्त्रणे'=जनसङ्कुलो देशः आकीर्णमित्युच्यते तस्मिन् यन्मन्त्रणं परस्परं रहस्यालापः तत्र, 'अपि च= तथा—'परव्यामोहने'=परेषां बोद्धव्यव्यतिरिक्तानां व्यामोहने अज्ञातृत्वसम्पादने 'प्रहेलिका सोपयोगा'=प्रयोजनवत्यः सन्ति एवमासां यमकादिवत् रसपरिपन्थित्वेऽपि अलंकारत्वं नायुक्तम् इतरत्र तु दोष एवेति भावः ॥ ९७ ॥

[अथासां लक्षणसहितानि नामानि]

आहुः 'समागतां' नाम गूढार्थां पदसन्धिना ।
'वञ्चिता'ऽन्यत्र रूढेन यत्र शब्देन वञ्चना ॥ ९८ ॥

अर्धाभ्यां द्वयोः प्रहेलिकयोर्लक्षणं निर्दिशति—'आहुः' इति । 'पदसन्धिना'=सुप्तिङन्तं पदम् पदयोः सन्धिः पदसन्धिः तेन पदसामीप्यजनितसन्धिकार्येण 'गूढार्थाम्'=गूढः दुर्बोधः अर्थो यस्याः तां तादृशीं प्रहेलिकां 'समागतां नाम आहुः'=कथयन्ति ।

'अन्यत्र'=विवक्षितार्थेतरे 'यत्र'=यस्मिन् स्थले 'रूढेन'=रूढिशक्तिमता प्रसिद्धेन 'शब्देन' या 'वञ्चना'= परप्रतारणा क्रियते सा 'वञ्चिता' नाम प्रहेलिका ज्ञेया इति शेषः ॥ ९८ ॥

'व्युत्क्रान्ता'ऽतिव्यवहितप्रयोगान्मोहकारिणी ।
सा स्यात् 'प्रमुषिता' यस्यां दुर्बोधार्था पदावली ॥ ९९ ॥

'व्युत्क्रान्ता' इति । 'अतिव्यवहितप्रयोगात्'=अतिव्यवहितानाम् अत्यन्तं व्यवधानवतां

पदानां प्रयोगात् सन्निवेशात् [या] 'मोहकारिणी'=बोद्धु [श्रोतु] अर्थावगम—विधुरताजनयित्री [सा] 'व्युत्क्रान्ता' इति नामोच्यते । यस्याम्'=प्रहेलिकायाम् 'पदावली'=पदपंक्ति पदानां समूह 'दुर्बोधार्था'=दुर्बोधो दुगाऽर्था यस्या सा अत्यप्रसिद्धपद-प्रयोगात् दुर्ग्राह्यार्था 'सा प्रमुषिता' नाम प्रहेलिका 'स्यात्'=भवतीत्यर्थ ॥ ९९ ॥

'समानरूपा' गौणार्थारोपितैर्ग्रथिता पदैः ।
'परुषा' लक्षणास्तित्वमात्रव्युत्पादितश्रुति ॥ १०० ॥

'गौणार्थारोपितै'=गौणार्थेन साध्यवसानगौणलाक्षणिकार्थेन आरोपितै सादृश्य-सम्बन्धेन प्रयुक्तै पदै ग्रथिता'=गुम्फिता प्रहेलिका 'समानरूपा' नाम, तथा—'लक्षणास्तित्वमात्रव्युत्पादितश्रुति'=लक्षणं सूत्रमनुशासनमिति यावत् तस्य अनुशासनशास्त्रस्य अस्तित्वमात्रेण तदर्थऽस्य शक्तिरस्तीति ज्ञानमात्रेण कृत्वा व्युत्पादिता साधिता श्रुति शब्द यस्या सा तादृशी 'परुषा' नाम प्रहेलिका ज्ञेया ॥ १०० ॥

संख्याता' नाम संख्यानं यत्र व्यामोहकारणम् ।
अन्यथा भासते यत्र वाक्यार्थ सा 'प्रकल्पिता' ॥ १०१

'यत्र संख्यानम्'=वर्णगणना अथवा प्रयुक्त संख्यावाची शब्द 'व्यामोहकारणम्'=श्रोतु शीघ्र निश्चयाभावेन विशेषतो मोहजनिका [मोहजनक] सा संख्यानघटिता 'संख्याता' उच्यते । 'यत्र वाक्यार्थ'=शाब्दबोध 'अन्यथा भासते = आपातत प्रतीयमानात् अर्थात् प्रकारान्तरेण प्रतीतिपर्यवसान प्राप्नोति सा अन्यस्यार्थस्य प्रकृष्टकल्पनाहेतो 'प्रकल्पिता इति नाम प्रहेलिका भवति ॥ १०१ ॥

सा 'नामान्तरिता' यस्या नाम्नि नानार्थकल्पना ।
'निभृता' निभृतान्यार्था तुल्यधर्मस्पृशा गिरा ॥ १०२ ॥

'यस्याम्'=प्रहेलिकाया 'नाम्नि'=सञ्ज्ञायाम् 'नानार्थकल्पना'=नानार्थानाम् अनेकाभिधेयानां शब्दस्य बहूनामर्थानां कल्पना विभावना 'घटेत' इति शेष सा 'नामान्तरिता'=प्रहेलिका ज्ञातव्या इति शेष । यस्याम 'तुल्यधर्मस्पृशा'=प्रकृताप्रकृतयो [प्रस्तुताप्रस्तुतयो] साधारणधर्मप्रतिपादनया 'गिरा'=वचसा 'निभृतान्यार्था'=निभृत गोपित अन्यार्थ. प्रस्तुतार्था यत्र सा तथाभूता 'निभृता' इत्युच्यत इति शेष ॥ १०२ ॥

'समानशब्दो'पन्यस्तशब्दपर्यायसाधिता ।
'सम्मूढा' नाम या साक्षान्निर्दिष्टार्थापि मूढये ॥ १०३ ॥

'उपन्यस्तशब्दपर्यायसाधिता'=उपन्यस्तेन उपनिबद्धेन शब्दपर्यायेण पदीयस्वार्थप्रतिपादकनामान्तरेण साधिता प्रणीता या सा समानशब्दा भवति ।

शब्दपर्यायप्रधान लक्षणमाहारा एवर्धर्मेयवन्धरूप ननु अभिप्रायापि ग्रहार्थशब्दस्व-रूप तथा सति अर्थस्य गोप्यत्वाभावे प्रहेलिकेव न स्यादित्यवस्य ध्यातव्यम् । या= नाम प्रहेलिका साक्षात्'=वाचकपदेन निर्दिष्टार्था अपि=निर्दिष्ट कथित अर्थ अभिधेयो

यत्र तथाभूता अपि 'मूढये'=आपाततो मोहाय भवति सा 'सम्मूढा' नाम निगद्यते इति शेष । 'मूढये' इति । 'मुह' वैचित्ये । दिवादि । भावे'क्तिन्' । चतुर्थ्येकवचनम् ॥१०३॥

योगमालात्मिका नाम या स्यात् सा 'परिहारिका' ।
'एकच्छन्ना'ऽऽश्रितं व्यक्तं यस्यामाश्रयगोपनम् ॥ १०४ ॥

'या'=गी [वाक्] 'योगमालात्मिका'=योगाना योगशक्त्या [प्रकृतिप्रत्ययसमुदायरूपया] साधितानां पदानां माला समुदाय एव आत्मा स्वरूप यस्या सा तथाभूता अर्थात् योगशक्तिमच्छब्दपरम्परया रूढपदबोध्यानामैकैकानामर्थानां बोधकारिणी या 'सा 'परिहारिका नाम' प्रहेलिका । परिहरति शीघ्रमेवार्थबोध वारयतीति योगसमाख्यया तथा व्यपदिष्टे । 'यस्याम्'=प्रहेलिकायाम् 'आश्रितम्'=आधेयम् 'व्यक्तम्'=स्फुट भवेत् [परन्तु] 'आश्रयगोपनम्=आश्रयस्य आधारस्य गोपन स्यात् सा एकच्छन्ना नाम प्रहेलिका । एक आश्रय छन्न' निगूढ यत्र सा इति योगात् उक्तनाम्नी प्रहेलिका भवतीत्यर्थः ॥ १०४ ॥

सा भवेद् 'उभयच्छन्ना' यस्यामुभयगोपनम् ।
'सङ्कीर्णा' नाम सा यस्यां नानालक्षणसङ्कर ॥ १०५ ॥

'यस्याम् उभयगोपनम्'=आश्रिताश्रययोर्द्वयोरपि गोपन संवरण 'भवत्' 'सा' 'उभयच्छन्ना' भवेत् । 'यस्याम् नानालक्षणसङ्कर'=नानालक्षणानाम् उक्ताना समागतादि पञ्चदशप्रहेलिकाप्रकाराणा मध्य द्व्यादिलक्षणाना सङ्कर साहित्यरूपेणावस्थान 'सा 'सङ्कीर्णा नाम' ज्ञातव्या इति शेष ॥ १०५ ॥

[अदुष्टादुष्टप्रहेलिकासङ्ख्यानम्]

एता. षोडश निर्दिष्टा' पूर्वाचार्यै प्रहेलिका' ।
दुष्टप्रहेलिकाश्चान्यास्तैरधीताश्चतुर्दश ॥ १०६ ॥

'एता' इति । 'एता'=समागताद्या 'षोडश'=शुद्धसङ्कीर्णभेदैरित्यर्थ । 'अन्या'=*च्युताक्षरादत्ताक्षरादिभेदाभिन्ना 'अधीता'=दुष्टत्वेन पठिता इत्यर्थ । स्पष्टमन्यत् ॥ १०६ ॥

---

* उक्तञ्च विश्वनाथेन —

रसस्य परिपन्थित्वान्नालङ्कार प्रहेलिका ।
उक्तिवैचित्र्यमात्र सा च्युतदत्ताक्षरादिका ॥

च्युताक्षरा दत्ताक्षरा च्युतदत्ताक्षरा च । उदाहरणम्—

कूजन्ति कोकिला साले यौवने फुल्लमम्बुजम् ।
कि करोतु कुरङ्गाक्षी वदनेन निपीडिता ॥

अत्र—'रसाले' इति वक्तव्ये 'साले' इति 'र' च्युत । 'वने' इत्यत्र 'यौवने' इति 'यौ' दत्त । 'वदनेन' इत्यत्र 'मदनेन' इति म' च्युत । 'व' दत्त । आदि-

[दुष्टप्रहेलिकानां स्वरूपं, तासां वर्जनञ्च]

दोषानपरिसङ्ख्येयान् मन्यमाना वयं पुनः ।
साध्वीरेवाभिधास्यामस्ता दुष्टा यास्त्वलक्षणा ॥ १०७ ॥

ननु--दुष्टा प्रहेलिका या पूर्वैराचार्यैरुक्ता तामामिहानिरूपणात् तव ग्रन्थस्य न्यूनता स्यादित्याशङ्कयाह--'दोषान्' इति । 'वय पुन '=वयन्तु 'अपरिसङ्ख्येयान्' =गणयितुमशक्यान् 'दोषान्'=वाक्यार्थबोधप्रतिबन्धकीभूतान् 'मन्यमाना '=जानन्त साध्वी '=दोषप्राचुर्याभावेन यमकादिवत् अलङ्कारताङ्गता 'एव अभिधास्याम '=उदाहरण-द्वारा निरूपयिष्याम । अदुष्टानां लक्षणन्तु अधस्तादुक्तमेवेति भाव । 'या तु'=प्रहे-लिका 'अलक्षणा =अग्रेनिरूपितसमागतादिलक्षणहीना 'ता' दुष्टा '=दोषवत्य [मन्तव्या] तासां निरूपणे व्यर्थ प्रयास मन्ये इति भाव ।

सारस्तु—समागतादिषोडशसङ्ख्याकप्रहेलिकानामलङ्कारत्व [यमकादिवत्] मयापि [दण्डिना] मन्यते नेतरासामिति ज्ञेय ॥ १०७ ॥

[क्रमश उदाहरणेषु—समागताया उदाहरणम्]

'न मयागोरसाभिज्ञं चेत कस्मात् प्रकुप्यसि ।
अस्थानरुदितैरेभिरलमालोहितेक्षणे ' ॥ १०८ ॥

आदौ समागतां प्रहेलिकामुदाहरति—'न' इति । [काचित् मानवतीं गोपिकां प्रति सान्त्वना कुर्वत श्रीकृष्णस्य वाक्यमिदम्] हे ! 'आलोहितेक्षणे '=आसमन्तात् लोहिते रक्ते [कोपवशात्] ईक्षणे नयने यस्या तत्सम्बोधनम् 'मया'=मम 'चेत '=चित्तम 'गोरसाभिज्ञम्=गोरसस्य दधिदुग्धादे अभिज्ञ रसवित् 'न'=नास्ति । 'मया इति षष्ठ्यर्थे तृतीया । अथवा—'धार्यते' इति क्रियापदमध्याहृत्य व्याख्येयम उभयत्रापि सारस्तु—न मया तव दधिदुग्धादि अपहृतम् । अत 'कस्मात्'=कारणात् त्व 'प्रकुप्यसि'=क्रोध करोषि । 'एभि '=एतादृशै 'अस्थानरुदितै =कारण विना रोदनै 'अलम्'=मारोदीरित्यर्थ । अयमर्थ जनसमाजे गोप्यवृत्तान्तसंवरक अनेनास्या दध्यादि आच्छिन्न स्यादितीय रोदितीति लोका जानीयु ।

शब्दात् क्रियाकारकगुप्त्यादय । तत्र क्रियागुप्तिर्यथा--

पाण्डवाना सभामध्ये दुर्योधन उपागत ।
तस्मै गाश्च हिरण्यञ्च सर्वाण्याभरणानि च ॥

अत्र--'दुर्योधन ' इत्यत्र 'अदुर्योऽधन ' इति 'अदु ' इति क्रियागुप्ति । एवमन्य-त्रापि ।

* [प्र०] प्रहेलिकानां वि सामान्यमलक्षणम् ' तासामलङ्कारत्व नास्ति नेति अत्र भीरसो दण्डिन स्वरस । ताता विशेषलक्षणाद तदुदाहरणेषु दोषन्या स्फुटी-कुर । [उ०] अस्य पृ० ३७२ प० १४ त प्रहेलिकाप्रकरणान्तम ।

वास्तवो [विवक्षितो गूढोऽ] र्थस्तु—मया चेत 'आगोरसाभिज्ञम्'=आगस अपराधस्य त्वदितरनायिकान्तरासक्तिलक्षणस्य यो रस आस्वाद तस्य अभिज्ञ 'न' धार्यते अर्थात् त्वामन्तरा नान्यां रमेय तस्मान्मुधैव त्वयैतावान् मान क्रियते । अत्र—'मे 'आगोरसाभिज्ञम्' इति पदयोर्विभागे 'एचोयवायाव' [ ] इति सूत्रेण 'ए' कारस्य अयादेशे कृते 'मयागोरसाभिज्ञम्' इति निष्पद्यते । तेन च निष्पन्नेन प्रकृतार्थे सवृत । तादृशसन्धिना प्रकृतार्थे [गूढार्थे] सवरणात्सत्वादिय 'समागता' नाम प्रहेलिका [प्रथमा] ॥ १०८ ॥

[वञ्चिताया उदाहरणम्]

कुब्जामासेवमानस्य यथा ते वर्धते रति ।
नैवं निर्विशतो नारीरमरस्त्रीविडम्बिनी ॥ १०९ ॥

वञ्चितामुदाहरति—'कुब्जाम्' इति । [कान्यकुब्जपुर्यां तत्रत्यायां महिलायामासक्तम्प्रति कश्चिदाह] 'कुब्जाम'=न्युब्जपृष्ठाम् काञ्चन स्त्रीम् 'आसेवमानस्य' रममाणस्य 'ते'=तव 'यथा'=येन प्रकारेण 'रति'=अनुराग 'वर्द्धते'=एधते एवम्'=तथा 'अमरस्त्रीविडम्बिनी'=सुराङ्गनातुल्या 'नारी'=अन्या महिला 'निविशत'=उपभुञ्जानस्य 'न =[सा रति] नैव वर्धते इति पुनरप्यनुपपन्नमयम् इति ऋजुरीत्याऽर्थ । गूढस्तु--'कुब्जाम्' कान्यकुब्जपुरीम् तत्रत्यां स्त्रीं वेति ज्ञेयम

अत्र—'कुब्जा' पद भुग्नपृष्ठायां स्त्रियामेव प्रसिद्ध वक्तुरभिप्रेतायां कान्यकुब्जनगर्यां तत्रत्यायां नार्यां वा न तस्य तथा प्रसिद्धिरिति अप्रसिद्धस्यार्थस्य पण्डितजनज्ञेयतया सवृते । अतो विशेषलक्षणसङ्गतिरप्यस्तीति [द्वितीया] 'वञ्चिता नाम प्रहेलिका ॥ १०९ ॥

[व्युत्क्रान्ताया उदाहरणम्]

दण्डे चुम्बति पद्मिन्या हंस कर्कशकण्टके ।
मुखं वल्गुरवं कुर्वंस्तुण्डेनाङ्गानि घट्टयन् ॥ ११० ॥

व्युत्क्रान्तामुदाहरति—'दण्डेषु' इति । 'कर्कशकण्टके'=कर्कशा खरा कण्टका यस्मिन् तादृशे 'पद्मिन्या'=कमलिन्या 'दण्डे'=नाले 'अङ्गानि'=अवयवान् 'घट्टयन्'=कर्षयन् तथा 'तुण्डेन'=मुखेन 'वल्गुरवम्'=मनोहर शब्द 'कुर्वन्'=विदधत 'हस'=कादम्ब 'पद्मिन्या मुखम्'=आस्य चुम्बति' इति प्रसिद्धोऽर्थ । परमत्र पदानां सन्निवेशोऽतिव्यवहित इति वाक्यार्थबोधहेतोरासत्तेर्व्युत्क्रमो जात अत इय 'व्युत्क्रान्ता' नाम [तृतीया] प्रहेलिका । एषा च क्लिष्टत्वदोषान्नातिभिद्यते ॥ ११० ॥

[प्रमुषिताया उदाहरणम्]

खातय कनि ! काले ते स्फातय स्फार्हवल्गवः ।
चन्द्रे साक्षाद्भवन्त्यत्र वायवो मम धारिण ॥ १११ ॥

प्रमुषितामुदाहरति—'खातय' इति । हे ! 'कनि !' कुमारि ! [कन्या कनी कुमारी च' इति हेमचन्द्र] 'ते'=तव 'काले'=पादे काल्यते प्रेर्यते प्रक्षिप्यतेऽसौ 'काल' पाद' 'अकर्तरि च कारके सञ्ज्ञायाम् [३ । ३ । १९] इति सूत्रेण 'कल प्रेरणे' इति धातो 'कर्मणि घञ्' । 'स्फातय'=स्फायन स्फा ['स्फायी' वृद्धौ । अस्मात् क्विपि 'य' लोपे रूपम्] वृद्धिरित्यर्थ. । तस्या अतिः गतिर्यत्र ते प्रभूता इत्यर्थ. । तथा—'स्फार्हवल्गव' =स्फाम् स्फीतनाम अर्हन्तीति स्फार्हो प्रभूता । वल्गन्तीति वल्गव स्फार्हो प्रभूता' वल्गव ध्वनयो येषां ते स्फार्हवल्गव एवम्भूता 'ते'=तव 'खातय'= खम् आकाशम् तस्यायमिति 'ख' शब्द । अतनम् 'अति'। 'इक् कृष्यादिभ्य' [वा० ३ । ३ । १०८] इत्यनेन 'अत' धातो इक्' । खस्य शब्दस्य अति प्राप्तियेषु ते खातय अलङ्कारा 'सन्ति' इति शेष । तव बहुमूल्यानि प्रभूतानि भूषणानि—शब्दायन्ते इत्ययमर्थश्लोकार्थ । तस्मिन् 'चन्द्रे=सशिञ्जितनूपुराद्यलङ्कारवति आह्लादके तव पादे 'मम' 'वायव'=असव [प्राणा] 'धारिणा=अवस्थिता 'भवन्ति' इति शेष 'धृङ् अवस्थाने' इत्यस्य रूपम् । अत्र—अप्रसिद्धार्थबहुभि पदैः निरूपित' प्रकृतोऽर्थ श्रोतृसमाजे नष्ट इति प्रमोषकरणादियं 'प्रमुषिता' [चतुर्थी] प्रहेलिका ।१११

[समानरूपाया उदाहरणम्]

अत्रोद्याने मया दृष्टा वल्लरी पञ्चपल्लवा ।

पल्लवे पल्लवे ताम्रा यस्या कुसुममञ्जरी ॥ ११२ ॥

समानरूपामुदाहरति—'अत्र' इति । 'अत्र'=अस्मिन् 'उद्याने'=आरामे 'पञ्चपल्लवा'= पञ्चशाखासमोपेता 'वल्लरी'=लता 'मया' 'दृष्टा'=विलोकिता । 'यस्याम'=वल्लर्याम 'पल्लवे पल्लवे=प्रतिपत्रम 'ताम्रा'=रक्ता 'कुसुममञ्जरी'=पुष्पशिञ्जरि 'राजते' इति शेष ।

अत्र काचित नायिका उद्यानरूपत्वेन आरोपिता । तस्या बाहु वल्लरीत्वेन अङ्गुलय पल्लवत्वेन नखा कुसुममञ्जरीत्वेन चाध्यारोपिता परमत्र उद्यानादीनि पदानि नायिकाद्यर्थाभिधाने नाभिप्रापेक्षाणि किन्तु गौण्या तथा बोध इति सादृश्यसम्बन्धहेतुकेयं 'समानरूपा' पञ्चमी प्रहेलिका । इयञ्च 'वापी कापि स्फुरति गगने' इत्यादिवत अतिशयोक्तिरूपधानाति ॥ ११२ ॥

[परुषाया उदाहरणम्]

सुरा सुरालये स्वैरं भ्रमन्ति दशनार्चिषा ।

मज्जन्त इव मत्तास्ते सौरे सरसि सम्प्रति ॥ ११३ ॥

परुषामुदाहरति—'सुरा' इति । सुरा मद्यम । सुरां करोतीति सुरायते 'तत्करोति तदाचष्टे' इति 'णिच' । तत क्विप् । अथवा—सुरा एषामस्तीति सुरा शौण्डिका अर्श आदिभ्योऽच । किंवा—सु सुष्ठु रा ध्वनिविशेषो येषां ते सुरा ['रै' शब्दे क्विपि रूपम्] 'दशनार्चिषा=दशनानां दन्तानाम् अर्चिषा मयूखेन उपलक्षिता विहृतास्यत्वात 'स्वैरम्=स्वच्छन्द यथा स्यात तथा सुरालये शौण्डिकानां मद्यालये इत्यर्थ

'भ्रमन्ति'=पर्यटन्ति । कीदृश ते—'सम्प्रति'=अधुना ते सुरा सौरे'=सुराया इद सौरम् तत्र 'सरसि=तटाके 'मज्जन्त इव'=ब्रुडन्त सन्त इव 'मत्ता.'=प्रमदान्विता । अत्र— 'सुरा ' इति पद देववाचि तथापि अनुशासनस्यास्तित्वमात्रमाश्रित्य 'सुराकारेषु 'सुरापेषु' च अशक्तमपि प्रयोजित प्रयोक्तु पारुष्य व्यनक्तीति 'परुषा' इय [षष्ठी] प्रहेलिका ॥११३॥

[सख्याताया उदाहरणम्]

नासिक्यमध्या परितश्चतुर्वर्णविभूषिता ।
अस्ति काचित् पुरी यस्यामष्टवर्णाह्वया नृपा ॥ ११४ ॥

सख्यातामुदाहरति—'नासिक्यमध्या' इति । 'काचित् पुरी अस्ति' । कथम्भूता पुरी- 'नासिक्यमध्या'=नासिकायां भव नासिक्य 'शरीरावयवाच्च' [४ । ३ । ६३] इति सूत्रेण यत्' । स च [प्रकृते] 'अ' कार' । नासिक्य मध्ये यस्या सा तादृशी । तथा— 'परित '=सर्वत 'चतुर्वर्णविभूषिता'=चतुर्भिर्वर्ण 'क' 'आ' 'च' 'ई' इति चतुर्भिर क्षर [नासिक्यनकारमोहित] विशेषेण भूषिता मण्डिता शोभितेत्यर्थ एवम्भूता सा पुरी 'काञ्ची इति मवरणायोऽर्थ । यद्यपि 'काञ्ची इत्याकार शब्द सज्ञा, नगरी तु तदभि- धेयोऽर्थ तथापि सज्ञासज्ञिनोरभेदोपचारात् पुर्या द्वे विशेषणे । 'यस्याम्'=पुर्याम 'अष्टवर्णाह्वया नृपा '=अष्टौ वर्णा अक्षराणि यस्मिन् तथाभूत आह्वयोऽभिधान येषां तादृशा नृपा राजान 'आसन्' इति शेष । एतावता 'पुण्ड्रकनामाना राजानोऽभूवन्' इत्यर्थो लभ्यो भवति । पुण्ड्रक'शब्दे च 'प, उ, ण, ड, र अ क, अ' एते अष्टौ वर्णा निबन्धका सन्ति । पुण्ड्रकवशीया 'राजान पूर्व काञ्च्यामभूवन् इति हि लोके ख्याति । एवमुक्तानामष्टानामक्षराणां सख्यानेन श्रोतृणां व्यामोहकरणात् 'सख्याता' नाम [सप्तमी] प्रहेलिका बोध्या ॥ ११४ ॥

[प्रकल्पिताया उदाहरणम्]

गिरा स्खलन्त्या नम्रेण शिरसा दीनया दृशा ।
तिष्ठन्तमपि सोत्कम्पं वृद्धे मां नानुकम्पसे ॥ ११५ ॥

प्रकल्पितामुदाहरति—'गिरा' इति । हे ! 'वृद्धे !'=जरठे 'स्खलन्त्या'=वार्धक्येन प्रभ्रश्यन्त्या 'गिरा'=वाण्या, 'नम्रेण'=अवनतेन शिरसा=उत्तमाङ्गेन तथा-'दीनया'=कातर- भावव्यञ्जनया 'दृशा'=दृष्ट्या चक्षुषा च उपलक्षिता [उपलक्षणे तृतीया] त्वम् 'सोत्कम्पम् । वेपथुमन्तम 'तिष्ठन्तम अपि'=स्थितवन्तमपि 'न अनुकम्पसे'=नैव दयसे इति प्रसिद्धोऽर्थ गाप्याऽर्थस्तु—हे ! 'वृद्धे !'=ऋद्धे ! लाक्ष्म ! [ऋद्धि सिद्धिलक्ष्म्या वृद्धेरप्याह्वया इमे इत्यमर'] निर्धनत्वात् स्खलद्गिरा नम्रशिरसा दीनचक्षुषा चोपलक्षित तथा सोत्कम्प मां त्व नानुकम्पसे मम दारिद्र्य नापाकरोषि ।

अत्र—आदौ प्रतीयमानादर्थात् यत्र प्रकृतत्वेन अर्थान्तरकल्पना तत इय 'प्रकल्पिता' नाम [अष्टमी] प्रहेलिका ॥ ११५ ॥

[नामान्तरिताया उदाहरणम्]

आदौ राजेत्यधीराक्षि ! पार्थिव कोऽपि गीयते ।
सनातनश्च नैवासौ राजा नापि सनातन. ॥ ११६ ॥

नामान्तरितामुदाहरति—'आदौ' इति। हे ! 'अधीराक्षि !'=अधीरे चपले अक्षिणी यस्या तत्सम्बोधनम् चपलदृशे ! इत्यर्थ 'क' अपि पार्थिवः'=पार्थिवशब्दवाच्य 'आदौ'=प्रथमम् 'राजा' 'इति' नाम्ना 'गीयते'=अभिधीयते । परन्तु 'असौ'=पार्थिवः 'न एव राजा'=वस्तुतो राजा पृथिवीपति' नास्ति 'न च सनातन'=नित्यश्च नास्ति । तस्मात् 'कोऽसौ अस्ति' इति गम्य प्रश्न । सवरणीय उत्तरभूतोऽर्थस्तु—'कोपि पार्थिव'=पृथिवीविकार' वृक्षविशेष 'स आदौ' प्रथमभागे 'राजा इति गीयते उच्चार्यते अर्थात् तद्वाचकाभिधेयस्य प्रथमभागे 'राजा' इति शब्द श्रूयते तथा—'स ना तन'='इति शब्दशून्यो नास्ति अर्थात् तन्नाम्नोऽन्ते 'तन' शब्दोऽपि वर्त्तत एव एवञ्च—'राजातनवृक्ष' इति सवरणीयोऽर्थो निर्गतो भवति । स च पियालवृक्ष । राजातन पियाल स्यात्' इत्यमर । अत्र—'राजातन' इत्यभिधातव्ये नानार्थकल्पना कृता तत इयम् 'नामान्तरिता [नवमी] प्रहेलिका। लक्षणे नामपद वस्तुमात्रतात्पर्यकम्। तेन—

तरुण्यालिङ्गित कण्ठे नितम्बस्थलमाश्रित ।
गुरूणा सन्निधानेऽपि क कूजति मुहुर्मुहु ॥

इत्यादावपि 'नामान्तरिता प्रहेलिका। अत्र—जलपूरितघटात्मके वस्तुनि वक्तव्ये प्रथम नानार्थकल्पनात् नामान्तरिता । किञ्च—

य एवादौ स एवान्ते मध्ये भवति मध्यम ।
अस्यार्थं यो न जानाति तन्मुखे त ददाम्यहम् ॥

इत्यादावपि सैव । अत्र 'यवस' इत्यर्थ प्रतिपाद्य ॥ ११६ ॥

[निगूढाया उदाहरणम्]

हतद्रव्य नरं त्यक्त्वा धनवन्तं व्रजन्ति का ।
नानाभङ्गिसमाकृष्टलोका वेश्या न दुर्धरा ॥ ११७ ॥

निगूढामुदाहरति—'हतद्रव्यम्' इति । 'नानाभङ्गिसमाकृष्टलोका'=नाना भङ्गिभि अनेकविधाभिश्चतुरचेष्टाभि समाकृष्टा [सम्यक्] स्वायत्तीकृता लोका जना याभि तास्तथाभूता 'हतद्रव्यम्'=हृतम् अपहृत क्षीणतां गत द्रव्य धन यस्य स तादृश तम् 'नरम्'=मनुष्य 'त्यक्त्वा'=विहाय 'धनवन्तम्'=आढ्य पुरुषम् 'का व्रजन्ति'=यान्ति [इति मम प्रश्न]' यदि—उक्तविशेषणविशिष्टा वेश्या एव भवितुमर्हन्तीति उत्तर ... तदाह—'दुर्धरा वेश्या न'=दुःखेन धारयितु योग्या महाव्ययकारणात् ... दुर्धरा वेश्या वारनारी मम प्रश्नस्य विषयो न ... । अत्र—उत्तरस्य सवरणीयोऽर्थ 'पर्वतनिर्गता नद' इति । तथाहि—

नाना अनेके भङ्गा तरङ्गा' सन्त्यस्येति 'नानाभङ्गि' जलम्, तेन समाकृष्य सम्यक् समीप मानीता अवतरन्तो लोका. जना याभिः ता तथाभूता । किञ्च—दुर्धरा =महा जलप्रवाहात् विविधवक्रनक्रादिजन्तुप्रसराद्वा दुर्गम्या । किं कृत्वा – 'हृतद्रव्य नर त्यक्त्वा' हृतानि द्रव्याणि [द्रुर्वृक्ष , तस्य विकारो ऽवयवोवा 'द्रव्यम्'। 'द्रोश्च' ।४।३।१६१ इति पाणिनि सूत्रेण 'यत्'।] वृक्षसम्बन्धीनि शाखापल्लवादीनि वस्तूनि यस्य त 'नरम्'* नरसदृशम् आश्रयप्रदमित्यर्थ कं यान्ति—'धनवन्नम्'=धन रत्नादि तद्वन्त रत्नाकर समुद्रमित्यर्थ । अत्र—विशेषणानामुभयत्रापि साम्यात् 'एकतरनिषेधेऽन्यतरविधिनान्तरीयकत्वम्' इति नियमात् 'नदी' एवोत्तरे युज्यते । परन्तु—तस्या अर्थ तुल्यविशेषणबलात् प्रतीतोऽपि वाचकशब्दानुपादानात् 'निभृता' नाम [दशमी] प्रहेलिका ॥ ११७ ॥

[समानशब्दाया उदाहरणम्]

जितप्रकृष्टकेशाख्यो यस्तवाभूमिसाह्वय ।
स मामद्य प्रभूतोत्कं करोति कलभाषिणि ॥ ११८ ॥

हे ! 'कलभाषिणि !'=मधुरालापे ! 'जितप्रकृष्ट केशाख्य '=केशस्य आख्या केशाख्या 'बाल' इति नाम । प्रकृष्ट उत्तमो य केश तस्य आख्या अभिधायक नाम प्रवाल' इति। जिता न्यक्कृता प्रकृष्टकेशाख्या प्रवाला येन स तथाभूत । 'अभूमिसाह्वय '=भूमिधरा नास्ति भूमिर्यस्य स' अभूमि अधर अभूमिना सम आह्वयो नाम यस्य स अभूमिसाह्वय एवम्भूत 'य तव' अभूमिसाह्वय ओष्ठ इति फलितोऽर्थ । स अद्य माम्' 'प्रभूतोत्कम्'=अत्युत्कण्ठावन्त 'करोति'=विधत्ते । प्रवालतुल्य [रक्ततर] तवोष्ठो मामाकुलयतीति सवोऽर्थ । अत्र—'प्रकृष्टकेशाख्य. 'अभूमि' शब्दस्य † लक्षि-

---

*आश्रयप्रदत्वसादृश्याद् गौणोऽस्य प्रयोग ।

† शक्यपरम्परासम्बन्ध **लक्षितलक्षणा** । पदीयशक्यार्थस्य लक्ष्यमाणेनार्थेन सह य परम्परासम्बन्ध सा लक्षितलक्षणा। यथा—'मधुकर शब्दायते' इत्यर्थप्रतिपादनाय केनचिद् आप्तेन 'द्विरेफो रौति' इति वाक्य प्रयुक्तम् । तद्वाक्यश्रवणोत्तर श्रोता पुरुष 'द्विरेफ पदस्य शक्यार्थरूपे 'रेफ द्वये शब्दकर्तृत्वानुपपत्ति मत्वा 'द्विरेफ' पदेन मधुकरव्यक्ति लक्षणयाऽवगच्छति, एवम्भूता या लक्षणा सा 'लक्षितलक्षणा' अर्थात् द्विरेफपदस्य शक्यार्थो रेफद्वयम, तस्य मधुकरव्यक्तया साक्षात्सम्बन्धस्तु भवितु नार्हति किन्तु तयो रेफयो साक्षात्सम्बन्धो 'भ्रमर' पदे, स्वघटितपदवाच्यत्वरूपपरम्परासम्बन्धस्तु मधुकरव्यक्तौ वर्त्तते । 'स्व' पदेन द्विरेफपदशक्यार्थभूतरेफद्वयग्रहणम्, तेन घटित 'भ्रमर' पदम्, तद्भ्रमरपदवाच्यत्वसम्बन्धो मधुकरे इति । एवमेव प्रकृते 'प्रकृष्टकेश' पदस्य प्रवालशब्दे 'अभूमि' शब्दस्य च अधरशब्दे लक्षणां कृत्वा पश्चात् [दर्शितरीत्या] तदर्थयोर्बोधो लक्षितलक्षणया । लक्षणाया सरल प्रपञ्चो मदीय-**न्यायमुक्तावली-प्रभायां** शब्दखण्डे द्रष्टव्य ।

तल्लक्षणया प्रवालाधरयो र्बोधं जनयत । तथाहि—'प्रकृष्टकेशस्य' प्रवालशब्दे 'अभूमि' शब्दस्य च 'अधर' शब्दे पूर्वं लक्षणा लक्षितयोश्च तयो शब्दयो शक्त्या प्रवाला-धररूपद्वयार्थस्य यथाक्रममुपस्थिति । तदियं प्रस्तुतस्य समानशब्देनार्थोपस्थित्या 'समान शब्दा' [एकादशी] प्रहेलिका ॥ ११८ ॥

[सम्मूढाया उदाहरणम्]

शयनीये परावृत्य शयितौ कामिनौ क्रुधा ।
तथैव शयितौ रागात् स्वैरं मुखमचुम्बताम् ॥ ११९ ॥

सम्मूढामुदाहरति—'शयनीये' इति । 'कामिनौ =[दम्पती] कामुकौ 'क्रुधा'= प्रणयक्रोधेन 'शयनीये'=आस्तरणे [शय्यायाम्] 'परावृत्य'=विमुखीभूय 'शयितौ = निद्राणौ । 'तथैव शयितौ' परावृत्य शयितावपि परावर्त्तना कृत्वा 'रागात् =प्रीते 'स्वैरम्'= स्वच्छन्दम् 'मुखम्'=आननम् 'अचुम्बताम्'=चुम्बितवन्तौ । अत्र—क्रुधा शयितयो परावृत्य मुखचुम्बन [चुम्बन वक्त्रसंयोगविशेष] न युज्यत इत्यापाततोऽर्थस्य व्यामोहः पर्यन्ते तु आर्दौ प्रणयकोपेन परावृत्य तयो शयनम् पश्चात् कामुकतया समुद्बुद्धरागहेतो पुन परावृत्य शयितौ' इति परावृत्तयो पार्श्वान्तरसञ्चालनेन सम्मुखत्वान्मुखचुम्बन सुघ-टमेवेति वाह्यदृष्ट्या श्रोतृणा व्यामोहकरणादियं 'सम्मूढा' [द्वादशी] प्रहेलिका ॥ ११९ ॥

[परिहारिकाया उदाहरणम्]

विजितात्मभवद्वेषिगुरुपादहतो जन ।
हिमापहामित्रधरैर्व्याप्तं व्योमाभिनन्दति ॥ १२० ॥

परिहारिकामुदाहरति—'विजितात्म०' इति । वि पक्षी, तेन विना गरुडेन जित पराजित इन्द्र [अमृताहरणसमये गरुडेन इन्द्र पराजित इति पौराणिकी प्रसिद्धि] तस्य आत्मभव =तनूज अर्जुन , तस्य द्वेषी शत्रु कर्ण तस्य गुरु पिता सूर्य , तस्य पादै किरणै , हत तापमुपनीत 'जन '=पुरुष 'हिमापहामित्रधरै =हिम जाड्य शैत्यम् अपहन्तीति हिमापह अनल , तस्य अमित्र शत्रु जलम्, तस्य धरै वारिदै 'व्याप्तम्'=आच्छादितम् 'व्योम'=आकाशम् 'अभिनन्दति =समाद्रियते । अत्र यौगिकैरेव पदै झटिति प्रकृतार्थसंवरणकरणात् 'परिहारिका' नाम [त्रयोदशी] प्रहेलिका ॥१२०॥

[एकच्छन्नाया उदाहरणम्]

न स्पृशत्यायुधं जातु न स्त्रीणा स्तनमण्डलम् ।
अमनुष्यस्य कस्यापि हस्तोऽयं न किलाफल ॥ १२१ ॥

एकच्छन्नामुदाहरति— 'अमनुष्यस्य =मनुष्येषु अगणनार्हस्य 'कस्य अपि' पुरुषस्य 'हस्त =पाणि 'जातु =कदाचित् अपि' 'आयुधम्'=अस्त्रम् 'न स्पृशति' नैव *स्पृशति

* एतदनन्तरमपि स्त्री स्तनमण्डलमपि न स्पृशति इति बुद्धिश्च आख्यात चन्द्रिका' ।

'स्त्रीणां स्तनमण्डल च'=नारीकुचमण्डलमपि न स्पृशति तथापि 'अय हस्त' 'अफल.'= निष्फल [व्यर्थ] न 'किल'=अपि तु सफल एव इत्यस्यार्थस्यापातत प्रतीति । पर- मत्र—शत्रुस्त्रीस्तनस्पर्शाभावेन 'नाय वीरः नापि शृङ्गारी इति कथमस्य हस्तस्य साफ- ल्यम् इति विरोधवदवभासनात् प्रकृते 'अमनुष्य' पदेन गन्धर्वो लक्ष्यते तस्य हस्तो गन्ध- र्वहस्त इति समुदितार्थ प्रतीत, तेन एरण्डवृक्ष' इति सवृतार्थबोध । उक्तञ्च 'हारा वल्याम्'—

'अमण्डपञ्चाङ्गुलवर्धमाना गन्धर्वहस्तास्त्रिपुटीफलश्च' इति, तस्य फलमस्त्येवेति आश्रित फलं स्फुट प्रतीयते नत्वाश्रयस्य वृक्षस्य स्फुटा प्रतीति रिति 'एकच्छन्ना'इय [चतु र्दशी] प्रहेलिका ॥ १२१ ॥

[उभयच्छन्नाया उदाहरणम्]

केन कः सह सम्भूय सर्वकार्येषु सन्निधिम ।
लब्ध्वा भोजनकालेतु यदि दृष्टो निरस्यते ॥ १२२ ॥

उभयच्छन्नामुदाहरति—'केन इति । 'क'=पदार्थ' 'केन'=पदार्थेन 'सह सम्भूय'= मिलित्वा 'सर्वकार्येषु'=सकलासु क्रियासु 'सान्निधिम्'=सन्निकर्षम् 'लब्ध्वा'=प्राप्य 'भोजन- काले तु'=अभ्यवहारवेलायाम् यदि दृष्ट'=यदि नाम आलोकित स्यात् तदा 'निरस्यते'= नितरामस्यते क्षिप्यते समुत्सार्यते इति प्रसिद्धयोजनया प्रश्न ।

अस्योत्तरन्तु—'केन' मस्तकेन सम्भूय कस्य शिरस अय क केश 'तस्येदम्' [पा० ४ । २ । १२०] इतीदमर्थेऽण् । स च सर्वकालेषु सान्निधिंप्राप्तोऽपि भोजनकाले दृष्ट' सन् दूरमुत्सार्यते । अत्र—आश्रयस्य मस्तकस्य आश्रितस्य केशस्य न उभयोरपि छन्नत्वात् 'उभयच्छन्ना' इयम् [पञ्चदशी] प्रहेलिका ॥ १२२ ॥

[सकीर्णाया उदाहरणम्]

सहया सगजा सेना सभटेयं न चेज्जिता ।
अमात्रिकोऽयं मूढ' स्यादक्षरज्ञश्च न सुत ॥ १२३ ॥

सङ्कीर्णामुदाहरति—'सहया' इति । 'सहया'=हयैर्वाजिभिः सहिता, 'सभटा'=भटै योद्धृभि सहिता अर्थात् साश्वा, सकरिका सयोधा 'इयम्'=शत्रूणां 'सेना'=चमू चेत्'= यदि 'न जिता'=नैव पराभव नीता 'स्यात्'=भवेत् तदा 'न'=अस्माकम् 'अयम्'=पुर स्थित 'सुत'=आत्मज [कीदृश] 'अक्षरज्ञ'=अक्षरब्रह्मविदपि 'अमात्रिक'= मीयन्ते इन्द्रियै परिच्छिद्यन्ते इति 'मात्रा'=शब्दादिविषया [मात्रास्पर्शास्तु कौन्तेय । इति भगवदुक्ते] मात्रा अर्हतीति मात्रिक' । 'तदर्हति' [५ । १ । ६३] इति पाणिनि सूत्रेण अर्हत्यर्थे 'ठञ्' । न मात्रिक अमात्रिक' वैषयिकसुखास्पृक् तथा—'मूढ' च'= मूर्खश्च 'स्यात्' ब्रह्मविदपि मूर्खत्वेन गण्य' स्यात् । वस्तुत —ब्रह्मविदपि साधारणलोक दृष्ट्या मूर्खत्वेन गण्यते 'या निशा सर्वभूतानाम् इति भगवदुक्ते, एवमयमर्थ आपातत:

प्रतीतिविषयः । सवरणार्हे[गूढ]स्तु—हश्च यश्च ह्यौ हकारयकारौ वर्णौ ताभ्यां सहित 'सह्या' इत्यादि रीत्या हकारयकाराभ्यां भकारटकाराभ्यां च सहिता 'इयम् सेना' इन चराचरस्रष्टा प्रभु प्रजापति [ब्रह्मा] तेन महिता प्रजापतिर्नव सृष्टा 'वर्णमाला' इत्यर्थ । स्मर्त्तारश्चाहु —'धात्राक्षराणि सृष्टानि पत्राद्दृष्टान्यत पुरा' इति । [सेयम्] नचेज्जिता नाभ्यस्ता तदा अमात्रिक '=मात्रा अच. अकाराद्याः स्वरा तज्ज्ञानरहितोऽयं जन 'नः सुत ' 'अक्षरज्ञ =अक्षर वेद न क्षरति विपर्येति किन्तु प्रतिसर्ग निश्वासन्यायेन समाना-नुपूर्वीक एव तिष्ठति इति व्युत्पत्ते तस्य 'ज्ञ ' अधीतवेदोऽपि वर्णमालाविज्ञानशून्यश्चेत् तदा 'मूढः' मूर्ख एव । अर्थात् पठितवेद =कीरवद्घटितवेदोपि यदि वर्णलेखनादिप्रकारान-भिज्ञ तदा मूर्ख एव। 'योऽर्थ ज्ञ स इत्सकल भद्रमश्नुते' [ ] इति श्रुते । अत्र वर्णलेखनमुपलक्षणमर्थज्ञानादे । बहव सन्त्येवंविधा दुष्प्रबुद्धा ध्वाक्षमुखा खट्वारूढा लोके इत्याशय । एवमिय सङ्कीर्णा नाम [षोडशी] प्रहेलिका ॥ १२४ ॥

[सङ्कीर्णाया स्वरूपोपपादनम्]

सा नामान्तरितामिश्रा वञ्चितारूपयोगिनी ।
एवमेवेतरासामप्युह्येय सङ्करकम ॥ १२५ ॥[प्रहेलिकाचक्रम्]

—*—

इति शब्दालङ्कारा

—›—

उक्तोदाहरणे सङ्कीर्णाया स्वरूप लापर्यति— सा इति । 'सा =अथ उक्ता सङ्कीर्णा-भिधा प्रहेलिका 'नामान्तरितामिश्रा –ह्यादिशब्दानामनेकार्थकल्पनात् 'नामान्तरिताख्या' प्रहेलिकालक्षणोपेता तथा—'वञ्चितारूपयोगिनी'='सेना पदस्य चमू' रूपार्थस्य प्रसिद्ध-स्यापि अविवक्षितभाव मत्वा अर्थान्तरकल्पनात्वात् 'वञ्चिताया प्रहेलिकाया यद् रूपम् लक्षणम् तद्योगिनी तल्लक्षणसमन्विता अप्यस्ति अत एवोक्तोदाहरणे सङ्करत्वात् प्रहेलि-काया सङ्कीर्णा' इति सञ्ज्ञा युज्यते । एवमेव –अनयैव रीत्या इतरासाम्'=अन्यासा-मपि प्रहेलिकानां 'सङ्करकम'=अन्योन्य साङ्कर्यप्रकार 'उह्येय '=अवनेय प्रन्थगौरवभ-भिया दिङ्मात्रम्प्रादर्शीति भाव ॥ १२५ ॥

इत्यादि—प्रहेलिकानां प्रकरणमसमाप्तमित्यथ । शब्दालङ्कारप्रकरणञ्च समाप्तम् ॥

—›—

चकार यो दीर्घतरा प्रहेलिका समारचक्रोपधिना महान् दण्डी ।
स सर्वशास्त्रार्थरसो निपीयते मया मनसा साऽऽनन्दनां करोतु ॥

—›—

[अथ दोषनिरूपणम्]

अपार्थं व्यर्थमेकार्थं ससंशयमपक्रमम ।
शब्दहीनं यतिभ्रष्टं भिन्नवृत्तं विसन्धिकम् ॥ १२५ ॥
देशकालकलालोकन्यायागमविरोधि च ।
इति दोषा दशैवैते वर्ज्या काव्येषु सूरिभि. ॥ १२६ ॥

इत्थं काव्यस्य उपादेयान् गुणानलङ्कारांश्च सविस्तर निरूप्य दुष्प्रयुक्ताया' गो प्रयोक्तरेव गोत्वशसनात् तदीयहेयानपि काश्चिद् धर्मान् दोषाख्यान् [परैरपरैश्चानेकधा वर्णितानपि निरूपयितुकाम आचार्य सम्प्रति शिष्यबुद्धिव्याकुलतापरिहाराय सक्षेपे णैव वर्णयितुमुपक्रमते— अपार्थम्' इति । 'अपार्थम्, व्यर्थम् एकार्थम्, ससशयम, अपक्रमम्, शब्दहीनम्, यतिभ्रष्टम भिन्नवृत्तम, विसन्धिकम,देश काल कला लोक-न्यायागमविरोधि, च' 'इति'=एतादृश वाक्य दुष्टमित्यर्थ 'इति' शब्दोऽत्र वाक्यपरिसमाप्तौ । 'अपार्थम् इत्यादि नपुसकनिर्देशात् 'वाक्यम' इति विशेष्यपदस्य अध्याहारो बोध्य' । तेन 'अपार्थं [अपार्थदोषवत] वाक्य दुष्टम् व्यर्थ वाक्य दुष्टम्' इति रीत्या सर्वत्र योजनीयम् । अध्याहृत 'वाक्य' पद पदादीनामप्युलक्षक यथायथ बोध्यम । 'एते'= अपार्थादय 'दोषा '=हेयत्वेन निर्दिष्टा वाक्यापकर्षका धर्मा 'सूरिभि '=अलङ्कारशास्त्रस्वरूपविज्ञै 'काव्येषु'=कविकर्मभूतेषु निबन्धेषु 'वर्ज्या '=अवश्य ज्ञातव्या ।

यद्यपि श्रुतिकटुप्रभृतयोऽनेके दोषा काव्यापकर्षका नवीनै प्राचीनैश्च काव्यविशारदार्यै तेषु तेषु निबन्धेषु वर्णनीयत्वेनोक्ता तेप्यत्र वक्तव्या , अन्यथा ग्रन्थन्यूनतापरिहारानुपपत्ते तथापि शाब्दबोधविघटकत्वेनावश्य परिहर्तव्यानामेव प्रयोक्तृगोत्वप्रकाशनत्वात् तेषामिहानभिधान न ग्रन्थन्यूनतामावेदयति । अपि च श्रुतिकटुत्वादयो वैरस्यमात्राधायका नात्यन्त वाक्यार्थबोधप्रतिकूलतावद्धा इत्येतैरेव शिष्यजिज्ञासाप्रशान्ते एतज्ज्ञानेनैव च इतरेषामपि बुद्धिवैभवेन स्वय ज्ञातु सुगत्वात् ते इह नोक्ता इत्यपि न विस्मर्तव्यम् । एतेनैवाभिप्रायेण वामन 'गुणविपर्ययात्मानो दोषा ' [अधि० २ । सू० १] अर्थत स्तद्वगम ' [अधि० २ । सू० २] सौकुमार्याय प्रपञ्च ' [अधि० २ । सू० ३] इति प्रपञ्चितवान् । इत्यमपार्थादीना दशानामेवावश्य परिहेयता दण्डिमतसिद्धा ।

यद्यपि सामान्यलक्षणपरिज्ञानोत्तरमेव विशेषदर्शन न्याय्यम् तथापि 'दोषा इति पदोक्त्या योगबलादेव तल्लक्षणमप्युक्त भवति । तथाहि —'दुष वैकृत्ये इत्यस्माद्धातो 'अकर्तरि च कारके सञ्ज्ञाया घञ्' [३ । ३ । १९] इति सूत्रेण करणे घञि कृते 'दुष्यति विकृत भवति काव्यमनेन' इति दोष इति व्युत्पत्त्या 'काव्यविघटकत्व दोष-

त्वम्' इति दोषसामान्यलक्षणमुक्तं भवति । विघटकत्वञ्च—उपादेयगुणादिधर्माभिमत-प्रतीतिव्यवधायकत्वेन ज्ञेयम् ॥ १२५ ॥ १२६ ॥*

[प्रतिज्ञाहान्यादीनां दोषत्वाभावकथनम्]

प्रतिज्ञाहेतुदृष्टान्तहानिर्दोषो न वेत्यसौ ।
विचार कर्कश प्रायस्तेनालीढेन किं फलम् ॥ १२७ ॥

ननु—'दर्शवेति' अवधारणमयुक्तमाभाति प्रतिज्ञाहान्यादीनामपि महर्षिगोतम-प्रतिपादितानां न्यायशास्त्रप्रसिद्धानां विवक्षितार्थप्रतिबन्धकत्वेन दोषत्वाभिधानात्, 'प्रतिज्ञाहेतुदृष्टान्तहीनं दुष्टञ्च नेष्यते' इत्यादि भामहोक्तेश्च तेषां दोषत्वाभाव तत्र किं युक्तमयुक्तं वेति संशयापाकरणाय स्वसिद्धान्तमाविष्करोति—'प्रतिज्ञा'० इति । 'प्रतिज्ञाहेतुदृष्टान्तहानि'=प्रतिज्ञा च हेतुश्च दृष्टान्तश्च ते, तेषां हानि हतिविरोध इति यावत् 'दोष नवा इति असौ विचार'=विवेक अन्यतरपक्षावधारणमिति यावत् 'प्राय'=बाहुल्येन कर्कश'=कठोर न्यायशास्त्रीयप्रक्रियासम्बन्धित्वात् प्रकृते प्रयोजनशून्य इत्यर्थ । अत 'तेन आलीढेन'=आस्वादितेन ज्ञातेन तेन विचारेण 'किम् फलम्'= न किञ्चिदपि फलमस्तीति भाव ।

अयमाशय—[तत्र] साध्यनिर्देश प्रतिज्ञा, प्रतिज्ञाया हानि प्रतिज्ञाहानि साच प्रतिज्ञातार्थविरुद्धाभ्युपगम प्रतिज्ञातार्थपरित्यागो वा यथा—शब्दोऽनित्य प्रत्यक्ष-गुणत्वात्' इत्यत्र 'सोऽयं गकार' इत्यादिप्रत्यभिज्ञाबलात् परेण बाधे उद्भाविते 'अस्तु तर्हि नित्य शब्द' इति नित्यत्वमङ्गीकुर्वन् वादी शब्दस्यानित्यत्वप्रतिज्ञां जहाति इत्येवमादि गोतमतन्त्रे सविस्तरं प्रपञ्चितम् । तदाद्या निग्रहस्थाननाम्ना दोषा तत्र—

---

* जयदेवस्तु—

स्याच्चेतो विशता येन सक्षता रमणीयता ।
शब्देऽर्थे च कृतोन्मेषं दोषमुद्घोषयन्ति तम् ॥ इति—

दोषसामान्यलक्षणमुक्तवान् । 'रसाद्यन्यतरधीप्रतिबन्धकत्व तदवच्छेदकतया सिद्धो जातिविशेषो वा दोषत्वम्' निष्कर्ष ।

श्लेषप्रसादसमतादिगुणानां रसार्थवबोधजनकत्वया सिद्धानामभावकृतो दोष ननु जात्यन्तरम् । यथा—श्रुतिकटुत्व सौकुमार्याभाव कान्तेरभावो ग्राम्यादिरित्याद्य सरस्वतीकण्ठाभरणकार । तदुक्तं वामनेन—

यो हेतु काव्यशोभाया सोऽलङ्कारो निगद्यते ।
गुणोऽपि तादृशो ज्ञेयो दोष स्यात्तद्विपर्यय ॥ इति ।

तदद 'काव्यशोभाहेतुगुणाभाव दोष' दोषत्वमिति नैतद् सत्यम् । काव्यप्रकाशादौ तु नित्यानित्यादिदोषत्वविधानाच्च गुणाभाव न प्रतिबन्धकत्वात् दोषत्वमित्युक्त भवति ॥

'भोजराजो'ऽपि कांश्चित् अलङ्कारशास्त्रे दोषत्वेन निरूपितवान् । यथा—

यावज्जीवमहं मौनी ब्रह्मचारी पिता मम ।
माता च मम वन्ध्यासीदपुत्रश्च पितामहः ॥ इति ।

तेषामत्र प्रपञ्चो नातीवोपयुक्त इति ते मयोपेक्षिता इत्याशयः ॥ १२७ ॥

[अपार्थस्य सापवादं लक्षणम्]

समुदायार्थशून्यं यत् तदपार्थमितीष्यते ।
उन्मत्तमत्तबालानामुक्तेरन्यत्र दुष्यति ॥ १२८ ॥

उद्देशानुसारं दोषभेदान् निरूपयन् क्रमप्राप्तमपार्थं लक्षयति—'समुदायार्थशून्यम्'= इति । समुदायस्य वाक्यघटकपदसमूहस्य महावाक्यघटकवाक्यसमुदायस्य वा योऽर्थः वाक्यार्थबोधैकभाग्यमापन्नः प्रतिपाद्यो विषयः तेन शून्यं 'यत्'=वाक्यम्, तत् 'अपार्थम् इति' अपार्थाख्यदोषवत् 'इष्यते'=कथ्यते । यत्र—पदार्थस्य वाक्यार्थस्य वा आकाङ्क्षा-योग्यतासत्त्यभावेन विशेष्यविशेषणतयाऽन्वयो बाधितो भवति तत्र तत्र 'अपार्थो' नाम दोषः, तादृशदोषवत् पदं वाक्यं वा अपार्थमिति निर्गलितोऽर्थः । अस्यापवादस्थलमाह—'उन्मत्त'० इति 'उन्मत्तमत्तबालानाम्'=उन्मत्ता उन्मादादिरोगवशात्, मत्ता सुरा-पानादिना विकृतिं गताः, बालाः शिशवः तेषाम् 'उक्तेः'=वचनात् 'अन्यत्र'=इतरत्र उन्मत्तादिभिन्नजनानामुक्तौ 'दुष्यति' दोषवद् भवति । उन्मत्तादीनां वाक्यादुक्तौ अपार्थो नैव दोष इति भावः । १२८ ॥

[अपार्थस्योदाहरणम्]

समुद्रः पीयते देवैरहमस्मि जरातुरः ।
अमी गर्जन्ति जीमूता हरेरैरावणः प्रियः ॥ १२९ ॥

आदौ बहुवाक्यघटितमपार्थं दोषमाह—'समुद्र' इति । 'देवैः'=सुरैः मेघैः 'समुद्रः' सागरः 'पीयते'=आस्वाद्यते 'अहं जरातुरः'=जराजीर्णगात्रः 'अस्मि'=भवामि 'अमी जीमूताः'=घनाहकाः 'गर्जन्ति'=गर्जनां कुर्वते [नदन्ति] 'हरेः'=इन्द्रस्य 'ऐरावणः'= ऐरावतः 'प्रियः'=हृद्य इत्यर्थः ।

अत्र—स्वार्थबोधे विश्रान्तानामपि चतुर्णां वाक्यानां परस्परमाकाङ्क्षाद्यभावेन अङ्गाङ्गित्वाभावः, तेन च एकवाक्यताविरहात् समुदितोऽर्थो नास्तीति अपार्थदोषवदिदं वाक्यमपार्थम् । उक्तञ्च 'भट्टपादैः'—

स्वार्थबोधे समाप्तानामङ्गाङ्गित्वव्यपेक्षया ।
वाक्यानामेकवाक्यत्वं पुनः संहत्य जायते ॥ इति ॥

एतच्चाय वाक्यार्थगतो दोषः । बहुपदगतं यथा—'अग्निना सिञ्चति । रामः कृष्णं गां अश्वं गजेन उष्ट्रो हन्ति' ॥ १२९ ॥

इदमस्वस्थचित्तानामभिधानमनिन्दितम ।
इतरत्र कवि को वा प्रयुञ्जीतैवमादिकम ॥ १३० ॥

उक्तमपार्थस्वरूपमुपपादयति--'इदम्' इति । 'अस्वस्थचित्तानाम्'=उन्मादादि-रोगवताम 'इदम्'=पूर्वोक्तम 'अभिधानम्'=समुद्र पीयत इत्यादि वाक्यम 'अनिन्दितम' निन्दित [दुष्ट] न भवतीत्यर्थ वाक्यप्रयोक्तृस्वधानरहितत्वात् 'इतरत्र'=अस्वस्थचित्तादि-भ्योऽन्यत्र 'क कवि' 'वा'=निश्चयेन 'एवम आदिकम्'=दर्शितदोषयुक्त वाक्य 'प्रयुञ्जीत'=व्यवहरेत, स्वस्थ कोपि कविर्नैतादृश दुष्ट वाक्य प्रयुङ्क्ते इत्यर्थ ॥ १३० ॥

[व्यर्थस्य लक्षणम्]

एकवाक्ये प्रबन्धे वा पूर्वापरपराहतम ।
विरुद्धार्थतया व्यर्थमिति दोषेषु पठ्यते ॥ १३१ ॥

व्यर्थं लक्षयति--'एकवाक्ये' इति । 'एकवाक्ये'=एकस्मिन वाक्ये 'वा'=अथवा 'प्रबन्धे'=वाक्यसमुदायात्मके ग्रन्थे यत वाक्यम् 'पूर्वापरपराहतम्'=पूर्वोत्तरसङ्गतिविकल 'विरुद्धार्थतया'=विरुद्धश्चासावर्थश्च विरुद्धार्थ तस्य भाव तत्ता तया अर्थविरोधेन हेतुनेत्यर्थ 'दोषेषु'=अपार्थादिदोषेषु मध्ये 'व्यर्थम्'=व्यर्थदोषवत् 'पठ्यते'=गण्यते इत्यत्र तात्पर्यम् ।

प्रबन्धगतशब्दार्थयो परस्पर विरोधात शाब्दबोधानुपपत्तिरेवास्य दोषतायां बीजम [अत एव] व्यर्थ वाक्यार्थबोधोत्तर पर्यालोचनया अर्थविरोधप्रतीति, अपार्थे तु आकाङ्क्षादिविरहेण वाक्यार्थबोध एव न भवतीत्यनयोर्विशेष । विरुद्धमतिकारित्व प्रकाशितविरुद्धत्वामनपरार्थत्वादीनामपि सर्वाक्षुवाना व्यर्थत्वान्तर्भाव प्रयोक्तुरत्यन्ताज्ञत्व-प्रकाशकत्वसाम्यात ॥ १३१ ॥

[व्यर्थस्योदाहरणम]

जहि शत्रुबल कृत्स्न जय विश्वम्भरामिमाम ।
न च तेकोऽपि विद्वेष्टा सर्वभूतानुकम्पिन ॥ १३२ ॥

[प्रबन्ध] वाक्यगत व्यर्थमुदाहरति—'जहि' इति 'कृत्स्नम'=समग्रम 'शत्रुबलम'= शत्रुसैन्यम अथवा सम्पूर्णं शत्रूणा सामर्थ्य जनधनादिहेतुकम 'जहि'=नाशय । 'इमाम विश्वम्भराम'=पृथ्वीम 'जय'=वशीकुरु । 'सर्वभूतानुकम्पिन'=सर्वेषा प्राणिनामुपरि दयाशीलस्य 'तव' [illegible] अपि 'विद्वेष्टा'=द्वेषकर्ता [illegible] 'न'=नास्ति इति आशय ।

अत्र [illegible] सकलशत्रुबलक्षयकरणम्, सर्वभूतानुकम्पित्व [illegible] पूर्वोत्तरसन्दर्भपर्यालोचनया विरुद्धाऽवभासते । प्रबन्धगतेन [illegible] ॥ १३२ ॥

[व्यर्थदोषस्य क्वचिद गुणत्वम्]

अस्ति काचिदवस्था सा साभिषङ्गस्य चेतस ।
यस्या भवेदभिमता विरुद्धार्थाऽपि भारती ॥ १३३ ॥

[illegible]

न्यर्थदोषस्य कदाचित् [वक्तृविशेषोक्तौ] गुणभाव दर्शयति—'अस्ति' इति। 'साभिषङ्गस्य'=विरहादिना तिरस्कारोऽभिषङ्ग तेन सह वर्तमान साभिषङ्ग तस्य वियोगाद्याभिभूतस्य 'चेतस'=हृदयस्य 'सा काचित्'=वक्तुमशक्या हिताऽहितादिविवेकाक्षमा 'अवस्था'=दशा 'अस्ति'=विद्यते । 'यस्याम्'=दशायाम् 'विरुद्धार्था'=अर्थसङ्गतिशून्या 'अपि भारती'=कविवाक् 'अभिमता'=इष्टा निर्दुष्टतयाभिलषिता 'भवेत्'=स्यात् । श्रोतॄणाम् इति शेष । 'अभिमता' इत्युक्त्या न केवलस्य क्वचिद्दोषाभाव अपि तु गुणत्वमपीति प्रत्यायितम् ॥ १३३ ॥

परदाराभिलाषो मे कथमार्यस्य युज्यते ।
पिबामि तरलं तस्या कदा नु दशनच्छदम् ॥ १३४ ॥

उक्तमर्थमुदाहरणेन स्पष्टीकरोति—'परदारे'ति । 'मे'=मम 'आर्यस्य'=सदाचारिण परदाराभिलाष'=परकीयनारीषु रति 'कथम्'=केन प्रकारेण 'युज्यते' न कथमपि युज्यत इति भाव । तस्या =परदाराणाम् [परकीयाया स्त्रिय]' तरलम्'=व्रीडावशात् त्रसोत्पन्नसम्भ्रमाद्वा कम्पमानम् 'दशनच्छदम्'= अधरम् 'कदा'=कस्मिन् काले 'नु'=निश्चितम् पिबामि'=आस्वादये [चुम्बये] ।

अत्र—आर्यत्वाभिमानवत पुरुषस्य परदाराभिलाषो न युक्त अत. तादृशीमयुक्ततां प्रतिपादयत एव प्रयोक्तुर्यत् परकीयाधरपानौत्सुक्यमुत्तरार्धे प्रथित तद्व्यर्थमेव, यत पूर्वार्धे व्यङ्ग्य शान्तभाव, उत्तरार्धे शृङ्गारस्य व्यभिचारी औत्सुक्य नाम तयोर्द्वयो विरोध, परमनेन वाक्यप्रयोक्तुर्वियोगाभिभूतत्व व्यक्तीकृतमिति तस्य शृङ्गारपोषकतया चमत्कारविशेषावहत्वेन गुणत्वमेव* ॥ १३४ ॥

[अथ–एकार्थस्य लक्षणम्]

अविशेषेण पूर्वोक्तं यदि भूयोऽपि कीर्त्यते ।
अर्थत शब्दतो वापि तदेकार्थं मतं यथा ॥ १३५ ॥

एकार्थं लक्षयति—'अविशेषेण, इति । [पूर्वोक्तमिति सामान्ये नपुंसकम् अर्थत शब्दत इति प्रथमार्थे तसिन्नन्तम् 'यत्र, इति पदस्य अध्याहार] 'यदि यत्र पूर्वोक्तम्, अर्थत शब्दत वा अपि'=यस्मिन् वाक्ये पूर्वोक्त शब्दोऽर्थो वा 'अविशेषेण'=समान

*यथा वा काव्यप्रकाशादौ—

क्वाकार्यं शशलक्ष्मण क्व च कुलं भूयोऽपि दृश्येत सा, दोषाणां प्रशमाय मे श्रुतमहो कोपेऽपि कान्तं मुखम् । किं वक्ष्यन्त्यपकल्मषा कृतधिय स्वप्नेऽपि सा दुर्लभा, चेत स्वास्थ्यमुपैहि क खलु युवा धन्योऽधरं धास्यति ।

अत्र—शान्तरसस्याङ्गभूताना वितर्कमतिशङ्काधृतीना विप्रलम्भस्याङ्गैः औत्सुक्यस्मृतिदैन्यचिन्ताभि सह विरोध, तत्र प्रयोक्तुर्विरहातुरत्वाभिव्यञ्जनात् शृङ्गार प्रकर्षद् गुण एव । उक्तञ्च—'मत्तोन्मत्तादेर्विरुद्धस्य व्याहतत्वेन वचो गुण' इति ।

रूपेण [एकरूपेण] 'भूय अपि कीर्त्यते'=पुनरपि उच्चार्यते उपनिबद्धयते वा 'तत एकार्थम् मतम्'=तद्वाक्यम् एकार्थदोषोपेत ज्ञातम् । इत्थमयं शब्दगत अर्थगतश्च द्विविधो दोष । तत —'एकार्थकशब्दस्य अर्थस्य यत् पुनरुक्तत्व तदेकार्थत्व'मिति सामान्यलक्षण फलितम् । तेन पुनरुक्ताख्योऽर्थदोष कथितपदत्वश्च शब्दगतो दोषोऽन्यैरुक्तोऽत्रैव सङ्गृहीत । यत्र तु—विशेषविवक्षायै उक्तस्य पुनरुक्ति तत्र न दोष एतच्चानुपद स्फुटीभविष्यति । 'यथा' इति वक्ष्यमाणोदाहरणाभिप्रायेणोक्तम् ॥ १३५ ॥

[एकार्थस्योदाहरणम्]

उत्कामुन्मनयन्त्येते बाला तदलकत्विष ।
अम्भोधरास्तडित्वन्तो गम्भीरा स्तनयित्नवः ॥ १३६ ॥

अर्थगतमेकार्थमुदाहरति—'उत्काम' इति । तदलकत्विष'= ['तत' पदेन बालाया परामर्श] तस्या बालाया अलकाना केशाना त्विट् [कान्ति] इव त्विट् येषां ते तादृश 'स्तनयित्नव'=स्तनन-[गर्जन]-कारिण 'तडित्वन्त'=सविद्युता 'गम्भीरा'=जलपूरिततया घनतरा एते 'अम्भोधरा'=मेघा 'उत्काम्'=उत्कण्ठिताम् 'बालाम्'=उद्बुद्धयौवनाम् 'उन्मनयन्ति'=उत्कण्ठयन्ति । अत्र—उत्कोन्मन'-शब्दौ अम्भोधरतडित्वत्स्तनयित्नुशब्दाश्च स्वरूपेण भिन्ना अपि एकार्थपर्यायतया एकस्मिन्नेव अर्थे शक्ता , अत उक्तस्यैवार्थस्य पुनरुक्तिकरणात् अर्थगतोऽयमेकार्थो नाम दोष , तादृशदोषवदिद वाक्य दुष्टम् । शब्दगतमेव कथितपदम् अर्थगतमेव पुनरुक्तमिति नव्यकल्पना 'प्रकाशादौ' द्रष्टव्या । दुष्टिबीजन्तु श्रोतुर्वैरस्याधायकत्वम् । यदि चेय नायिका विरहोत्कण्ठिता तदा नायमत्र दोष ॥ १३६ ॥*

[एकार्थस्यापवाद]

अनुकम्पाद्यतिशयो यदि कश्चिद् विवक्ष्यते ।
न दोष पुनरुक्तोऽपि प्रत्युतेयमलङ्क्रिया ॥ १३७ ॥

लक्षणवाक्ये 'अविशेषेण' इत्युक्तम् तस्य फल दर्शयन् एकार्थस्यापवादमाह—'अनुकम्पा' इति । यदि कश्चित् 'अनुकम्पाद्यतिशय'=अनुकम्पादीनामतिशय , अर्थात् प्रस्तुतस्य अनुकम्पनीयत्वादिविशेष 'विवक्ष्यते'=वक्तुमिष्यते तदा 'पुनरुक्त अपि'=द्विविधोऽप्येकार्थ 'न दोष' 'प्रत्युत इयम्'=पुनरुक्ति 'अलङ्क्रिया'=काव्यशोभाकरत्वात् अलङ्कार एव भवतीत्यर्थ । एव यत्र रसेनाक्षिप्तचेता वक्ता वक्ति तत्राऽपि एकार्थदोषाभाव तथाचोक्त 'भोजराजेन'—

---

* क्वचित् यथा—'श्यामाक्षी श्यामलोचना' । अत्र-श्यामान्यत् श्यामे लोचने यस्या इति श्यामा पद पुनरुक्तम् । [चन्द्रालोके]

'यदि' पदेन [illegible] परिहार । [illegible] 'एकार्थत्व' [illegible] ।

असार ससार परिमुषितरत्न त्रिभुवन
निरालोक लोक मरणशरण बान्धवजनम् ।
अदर्प कन्दर्प जननयननिर्माणमफल
जगज्जीर्णारण्य कथमपि विधातु व्यवसित ॥

अत्र—'असार ससारम्' इत्यभिधाय पुन त्रिभुवनस्य परिमुषितरत्नत्वादिकथन विशेषाप्रतिपादकत्वेऽपि शान्तरसाक्षिप्ततया गुणत्वम् एवमाद्यन्यदपि बोध्यम् ॥ १३७ ॥

[एकार्थस्य गुणस्थलम्]

हन्यते सा वरारोहा स्मरेणाकाण्डवैरिणा ।
हन्यते चारुसर्वाङ्गी हन्यते मञ्जुभाषिणी ॥ १३८ ॥

अनुकम्पायामेकार्थदोषाभाव [गुणत्वम्] दर्शयति–'हन्यते' इति । 'सा वरारोहा'=वरवर्णिनी 'अकाण्डवैरिणा'=निर्निमित्तशत्रुणा 'स्मरेण'=मदनेन 'हन्यते'=पीड्यते सा 'चारुसर्वाङ्गी'=चारूणि सुन्दराणि वृत्तानुपूर्वाणि सर्वाणि अङ्गानि यस्या सा तादृशी 'हन्यते' सा 'मञ्जुभाषिणी'=मधुरालापिनी 'हन्यते' ।

अत्र—'हन्यते' इति क्रियापद पुन पुनरुक्तमपि प्रकृताया नायिकाया अनुकम्पनीयता ख्यापयतीति वैचित्र्याधायकतया न दोष । एवम्—

उदेति सविता ताम्रस्ताम्र एवास्तमेति च ।
सम्पत्तौ च विपत्तौ च महतामेकरूपता ॥

इत्यादौ विधेयानुवादादिस्थलेऽपि दोषाभावो बोध्य ॥ १३८ ॥

[ससशयस्य लक्षणम्]

निर्णयार्थं प्रयुक्तानि संशयं जनयन्ति चेत् ।
वचांसि दोष एवासौ ससंशय इति स्मृत ॥ १३९ ॥

ससशय लक्षयति—'निर्णयार्थम्' इति । 'निर्णयार्थम्'=बोद्धव्यस्य [श्रोतु] प्रकृतिनिरूप्ये रेकतरनिश्चयार्थम् 'प्रयुक्तानि'=व्यवहृतानि 'वचांसि'=पदानि चेत्'=यदि 'सशयम्'=एकस्मिन् धर्मिणि भावाभावावगाहि ज्ञानम् 'जनयन्ति'=उत्पादयन्ति तदा 'असौ एव दोष ससशय इति [नाम्ना] स्मृत'=उक्त तादृशदोषवद् वाक्य ससशयमित्यर्थ । अयमपि द्विविध -शब्दगतोऽर्थगतश्च । यस्मिन् वाक्ये सशयोत्पत्तु शब्दसन्देहो जायते तत्र शब्दगत । यत्र त्वर्थप्रतीत्युत्तरकालेऽनिश्चय तत्र अर्थगत ॥ १३९ ॥

[शब्दगतस्य ससशयस्योदाहरणम्]

मनोरथप्रियालोकरसलोलेक्षणे ! सखि !
आराद्वृत्ति रसौ माता न क्षमा द्रष्टुमीदृशम् ॥ १४० ॥

शब्दगत ससंशयमुदाहरति—'मनोरथ०' इति । [सकाम आरमीक्षमाणां तन्मातृरहस्यभेदभिया अस्ताम्प्रति तदीयवयस्याया उक्तिरियम्] मनोरथस्य अभिलषितस्य प्रिय वल्लभ मनोरथप्रिय जार उपपतिरिति यावत् तस्य आलोके दर्शने यो रस प्रीतिविशेष तेन लोले चपले ईक्षणे नयने यस्या तत्सम्बोधन हे ! मनोरथप्रियालोकरसलोलेक्षणे । 'सखि !'=आलि 'असौ' [तव] 'माता'=जननी 'आराद्-वृत्ति'=आरात् दूरे वृत्ति वर्त्तन स्थितिर्यस्या सा तादृशी 'ईदृशम्'=त्वदीयवल्लभदर्शनात्मक कर्म 'द्रष्टुम्'=ज्ञातुम 'न क्षमा'=न समर्था यत सा व्यवहिता तस्मात् तवेमा चेष्टां न ज्ञास्यतीति सानुराग तमवलोकयेति भाव ।

अत्र—'आरात् दूरसमीपयो' इति [अमर] कोषादिप्रामाण्यात् 'आराद्वृत्ति' रित्यस्य दूरवर्त्तिना ते माता तेन त्वमादृशे कर्मणि प्रवर्त्तस्व अथवा समीपवर्त्तिनी सेति ततस्त्व निवर्त्तस्व इति प्रवृत्तिनिवृत्त्योरेकतरनिश्चयाभावात् सन्देह एव वाक्यार्थस्य पर्यवसान तेनात्र ससंशयो दोष । स च उभयार्थकशब्दप्रयोगहेतुकत्वात् शब्दगत । अर्थगतो यथा—'काव्यप्रकाशे'—

मात्सर्यमुत्साय विचार्यकार्य मार्या ! समर्यादमुदाहरन्तु ।
सेव्या नितम्बा किमु भूधराणामुत स्मरस्मेरविलासिनीनाम् ॥ इति ॥

अत्र प्रकरणादिनिश्चयाभावात् किं शान्तो वक्ता शृङ्गारी वेति न निश्चय तेन संशय ॥ १४० ॥

[ससंशयस्य गुणभाव]

ईदृशं संशयायैव यदि जातु प्रयुज्यते ।
स्यादलङ्कार एवासौ न दोषस्तत्र तद् यथा ॥ १४१ ॥

अस्य क्वचित् गुणोऽपि भवति—'ईदृशम्' इति । 'यदि जातु'=यदि च 'ईदृशम् संशयाय एव प्रयुज्यते'=ईदृश वाक्य संशयमुद्दिश्यैव उच्यते 'तदा असौ'=संशय 'अलङ्कार एव स्यात्'=काव्यशोभाधायकतया अलङ्कारभाव भजते इत्यर्थ । 'तत्र'=तादृशि वाक्ये 'दोष' न 'तत् यथा' अग्र उदाहरणेन अनुपद निरूपयाम ॥ १४१ ॥

पश्याम्यनङ्गजातङ्कलङ्घितां तामनिन्दिताम् ।
कालेनैव कठोरेण ग्रस्तां किं नस्त्वदाशया ॥ १४२ ॥

[illegible] —'पश्यामि' इति [कश्चन नायकम्प्रति कश्चित् दूती आह] 'अनङ्गजातङ्कलङ्घिताम्'=अनङ्गात् कामात् [illegible] न चान्या आतङ्को [illegible] 'अनिन्दिताम्'=[illegible] 'कालेन'=[illegible] 'ग्रस्ताम्'=[illegible] इव [illegible] [illegible] 'कठोरेण'=[illegible] [illegible] 'त्वत्'=[illegible]

प्रयोजनम् । त्वामनामाद्य साद्य मान्मथज्वरातुरा आसन्नमृत्युर्वर्त्तते, अतस्त्वाशा सम्प्रत्य स्माक निष्फला इत्यर्थ !

अथवा—न अङ्गजातङ्कलंघिता=शारीरिकपीडाक्रान्ता इति अनङ्गजातङ्कलंघिता ताम् कठोरेण=तीव्रेण कालेन=ग्रीष्मसमयेनेत्यर्थ ग्रस्तां पश्यामि त्वदाशया न किम् ? तस्या काचन शारीरिको व्यथा न वर्त्तते केवल त्वामनासाद्य चिन्तया जागरणपरा ग्रीष्मतापेन व्याकुलीक्रियते इत्ययमर्थ इति सशय एव, परमत्र दूत्या विवक्षा वर्त्तत इति स गुणतां गत ॥ १४२ ॥

कामार्त्ता घर्मतप्ता वेत्यनिश्चयकरं वच ।
युवानमाकुलीकर्त्तु मिति दूत्याह नर्मणा ॥ १४३ ॥

उक्तोदाहरणे अस्य गुणत्व प्रतिपादयति—'कामार्त्ता' इति । 'दूती' 'युवानम्'= तरुणम् 'आकुलीकर्त्तुम्'=व्यामोहयितुम् नायकान्तिकगमनाय सोत्कण्ठ विधातुम 'कामार्त्ता'= मदनविह्वला 'घर्मतप्ता'=ग्रीष्मतप्ता 'वा इति अनिश्चयकरम् वच '=सन्दिग्ध वाक्यम् 'नर्मणा'=भङ्गिविशेषेण 'आह'=आख्यातवती उभयविधार्थस्य निर्णायायाशक्तो नायिक व्याकुलीभूत शीघ्रमेव तत्समीप यास्यतीति दूत्या सन्दिग्धमप्युक्त वचो गुणवदेव सम्पन्न नतु दोष तस्मादत्र सशयालङ्कार इत्यर्थ. ॥ १४३ ॥

[अपक्रमस्य लक्षणम्]

उद्देशानुगुणोऽर्थाना मनूद्देशो न चेत् कृत ।
अपक्रमाभिधानं त दोषमाचक्षते बुधा ॥ १४४ ॥

अपक्रमस्य लक्षणमाचष्टे—'उद्देशा०' इति । 'अर्थानाम्'=प्रतिपाद्यानां विषयाणाम् 'उद्देशानुगुण '=आद्यो न्यास उद्देश, उद्देशस्य अनुगुण योग्य इति उद्देशानुगुण प्रथमोपन्यासानुरूप इत्यर्थ [य.] अनूद्देश =पश्चात् न्यास [स] 'चेत्'=यदि 'न कृत '=नचनारित [तदा] 'बुधा '=अलङ्कारशास्त्रविद तम्' दोषम् 'अपक्रमाभिधानम्'='अपक्रम नामान 'आचक्षते'=भणन्ति ।

अयमाशय —'क्रमवता क्रमवद्भिरेवान्वय इति सिद्धान्त सचेन्न कृत तदा अप क्रमो दोष । वाक्यार्थबोधसामान्यमेवात्र त्रुटिभाजम् । तस्मादय दोषोऽत्यन्त परिहार्य । यद्यपि नदानि स्वाकृतयो शब्दार्थयोरक्रमत्वदुष्क्रमत्वयोरेवान्तर्भाव शास्य कर्त्तुं तथापि न तयोरत्यन्त परिहार्यता वाक्यार्थबोधस्याऽविघटनात् । तथाहि—

द्वय गत सम्प्रति शोचनीयता समागमप्रार्थनया पिनाकिना ।
कला च सा कान्तिमती कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी ॥

अत्र—इत्यत्र [illegible] वाक्यम् 'त्वम्' इत्यस्यानन्तर चकारो युक्त [illegible] —'[illegible] वा [illegible]'=इत्यत्र दुष्क्रमत्व दोष, यत [illegible] वस्तु प्रथम [illegible] पश्चात् वाच्य भवति, परमत्र [illegible]

वाजिन प्रथम याचनीयत्वमुपन्यस्तमिति क्रमस्य दुष्टत्वात् दुष्क्रमता, तथाप्यत्र वाक्यार्थबोधस्य बाधो न भवतीत्यस्य नात्यन्त परिहार्यता ॥ १४४ ॥

[अपक्रमस्योदाहरणम्]

स्थितिनिर्माणसंहारहेतवो जगताममी ।
शम्भुनारायणाम्भोजयोनय पालयन्तु व ॥ १४५ ॥

अपक्रममुदाहरति—'अमी' 'जगताम्'=चराचरप्रपञ्चस्ये यर्थ' 'स्थितिनिर्माणसहारहेतव'=स्थिति पालना, निर्माण रचना, सहार विनाशना, तेषां द्वन्द्व, तेषां हेतव' कारणभूता 'शम्भुनारायणाम्भोजयोनय'=शम्भु शिव, नारायणो विष्णु, अम्भोजयोनि' ब्रह्मा ते 'व'=युष्मान् 'पालनन्तु =अवन्तु ।

अत्र—आदौ उद्दिष्टा स्थितिनिमाणसहारा, तेषां क्रमिकान्वये युक्ते नारायणाम्भोजयोनिशम्भव इत्येव अनुद्देष्टव्य स्यात् नच तथा कृतमिति क्रमलघनेन शाब्दबोधस्य विघाटनत्वान् अपक्रमो दोष ॥ १४५ ॥

[अपक्रमस्य दोषताभाव]

यत्न' सम्बन्धविज्ञानहेतुकोऽपि कृतो यदि ।
क्रमलङ्घनमप्याहु सूरयो नैव दूषणम् ॥ १४६ ॥

अपक्रमस्यादोषत्व क्वचित् इत्याह—'यत' इति । 'यदि'=चेत् 'सम्बन्धविज्ञानहेतुक'=सम्बन्ध अन्वय तस्य विज्ञानम विशेषावगति तत सम्बन्धविज्ञानम् तत् हेतुय यस्य स तादृश 'यत्न'=प्रयासविशेषो रचनायाम 'अपि' 'कृत'=विहित तदा 'सूरय'=साहित्यनयनिपुणमतय क्रमलघनम अपि दूषण न एव आहु' अयात् उभयोमध्ये एवानरान्वयान पदाथ अक्रमिकत्यापि अन्वयबोधे सयत्ने उक्तदोषाभावो नतु गुणत्वम शोभाविशेषानाधायकत्वात ॥ १४६ ॥

बन्धुत्यागस्तनुत्यागो देशत्याग इति त्रिषु ।
आद्यन्तावायतक्लेशौ मध्यम क्षणिकज्वर ॥ १४७ ॥

एतदुदाहरणेन स्पष्टीकरोति—बन्धुत्याग' इति । बन्धुत्याग'=स्वजनपरित्याग तनुत्याग =शरीरत्याग [तथा] 'देशत्याग =स्वाभिजनत्याग 'इति त्रिषु =एषु त्रिषु त्यागेषु 'आद्यन्तौ'=बन्धुत्यागदेशत्यागौ आयतक्लेशौ'=आयत दीर्घकालपर्यन्त क्लेश दु ख याभ्या तौ तादृशौ दीर्घकालिकदु खप्रदौ 'स्त इति शेष 'मध्यम'=तनुत्याग 'क्षणिकज्वर'=अल्पकालपर्यन्तसन्तापद तस्मात् क्रमे तनुत्यागो मध्ये नाम नतु बन्धुत्यागदेशत्यागौ स्यातामिति भाव ।

[शब्दहीनस्य लक्षणम्]

शब्दहीनमनालक्ष्यलक्ष्यलक्षणपद्धति ।
पदप्रयोगोऽशिष्टेष्टः शिष्टेष्टस्तु न दुष्यति ॥ १४८ ॥

शब्दहीन लक्षणयति—'शब्दहीनम्' इति । 'अनालक्ष्यलक्ष्यलक्षणपद्धति.'=न आलक्ष्या अनालक्ष्या अज्ञेया लक्ष्यस्य सजातीयोदाहरणान्तरस्य लक्षणस्य अनुशासनस्य सूत्रकपरानुपठद [नियामकस्य] पद्धति मार्ग पदप्रयोगरूपा सरणि यस्य स तादृश 'अशिष्टेष्ट'=शिष्टेतरैरज्ञै प्रयुक्त अर्थात् अज्ञानमसुत्य 'पदप्रयोग'=पदानां, पदयो पदस्य वा प्रयोगो व्यवहार उच्चारणादिरूप 'शब्दहीनम्'=शब्दो हीनोऽपकृष्टो यत्र योगबलसिद्ध तादृशदोषवद् वाक्यादि 'शब्दहीनम्' भवति । अत्रैव परेरुक्तानां असाधुत्वाप्रयुक्तत्वासमर्थत्वाभिधाना दोषाणां सङ्ग्रहः । किं वा—'अशिष्टेष्ट'=अनुशासनसिद्धोऽपि शिष्टैर्यदि नेष्ट तदापि तादृशपदप्रयोगो दोषायैव । यथा—'दैवतानि पुंसि वा' इति कोशे सत्यपि पुल्लिङ्गो दैवतशब्दप्रयोगो दुष्ट । एवमेव 'हन्' हिंसागत्योरिति गमनार्थेऽपि हन्' धातु शिष्ट 'हन्ति कुञ्ज कृशोदरी' इत्यादिषु दुष्ट एव शिष्टैरप्रयुक्तत्वात् । इत्थमनुशासनासिद्ध तद्विरुद्ध वा शिष्टेष्ट चेन्न दोषाय, तद्विपरीतन्तु दोषायेति सार । अस्यापवादस्थलमाह—'शिष्टेष्ट तु' इति । अनुशासनादिविरुद्धोऽपि शिष्टैः कविभिश्चेत् इष्ट प्रयुक्त तदा 'न दुष्यति'=दोषतामावहतीत्यर्थ । यथा 'वलति' इत्यादिप्रयोगेषु अनुशासनबलाद् आत्मनेपदम् परन्तु—'चेत पर वलति शैलवनस्थलीषु' इत्यादावनुशासनविरुद्धमपि परस्मैपदप्रयोग कुर्वाण कविर्नोपरालम्भभाग्भवति । पद्धत्यादिशब्देषु गत्यर्थ 'हन्' धातो प्रयोग शिष्टेष्टत्वात् न दुष्ट । वेदे तु साक्षात् हन्तिर्गत्यर्थ 'आहन्ति गभे पसो०' [यजु० अ० २३ । क० २२] इत्यादिषु ॥ १४८ ॥

[शब्दहीनस्योदाहरणम्]

अवते भवते बाहुर्महीमर्णवशक्वरीम् ।
महाराजन्न जिज्ञासा नास्तीत्यासां गिरां रस ॥ १४९ ॥

शब्दहीनमुदाहरति—'अवते' इति । हे । 'महाराजन्' । 'भवते'=भवत बाहु '=भुज 'अर्णवशक्वरीम्'=अर्णव सागर शक्वरी मेखला यस्या सा ताम् समसुद्रामित्यर्थ 'महीम्'=पृथिवीम् । 'अवते'=रक्षति पालयतीत्यर्थ । 'अजिज्ञासा'=अत्र महीपालनविषये समर्थो भवान् न वेति जिज्ञासा विचारणा 'न'=नास्ति अर्थात् इद सत्यमेव । 'आसाम्'=[illegible] 'गिराम्'=वाणीनाम् 'रस'=माधुर्यानुकूल शृङ्गाराद्यनुप्राणित [illegible] 'नास्ति'=[illegible] पदानामसाधुतया तत्त्वावगतिनाऽन्वयशक्य [illegible] । अत्र [illegible] —'अवते' इत्यत्र [illegible] 'भवते' इत्यत्र षष्ठीस्थाने चतुर्थी, [illegible] इत्यत्र [illegible] 'रस' [illegible] । 'महाराजन्' इत्यत्रापि [illegible] [५ । ४ । ९१] इति समासान्त 'टच्' प्राप्त [illegible]

व्याकरणविरुद्धत्वेन च्युतसंस्कृतता सर्वमिदमनुशासनविरुद्धम् । 'शफरी' शब्दश्च 'शफरीच्छन्दसो भेदे नटीमेखलयोरपि' इति मेदिनीप्रामाण्यात् मेखलार्थकोऽपि केनापि न प्रयुक्त इत्यप्रयुक्तोऽपि । सर्वमिदं ग्रथितमपि श्रोतृमतिविकल्पमासादयन् वाक्यार्थबोध विघटनकारीति ज्ञेयम् । परन्तु बहुव्रीहौ कवेरेकान्तनियममश्चिन्त्य ॥ १४६ ॥

[शब्दहीनस्यापवादस्थलप्रदर्शनम्]

दक्षिणाद्रेरुपसरन् मारुतश्चूतपादपान् ।
कुरुते ललिताधूतप्रवालाङ्कुरशोभिनः ॥ १५० ॥
इत्यादिशास्त्रमाहात्म्यदर्शनालसचेतसाम् ।
अपभाषणवद् भाति नच सौभाग्यमुज्झति ॥ १५१ ॥

'शिष्टेष्टस्तु न दुष्यति' इत्युक्तं स्पष्टीकरोति—'दक्षिणाद्रे' इति । [मलयपर्वतीय वायुधूनिताम्रवनवर्णनामिदम्] 'दक्षिणाद्रे'=मलयाचलस्य 'उपसरन्'=समीपं गच्छन् 'मारुत'=पवनः 'चूतपादपान्'=आम्रवृक्षान् 'ललिताधूतप्रवालाङ्कुरशोभिनः'=ललितम् इति भावप्रधानो निर्देशः । ललितेन लालित्येन आ समन्तात् धूता धूनिता अर्थात् मन्दं मन्दं चालिता ये प्रवालाङ्कुराः सद्योनिर्गतपत्रप्ररोहाः तैः शोभिनः शोभावतः 'कुरुते'=विधत्ते ।

इत्यादीति—'इत्यादि'=दक्षिणाद्रेरित्यादि पूर्वोक्तं वाक्यम् 'शास्त्रमाहात्म्यदर्शनालस-चेतसाम्' शास्त्रम् अनुशासनं व्याकरणादि तस्य यत् माहात्म्यम् रहस्यं तस्य दर्शने अलसं पराङ्मुखं प्राप्तं चेतो मनो येषां तेषाम् व्याकरणादिशास्त्रविचारविमुखमनसामित्यर्थः 'अप-भाषणवत्'=अपशब्दवत् 'भाति'=प्रतीयते वस्तुतस्तु नापशब्दरूपता । अत एव 'न च सौभाग्यम् उज्झति'=शिष्टेरिष्टत्वात् सौष्ठवं न परिजहाति ।

इदमत्रावधेयम्—'उपसरन्' इति क्रियापदस्य 'दक्षिणाद्रे' इति कर्म, कर्मणि तु 'कर्मणि द्वितीया' [२ । ३ । २] इत्यनुशासनबलात् द्वितीया विभक्तिः स्यात् अर्थात् 'दक्षिणाद्रिमुपसरन्' इति भाव्यम् परन्तु सम्बन्धमात्रविवक्षया सर्वत्र शिष्टैः षष्ठी इष्यते । अत एव 'षष्ठी शेषे' [२ । ३ । ५०] इति सूत्रभाष्ये 'कर्मादीनामपि सम्बन्धमात्रविवक्षायां षष्ठ्येव । सतां गतम्, गते पुष्करोद्धरणयोः' रित्यादि दीक्षितैरुक्तम् । ॥ १५० १५१ ॥

[यतिभ्रंशस्य निरूपणम्]

शब्दोच्चारेषु नियतस्थाने पदच्छेदं यतिं विदुः ।
तदपेतं यतिभ्रष्टं श्रवणोद्वेजनं यथा ॥ १५२ ॥

सुधिय इति शेष. । पदान्ते जिह्वाया विश्रामविशेषो यतिरिति निर्गलितोऽर्थ. । तदुक्तं 'छन्दोमञ्जर्याम्'—

यतिर्जिह्वेष्टविश्रामस्थान कविभिरुच्यते ।
सा विच्छेदविरामाद्यै पदैर्वाच्या निजेच्छया ॥
क्वचिच्छन्दस्यास्ते यतिरभिहिता पूर्वकृतिभि
पदान्ते सा शोभां व्रजति पदमध्ये त्यजति च ।
पुनस्तत्रैवासौ स्वरविहितसन्धि श्रयति तां
यथा कृष्णा पुष्णात्वतुलमहिमा मां करुणया ॥

प्रपञ्चस्तु—**श्रीनारायणभट्ट** विरचिताया वृत्तरत्नाकरव्याख्यायां द्रष्टव्य । 'श्वेतमाण्डव्य' प्रभृतयस्तु यतिं नेच्छन्ति । 'तदपेतम्' इति । 'तदपेतम्'=उक्तलक्षणाया यते रपेत प्रत्युत दर्शितलक्षणयतिविरहित [वचनम्] 'श्रवणोद्वेजनम्'=श्रवणयो कर्णयोरुद्वेगकर दु खप्रदमिति यावत् 'यतिभ्रष्टम्'=यतिभ्रष्टनामकदोषोपेत भवतीत्यर्थ । 'यथा' इत्यग्रे उदाह्रियते इत्याशयः ॥ १५२ ॥

[यतिभ्रष्टस्योदाहरणम्]

स्त्रीणां सङ्गीत विधिमयमादित्यवंश्यो नरेन्द्र ।
पश्यत्यक्लिष्ट रसमिह शिष्टैरमत्यादि दुष्टम् ।
कार्याकार्याण्ययमविकलान्यागमेनैव पश्यन्
वश्यामुर्वीं वहति नृप इत्यस्ति चैवं प्रयोग ॥ १५३ ॥

यतिभ्रष्टमुदाहरति—'स्त्रीणाम्' इति । 'अयम् आदित्यवंश्य' नरेन्द्र '=सूर्यान्वयज' कश्चित् राजा 'शिष्टै अमा'=सहृदयै सह 'अक्लिष्टरसम्'=अक्लिष्टा पर्याप्ता हृदयग्राहिणी रसा यत्र तादृशम् 'स्त्रीणां सङ्गीतविधिम्'=नारीणां [नारीभि क्रियमाणम्] सङ्गीतस्य विधिर्विधान प्रकारो यत्र तत् नाट्यमित्यर्थ 'इह'=सदसि 'पश्यति'=आलोकते इत्यन्वयार्थ 'इत्यादि'=एवमाकारम् एतत्प्रभृति 'दुष्टम्'=यतिभ्रंशदोषोपेत पद्यमित्यर्थ । तथाहि—

भागान्ततया नामभेदगतत्त्वात् तस्यादुष्टत्वम् । आह च 'भोजराज' ।

स्वरसन्ध्यकृते प्रायो धातुभेदे तदिष्यते ।

नामभेदे च शेषेषु न दोष इति सूरय ॥ इति ॥

तदेतादृशमन्यदप्यधरतात् कृतव्याख्यानम् ॥ १५३ ॥

[उक्तेऽर्थे उपपत्ति]

लुप्ते पदान्ते शिष्टस्य पदत्वं निश्चितं यथा ।
तथा सन्धिविकारान्तं पदमेवेति वर्ण्यते ॥ १५४ ॥

ननु—पदमध्ये विरामरूपस्य उक्ताकारस्य उभयत्रापि यतिभ्रंशस्य एकत्र दोषभाव परत्रादुष्टत्वमित्यत्र किं विनिगमकमित्याशङ्कायामाह—'लुप्ते' इति । 'पदान्ते'=सुप्तिङन्त पदम् तस्य अन्ते शिष्टे वर्णे 'लुप्ते'=अदृष्टे सति 'भूरि हर' इत्येवमादिषु विभक्तिलोपे जाते सति 'शिष्टस्य' अवशेषतां गतस्य प्रकृतिभागस्य प्रकृत्यंशस्य 'यथा पदत्वम्' पदभाव 'निश्चितम्'=कृतसिद्धान्तम् 'तथा'=तद्वत् 'सन्धिविकारान्तम्' द्वयो स्वरयो सन्धान [प्रकृते] सन्धि' तत्कृतो यो विकारो दीर्घयत्वादिरूप आदेश स अन्ते यस्य तत तादृशमपि पदमध्यमपि 'पदम् एव इति वर्ण्यते'=पदान्त एवेति कविभिनिर्धीयते । एवञ्च—'कार्याकार्याण्ययमयम् इत्यादौ 'रय' इत्येवमादिस्थले, स्वरसन्धिजनितयकारादिविकाररूपवर्णान्ते 'र्यो' इत्यादौ च पदमध्येऽपि यतिर्न दोषतां स्पृशति । एतच्च पूर्वमपि स्फुटितप्रायम् ॥ १५४ ॥

[उक्तस्य प्रतिप्रसवस्यैकदेशता]

तथापि कष्टवर्णानां कवयो न प्रयुञ्जते ।
ध्वजिनी तस्य राज्ञः केतूदस्तजलदेत्यदः ॥ १५५ ॥

स्वरसन्धिकृतस्य प्रतिप्रसवस्यैकदेशतामाह—'तथापि' इति । 'तथापि'=स्वरसन्धिकरणेन पदमध्यस्य पदान्ततास्वीकारेऽपि 'कवय'=साहित्यशास्त्रपारदृश्वा सूरय 'कष्टवर्णानाम्'=श्रोत्रयो कटु=उद्वेजक दुरुच्चरम 'तस्य राज्ञ'=भूपस्य 'ध्वजिनी'=सेना 'केतूदस्तजलदा'=केतुभि पताकाभि उदस्ता ऊर्ध्वं क्षिप्ता जलदा मेघा यया सा तादृशी 'अस्ति' इति शेष 'इति अद'=एवमादि 'न प्रयुञ्जते'=नैव व्यवहरन्ति ।

अत्र—'केतूदस्ते' इत्यत्र 'तू' इति स्वरसन्धिवशसम्भूतदीर्घादेशेन पदान्तमपि 'के' इत्यस्मात्पर यतिस्थापितेन श्रोतृणां श्रोत्रयोर्वैरस्यमावहतीति स्वरसन्धावपि पदान्ते पदमध्ययतिर्दोष एवेति ज्ञेयम् ॥ १५५ ॥

[भिन्नवृत्तस्य लक्षणम्]

वर्णानां न्यूनताधिक्ये गुरुलघ्वयथास्थिति ।
तत्र तद्भिन्नवृत्तं स्यादेष दोष सुनिन्दित ॥ १५६ ॥

भिन्नवृत्तं लक्षयति—'वर्णानाम्' इति । अत्र तत्र छन्दसि यत्र छन्दोऽर्थे

यत्तदोर्नित्यसम्बन्धात् । 'यत्र =श्लोके 'वर्णानाम्' [बहुवचनमविवक्षितम्] वर्णस्य वर्णयो वर्णाना वा 'न्यूनताधिक्ये'=न्यूनता अधिक्य वा तथा 'गुरुलघ्वयथास्थिति'= गुरूणां लघूनां वा वर्णानां या अयथास्थिति नियमं विनाऽवस्थानम् विन्यासविशेष 'तत्र'=पद्ये 'तत् भिन्नवृत्तम्'=भिन्न नियमभङ्गोपेत छन्दो वृत्त यत्र तत् छन्दोभङ्गाख्यदोषवत् 'स्यात्'=भवेत् । 'एष दोष सुनिन्दित'=कवेर्निन्दावहत्वात् [छन्दोज्ञानानभिज्ञतया] सर्वथा वर्जनीय इत्यर्थ ॥ १५६ ॥

[भिन्नवृत्तस्योदाहरणम्]

इन्दुपादा शिशिरा स्पृशन्तीत्यूनवर्णता ।
सहकारस्य किसलयान्यार्द्राणीत्यधिकाक्षरम् ॥ १५७ ॥

एकेनैव पद्येन न्यूनताधिक्ये भिन्नवृत्तमुदाहरति— इन्दुपादा' इति । 'इन्दुपादा'= चन्द्रमयूखा शिशिरा'=शीतला 'स्पृशन्ति'=छुपन्ति । 'इति ऊनवर्णता'=इत्यत्र प्रथमे पादे ऊनवर्णता अर्थात् प्रथम पादोऽष्टाक्षरो वचनीय तदनुक्त्वा सप्ताक्षर उक्त 'सहकारस्य'=चूतस्य 'किसलयानि'=पत्राणि 'आर्द्राणि'=नवनवानि सन्ति इति शेष । इति अधिकाक्षरम् अत्र तृतीय पादो नवाक्षर उक्त इत्यक्षराधिक्यमिति वर्णन्यूनाधिक्यभावे भिन्नवृत्तोदाहरणम् ॥ १५७ ॥

कामेन बाणा निशिता विमुक्ता
मृगेक्षणास्वित्ययथागुरुत्वम् ।
स्मरस्य बाणा निशिता पतन्ति
वामेक्षणास्वित्ययथालघुत्वम् ॥ १५८ ॥

गुरुलघ्वयथास्थितित्वे भिन्नवृत्तमुदाहरति—'कामेन' इति । 'मृगेक्षणासु'=हरिणाक्षीषु 'कामेन'=मन्मथेन 'निशिता'=तीव्रा 'बाणा'=सायका 'विमुक्ता'=त्यक्ता इति अन्वयार्थ । 'इति अयथागुरुत्वम्'=अत्र—प्रथमपादे उपेन्द्रवज्रालक्षणके आद्यो 'का' इति गुरुवर्णोऽयथास्थान निवेशित ।

अयमाशय —अयं श्लोक इन्द्रवज्रोपेन्द्रवज्रयोरुपजाति । यद्यपि उपजातिवृत्ते यादृच्छिकया इन्द्रवज्रा पादस्वीकारे न कोऽपि दोष आभाति तथापि—

उपजातिनिबद्धानां निर्दोषा यद्यपि स्फुट ।
[illegible] प्रथम कुर्यात् पूर्वपादान्तरं लघु ॥
[illegible] [illegible] [illegible]मिवाप्नुत ।
[illegible] [illegible] [illegible] किञ्चित् कर्णारुन्तुदनाम ॥

स्मरस्येति—स्पष्टार्थम । इदमुत्तरार्धम् 'इन्द्रवज्रावृतम्' । 'स्यादिन्द्रवज्रा ततजास्ततो गौ' इति तल्लक्षणात्, तेनात्र प्रथम तगणे निवेशनीये गुरुवर्णे स्यात, परमत्रादौ 'स्म' इति लघ्वक्षर निवेशितम । तगणस्तु अन्तलघुर्भवति । तथा च पैङ्गल सूत्रम **'सा ते क त्'** [अ० १ । ५] इति अन्तलघोस्त्रिकस्य 'त' सज्ञा परिभाषिता । अत्र तु तद्विपरीत्य कृतम् । इदमपि चिन्त्यम् ॥ १५८ ॥

[विसन्धिकस्य लक्षणम्]

न संहितां विवक्षामीत्यसन्धानं पदेषु यत् ।

तद्विसन्धीति निर्दिष्ट न प्रगृह्यादिहेतुकम ॥ १५६ ॥

विसन्धिक लक्षयति—'न' इति । 'सहिताम्'=वर्णयो परस्पर सम्मिलनरूप सन्धिम 'न'=नहि 'विवक्षामि'=वक्तुमिच्छामि, विधायकसूत्रे सत्यपि प्रयोक्ता न कामये इतीच्छया 'यत् पदेषु असन्धानम्'=पदघटकवर्णेषु य सन्ध्यभाव 'तत् विसन्धि इति निर्दिष्टम्'= तद्विसन्धिदोषयुक्त पद्यादि कथित शास्त्रकारैरित्यर्थ । 'प्रगृह्यादिहेतुक न'= ईदूदेद्द्विवचन प्रगृह्यम' [१ । १ । ११] इत्याद्यनुशासनबलसिद्ध सन्ध्यभाव 'विसन्धि' सज्ञक दूषण नेत्यर्थ । वि गत सन्धि यत्रेति बहुव्रीहिसमासाश्रयणात् 'विसन्धि' इति पद वाक्यादिविशेषणम ।

इदन्तु बोध्यम्—प्रगृह्यादिहेतुकसन्ध्यभावेऽपि सकृत्प्रयोग एव दोषाभाव पुन पुन प्रयोगे तु दोष एव । यथा—'धीदोर्बले अतितते उचितानुवृत्ती आतन्वती विजयसम्पद सेत्य भात ' इत्यादौ । यत्तु—कैश्चित 'विसन्धि' पदेन सन्धौ कष्टत्वम अश्लीलत्वञ्चा- भिप्रेत, तदुपलक्ष्यम यथा—

उर्व्यसावत्र तर्वाली मरुन्ते चाववाश्वनि ।

वाच्यर्जु युञ्यते गन्तु शिरो नमय तन्मनाक् ॥

इदन्तु वाक्यगत श्रुतिकटुत्वमेव ।

घनादुह्याय गगने चलगटामरचोगन्त ।

अयमुत्पतते पत्रा तदत्रव ग्राचइयुर ॥

इत्यत्र तु लग 'ति जुगुप्साव्यञ्जकमश्लीलम, चिह्नु इत्यत्र नाटाध्यदक्र तत् ॥ १५६ ॥

[विसन्धिकस्योदाहरणम]

मन्दानिलेन चलता अङ्गनागण्डमण्डले ।

लुप्तमुद्भेदि घर्माम्भो नभस्यस्मद्वपुष्यपि ॥ १६० ॥

विसन्धिकमुदाहरति—मन्दानिलेन [illegible] । [illegible] [illegible] मन्दानिलेन मन्दगामिना [illegible] '[illegible]'=[illegible] [illegible] [illegible] [illegible] [illegible]=[illegible] [illegible] '[illegible]'=[illegible]

'घर्माम्भः'=प्रस्वेदवारि लुप्तम्'=लोपं नीतमित्यन्वितार्थः । अत्र 'चनता' इति प्रथमपादस्थान्तपदाकारस्य 'अङ्गना' इति द्वितीयपादस्थादिपदाकारेण सह छन्दोभङ्गभयात् दीर्घभावो न विहितः, तस्मादत्र विवक्षाकृतः [ऐच्छिकः] विसन्धिदोषः । ॥ १६० ॥

[विसन्धेर्दोषाभावस्थलम्]

मानेर्ष्ये इह शीर्येते स्त्रीणां हिमऋतौ प्रिये ।
आसु रात्रिष्विति प्राज्ञैराम्नातं व्यस्तमीदृशम् ॥ १६१ ॥

प्रगृह्यादिहेतुकमन्व्यभावे दोषाभावमुदाहरति—'मानेर्ष्ये' इति । 'इह' 'हिमऋतौ'=हेमन्तकाले 'आसु रात्रिषु'=हेमन्तनिशासु 'स्त्रीणाम्'=कामिनीनाम् 'मानेर्ष्ये'=मानः प्रणयकोपः, ईर्ष्या नायकापराधजनितः कोपः, मानश्च ईर्ष्या च ते मानेर्ष्ये 'प्रिये'=प्रणयिजनविषये इत्यर्थः 'शीर्येते'=भ्रश्यतः हेमन्तर्तौ रतिमात्रस्योद्दीपकत्वादिति भावः । इति ईदृशम् प्राज्ञैः 'व्यस्तम्'=सन्ध्यभावः आम्नातम्=अनुशिष्टम् । अर्थात् 'मानेर्ष्ये इह' इत्यत्र 'ईदूदेद्द्विवचनं प्रगृह्यम्' [१ । १ । ११] इति पाणिनिमुन्यनुशासनेन द्विवचनान्तस्य एकारस्य 'एचोऽयवायावः' [ ] इति सूत्रविहितः एकारस्य 'अय्' इत्यादेशरूपः सन्धिर्निषिद्धः । तथा—'हिमऋतौ' इत्यत्र 'ऋत्यकः' [६ । १ । ११८] इति सूत्रेण ऋकारे परे अकारस्य विकल्पेन सन्धिनिषेधः कृतः तस्मादत्र न दोष इत्याशयः ॥ १६१ ॥

[देश-काल कला-लोक न्यायागमानां लक्षणम्]

देशोऽद्रिवनराष्ट्रादिः कालो रात्रिन्दिवर्त्तवः ।
नृत्यगीतप्रभृतयः कलाः कामार्थसंश्रयाः ॥ १६२ ॥
चराचराणां भूतानां प्रवृत्तिर्लोकसंज्ञिता ।
हेतुविद्यात्मको न्यायः सस्मृतिः श्रुतिरागमः ॥ १६३ ॥

वलिविकारा, पुष्पास्तरण, दशनवसनाङ्गरागा, मणिभूमिकाकर्म, शयनरचनम्, उदकवाद्यम्, उदकघात, चित्रायोगा, माल्यग्रथनविकल्पा, शेखरापीडयोजन, नेपथ्ययोगा, कर्णपत्रभङ्गा, गन्धयुक्तिः, भूषणयोजनम्, ऐन्द्रजाल, कौचुमारयोगा, हस्तलाघव, चित्रशाकपूपभक्ष्यविकारक्रिया, पानकरसरागासवयोजन, सूचीवापकर्म्माणि, सूत्रक्रीडा, प्रहेलिका, प्रतिमाला, दुर्व्वचकयोगा, पुस्तकवाचन, नाटिकाख्यायिकादर्शन, काव्यसमस्यापूरण, पट्टिकावेत्रवाणविकल्पा, तर्कुकर्म्माणि, तक्षणम्, वास्तुविद्या, रूप्यरत्नपरीक्षा, धातुवाद, मणिरागज्ञानम्, आकरज्ञान, वृक्षायुर्व्वेदयोगा, मेषकुक्कुटलावकयुद्धविधि, शुकसारिकाप्रलापनम्, उत्सादनम्, केशमार्जनकौशलम्, अक्षरमुष्टिकाकथन, म्लेच्छितकविकल्पा, देशभाषाज्ञान, पुष्पशकटिकानिमित्तज्ञान, यन्त्रमातृका, धारणमातृका, सम्पाठ्य, मानसी काव्यक्रिया, क्रियाविकल्पा, छलितकयोगा, अभिधानकोषच्छन्दोज्ञान, वस्त्रगोपनानि, द्यूतविशेष, आकर्षक्रीडा, बालक्रीडनकानि, वैनायिकीनां विद्याना ज्ञान, वैजयिकीनां विद्यानां ज्ञान, वैतालिकीनां विद्यानां ज्ञानञ्चेति (६३)॥

'चराचराणाम्' इति। 'चराचराणाम्'=त्रसस्थावराणाम् 'भूतानाम्'=जीवानाम [या] 'प्रवृत्ति'=वृत्तान्त [सा] 'लोकसञ्ज्ञिता'='लोक' शब्देन व्यवह्रियत इत्यर्थ। 'हेतुविद्यात्मक न्याय'='हेतु' पदेनात्र तर्कग्रह हेतुप्रधाना विद्या हेतुविद्या सा आत्मा स्वरूप यस्य स तादृश न्याय युक्तिमूलक न्यायादिदर्शनशास्त्रमित्यर्थ। एतेनात्र सकलास्तिकनास्तिकदर्शन 'न्याय' पदेन ग्राह्यमिष्टम्। स स्मृति श्रुति आगम'= स्मृति आर्प मानवादि वाक्यम तया स्मृत्या सह वर्त्तत इति सस्मृति श्रुति वेद [इह] 'आगम' पदेनोच्यते इत्यर्थ। एतेन परकीयानामपि शास्त्रागामागमपदेन गौण्या वृत्त्या ग्रहणम्, अन्यथा वर्णनाया वदेरव्यापकतापत्ते ॥ १६३ ॥

[देशादिविरोधस्य लक्षणम्]

तेषु तेष्वयथारूढ यदि किञ्चित् प्रदर्श्यते ।
कवे प्रमाद्रोदेशादिविरोधीत्येतदुच्यते ॥ १६४ ॥

देशादिविरोध लक्षयति—'तेषु' इति। यदि तेषु तेषु अयथारूढ किञ्चित् प्रदश्यते=तेषु तेषु देशकालादिषु यदि किञ्चिदपि अयथारूढम्=अप्रसिद्ध वर्णने यथा-र्थाटवदेशे कुसुमोत्पत्तिवर्णनम्, नार्मदेषु गुवाकनारिकेलोद्यानवर्णन वा तत् एतत् कवे प्रमादात=वर्णयितुर्मोहात [वर्ण्यमान] 'देशादिविरोधि' [इति] उच्यते=देशविरुद्ध कालविरुद्धमित्येवमादि भण्यते ॥ १६४ ॥

[देशविरोधस्योदाहरणम्]

कर्पूरपादपामर्शसुरभिर्मलयानिल ।
कलिङ्गवनसम्भूता मृगप्राया मतङ्गजा ॥ १६५ ॥

देशविरोधमुदाहरति— 'कर्पूर' इति। मलयानिल =मलयाचलात प्रवृत्त वायु

'कर्पूरपादपानां हिमवालुकाद्रुमाणाम् आमर्शेन स्पर्शेन सुरभि घ्राणतर्पण 'श्रीत' इति शेष । 'अथ कर्पूरमस्त्रियाम् । घनसारश्चन्द्रसञ्ज्ञ' सिताभ्रो हिमवालुका' इत्यमर । 'मतङ्गजा '=हस्तिन कलिङ्गवनसम्भूता '=कलिङ्गनामकदेशारण्यजाता गजा 'मृगप्राया' मृगसदृशा क्षुद्रकाया इत्यर्थ ।

अत्र चीनदेशभवानां कर्पूरपादपाना मलयाद्रौ वर्णनमिति अद्रिरूपदेशविरुद्धता । कलिङ्गदेशे तथाविधगजानामप्रसिद्धे वनरूपदेशविरोधो ज्ञेय ॥ १६५ ॥

चोला कालागुरुश्यामकावेरीतीरभूमय ।
इति देशविरोधिन्या वाच प्रस्थानमीदृशम् ॥ १६६ ॥

पर्वतवनात्मकदेशविरोधमुदाहृत्य राष्ट्रात्मकदेशविरोधमुदाहरति—'चोलाः' इति । 'कालागुरुश्यामकावेरीतीरभूमय '=कालागुरुणा कृष्णागुरुणा श्यामा कृष्णा कावेर्या तदाख्याया नद्या तीरभूमय तटप्रान्तभागा येषु तादृश 'चोला '=कर्णाटकान्तर्गतदेश विशेषा सन्ति । अत्र कावेरीतीरे कालागुरूणामुत्पत्तिर्न भवतीति तद्विरुद्धवर्णनात् राष्ट्ररूपदेशविरोध । यथा वा मम—

शालिकोटाधोभागे चन्द्रभागा सरिद्वरा ।
शालेया वर्तते यत्र सान्ति रात्रिन्दिवा नरा ॥

चन्द्रभागाख्या नद्या देशविरोध सा च पञ्जीराबादनगरकोपान्त्यवर्तिनी । रात्रिमिति कथने आगमविरोधोऽपि ॥ १६६ ॥

[कालविरोधस्योदाहरणम्]

पद्मिनी नक्तमुन्निद्रा स्फुटत्यह्नि कुमुद्वती ।
मधुरुत्फुल्लनिचुलो निदाघो मेघदुर्दिन ॥ १६७ ॥
श्रव्यहंसगिरो वर्षा शरदो मत्तबर्हिण ।
हेमन्तो निर्मलादित्य शिशिर श्लाघ्यचन्दन ॥ १६८ ॥

गिर शरदेव न वर्षासु, बर्हिणो वर्षास्वेव मायन्ति न शरत्सु, आदित्यस्य नैर्मल्य ग्रीष्मादृतुष्वेव ननु हेमन्ते, चन्दनस्य शैशिर्यं ग्रीष्म एव श्लाघ्य ननु शिशिरर्त्तौ इति तत्तद्विपरीतवर्णनात् नानाविध कालविरोधो बोध्य ॥ १६७, १६८ ॥

इति कालविरोधस्य दर्शिता गतिरीदृशी ।
मार्ग कलाविरोधस्य मनागुद्दिश्यते यथा ॥ १६९ ॥

कालविरोधमुपसंहरन् [दिङ्मात्र] कलाविरोधदर्शन प्रतिजानीते—'इति' इति । 'मनाग् उद्दिश्यते' इति कथनात् विस्तरे ग्रन्थबाहुल्यभीतिं मन्यते । शिष्ट स्पष्टम् ।

वीरशृङ्गारयोर्भावौ स्थायिनौ क्रोधविस्मयौ ।
पूर्णसप्तस्वर सोऽयं भिन्नमार्ग प्रवर्त्तते ॥ १७० ॥

कलासु नाटय प्रधानम् क्षिप्रमेव सामाजिकहृदयावर्जकत्वात् इति, तस्मादादौ तद्विरोधमेवोदाहरति—'वीरशृङ्गारयो' इति । वीरशृङ्गारयो =वीररसशृङ्गाररसयो 'स्थायिनौ भावौ क्रोधविस्मयौ' परस्पर विरुद्धा इति शेष । इदमुक्त भवति—

> अविरुद्धा विरुद्धा वा य तिरोधातुमक्षमा ।
> आस्वादांकुरकन्दोऽसा भाव स्थायीति सम्मत
> रसावस्य पर भाव स्थायिता प्रतिपद्यत ॥

इत्युक्तया दिशा रसस्य प्रारम्भाद्यरमसीमान्त समुद्भिन्नास्वादरूपत्वेन स्थिर वर्त्तमानो भाव [चित्तवृत्तिविशेष] स्थायी' इति पदवाच्यो भवति। तत्र वीरे उत्साह ,शृङ्गारे रतिश्च स्थायीति मर्यादा,एवमेव रौद्रस्य क्रोध अद्भुतस्य विस्मय स्थायी, यदि तु वीरे शृङ्गारे च व्यभिचारिरूपणावस्थितस्य क्रोधस्य विस्मयस्य वा स्थायित्वेन निर्देश क्रियेत तदा नाटयकलाविरोधो दोष । क्रोधादीनां स्वरूप रसवत्प्रकरणे पूर्व प्रदर्शितमिति तत एवावगन्तव्यम्।

गीतकलाविरोध दर्शयति—'पूर्ण०' इति 'पूर्णसप्तस्वर '=पूर्णा साकल्येन प्रयुक्ता ये सप्त स्वरा –'निषादर्षभगान्धारषड्जमध्यमधैवता । पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिता स्वरा ' इत्युक्ता यत्र स तथाविध 'स ग्रयम भिन्नमार्ग प्रवर्त्तते'=भिन्न तत्तत्कालनिषिद्धस्वरान्तरसाहचर्याद्दूषित स चासौ मार्ग तत्तत्कालाविहितस्वरप्रयोग प्रवर्त्तते, गान्धा प्रक्रियायां एतदन्यथाकरणे तु विरोध अथात सङ्गीतशास्त्रे समाना स्वराणा प्रयोगे भिन्नकालिकोदित तेषामेवैव साकल्येन प्रयोग गीतकलाविरोधो दोष । तथाहि भरत —

> प्रभात स्वरता नित्य मध्यम पञ्चमोऽपि च ।
> मध्याह्न प्रयत गृह्य पञ्चम पञ्चमोऽपि च ॥
> ... मस्य निषादश्च धैवत पञ्चमोऽपि च ।
> ... प्रयाता अन्यस्वरान्त्य विपर्यय ॥ इति । १७० ॥

इत्थ कलास्वनु प्रदिष्टविरोध साधु नीयताम् ।
तस्या कलापरिच्छेदे रूपमाविर्भविष्यति ॥ १७१ ॥

कलाविरोधमुपसंहरति—'इत्यम्' इति । 'इत्यम्'=अनेन प्रकारेण 'कलाचतुःषष्ठिविरोध'=कलानाम् पूर्वोक्तानां या चतुःषष्टिः तस्या विरोधः 'साधु'=यथा तथा 'नीयताम्'=अवगम्यताम् । यथा नाट्यगीतयोर्द्वयोः कलयोर्विरोधोऽस्माभिः निरूपितः तथा शिष्टानामपि कलानां विरोधो विज्ञातव्यः । ननु कास्ताः कलाः यासां विरोधो निर्दिशित इत्याशङ्क्याह—'तस्याः' इति । 'तस्या'=चतुःषष्ठिसंख्याकायाः कलायाः 'रूपम्'=स्वरूपम् 'कलापरिच्छेदे'='कलापरिच्छेद' नामके ग्रन्थे 'आविर्भविष्यति'=ज्ञातं भविष्यतीति स एवावलोकनीयः । एतेन कलापरिच्छेदोऽपि दण्डिकृतिरिति सम्भाव्यते ॥ १७१ ॥

आधूतकेशरो हस्ती तीक्ष्णशृङ्गस्तुरङ्गमः ।
गुरुसारोऽयमेरण्डो निःसारः खदिरद्रुमः ॥ १७२ ॥

लोकविरोधमुदाहरति—'आधूत०' इति । [अयम्] 'हस्ती'=गजः 'आधूतकेशरः'=आधूना समन्ततो धूनिता केशराः सटा यस्य तादृशोऽस्ति इति शेषः । 'तुरङ्गमः'=अश्वः 'तीक्ष्णशृङ्गः'=खरशृङ्गः । 'एरण्ड'=एतन्नामा द्रुमः 'गुरुसारः'=गुरुः गरिष्ठः सारः मज्जा यस्य सः । 'खदिरद्रुमः'=गायत्रीद्रुमः 'निःसारः'=सारशून्योऽस्ति । 'गायत्री बालतनयः खदिरो दन्तधावनः' इत्यमरः]।

अत्र—हस्तिनः केशराणाम्, अश्वस्य तीक्ष्णशृङ्गत्वम्, एरण्डस्य गुरुसारत्वम्, खदिरस्य सारशून्यत्वं च लोकविरुद्धम् । अत्र लोकव्यवहारस्य च विरोधो दर्शितः ॥१७२॥

इति लौकिक एवायं विरोधः सर्वगर्हितः ।
विरोधो हेतुविद्यासु न्यायाख्यासु निदर्श्यते ॥ १७३ ॥

लोकविरोधमुपसंहरन् न्यायविरोधं दर्शयितुं प्रतिजानीते—'इति' इति । 'इति'=अनेन प्रकारेण 'लौकिकः एव अयं विरोधः सर्वगर्हितः'=देशादिविरोधापेक्षया सर्वथा हेय एव सर्वैर्निन्दितः कवयितुरज्ञत्वप्रकाशनादिति भावः । 'न्यायाख्यासु'=न्यायनामकासु 'हेतुविद्यासु'=तर्कप्रधानेषु शास्त्रेष्विति यावत् 'विरोधः' 'निदर्श्यते'=उदाहरणेन प्रदर्श्यते ॥ १७३ ॥

सत्यमेवाह सुगतः संस्कारानविनश्वरान् ।
तथाहि सा चकोराक्षी स्थितैवाद्यापि मे हृदि ॥ १७४ ॥

क्षणभङ्गित्वमप्रतियोगिन ते, क्षणभङ्गवादो हि प्रसिद्ध सौगतानाम् तद्विरुद्धमिह संस्कार-स्थैर्यग्रन्थन वक्तारज्ञतां बोधयत् सहृदयहृदयमुद्वेजयतीति सौगतमतविरुद्धतया हेतुविद्या-विरोधोऽयम् ॥ १७४ ॥

कापिले रसदुद्भूति स्थान एवोपवर्ण्यते ।
असतामेव दृश्यन्ते यस्मादस्माभिरुद्भवा ॥ १७५ ॥

साङ्ख्यदर्शनन्यायविरोधमुदाहरति—'कापिले' इति । 'कापिले'=साङ्ख्ये 'असदुद्भूति'=असता प्रागभावप्रतियोगिनामनित्यानां घटपटादिपदार्थानाम् अथच दुष्टानाम् उद्भूति उत्पत्ति 'स्थान एव'=युक्तमेव 'उपवर्ण्यते'=कीर्त्यते । अत्र हेतुमाह— असताम्' इत्यादि । 'यस्मात अस्माभि असताम् एव उद्भवा दृश्यन्ते'=अविद्यमानानामेव प्रादुर्भावा अवलोक्यन्ते, अर्थात् असन्तो दुर्जना एव जायन्ते [म्रियन्ते च] नतु सज्जना । अयमभिसन्धि — असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात् ।
शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम् ॥

इति सत्कार्यवादिनो हि साङ्ख्या । एवं मते सत सदेव जायते नत्वसत्, अन्यथा सिकताकणेभ्योऽपि तैलोत्पत्तिप्रसङ्गात्, एव स्थितेऽपि प्रकृते श्लेषसामर्थ्यात् असच्छब्दस्य वाक्यार्थयोर्हेतुहेतुमद्भाव साङ्ख्यमतविरुद्ध एवोपनिबद्ध इति दोष. ॥ १७५ ॥

गतिर्न्यायविरोधस्य सैषा सर्वत्र दृश्यते ।
अथागमविरोधस्य प्रस्थानमुपदिश्यते ॥ १७६ ॥

न्यायविरोधमुपसंहरन् आगमविरोधनिरूपण प्रतिजानीते— गति । इति । सा एषा =सौगतकापिलाभिहितप्रकारा 'न्यायविरोधस्य गति'=दृष्टान्तरूपा सर्वत्र'=वेदान्तादिष्वपि दृश्यते'=ज्ञायतामित्यत्र तात्पर्यम । 'अथ' इत्यादि स्पष्टार्थम् । प्रस्थानम्=दिग्दर्शनम् इति यावत ॥ १७६ ॥

अनाहिताग्नयोऽप्येते जातपुत्रा वितन्वते ।
विप्रा वैश्वानरीं मिष्टिमक्लिष्टाचारभूषणा ॥ १७७ ॥

आगमविरोधे आदा श्रुतिविरोधमुदाहरति—'अनाहिताग्नय इति । 'एते अक्लिष्टाचारभूषणा '=अक्लिष्ट अक्षुण्ण अप्रतिहतो य आचार तत्सानुष्ठानादि अन्तरङ्गभूत शौचादिर्वा स एव भूषण मण्डनमिव येषा ते तादृश अनवरतसदाचारेण इत्यर्थ जातपुत्रा '= अनाहिताग्नय अपि'=अकृताग्न्याधाना अपि विप्रा =ब्राह्मणा वैश्वानरीम् इष्टिम् - विश्वानरदेवताक यज्ञम् वितन्वते'=विदधते ।

असावनुपनीतोऽपि वेदानधिजगे गुरोः ।
स्वभावशुद्धः स्फटिको न संस्कारमपेक्षते ॥ १७८ ॥

स्मृतिविरोधमुदाहरति—'असौ' इति । 'अनुपनीतः' अपि 'असौ'=अकृतोपनयनसंस्कारोऽपि सन् 'गुरोः' सकाशात् 'वेदान्'=ऋगादीन् 'अधिजगे'=अध्यैष्ट। अत्र दृष्टान्तरूपामुक्तिमाह—'स्वभावशुद्धः' इति । 'स्वभावशुद्धः'=प्रकृतिनिर्मलः 'स्फटिकः' मणिविशेषः 'संस्कारं न अपेक्षते'=शुद्धिविशेषं गुणाधानरूपं 'न अपेक्षते'=नाकाङ्क्षते ।

अत्र [illegible] वेदाध्ययने स्मृतिविरोधः । तदुक्तं मनुना—

नाभिव्याहारयेद् ब्रह्म स्वधानिनयनादृते ।
शूद्रेण हि समस्तावद् यावद् वेदे न जायते ॥ १७८ ॥ इति ॥

[उक्तविरोधस्य क्वचिद् गुणत्वम्]

विरोधः सकलोऽप्येष कदाचित् कविकौशलात् ।
उत्क्रम्य दोषगणनां गुणवीथीं विगाहते ॥ १७९ ॥

[illegible]—'विरोधः' इति । 'एषः'=उक्ताकारः 'सकलः'=सम्पूर्णः 'अपि' '[illegible]'=[illegible] 'कविकौशलात्'=[illegible] 'कदाचित्' '[illegible]'=[illegible] 'उत्क्रम्य'=[illegible] 'गुणवीथीम्'=गुणमार्गम् 'विगाहते'=[illegible] ॥ १७९ ॥

तस्य राज्ञः प्रभावेण तदुद्यानानि जज्ञिरे ।
आर्द्रांशुकप्रवालानामास्पदं सुरशाखिनाम् ॥ १८० ॥

[illegible]—'तस्य' इति । 'तस्य राज्ञः'=नरपतेः 'प्रभावेण'=[illegible] 'तदुद्यानानि'=[illegible] । 'आर्द्रांशुक॰'=आर्द्राणि [illegible] अभिनवानि [illegible] एव [illegible] पत्राणि येषां तेषाम् 'सुरशाखिनाम्'=देवतरूणाम् '[illegible]'=[illegible] 'जज्ञिरे'=[illegible] । ['प्रवालोऽस्त्री [illegible] [illegible]]

[illegible] देशविरुद्धतया [illegible] गुणतामापन्नः [illegible] । [illegible] ॥ १८० ॥

[illegible] विनाशपिशुनश्चचार खरमारुतः ।
धुन्वन् कदम्बरजसा सह सप्तच्छदोद्गमान् ॥ १८१ ॥

सप्तपर्णपुष्पाणामुद्गमाश्च शरदि जायन्ते तदा च कदम्बपुष्पाणि न सम्भवन्ति, तेषां वर्षाकालभवत्वादिति स्पष्ट कालविरोध तथापि 'अकाले फलपुष्पाणि देशोपद्रवकारणम्' इत्यादि विष्णुधर्मोत्तरीयवाक्येन अकालेऽपि फलपुष्पोद्गमन सम्भावितम् तदत्र प्रतिपक्षभूपानां विनाशसूचनात् विजिगीषो राज्ञ उत्कर्षातिशयव्यञ्जकत्वेन गुण एव जात एतादृशव्यङ्ग्योपनिबन्धनमेव च कवे कौशलम् ॥ १८१ ॥

दोलाभिप्रेरणत्रस्तवधूजनमुखोद्गतम् ।
कामिनां लयवैषम्यं गेयं रागमवर्धयत् ॥ १८२ ॥

कलाविरोधस्य गुणभाव दर्शयति—'दोला०' इति दोलाया हिन्दोलाया यत् अभिप्रेरणा अभित प्रेरणम् सवेगचालनम् तेन त्रस्तानां भीतानां वधूजनानां यानि मुखानि तेभ्य उद्गतम् उच्चारितम् 'लयवैषम्यम्'=लयस्य गीतवाद्यादिसाम्यस्य वैषम्य वैपरीत्य यस्मिन् तथाभूतमपि 'गेयम्'=गानम् भयेन लयासङ्गतमपि 'कामिनाम्'=रतिभोगलम्पटानां 'रागम्'=प्रीतिविशेषम् 'अवर्धयत्'=वृद्धिं निन्ये । अत्र गीतशास्त्रानुसार लयानुगम्यैव गानं श्रोतॄणां मनो हरतीति वस्तुस्थिति, परन्त्वत्र तद्वैपरीत्येन गीतात्मककलाविरोध स्पष्ट स च वधूजनेषु कामिना रत्याधिक्यव्यञ्जनात् गुणो जात ॥ १८२ ॥

इन्दुपादा शिखिन कामी शिशिरं हव्यवाहनम् ।
अबलाविरहक्लेशविह्वलो गणयत्ययम् ॥ १८३ ॥

लोकविरोधस्य गुणतां दर्शयति—'इन्दुपाद' इति । 'अयम् अबलाविरहक्लेशविह्वल'=कान्तावियोगजनितव्याकुलत्वकारण 'कामी'=कामुक 'इन्दुपाद=इन्दुसम्बन्धिन 'शिखिन'=मयूखान् अपेक्ष्य [ल्यब्लोपे पञ्चमी] 'हव्यवाहनम्'=हुतभुजम् 'शिशिरम्'=शीतलम् 'गणयति'=कल्पयते । अत्र—हव्यवाहन शिशिरत्वेन लोकविरोध, परमसौ विरहिषु चन्द्रमयूखानामत्यन्तमुद्दीपनत्वव्यञ्जनात् गुण एव वृत्त ।
॥ १८ ॥

प्रमेयो ऽप्यप्रमेयोऽसि सफलोऽप्यसि निष्फल ।
एकस्त्वमप्यनेकोऽसि नमस्ते विश्वमूर्तये ॥ १८४ ॥

न्यायविरोधस्य गुणतां दर्शयति—'प्रमेय' इति । 'प्रमेय'=प्रमाणैरनुमानादिभिर्ज्ञेय 'अपि' 'अप्रमेय' 'असि'=इदयमप्रत्यक्षप्रमाणगम्यत्वात् अप्रमेयोऽसि । सफल'=फल कर्म [illegible] तेन [illegible] निष्फल=[illegible] [illegible] [illegible] । एक'=[illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] । अत्र—

[illegible]किस्मिन्नेव वस्तुनि प्रमेयत्वाप्रमेयत्वादिक परस्पर विरोधीनि परन्तु ब्रह्मणो [illegible] महामाहा-त्म्यात् गुणो जात ॥ १८४ ॥

पञ्चानां पाण्डुपुत्राणां पत्नी पाञ्चालपुत्रिका ।
सतीनामग्रणीश्चासीद्दैवो हि विधिरीदृश ॥ १८५ ॥

[illegible]विरोधस्य गुणतां दर्शयति—'पञ्चानाम्' इति । 'पाञ्चालपुत्रिका'=पाञ्चाली द्रुपदात्मजा 'पञ्चानाम् पाण्डुपुत्राणाम् 'पत्नी'=युधिष्ठिरादीनां पञ्चानामपि [सहधर्मिणी] [illegible] 'सतीनाम्' च 'अग्रणी' 'आसीत्'=पतिव्रतानां धुरि कीर्तनीयाऽभवदित्यर्थः । [illegible] 'विधि'=विधानम् 'ईदृश'=आगमनिघ्नताविरही । [illegible] विधानमनुसरति देशकालविकल्पत्वात् यद्यपि [illegible] तथापि पतिपत्नीभाव आगममन्याम्य [illegible] । [illegible] बहुपतित्व सतीत्वञ्च आगमविरुद्धमपि [illegible] गुणः ॥ १८५ ॥

शब्दार्थालङ्क्रियाश्चित्रमार्गाः सुकरदुष्कराः ।
गुणा दोषाश्च काव्यानामिह संक्षिप्य दर्शिताः ॥ १८६ ॥

[illegible] 'शब्दार्थ०' इति । [illegible] 'काव्यानाम् शब्दार्थालङ्क्रिया' [illegible] 'सुकरदुष्करा' [illegible] 'गुणा दोषा च' [illegible] गुणा [illegible] निरूपिता [illegible] तेषां [illegible] ॥ १८६ ॥

व्युत्पन्नबुद्धिरमुना विधिदर्शितेन
मार्गेण दोषगुणयोर्वशवर्तिनीभिः ।
वाग्भिः कृताभिसरणो मदिरेक्षणाभि-
र्धन्यो युवेव रमते लभते च कीर्तिम् ॥ १८७ ॥

इति [illegible] काव्यादर्शे शब्दालङ्कारदोषविभागो नाम
तृतीयः परिच्छेदः ।

संक्षेपोक्त्या अपि ग्रन्थस्य पूर्णतां समर्थयन् समाप्तिं करोति – 'व्युत्पन्नबुद्धि' इति । 'अमुना'=प्रदर्शितेन 'विधिदर्शितेन=विधीयन्ते प्रतिपाद्यन्ते वस्तुस्वरूपाण्येभिरिति विधयः लक्षणानि [व्युपसृष्टात् 'धाञ् धातो 'उपसर्गे घोः किः' ३ । ३ । ९२ इति पाणिनि-सूत्रेण 'कि' प्रत्ययः । अथवा—'विध विधाने' इति तौदादिकात् 'इगुपधात् कित्' [उ० । ४ । १२०] इति सूत्रेण 'इन्' प्रत्ययः] तैर्विधिभिर्दर्शितेन विवेचितेन 'दोष-गुणयो'=हेयोपादेयधर्मयोः 'मार्गेण'=प्रकारेण 'व्युत्पन्नबुद्धि'=व्युत्पन्ना व्युत्पत्तिमती बुद्धिर्यस्य स परिनिष्ठितमतिरित्यर्थः तथा तेनैवमार्गेण 'वशवर्त्तिनीभि'=अभ्यासवशात् स्वायत्ताभिः वाग्भिः काव्यस्वरूपाभिः वाणीभिः 'कृताभिसरण' कृतम् अनुष्ठितम् अभि-सरणम् उद्योगो येन स शास्त्राभ्यासे सदोद्यतः पुरुषः 'रमते=ब्रह्मास्वादसहोदररसानु-भविता जायते तथा 'कीर्तिम् च=यशश्च लभते प्राप्नोति अर्थात् काव्यस्य मौलिभूतं प्रयोजनं यन्निर्वृतिः कीर्तिश्च सर्वत्र देशे काले वा सत्स्यातिरूपा तां भजते इत्येतावता काव्यप्रयोजनमुपसंहृतं भवति । उक्तमर्थमुपमया स्पष्टीकरोति—'मदिरेक्षणाभि'=मदमत्त-नयनाभिः मदाघूर्णितदृष्टिभिः सुन्दरीभिः 'वशवर्त्तिनीभि'=निरतिशयप्रेमवशात् स्वाधी-नाभिः 'विधिदर्शितेन=तडिदादिरूपदैवप्रकाशितेन 'दोषगुणयोः मार्गेण'=अनेन पथेन याने सुमहान् दोषः, अनेन च तद्दोषाभावः गुणो वा इत्येवमात्मना विनिरूपितेन वर्त्मना 'कृताभिसरण'=विहिताभिसारः 'युवा'=तरुण इव 'रमते'=रतिप्रीतिमनुभवति 'कीर्तिं= नादृशाङ्गनाप्रेमास्पदीभूततया यशोविशेषञ्च लभते प्राप्नोति । यथा कश्चित् तरुणः अनु-कूलदैवतयाऽनुकूलेन शोभनेन मार्गेण कस्याश्चन सुन्दर्या अभिसाराय प्रवर्त्तन् तल्लाभेन तदीयरतिगोचरः सन् सुप्रीतः सुकीर्तिश्च जायते तद्वत् मदुक्तसदोषगुणादिलक्षणपरिशी-लनेन देशकालादिविषयविवेचनाविचक्षणः सन् काव्यं ज्ञातुं कर्त्तुं वा प्रवृत्तः निर्वृतिमान् कीर्तिमांश्च भवति इति भावः । शम् । वसन्ततिलकावृत्तम् । शिवम् ॥ १८७॥

अथ टीकाकारस्यातिसंक्षिप्तः परिचयः ।

अस्ति प्रसिद्धा नगरी विशाला या शालिकोटेति जना वदन्ति ।
याऽनेकवर्णैरपि पूज्यमाना यशांसि कुर्वन्ति महान्ति सताम् ॥ १ ॥

यामार्हतास्तीर्थमनन्तमेतं हिमाद्रिशाखा परितो हरन्ति ।
तत्राऽभवत् पूर्णमानसाग्रा पूर्णा गतस्पर्धा यतनाव तन्नामा ॥ २ ॥

स प्राप्य गोरक्षगुरुं गिरीशं समानवाधिं चुनदाचकार ।
तृणापविद्धोऽपि चचाल न स्मा मानागमे दोषमुदीक्षमाणः ॥ ३ ॥

स्वपक्षतरक्षणकारणाय भाषाहृतानन्दन टीकं तुष्टये ।
प्रसादितोऽस्यास्तत नामे सन् हर्षोत्सनाद पुरिकाकेतु ॥ ४ ॥

तस्यां नगर्यामभवद् द्विजाग्र्यो दुर्गापदाम्भोजमिलिन्दकल्प ।

नाम्ना तुलाराम इति प्रसिद्धो राजन्यक यं बहुशो निषेवे ॥ ५ ॥

तुलसीरामस्तस्माल्लेभे जन्मापर शिव शान्त ।

शिवभक्तिभावभरित यस्य मनो नैव दीनतां भेजे ॥ ६ ॥

तस्मात् देवीदास सकलोपाध्यायकर्मणां कुशल ।

पण्डितजनतामध्ये मुमुहे धिषणा न यस्य कृत्येषु ॥ ७ ॥

तस्मात्त्वधमे दृढभक्तिभाजो नृसिंहदेवो जनि माप तस्मिन् ।

काले सदा घोरपिशाचवृत्तिर्जनेषु वास बहुधा वितेने ॥ ८ ॥

क्वचित क्वचित पण्डितरूपशब्द श्रुतो जनानामचरत प्रचारम् ।

कश्चित् कृती ब्राह्मणपादकञ्जे न्यधात्–शिर स्व श्रेयमीक्षमाण. ॥ ९ ॥

[illegible] दुर्घटनेऽपि काले क्वचित् क्वचिद् ये गुरवो न्यवात्सु ।

[illegible]निश्चितानुरागो नैकानि शास्त्राण्यपठत् स तेभ्य ॥ १० ॥

तेषां गुरूणां कृपयाऽहमत्र [illegible] प्रभावात् ।

[illegible] गुणाणां वाणी [illegible] परमां पवित्राम् ॥ ११ ॥

दुर्जनप्रशस्ति

नमामि [illegible] तान्तान् विनापराध परचित्तमर्म ।

दुन्ता हा ! [illegible] शरीरं [illegible] किराता इव निर्दया ये ॥ १ ॥

[illegible] लिखितु विधिना न शेके नि शङ्कमत्र [illegible] प्रसूते ।

[illegible] नु तानि [illegible] प्रमाणपथगन्यमहोदराणि ॥ २ ॥

[illegible] दुरात्मनामत परेषां गुणानापि [illegible] ।

[illegible] कुमनाभिमानिता ॥ ३ ॥

[illegible] भवे [illegible] विडम्बना ।

[illegible] मनारम स नन नन किल कालिमा मुखे ॥ ४ ॥


[illegible] ।

[illegible] ॥ ५ ॥

काव्यादर्शस्य 'कुसुम-प्रतिमां' नाम नामतः ।
'सौभाग्यवत्या' विवृत्या टीकां पूरितवानहम् ॥ २ ॥
पञ्चमे जार्जभूपेन्द्रे भारते सति शासति ।
इमामकार्षं सरलां टीकां छात्रहितेच्छये ॥ ३ ॥
तुष्यता तेन साकान्त उमाकान्तश्च कर्मणा ।
शर्म वो यच्छतां नित्यं पठतां सर्वकर्मसु ॥ ४ ॥
या मे गृहस्थाश्रमधर्मवोटी सक्ता परं कौशलमन्त्रणासु ।
'सुहागवन्ती'ति सुनामरूपा स्ववशनाम्न स्थितिकामयित्री ॥ ५ ॥
तद्धार्दसम्पोषणकामपूर्त्यै तदीयनाम्ना व्यरच स्फुटार्थाम् ।
निगूढभावां 'विवृतिं' सुधीशा ! मान्यं मदीयं क्षमयन्तु सन्तः ! ॥ ६ ॥
विप्राः सन्तु कदर्थनाविरहिताः पृथ्वी सशस्या भवेत्
काले वर्षतु वारिदोऽपि पवनाः सवान्तु सौख्यायनाः ।
राजानो निजमित्रतां प्रतिदिनं संवर्धयन्तु क्षणं
सर्वेषां गृहवेषु नित्यमतुलं सज्ञायतां सर्वथा ॥ ७ ॥

इति श्रीपण्डितदेवीदासतनुजनुषा सारस्वतवंशावतंसेन सतीविष्णुदेवीगर्भजेन स्यालकोटवास्तव्य-जैनन्यायविशारद-कवितार्किक [तन्त्रचक्रवर्ति] दर्शनाचार्य-नृसिंहदेवशास्त्रिविरचितायां स्वोपज्ञ 'सौभाग्यवती' विवृतिसहितायां 'कुसुमप्रतिमा'ख्यायां काव्यादर्शव्याख्यायां तृतीयः परिच्छेदः

समाप्तश्चायं ग्रन्थः



ॐ

'प्रभा' टीकोपेता न्यायसिद्धान्तमुक्तावली ।

माननीया ! शास्त्रिमहाभागा ! परीक्षादित्सव ! छात्राश्च !

सहर्षमिदमावेद्यते भवतां पुरतः कवितार्किकदर्शनाचार्य—**नृसिंहदेवशास्त्रि**रचिताया न्यायसिद्धान्तमुक्तावल्या 'प्रभा' नाम्नी टीका सम्प्रति मुद्रिता सती विक्रयाय प्रस्तुता वर्तते इयं टीकाऽत्यन्तं सरला, सन्ति दिनकर्यादिका अन्या अप्यस्याष्टीकाः परन्तु मूलार्थावगमाय ता सम्प्रति छात्राणां नोपकुर्वन्ति यादृशीयमुपकारपरायणा शास्त्रिभी रचिता । अनेके विद्वांस एतां श्लाघन्ते । अत्र मूलपङ्क्तेः पूर्वमर्थः प्रकाशितः पश्चात्तद्भावः सरलसंस्कृतेनोद्घाट्य दर्शितः सामान्यलक्षणादिकठिनस्थलेषु रहस्यबोधनाय यादृशी सरलता कृता सा नान्यत्रोपलभ्यते अवच्छेदकादिकठिना नव्यन्यायशास्त्रपरिभाषा क्वचित् टिप्पणे क्वचिन्मूलेऽतिमात्रं परिष्कृता । अहो ! अनुमानखण्डे व्याप्तिपक्षतादिस्वरूपं यथा सरलं प्रदर्शितं तदन्यत्र किं केन दर्शयितुं शक्यते ? शब्दखण्डे शाब्दबोधस्य लक्षणं दर्शयित्वा तद्भेदा मतभेदेन च [illegible] शक्तिवादरहस्यं स्वतःपरतःप्रामाण्यवादो विधिवाद इत्यादिकठिना विषयाः सुस्पष्टं तथा लिखिता येनाध्यापकानां विशारदमध्यमादिपरीक्षा[illegible] छात्राणां पाठने पठने च कथमपि क्लेशो न भवेत् । आदौ पण्डितानां मनोविनोदाय 'न्याय[illegible]समीक्षा' नाम्नी भूमिकां विरच्य शास्त्रिभिर्योजिता यत्रेश्वरसिद्धिर्महत्या [illegible] प्रदर्शि, [illegible] चागखण्डोपधिना न्यरूपि । छात्राणामुपकाराय [illegible] भूमिका पुरतो विनिवेशिता तत्तद्विषयस्य [illegible]वगमाय प्रारम्भे विषय[illegible] च [illegible] । किं [illegible] क्वचित् क्वचित् शास्त्रिभिः पूर्वमीमांसाया वि[illegible] [illegible] सरलतां नीतं, एवंविधा अनेके गुणा अस्या अवलोकनेनैव ज्ञातु[illegible] । [illegible] आश्रय [illegible] मुक्तावल्या अभ्यासकारिण छात्रा सर्वथोत्तीर्णा भवि[illegible] [illegible] । सेयमस्माभिरतिमनोहरैर्मुम्बईसीसकाक्षरैर्मुद्रापिता प्रकाशिता च । [illegible] सत्यामपि पिपठिषुजनगौरवाय मूल्यमल्पमेव [illegible] [illegible], [illegible] प्रचारेण शिथिलप्रचारस्य न्यायशास्त्रस्य पुनरुद्धारं [illegible] [illegible] निवेदयाम ।

[illegible] मूल्यम् २) रूप्यकद्वयम् अनुमानादिद्वितीयखण्डस्य मूल्यम् १) [illegible] मू० [केवल विद्यार्थियों के लिये] ३॥) रूप्यकत्रयम्, अर्धानकाश्च ।

निवेदकः—

मेहरचन्द लछमणदास,

संस्कृत पुस्तकालय सैदमिट्ठा बाजार, लाहौर ।

काव्यादर्शस्य मूलश्लोकानामकारादिक्रमेण अनुक्रमणी ।

स



सभी प्रकार के पुस्तकों के मिलने का पता ☞

'मेहरचन्द लक्ष्मणदास' अध्यक्ष—

संस्कृत पुस्तकालय लाहौर ।